1·3 H.

॥ श्रीरस्तु ॥

॥ द्राविडाम्नाय दिव्यप्रबन्धटीका-संस्कृत और हिन्दी ॥

॥ श्रीपराङ्कुशपरकालयतिवरवरवरमुनीन्द्रेभ्यो नमः ॥

द्राविडाम्नायचतुस्सहस्रदिव्यप्रबन्धवर्गे

* चतुर्थं सहस्रम् - सहस्रगीतिः *

तत्र प्रथमशतकम्

श्रीकाञ्ची प्रतिवादिभयङ्कर जगदाचार्य सिंहासनाधीश
श्रीमदण्णङ्गराचार्य विलिखितया संस्कृतटीकया

श्रीमद्यादवाद्रि· अक्कारक्कनि· संपत्कुमाराचार्य विलिखितया
हिन्दीटीकया च सनाथम्

राजस्थानमौलासरवास्तव्य· परमभागवत
श्रीयुत सेठजी· रामदयाळ सोमाणी महात्मनो द्रव्यसाहाय्येन

* मदरास. लिबर्टि मुद्रणालये सम्मुद्रितम् *

प्राप्तिस्थानम्--

Jagadacharya P. B. ANNANGARACHARYA,

L. KANCHEEPURAM.

—***—

समग्रचतुस्सहस्रगाथाटीकाद्वयमूल्यम् अग्रिमं पञ्चाशन्मुद्रामात्रम्.

1963.

॥ श्रीरस्तु ॥

॥ द्राविडाम्नाय दिव्यप्रबन्धटीका-संस्कृत और हिन्दी ॥

॥ श्रीपराङ्कुशपरकालयतिवरवरवरमुनीन्द्रेभ्यो नमः ॥

द्राविडाम्नायचतुस्सहस्रदिव्यप्रबन्धवर्गे

* चतुर्थं सहस्रम् - सहस्रगीतिः *

तत्र प्रथमशतकम्

श्रीकाञ्ची प्रतिवादिभयङ्कर जगदाचार्यसिंहासनाधीश
श्रीमदण्णङ्गराचार्य विलिखितया संस्कृतटीकया

श्रीमद्यादवाद्रि· अकारकनि· संपत्कुमाराचार्य विलिखितया
हिन्दीटीकया च सनाथम्

राजस्थानमौलासरवास्तव्य· परमभागवत
श्रीयुत सेठजी· रामदयाळ सोमाणी महात्मनो द्रव्यसाहाय्येन

* मदरास. लिबर्टि मुद्रणालये सम्मुद्रितम् *

प्राप्तिस्थानम्—

Jagadacharya P. B. ANNANGARACHARYA,

L. KANCHEEPURAM.

—***—

समग्रचतुस्सहस्रगाथाटीकाद्वयमूल्यम् अग्रिमं पञ्चाशन्मुद्रामात्रम् .

1963.

॥ श्रीरस्तु ॥

* कृष्यदिव्यप्रबन्धटीकासूची *

१९६३ संवत्सरीय–आगस्टमासावसानपर्यन्तं संमुद्र्य प्रकाशितानां दिव्यप्रबन्धटीकापुस्तकानां सूची ।

१. श्रीमट्टनाथसूरिवरानुगृहीत-तिरुप्पल्लाण्डु-पेरियाळ्वार्तिरुमोळिनाम्नोः दिव्यप्रबन्धयोस्संस्कृतटीका

२. ,, ,, हिन्दीटीका

३. श्रीगोदादेव्यनुगृहीत-तिरुप्पावैदिव्यप्रबन्धस्य संस्कृतटीका

४. ,, हिन्दीटीका

५. श्रीगोदादेव्यनुगृहीत-नाच्चियार्तिरुमोळि, श्रीकुलशेखरसूर्यनुगृहीत-पेरुमाळ्तिरुमोळि, श्रीभक्तिसार-मुनीन्द्रानुगृहीतं तिरुच्चन्दविरुत्तम्, श्रीभक्तांघ्रिरेणुसूरिवरानुगृहीतौ तिरुमालै. तिरुप्पळ्ळियेळुच्चिदिव्य प्रबन्धौ, श्रीपाणसूरीन्द्रानुगृहीत अमलनादिपिरान्, श्रीमधुरकविसूर्यनुगृहीतः कण्णिनुण्शिरुत्ताम्बु. इत्येते प्रबन्धा एकसम्पुटात्मकाः (सम्पुटेऽस्मिन् तिरुप्पावैप्रबन्धोऽपि घटितोऽस्ति.)

६. ,, हिन्दीटीका

७. श्रीपरकालसूरीन्द्रानुगृहीते पेरियतिरुमोळि (बृहत्सूक्त) समाख्ये द्वितीयसहस्रे प्रथमं द्वितीयं चेति शतकद्वयम् संस्कृतटीकया हिन्दीटीकया च समेतम्

८. उपरि निर्दिष्टे बृहत्सूक्ते दशममेकादशं चेति शतकद्वयम्–संस्कृतटीकान्वितम्

९. ,, हिन्दीटीकान्वितम्

१०. तृतीयसहस्रे श्रीपरकालसूरीन्द्रानुगृहीताः तिरुवेळुकूत्तिरुक्कै, शिरियतिरुमडल्, पेरियतिरुमडल् समाख्याः त्रयो दिव्यप्रबन्धाः संस्कृतटीकया हिन्दीटीकया च समन्विताः

११. चतुर्थसहस्रे-सहस्रगीत्याम् प्रथमं शतकम् संस्कृतटीकया हिन्दीटीकया च सनाथम् ॥ आहत्य एकादश सम्पुटानि अद्यावधि मुद्रितानि. प्रकाशितानि च ॥

क्रमश उपर्युपरि उभयटीकामुद्रणं च वेगेन प्रचलति। प्रतिमासं प्रतिमासद्वयं वा नियतमेकैकं सम्पुटं प्रकाशयेम । सकृदेव पञ्चाशन्मुद्रासमर्पकाणां चतुस्सहस्रप्रबन्धा अप्युभयटीकासमेता स्सुलभास्स्युः क्रमेण ।

इति.

प्र. अण्णङ्गराचार्यः

20—8—1963.

॥ श्रीः ॥

भूमिका

यह तो निर्विवाद है कि प्रपंच के भक्तिसाहित्यों का अग्रस्थान, द्राविडदेश में अवतीर्ण "आळ्वार" शुभनाम से प्रसिद्ध दिव्यसूरियों के गाये हुए दिव्यप्रबंधों को मिलता है। जिस समय, नाना कारणों से हमारे देश में भक्तिमार्ग बहुत क्षीण हो गया था, तब श्रीमन्नाथमुनिस्वामीजी, श्रीयामुनाचार्यस्वामीजी, श्रीरामानुजाचार्य स्वामीजी इत्यादि महान आचार्यों ने इन दिव्यप्रबंधों के सहारे ही उसका पुनरुद्धार किया।

ऐसे दिव्यप्रबंधों के लगभग चार हजार द्राविडी गाथाओं से युत होने से, इन्हें चारहजार दिव्यप्रबंध कहने की रूढि है। इनमें से, श्रीशठकोपसूरि (नम्माळ्वार) की गायी हुई तिरुवाय्-मोऴि नामक सहस्रगीति (जिसमें ११०२ गाथाएं हैं) मुख्य मानी जाती है; क्योंकि इसमें ही भक्तितत्व का एवं तदुपयुक्त दूसरे अनेक तत्वार्थों का बडा सुंदर व रोचक वर्णन किया गया है। अत एव श्रीवैष्णव-संप्रदाय के प्राचीन आचार्यों ने इसका खूब प्रचार किया, इस पर अनेक टीकाएं लिखी, विस्तृत विवेचन भी किया। अतः इस ग्रंथ का माहात्म्य वाचामगोचर है।

ऐसे महान ग्रंथ का प्रचार इस सारे देश में होना अत्यावश्यक है। परंतु अभी तक यह प्रचार पर्याप्त मात्रा में नहीं हुआ है। इसका मुख्य कारण यही है कि इस ग्रंथ का स्पष्ट शब्दार्थ व भावार्थ बतानेवाला ग्रंथ, संस्कृत वा हिंदी में अभीतक नहीं लिखा गया। अब इस न्यूनताके परिहारार्थ यह ग्रंथ प्रकाशित किया जा रहा है। इसमें (१) मूल द्राविडी गाथा, (नागरी अक्षरों में)। (२) उसका अनुवाद, (३) और पूर्वाचार्यों की परंपरा से प्राप्त अनेक विशेषार्थ—इतने विषय शामिल हैं। अनुवाद व व्याख्यान संस्कृत तथा हिंदी भाषा में लिखे गये हैं।

यह ग्रंथ तैयार करने की प्रेरणा, तथा छपाने का खर्च देकर प्रोत्साहित करनेवाले मौलासर के निवासी धर्मपरायण सेठजी रामदयाल सोमानी जी को भगवान की कृपा से आयुरारो-ग्यैश्वर्यादि समस्त सन्मंगल हो, यह समस्त आस्तिकजनता का मंगलाशासन है।

हमारी आशा है कि भक्तिमार्ग में चलना चाहने वाली जनता हमारे इस प्रयत्न का परिपूर्ण लाभ उठावेगी।

२५–१२–१९६३


श्रीकाञ्ची-प्रतिवादि भयंकर अण्णंगराचार्य स्वामीजी.



श्रीयुत. सेठजी. परम भागवत श्रीवैष्णवदास
रामदयाळ सोमाणी (बम्बई) मौलासर. राजस्थान.

॥ श्रीरस्तु ॥

श्रीहस्तिशैलशिखरोज्ज्वलपारिजाताय नमः ॥



श्रीपराङ्कुशपरकालयतिवर वरवरमुनीन्द्रेभ्यो नमः ॥

द्राविडाम्नायदिव्यप्रबन्ध विवर्ते चतुर्थसहस्रम्

तिरुवाय्मोळीति प्रथिता

सहस्रगीतिः

—: प्रपन्नजनकूटस्थश्रीशठकोपमुनीन्द्रदिव्यसूक्तिः :—

(श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यकृतानुवाद - तद्विवरणसमेता)

[सर्वदिव्यप्रबन्धसाधारणमुखपद्यानि]

—: भगवता श्रीरङ्गनाथेनानुगृहीतं श्रीवरवरमुनीन्द्रस्तुतिपद्यम् :—

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥

—: श्रीकूरेशगुरुवरानुगृहीतं गुरुपरम्परास्तुतिपद्यम् :—

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् । अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

—: श्रीकूरेशगुरुवरानुगृहीतं भगवद्रामानुजस्तुतिपद्यम् :—

यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः रामानुजस्य चरणौ शरणं प्रपद्ये ॥

—: भगवद्यामुनमुनीन्द्रैरनुगृहीतं श्रीशठकोपमुनीन्द्रस्तुतिपद्यम् :—

माता पिता युवतयस्तनया विभूतिः सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥

—: श्रीपराशरभट्टार्यानुगृहीतं सकलदिव्यसूरि स्तुतिपद्यम् :—

भूतं सरश्च महदाह्वय भट्टनाथ श्रीभक्तिसार कुलशेखर योगिवाहान् ।
भक्ताङ्घ्रिरेणु परकाल यतीन्द्रमिश्रान् श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम् ॥

॥ सर्वदिव्यप्रबन्धसाधारणस्तुतिपद्यानि समाप्तानि ॥

॥ श्रीरस्तु ॥

* सहस्रगीतेरसाधारण मुखपद्यानि *

(संस्कृतपद्यमेकम् , द्राविडपद्यानि पञ्चेति षट् पद्यानि प्रथन्ते ; तत्र प्रथमं संस्कृतपद्यम् ।)

भक्तामृतं विश्वजनानुमोदनं सर्वार्थदं श्रीशठकोपवाङ्मयम् ।
सहस्रशाखोपनिषत्समागमं नमाम्यहं द्राविडवेदसागरम् ॥

(विवरणम्.) सहस्रगीतिस्सागरत्वेन रूप्यत इह । सागरसाधर्म्यमस्याः पञ्चभिर्विशेषणैरुपपाद्यते । प्रसिद्धस्सागरस्तावत् भगवति भक्तानाममराणाम् अमृतप्रदायकोऽभूदिति हेतुना भक्तामृतमय आसीत् सः । सहस्रगीतिस्तावत् वस्तुनो भक्तानां श्रीवैष्णवाग्रेसराणां भौमम् अथापि दिव्यममृतमिति नातिशयोक्तिः । [विश्वजनानुमोदनम्] जगति सागरदर्शनेन अप्रहृष्यन् जनो न कोऽप्यस्ति । सागरं सर्वेऽप्यसकृदवलोक्य मोदन्ते । सहस्रगीतिरपि भक्तिभाजां, गानकलाकुशलानां, नित्यमुक्तानां, किं बहुना ? सर्वेश्वरस्यापि च संतोषप्रदेति विश्वजनानुमोदनत्वमस्या अव्याहतम् । [सर्वार्थदम्] सागरो हि रत्नाकरस्सन् सर्वार्थदानसमर्थः । सहस्रगीतिश्च * वेदार्थरत्ननिधिरिति श्रीवत्साङ्कमिश्रोपश्लोकितमुनिवरदिव्यमुखारविन्दविनिर्गतत्वेन सर्वार्थदा । तदिदमनुभवैकवेद्यं विदुषाम् । [श्रीशठकोपवाङ्मयम्] सागरः कदाचिदगस्त्यमहामुनिमुखं प्रविश्य विनिर्गत इत्यतो मुनिवरवाङ्मयः प्रथितस्सः । सहस्रगीतिस्तु श्रीशठकोपदिव्यसूरिवरवाङ्मयी । उभयोरप्यनयोर्मुनिवरयोः द्राविडवाक्प्रवर्तकत्वेन साधर्म्यं बोध्यम् । [सहस्रशाखोपनिषत्समागमम्] सागरस्तावत् * नदीनां सागरो गतिरित्युक्तरीत्या स्वात्मनि प्रविशन्तीभिर्नदीभिरुत्खाताहृतानां शाखिशाखानां समागमविशिष्टस्स्यात् । सहस्रगीतिस्तु सहस्रशाखोपनिषदिति प्रसिद्धेन सामवेदेन सह समः आगम इति प्रथितम् । एतादृशं द्राविडवेदसागरं विगाहे इत्यनुक्त्वा नमामीति कथनम् * वन्दे रामायणार्णवमिति वचनं स्मारयति। विश्वपुमर्थसार्थसंपूर्णे सुमहति दिव्यशास्त्रेऽस्मिन् अवगाहनाधिकारिणोऽत्यन्तदुर्लभाः ; श्रीकोशनमस्कारे केवलमधिकारिणोऽस्मादृशा इति स्फोर्यत इव ॥ .... *

अथ द्वितीयं मुखपद्यम्

(गाथा.) तिरुवळुदिनाडेन्नुम् तेन्कुरुहूरेन्नुम् * मरुविनिय वण्पोरुनलेन्नुम्—अरुमरैहळ् ।
अन्दादि शेय्दान् अडियिणैये येप्पोळुदुम् * शिन्दियाय् नेञ्जे तेळिन्दु ॥

(छाया.) पाण्ड्यमण्डलमिति मण्डलं ध्यात्वा, श्रीकुरुकापुरीति दिव्यदेशमनुसन्धाय, स्पृहणीयोदारताम्रपर्णीति दिव्यनदीमनुचिन्त्य च, सुदुर्लभवेदार्थप्रकाशकशठकोपमुनीन्द्रस्य पादद्वन्द्वमेव सततमनुचिन्तय भो हृदय ॥

(विवरणम्.) श्रीशठकोपमुनीन्द्रपादारविन्दचिन्तनात्प्राक् तदवतारस्थलभूतकुरुकापुर्याः, तन्मण्डलस्य, शठकोपमुनेः पौराणिकनिरूपकभूतताम्रपर्णीसरितश्चानुसन्धानं कर्तव्यमिति शिक्षितं भवति पद्येनानेन ॥ *

अथ तृतीयं मुखपद्यम्

(गाथा.) मनत्ताळुम् वायाळुम् वण्कुरुहूर् पेणुम् * इनत्तारैयल्लादिरैञ्जेन्—धनत्ताळुम् ।
एदुम् कुरैविलेन् एन्दै शठकोपन् * पादङ्गळ् यामुडैय पत्तु ॥

(छाया.) मनसा वाचा च श्रीकुरुकापुरीप्रशंसनैकनिरतानां गोष्ठीष्वन्तर्गतेभ्यो व्यतिरिक्तानहं नैव नमस्कुर्याम् । धनेनाप्यहं पुष्कलो भवामि, यतो ह्यस्मत्स्वामिनश्शठकोपमुनेः दिव्य ।दौ मम मदन्वयानां च शरणम् ॥

(विवरणम्.) श्रीशठकोपमुनीन्द्रावतारस्थलभूतकुरुकापुरीप्रशंसनैकनिरतकरणग्रामानेवाहं प्रणमेयं नान्यानिति कथनेन भगवति श्रीशठकोपमुनौ भक्त्यतिशयः प्रकाशितो भवति । अस्यैव मुनेः पादारविन्दे एव स्वस्य सर्वस्वमिति प्रख्यापितं भवत्युत्तरार्धेन । * धनं मदीयं तव पादपङ्कजम् * इति स्तोत्ररत्नगीरिहानुसन्धेया ॥ *

अथ चतुर्थं मुखपद्यम्

(गाथा.) एयुन्द पेरुङ्कीर्ति यिरामानुशमुनितन् * वायुन्द मलर्प्पादम् वणङ्गुहिन्रेन्—आयुन्दपेरुम् ।
श्रीराग् शठकोपन् शेन्दमिव् वेदम् धरिकुम् * पेराद युळ्ळम् पेर ॥

(छाया.) (संप्रतिपन्नमहायशसो भगवतो रामानुजमुनीन्द्रस्य दिव्यपादारविन्दे प्रणमामि ; (किमर्थमिति चेत्) निरवद्यमहागुणनिवेशशठकोपमुनीन्द्रस्य दिव्यसूक्तीनां धारणे समर्थं सुदृढं हृदयं लब्धुम् ॥

(विवरणम्.) भगवद्रामानुजार्यपादारविन्दपरिसरे तद्भक्तप्रेसरेण श्रीशैलानन्तार्यनाम्ना गुरुवरेण प्रार्थना काचन क्रियते गाथयाऽनया । श्रीमत्पराङ्कुशमुनीन्द्रप्रख्यापिताया द्रमिडोपनिषदो ग्रहणं यद्यपि सुशकं भवति, तथाऽपि धारणं दुष्करमेव भृशम् ; हे रामानुजमुने ! तस्या दृढधारणसामर्थ्यं भवदनुग्रहभूम्ना भूयादिति । वस्तुत एषा प्रार्थना श्रीशठकोपमुनेः पादारविन्दयोः अथवा सकलफलप्रददिव्यदम्पतिपादयोर्वा कर्तव्या । तद्विसृज्य भगवद्रामानुजमुनीन्द्रपादारविन्दयोः प्रकृतप्रार्थनाकरणेन तस्य मुनीन्द्रस्य सुदृढकण्ठगृहीतद्रमिडोपनिषत्कत्वं व्यञ्जितं भवति । आचार्यानुग्रहबलादेव दिव्यप्रबन्धानां धारणं शक्यमिति च सूचितं भवति । श्रीपरकालमुनीन्द्रानुगृहीतबृहत्सूक्तस्य मुखपद्येष्वन्तिमेनापि पद्येन श्रीगोविन्दभट्टारकप्रणीतेन एवमेव प्रार्थना कृता विराजत इति प्रतिपत्तव्यम् ॥ .... *

अथ पञ्चमं मुखपद्यम्

(गाथा.) वान् तिहलुम् शोलै मदिळरङ्गर् वण् पुगल्मेल् * आन्र तमिव् मरैहलायिरमुम्—ईन्र ।
मुदल् ताय् शठकोपन् * मोय्म्बाल् वळर्त्त हितत्तायिरामानुशन् ॥

(छाया.) व्योमतलव्यापिभिर्महोद्यानैः प्राकारैश्च परिवृतस्य श्रीरङ्गक्षेत्रस्याधीशितुः श्रीरङ्गिणः कल्याणगुणकीर्तनवैयग्र्येणावतीर्णायाः द्राविडश्रुतिरूपसहस्रगीतेः प्रसवित्री माता श्रीपराङ्कुशमुनिवरः, महता समारोहेण तद्वर्धननिरता उपमाता तु भगवान् रामानुजः ॥

(विवरणम्.) अव्यवहितपूर्वस्तुतिपद्यस्यैव विवरणात्मकमिदं स्तुतिपद्यमिति प्रतिपत्तव्यम् । भगवतो रामानुजमुनेः द्रमिडोपनिषदा सह कीदृशोऽनुबन्धो वर्तत इति सुगममनेन पद्येन । लोके शिशूनां द्वे मातरौ प्रसिद्धे-जननी धात्री चेति । जननी तावत् प्रसवमात्रमेव जानाति । धात्री तु नक्तंदिवं परिश्रम्य सर्वविधान्यपि पोषणान्यातनोति । कृष्णकिशोरस्य मातरौ देवकीयशोदे अत्र स्मर्तव्ये । एवं सहस्रगीत्याख्यप्रजायाः प्रसवमात्रमतनुत शठकोपमुनीन्द्रः । भगवान् रामानुजस्तु तदध्यापन तद्व्याख्यानावतारणाज्ञापनादिभिरुच्चावचैः प्रयत्नैः अतितरामभिवर्धनमाततानेति सोऽयं धात्रीपदे न्यवीवृततेति सुसमञ्जसमेतत् ॥

ननु सहस्रगीत्यां श्रीरङ्गक्षेत्रमिव अन्येऽपि बहवो दिव्यदेशाः कीर्तितास्सन्ति । एकमेव दशकमत्र श्रीरङ्गस्थलप्रशंसापरमवतीर्णमवलोक्यते । तत्कथं "श्रीरङ्गनाथगुणकीर्तनव्यग्रायासहस्रगीते"रिति कथ्यते ? इति केचिदाशङ्केरन् । श्रीशठकोपमुनीन्द्रहृदयमर्मविदां पूर्वाचार्याणामेवं तावत्सिद्धान्तः—श्रीशठकोपमुनीन्द्रो रङ्गनाथमुद्दिश्यैव सहस्रगीतिं समर्पितवान्; ततः अन्येभ्योऽपि दिव्यदेशाधिपतिभ्यो भगवद्भ्यः काश्चन गाथास्समुद्धृत्य समार्पिपत्— अतो नात्र काचिदनुपपत्तिः ॥ ... . *

अथ षष्ठं मुखपद्यम्

(गाथा.) मिक्कविरैनिलैयुम् मेय्यामुयिर् निलैयुम् * तक्क नेरियुम् तडैयाहि—त्तोक्कियलुम्
ऊळ्विनैयुम् वाऴ्विनैयुमोदुम् कुरुहैयर्कोन् * याळिनिशै वेदत्तियल् ॥

(छाया.) श्रीकुरुकानगरनिवासभाजां श्रीवैष्णवानां स्वामिना मुनीन्द्रेणानुगृहीता वीणागानसनामिगानविशिष्टा सहस्रगीतिः प्राप्यस्य ब्रह्मणो रूपं प्राप्तुः प्रत्यगात्मनो रूपं प्राप्त्युपायस्वरूपं प्राप्तिविरोधिस्वरूपं प्राप्तिफलस्वरूपं च प्रतिपादयति ॥

(विवरणम्.) सहस्रगीत्यां प्रतिपाद्यमानानामर्थविशेषाणां प्रकाशनमपि मुखपद्यकर्तॄणां कर्तव्यं भवतीति तदत्र निबद्धम् । इदमेव ह्यर्थपञ्चकं सेतिहासपुराणकानां वेदानां प्रमेयमामनन्ति महर्षयः ॥ .... *

इति तनियन्नामक मुखपद्यविवृतिस्समाप्ता ॥

॥ अथ श्रीशठकोपमुनीन्द्रवैभवम् ॥

वृषे मासि विशाखर्क्षेऽवतीर्णस्य महात्मनः । शठारातिमुनीन्द्रस्य वैभवं प्रतिपाद्यते ॥

पाण्ड्यमण्डले गङ्गायमुनासरस्वतीप्रभृतिसकलसरिदपेक्षयाऽपि समुत्तुङ्गवैभवशालिन्यास्ताम्रपर्णीसरितस्तटे कुरुकापुरी नाम विलसति महानगरी । तत्र च वंशपरम्परया श्रीमन्नारायणैकसमाराधनसंसक्तचेतस्कपरमभागवतमहाकुले कारिनामा महनीयो महाभागवतस्समुत्पन्नो व्यराजत । केरलमण्डलीये तिरुवण्परिशारमिति नाम्ना सुप्रसिद्धे दिव्यदेशे उडैयनङ्गैयारनाम्नीं सहधर्मचरीमुपयेमे स महान् । तत्रैव कियन्तञ्चन कालमतिपाल्य अथ सह च दयितया कुरुकापुरीमधिगत्य यथाविधि गृहस्थाश्रमधर्मनिर्वर्तनधुरन्धरो विरेजे । सोऽयं सह दयितया कदाचित्तिरुक्कुरुङ्गुडिनामकं दिव्यदेशमुपेत्य तत्र भगवतः प्रार्थितार्थपरिदानदीक्षितत्वभूमानमवगत्य तस्य सन्निधाने सप्रश्रयं प्रार्थयतेस्म स्वस्य पुत्रसन्तत्यनुग्रहम् । प्रार्थितश्च भगवान् परमकृपापेशलहृदयस्सुप्रसन्नवदनस्सन् "अहमेव समागत्य युवयोस्तनयात्मना । प्रादुर्भवेयमचिराद्विषादो वां विलीयताम् ॥" इत्यर्चकमुखेनानुगृह्य तीर्थमालादि च प्रासादयत् । एवमनवधिकातिशयमप्रमेयमनुग्रहमासादयन् कारिर्महात्मा यथापुरं कुरुकापुरमुपेत्य निवसन् कालक्रमेण पत्नीमन्तर्वत्नीमद्राक्षीत् । सा च समये प्रासूत दिव्यं शिशुं वृषभमासि विशाखोडुनि शुभे । दिव्यशिशोरस्य प्रभावातिशयस्सर्वथा वाचां दवीयान् । अयं साक्षाद्भगवत एवावतारभूतो वा ! नित्यमुक्तेष्वन्यत-

मस्य, तेषां बहूनां मिलितानां वाऽवतारभूतो वा ! विलक्षणभगवत्कृपामूला निस्समाभ्यधिकं नैत्यं प्रापितस्संसारिष्वन्यतम एव वा ! इत्येवं बहुधा शङ्कितुं योग्योऽयं व्यक्तसदप्रमेयप्रभावभासुरः । निर्दिष्टपूर्वैतिरुक्कुरुक्कुडिदिव्यदेशाधिपतिभगवत्सूक्त्यनुरोधेन स एव भगवानेवमवततारेति ग्रहीतुं योग्यम् ॥

यत्र भगवानवतरितुमिच्छति, तत्र पुरस्तादेव * निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिश्शरीरभेदैर्विविधवरिवस्याविरचनविशारद आदिशेषः स्वयमुपसर्पतीति खलु संप्रदायः । अत एव सोऽयं फणिपुङ्गवो भगवदवतारभूतस्यास्य दिव्यशिशोर्वर्षातपादिवारणमुखेन परिरक्षणाय दिव्यतिन्त्रिणीवृक्षात्मना प्रागेवावतीर्ण आसीत्तत्रैव ॥

आप्रसवात् रोदनस्तन्यपानादिलौकिकव्यापारगन्धविरहेण विराजमानस्य म्लानिलेशविधुरस्य चास्य शिशोरतिशयं प्रेक्षमाणौ मातरपितरौ विस्मयप्रकर्षविवशान्तरङ्गौ सर्वथा भगवति न्यस्तभरौ निर्विचारौ द्वादशे वासरे श्रीनगरीदिव्यदेशाधीशस्य भगवत आदिनाथस्य सन्निधानं प्रापय्य शिशुं तद्दर्शनधन्यमाधाय सन्निहितस्य दिव्यतिन्त्रिणीतरोर्मूले सौवर्णडोलिकातलिममधिशाय्य समभ्यवर्धयताम् ॥

गर्भवासावसरे ज्ञानशालिनोऽपि शिशून् जननसमनन्तरक्षण एव स्वस्पर्शेन अज्ञानभागिनः कृत्वा रोदनक्रन्दनादिलौकिकव्यापारपरवशान् कर्तुं प्रभविष्णुः शठो नाम वायुः एनमपि दिव्यशिशुं जननकाले स्वयमभिभवितुमयतत, तदात्वे तमसौ हुंकारेण प्रसह्य निरस्यतिस्मेति हेतुना शठकोप इति नाम्ना पप्रथे । शठरिपुः, शठारिः, शठारातिरित्यादीन्यपि नामानि तत्पर्यायभूतानि प्रथन्ते ॥

तिन्त्रिणीमूलधामा मुनिवरोऽसौ आषोडशाद्वयसो नयनोन्मीलनविरहित एव सन् मौनावलम्बी विश्वतो विसृत्वरविलक्षणतेजःपुञ्जोऽवर्तत । पितरौ तु 'किमेतत् ? कथमेवमभूत् ?' इति विमृशन्तौ, आवयोः प्रमादिकेन केनापि भगवदपचरितेन किमेवं समभूदिति चिन्ताविह्वलौ विषण्णावास्ताम् । तदा परमपदनाथस्य शासनेन विष्वक्सेनोऽत्र रहसि समागत्य मुनिवरं पञ्चभिस्संस्कारैस्संस्कृत्य सकलार्थांश्चोपदिश्य प्रययौ ॥

षोडशकलापरिपूर्णचन्द्रवत् परिपूर्णषोडशहायनोऽसौ मुनिसार्वभौमस्तिन्त्रिणीतरुच्छायायां पद्मासनोपविष्टः परतत्त्वैकनिध्यानतत्परो ज्ञानमुद्राञ्चितपाणिपद्मः प्रचकाशे ॥

तदात्वे मधुरकविर्नाम महीसुरोत्तमो महान् क्षेत्रतीर्थयात्राकुतूहलेन पर्यटन्नुत्तरभारते, शठकोपमुनेरस्य प्रभावमाकर्ण्य दिव्यतेजःप्रसरमभिवीक्ष्य च श्रीमदयोध्यानगरीतस्सजवमुपगम्य तमिममासेवत । अस्य चैतन्यमस्ति न वेति शोधयितुमिच्छन् स एष मधुरकविः कञ्चिदश्मखण्डं चिक्षेप समया मुनिवरम् । तन्निनदनिशमनेन चक्षुषी समुदमीलयच्छठारिः । अथ च व्यवहारशक्तिरस्य विद्यते न वेति विज्ञातुकामस्स कमप्यनुयोगमाततान । सद्यः प्रत्युत्तरं च लेभे समञ्जसम् । अथ मधुरकविर्महानन्दसागरसंमग्नस्वान्तः सर्वज्ञममुं मुनिवरमेवाश्रित्य कृतार्थो भूयासमित्यभिनिवेशमुद्वहन् साष्टाङ्गं तस्य पादारविन्दे प्रणिपत्य भृशमभिष्टूय बद्धाञ्जलिपुटः प्रार्थयतस्म 'भगवन् मुनिसार्वभौम ! तत्त्वहितपुरुषार्थेषु वैशद्यमुत्पादयतु कृपया दासस्यास्य तत्रभवान्' इति । स च करुणया स्वीचकारैनमन्तरङ्गकिङ्करम् ॥

अथ कदाचित् श्रीवैकुण्ठनाथो भगवान् सह च श्रीभूमिनीलाभिर्विहगाधिराजमधिरुह्य समागत्य मुनेरस्य ज्ञानसाक्षात्कारगोचरो भूत्वा सर्वज्ञतां द्रढयतिस्म । एवमन्ये च सर्वे दिव्यदेशाधीशा भगवन्तः श्रीरङ्गनाथ श्रीवेङ्कटाद्रिनाथ श्रीहस्तिगिरिनाथादयः स्वयमुपगम्य दिव्यदर्शनं प्रदाय स्वस्वदिव्यगुणगणानन्वभावयन् । तदनु तादृशानुभवपरीवाहरूपतया दिव्यसूक्तीर्बहिराविर्भावयितुमावश्यकता समजनि तत्त्ववेदग्रेसरस्यास्य । ऋग्यजुस्सामाथर्वणाख्यवेदचतुष्टयपर्यायभूताश्चत्वारो दिव्यप्रबन्धा द्राविडब्रह्मसंहितासमाख्याः १. तिरुविरुत्तम्, २. तिरुवाशिरियम्, ३. पेरियतिरुवन्दादि, ४. तिरुवाय्मोळि नामभिः प्रथिताः क्रमेणावतरितुमारभन्त । मधुरकविरेव पार्श्वे निषण्णस्सन् परमया भक्त्या प्रबन्धानिमान् दिव्यतालपत्रारूढानकार्षीत् ॥

एतेषु चतुर्षु दिव्यप्रबन्धेषु चरमस्य सामवेदसारभूतस्य सहस्रगीतिसमाख्याविख्यातस्य प्रबन्धरत्नस्य सततगानमेव मधुरकवेर्नित्यकालक्षेपपर्याप्तमासीत् । श्रीमन्नाथमुनि श्रीयामुनमुनि श्रीरामानुजमुनि श्रीवत्साङ्कमिश्र भट्टपादप्रभृतयो वेदवेदान्तवेदाङ्गसागरपारदृश्वानो विद्वन्मणयो महान्तोऽपि तयैव द्रमिडोपनिषदा तत्त्वहितपुरुषार्थेषु विमलं विशदं विपुलं विज्ञानमुपलभ्य स्वयमाचार्यपदवीं निरवहन् ॥

दिव्यवकुलमालाभूषणभूषितत्वेन हेतुना मुनिवरोऽयं वकुलाभरणो वकुलभूषण इत्यपि नाम बिभर्तिस्म । परमतस्वरूपमत्तमातङ्गनामसाबङ्कुशात्मा विरराजेति हेतुना पराङ्कुश इत्यप्यप्रथत । "शठरिपुरेक एव कमलापतिदिव्यकवि" रित्युक्तरीत्या भगवद्भक्तेष्वयमेव मुनिराडग्रगण्योऽभूदिति आचन्द्रार्कं विश्वतः प्रसिद्ध्यै भगवतः पादुका सर्वेष्वपि देवालयेष्वस्यैव नाम्ना व्यपदिश्यमाना विलसतीति यत्तदिदमेकमेव पर्याप्तं महामुनेरस्य वैभवमसमाभ्यधिक मित्यवबोधयितुम् ॥ .... * ॥

इत्थं शठकोपमुनेर्वैभवमतिभोग्यमप्रमेयं च । अनुसंदधतां सुधियामत्रामुत्र च भवेन्महानन्दः ॥

श्रीमते रामानुजाय नमः श्रीमद्वरवरमुनये नमः ॥

॥ अथ सहस्रगीतिव्याख्यानावतारिका ॥

श्रीवैष्णवसंप्रदायप्रवर्तनधुरंधरेषु आळ्वार पदवाच्येषु सरोयोगिप्रभृतिषु श्रीपरकालसूरिपर्यन्तेषु दिव्यसूरिषु प्रधानतमः श्रीशठकोपमुनीन्द्र इति प्रथितमेतत् । अयमेव वकुलाभरण-वकुलभूषण-पराङ्कुशमुनि-कारिसूनु-प्रभृतिभिश्च नामभिः प्रथते । असावेव प्रपन्नजनकूटस्थ इति च प्रशस्यते । अमुना मुनिसार्वभौमेन (१) तिरुविरुत्तम् (२) तिरुवाशिरियम, (३) पेरियतिरुवन्दादि, (४) तिरुवाय्मोळीति चत्वारो दिव्यप्रबन्धाः प्राकाशिषत । तिरुवाय्मोळीति प्रसिद्धश्चरमप्रबन्ध एव सहस्रगीतिसंज्ञया व्यपदिश्यते । तदिदं दिव्यं नाम श्रीपराशरभट्टपादोपज्ञमिति विज्ञायते । त एव ह्याहुः श्रीरङ्गराजस्तवे पुन्नागतरुतलुजवर्णनपरे पद्ये * अजस्रसहस्रगीतिसेकोत्थदिव्यनिजसौरभम् * इति ॥

निर्दिष्टाश्चत्वारोऽमी दिव्यप्रबन्धाः क्रमेण चतुर्वेदसारभूता इति प्राचामाचार्याणामवधारणम् । द्राविडवेदस्य व्यासपदवीमलंकुर्वाणेन श्रीमता नाथमुनिना सहस्रचतुष्कत्वेन विभक्ते दिव्यप्रबन्धवर्गे सहस्रगीतिरेषा चतुर्थसहस्रत्वेन परिगण्यतेस्म । सामवेदस्थानीया चैषा ॥

तिरुविरुत्ताख्ये प्राथमिके प्रबन्धे स्वकीयज्ञानदृष्टिगोचरीभूतं भगवन्तं श्रियःपतिमुद्दिश्य "भो भगवन्! त्वदनुभवविरोधिपाञ्चभौतिकहेयशरीरसंबन्धं वियोजय कृपया" इति सांसारिकसकलदुरितनिवर्तनपूर्वकमोक्षप्रापणमर्थयते स्म सोऽयं मुनिवरः। सर्वज्ञोऽपि सर्वशक्तोऽपि स भगवान् नैव तां प्रार्थनां सद्यः फलेग्रहिमादधे। मुनिवरस्यास्य मुखात् स्वभक्तानामिव स्वस्यापि परमभोग्यान् कतिपयान् दिव्यप्रबन्धानवनारयितुं संसारिणो विनेतुं च कामयमानस्स भगवान् अस्यामेव विभूत्यां मुनिवरमवस्थापयितुमैच्छत्। "संसारान्मुक्तोऽयं मुनिः दिव्यं धाम विगाह्य तत्रास्मदीयगुणगणानुभवमेव खलु चिकीर्षति; तमस्यामेव जगत्यां कल्पयतु कामम्; तथा नामास्य करुणां करवाम; अनुभवपरीवाहरूपेणावतरिष्यद्भिर्दिव्यप्रबन्धैर्विलक्षणं जगदुपकारं च कृतवान् भवतु" इत्यभिसंदधानः स्वकीयस्वरूपरूपगुणविभूतिचेष्टितानि परमभोग्यानि प्राचीकशत्स भगवान्। ततश्च परमानन्दतुन्दिलस्वान्तोऽयं सूरिवरो दिव्यप्रबन्धचतुष्टयेन विलक्षणमनुभवमनुपबृंहयन् अर्थात् असमाभ्यधिकमुपकारं च जगत आततान। अदसीयास्सर्वेऽप्यमी दिव्यप्रबन्धा भगवद्भागवतगुणानुभवपरीवाहरूपा इत्यनेनैव हेतुना आर्षप्रबन्धानप्यतिशेरते।

तिरुवाय्मोळीति प्रबन्धसंज्ञा श्रीमुखसूक्तमित्यर्थमिव अभ्यर्हिततयार्थसूक्तिरित्यर्थमपि बिभर्ति। सेयं संज्ञा मुनिवरेण स्वेनैव न कृता। द्राविडवेदसमुद्धारकाग्रगण्येन श्रीमता नाथमुनिना प्रथमाचार्यप्रवरेण समुल्लिखितेति संप्रदायविदस्संगिरन्ते। श्रीमधुरकविसमुल्लिखितेत्यपि वदन्ति॥

सोऽयं दिव्यप्रबन्धो दशभिश्शतकैः शतेन दशकैः ११०२ संख्याकाभिर्गाथाभिश्च समेतोऽन्तादिरूपः। यत्र पूर्वगाथाया अन्तिमं पदम् अक्षरं वा उत्तरगाथाया आदिमं भवति, तत्रान्तादित्वव्यवहारः। समग्रा सेयं सहस्रगीतिरन्तादिक्रमेणैव निबद्धेति वेदितव्यम्॥

सकलदिव्यसूरिमध्ये श्रीशठकोपमुनेरिव सकलदिव्यप्रबन्धमध्ये सहस्रगीतेरस्या अभ्यर्हितत्वमर्थगौरवनिबन्धनम्। महाभारतं प्रशंसमानाः * यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् * इत्याचक्षते। वस्तुतस्तादृशी प्रथा सहस्रगीत्या एव संप्रतिपन्नेति सुवचम्। * प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः। प्राप्त्युपायं फलं प्राप्तेः तथा प्राप्तिविरोधि च। वदन्ति सकला वेदास्सेतिहासपुराणकाः। मुनयश्च महात्मानो वेदवेदार्थदर्शिनः॥ * इत्याद्युक्तरीत्या स्वस्वरूप-परस्वरूपोपायस्वरूप-विरोधिस्वरूप-पुरुषार्थस्वरूपाभिधानाः पञ्चैवार्थास्सकलशास्त्रसार सर्वस्वभूताः। ते खलु दिव्यप्रबन्धेऽस्मिन् संक्षेपविस्तराभ्यां निस्संदेहविपर्ययं प्रतिपाद्यन्त इति सर्वार्थपौष्कल्यमस्याक्षतम्॥

पूर्वाचार्यैर्बहुभिरस्यैव दिव्यप्रबन्धस्य विशेषतो व्याख्यातत्वात्, प्रथम-द्वितीय-तृतीयसहस्राणामिवास्य सहस्रस्य वीथीषु पारायणं नैव क्रियत इति संप्रदायबलाचास्य सर्वातिशायित्वं सुगमम्। सहस्रगीत्या अस्याः पूर्वाचार्यैः पञ्चभिरनुगृहीतानि पञ्च व्याख्यानानि संक्षिप्तानि विस्तृतानि च प्रथन्ते। भगवद्रामानुजदिव्याज्ञया तत्पुत्ररत्ननिर्विशेषः तिरुक्कुरुहैप्पिरान् पिळ्ळान् समाख्यः श्रीकुरुकेशसूरिरितिसंक्षिप्तामतिमधुरां च षट्सहस्रिकाख्यां व्याख्यां विनिर्ममे। श्रीपराशरभट्टार्यपदपङ्कजचञ्चरीकः असमवनि (नञ्जीयर) प्रथाप्रधानो वेदान्तिमुनिर्नवसहस्रिकां निर्ममे। श्रीकलिवैरिगुरुचरण (नम्बिळ्ळै) चरणयुगलैकदैवतः पेरियवाच्चान् पिळ्ळैनामा श्रीमत्कृष्णसमाह्वयो गुरुवरश्चतुर्विंशतिसहस्रिकां निरमिमीत। तत्सब्रह्मचारी वडक्कुत्तिरुवीधिप्पिळ्ळैनामा श्रीकृष्णपादगुरुवरः * ईडुनाम्नीम् षट्त्रिंशत्सहस्रिकामन्वगृह्णात्। अन्ततश्च वादिकेसरिविरुदभूषितस्सुन्दरजामातृमुनिः द्वादशसहस्रिकां प्रतिपदार्थरूपिणीमलेखीत्। श्रीमान् वेङ्कटनाथार्यो वेदान्ताचार्यवर्यस्तु दशकसारार्थसंग्रहरूपिणीं द्रमिडोपनिषत्तात्पर्यरत्नावलीं

शतकसारार्थसंग्राहकं द्रमिडोपनिषत्सारं च श्लोकमयं निबबन्ध । श्रीमद्वरवरमुनीन्द्रो दशकार्थसंग्राहकं तिरुवाय्मोळिनूत्तन्दादिनामानमतिमधुरदिव्यप्रबन्धमन्वग्रथीत् । पाश्चात्यो वादिकेसरिसुन्दरजामातृमुनिः द्रमिडोपनिषत्संगतिनामानं दशकार्थसारावबोधकं स्वादिष्ठश्लोकमयं ग्रन्थं न्यबध्नात् । स तावदिह प्रतिदशकावसानं क्रमशः प्रकाशयिष्यते ।

एवमनेकैराचार्यसार्वभौमैर्व्याख्यानादिप्रणयनेन नित्यकालक्षेपार्थमादरणेन च प्रख्यापितप्रभावातिशयस्सोऽयं दिव्यप्रबन्धस्संस्कृतभाषामिज्ञानां विदुषां हर्षप्रकर्षाय दासदासेन श्रीवैष्णवदासेन व्याख्यानवाचस्पति विरुदभाजा श्रीकाञ्ची प्रतिवादि भयङ्कराण्णङ्गराचार्यनाम्ना नातिसंक्षिप्तविस्तृतं व्याख्यायते ॥

॥ अपरा चेयमवतारिका पूर्वाचार्यव्याख्यानुसारिणी ॥

श्रियःपतिरवाप्तसमस्तकामः समस्तकल्याणगुणात्मकस्सर्वेश्वरः जननपदवीजंघालत्वेन स्वात्मानं स्वयमेव [सहस्रगीलाम् २-६-८] कथितवन्तं श्रीशठकोपमुनीन्द्रं * त्वदीयपादौ संश्रित्य प्रसन्नहृदयो ह्यहम् । अप्रमेय महानन्दसिन्धौ मग्नो भवाम्यहो ॥ * इति स्ववाचा [तत्रैवोत्तरार्धे] कथनसमर्थं कृत्वा विशेषकटाक्षलक्ष्यतामनैषीत् । * वृन्दावनं भगवता कृष्णेनाक्लिष्टकर्मणा । शुभेन मनसा ध्यातं गवां वृद्धिमभीप्सता ॥ (विष्णुपु. ५-६-२८) इत्युक्तरीत्या कण्टकपुञ्जदन्तुरस्य वृन्दावनस्य * उत्पन्ननवशष्पाढ्यतासंगादननिर्विशेषं ह्येतत्कर्म सत्यसंकल्पस्य भगवतः । तत्त्वहितपुरुषार्थेष्वतिविशदविज्ञानशालिनामग्रगण्यमाततान भगवान् मुनिवरमेनम् ।

लोके सन्ति नाम बाह्यकुदृष्टिदर्शनानि भूयांसि * या वेदबाह्यास्स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥ * (मनुस्मृ-१२-९५) इति मनुना महर्षिणाऽधिक्षिप्तानि तानि सन्तु नाम दूरे । आपादचूड मनवद्यपरमपवित्रस्य दर्शनस्य प्रवर्तकेष्वग्रेसरो हि मुनिसार्वभौमोऽसौ । चिदचिदीश्वरतत्त्वस्वभावभोगापवर्गतदुपायगतिषु निष्कलङ्कां शेमुषीं भगवतैव कारुणिकेन स्वकीयनिर्हेतुककृपाबलेन लम्भितोऽयं मुनिवरः प्रपन्नजनकूटस्थः प्रथते । * संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् । संदृश्यते वाऽप्यधिगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥ * (विष्णु-पु. ६-५-३८) * तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये । आयासायापरं कर्म विद्याऽन्या शिल्पनैपुणम् * ॥ (विष्णु-पु. १-१९-४८) इत्याद्यनेकप्रमाणप्रतिपन्नेष्वर्थेषु सुदृढाध्यवसाय गरिमा हि स एष मुनीश्वरः । दिव्यधामनिकेतनस्य श्रियःपत्युर्भगवतश्चरणारविन्दयुगलैकान्तिकात्यन्तिकानवधिकातिशय प्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैङ्कर्यप्राप्तियोग्यतायां सत्यामपि * अनेकजन्मसाहस्रीं संसार पदवीं व्रजन् । मोहश्रमं प्रयातोऽसौ वासनारेणुकुण्ठितः ॥ * (विष्णुपु. ६-७-१९) इत्युक्तरीत्या व्याधकुलसंवर्धितराजकुमारन्यायेन अनादिकालप्रवृत्तप्रकृत्यात्मभ्रमवैवश्यतः संसृतिचक्रे परिभ्राम्यतां तत्त्वहितपुरुषार्थचिन्तावैदेशिकानां भविना मनुजिघृक्षया दुस्तरकलिसागरसंतारणकर्णधारस्स एष मुनिवरोऽवतारितः ।

* कलौ खलु भविष्यन्ति नारायणपरायणाः । क्वचित्क्वचिन्महाभाग द्रमिडेषु च भूरिशः ॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी । कावेरी च महाभागा प्रतीची च महानदी ॥ ये पिबन्ति जलं तासां मनुजा मनुजेश्वर । प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ॥ * इत्युक्तरीत्या परमभागवतानामवतारस्थलनिर्देशे प्रथमं स्थानमासेदुष्या स्ताम्रपर्ण्यास्तीरे श्रीकुरुकापुर्यां * ततोऽखिलजगत्पद्मबोधायाच्युतभानुना । देवकीपूर्वसन्ध्यायामाविर्भूतं महात्मना ॥ (विष्णुपु. ५-३-१) इतिवत् वकुलभूषणभास्करोऽयमाविरभूत् ।

* हसितं भाषितं चैव गतिर्या यच्च चेष्टितम् । तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यति ॥ (रामा. बा. ३-४) इत्यनुगृहीतो वाल्मीकिरिव, * इमं स्वधर्मनिगममवेत्य मदनुष्ठितम् । अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः * इत्यूचिवान् नारद इव च "संशयविपर्ययविस्मृतिविधुरं दिव्यज्ञानमनुगृहीतवान्मे" इति स्ववाचैव (प्रथमगाथाद्वितीयपादे) प्रोक्तवानेष मुनिसार्वभौमो भगवदनुग्रहग्राहिततत्त्वहितपुरुषार्थयाथार्थ्यः * ज्ञानी त्वात्मैव मे मतम् * (गीता. ७-१८.) * स महात्मा सुदुर्लभः (गी. ७ १९.) * मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः * (गी. ७-३.) इत्यादिभगवद्वचनप्रधानलक्ष्यभूतः, परमभागवताग्रेसरः; * बाल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः । रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः ॥ सर्वप्रियकरस्तस्य रामस्यापि शरीरतः । लक्ष्मणो लक्ष्मिसंपन्नो बहिःप्राण इवापरः ॥ (रामा. बा. १८-३०,३१.) * नच सीता त्वया हीना नचाहमपि राघव । मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ ॥ (,, अयो. ५३-३१.) * न देवलोकाक्रमणं नामरत्वमहं वृणे । ऐश्वर्यं वाऽपि लोकानां कामये न त्वया विना । (,, अयो. ३१-५.) * अहं तावन्महाराजे पितृत्वं नोपलक्षये । भ्राता भर्ता च बन्धुश्च पिता च मम राघवः ॥ (,, अयो. ५८-३१.) इत्युक्तरीत्या सीतासौमित्रिवत् भगवत्संश्लेषविश्लेषैकसुखदुःखः भगवदनुभवैकधारकः, भगवत्येव सकलबन्धुताबुद्धिमान् * धर्मात्मा सत्यशौचादिगुणानामाकरस्तथा । उपमानशेषाणां साधूनां यस्सदाऽभवत् ॥ (विष्णुपु. १-१५-१५६.) इत्युक्तरीत्या साधुजनोपमानभावे प्रह्लादसाधर्म्यमातस्थिवान्, अन्यैश्च बहुभिः प्रकारैर्दशरथनन्दगोपभरतशत्रुघ्नमारुतिविभीषणधनञ्जयादीनामपि साम्यमश्नुवानस्स एष मुनिप्रवरः श्रोतॄणां सद्यो भगवद्भक्तिवर्धकान् सांसारिकसकलतापदावानलनिर्वापणसरसामृतप्रवाहपूरमयांश्चतुरो दिव्यप्रबन्धाननुजग्राह ।

* आद्ये स्वीयप्रबन्धे शठजिदमिदधे संसृतेर्दुस्सहत्वं
द्वैतीयीके स्वरूपाद्यखिलमथ हरेरन्वभूत् स्पष्टदृष्टम् ।
तार्तीयीके स्वकीयां भगवदनुभवे स्फोरयामास तीव्रामाशाम्,
तुर्ये यथेष्टं भगवदनुभवादाप मुक्तिं शठारिः ॥

इत्युक्तरीत्या प्रथमे तिरुविरुत्तदिव्यप्रबन्धे संसारदुस्सहतां प्रत्यपादयत्; द्वितीये तिरुवाशिरियदिव्यप्रबन्धे तत्प्रदर्शितस्वरूपरूपादिकं संक्षिप्तमप्यतिविशदमन्वभूत । तृतीये पेरियतिरुवन्दादिप्रबन्धे भगवत्यनुरागातिशयमनुक्षणमभिवर्धमानं प्रादर्शयत् । तिरुवाय्मोळिनाम्न्यस्मिंश्चरमप्रबन्धे सकलशास्त्रसारार्थभूत-अर्थपञ्चकतत्त्वत्रयलक्षणसर्ववेदितव्यार्थप्रकाशनमुखेन यथेष्टं भगवन्तमनुभूयान्ततो मुक्तिं च लेभे । वेदाध्ययनेन ब्राह्मण्यसिद्धिवत् सहस्रगीत्यध्ययनेनैव श्रीवैष्णवत्वसिद्धिरिति आचार्यवर्याणामनवद्यस्सिद्धान्तः । ब्राह्मणेतरप्रणीतत्वं द्रमिडभाषामयत्वं चादाय कुचोद्यानि कुर्वन्तो दुर्वादिनः आचार्यहृदयादिग्रन्थरत्ननिरस्ता इति नात्र तद्विस्तरः ।

ननु, * तस्माद्गायते न देयम् * न भोजयेच्छ्राद्धे नृत्तगीतशीलानिति गानस्य निन्दिततया गानरूपस्यास्य प्रबन्धस्य कथमादरणीयतेति चेदववीयताम् । * हरिकीर्तिं विनैवान्यत् ब्राह्मणेन नरोत्तम । भाषागानं न कर्तव्यं तस्मात्पापं त्वया कृतम् ॥ इति मत्स्यपुराणे हरिविषयकभाषागानं कुर्वन्तं ब्राह्मणं स्वराष्ट्राद्विवासितवन्तं राजानं प्रति यमवचनदर्शनेन भगवद्विषयकभाषागानस्यानिषिद्धत्वात्, * अहो देवर्षिभिर्धन्यैर्गीयमानः कीर्तिं शार्ङ्गधन्वनः ।

गायन्माधवमिदं तन्त्र्या रमयत्यातुरं जगत् ॥ इति वीणागायकस्य नारदस्य धन्यत्वप्रतिपादनात् * वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः । तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छति ॥ इति याज्ञवल्क्यस्मरणात्, तथा—* शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः । त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥ * इति गायतामेव भगवच्चरणारविन्दसाक्षात्कारसामर्थ्यप्रतिपादनाच्च नेदृश्याः क्षुद्रशङ्काया मनागप्यवकाशः । अत एव ह्याहुर्वेदान्ताचार्याः—

भाषागीतिः प्रशस्ता भगवति वचनाद्राजवच्चोपचारात्
सा चागस्त्यप्रसूता त्विति परिजगृहे भूमिकाभेदयोग्या ।
यत्तत्कृत्यं श्रुतीनां मुनिगणविहितैस्सेतिहासैः पुराणैः
तत्रासौ सत्त्वसीम्नश्शठमथनमुनेस्संहिता सार्वभौमी ॥

इति । अस्यार्थः—भगवद्विषये भाषागानं प्रशस्तम्, मात्स्यपुराणवचनात्, भगवत्सन्निधौ भाषागानविधायकश्रीपाञ्चरात्रवचनाच्च । * यथा युवानं राजानं यथा च मदहस्तिनम् । यथा प्रियातिथिं योग्यं भगवन्तं तथाऽर्चयेत् ॥ * इति राजोपचाराणां भगवत्सन्निधौ विहिततया राजसन्निधाविव भगवत्सन्निधावपि भाषागानस्य कर्तव्यत्वाच्च भाषागानं युज्यत एव; तासु भाषासु द्रामिडी भाषा अगस्त्यव्याकृतेति हेतुना प्रपन्नेष्वस्य योग्येति श्रीमन्नाथयामुनयतिवरादिभिः परिगृहीता । तस्मात् मुनिजनप्रणीतेतिहासपुराणादिभिः क्रियमाणे श्रुत्यर्थविशदीकरणात्मके श्रुतिविषयकिञ्चित्कारलक्षणकृत्ये सत्त्वनिवेशशठरिपोर्मुनिवरस्य द्रामिडी ब्रह्मसंहिता मूर्धाभिषिक्तेति ॥

अन्ये च वक्तव्या भूयांसो विषयास्तेषु तेषु स्थलेषु प्रकरणवशात् प्रपञ्च्येरन्नित्यलमधुना ॥

इत्यवतारिका समाप्ता ॥

॥ श्रीरस्तु ॥

श्रीपराङ्कुशपरकालयतिवरवरवरमुनीन्द्रेभ्यो नमः ॥

श्रीशठकोपमुनीन्द्रानुगृहीता

॥ सहस्रगीतिः प्रारभ्यते ॥

तत्र प्रथमशतके प्रथमदशकम् - उयर्वरवुयर्नलम् ।

अवतारिका—इदं दशकं भगवतः परत्वमुपपादयितुं प्रवर्तते । भगवानेव परात्पर इत्यमुं विषयमवधारयितुं किमस्ति साधनं नः? भगवान् हि न प्रत्यक्षगोचरः । न चाऽप्यनुमानगम्यः । केवलं शास्त्रैकवेद्यः । अतीन्द्रियेष्वर्थेषु शास्त्रैकावसेयत्वमेव निर्धारयन्त्यास्तिकाः परमवैदिकाः । दशकेऽस्मिन् सप्तमगाथायाम् "आस्ते विष्णुः परमप्रकाशवत्यां श्रुत्याम्" इत्यनुजप्रद्रुपा मुनिवरेणायमेवार्थोऽवबोधितो भवति । तथा नाम श्रुतिशिरसि विदितस्य परस्य ब्रह्मणः परत्वं दशकेऽस्मिन् बहुभिर्विशेषैर्निरूप्यते । निरस्तातिशयसमुन्नतिशालिकल्याणगुणविशिष्ट

इत्यर्थकेन 'उयर्वेरवुयर्नलमुडैयवन्' इति वाक्येनोपक्रम्यते सेयं सहस्रगीतिः। वेदान्तेषु सगुणश्रुतय इव निर्गुणश्रुतयोऽपि विराजन्ते। भगवतो गुणवत्ताप्रतिपादिका श्रुतिः सगुणश्रुतिः। तस्यैव गुणशून्यताप्रतिपादिका श्रुतिः निर्गुणश्रुतिः। प्रमाणमूर्धन्यस्य वेदस्य व्याहतभाषित्वं नैव घटेत। हेयगुणशून्यताप्रतिपादनपरत्वावधारणेन निर्गुणश्रुतिनिर्वाहः, कल्याणगुणवत्ताप्रतिपादनपरत्वावधारणेन सगुणश्रुतिसमन्वयश्च क्रियते प्रामाणिकैः। यदाहुः श्रीवत्साङ्कमिश्राः—

* दूरे गुणास्तव तु सत्त्वरजस्तमांसि तेन त्रयी प्रथयति त्वयि निर्गुणत्वम्।
नित्यं हरे निखिलसद्गुणसागरं हि त्वामामनन्ति परमेश्वरमीश्वराणाम्॥ ४२॥ इति श्रीवैकुण्ठस्तवे।

भगवतस्सद्भावमात्रमप्यनभ्युपगच्छन्तः तत्सद्भावाभ्युपगन्तारो विशिष्यन्त इति सत्यमेतत्। अभ्युपगम्यमानो भगवान् गुणशून्यः, विग्रहविधुरः, विभूतिदरिद्रः इति मायावादिनां प्रलापः। ईदृशभगवदभ्युपगमापेक्षया भगवतः असत्ताभ्युपगम एव वरमिति प्राचामाचार्याणां व्याहारः। गुणविभूतिविग्रहवैशिष्ट्यं प्रथमगाथायामेव सुस्पष्टमाचष्टे मुनिवरः। द्वितीयादिषु च गाथासु क्रमेणैकैकं विशेषं प्रतिपादयति परत्वौपयिकम्। तथा च प्रथमदशकमिदं भगवत्परत्वप्रतिपादनप्रवणमिति ध्येयम्॥ .... *

—: अथ सहस्रगीतिदिव्यप्रबन्धोपक्रमः :—

(गाथा.) उयर्वेरवुयर्नल मुडैयवन् यवनवन् * मयर्वेर मदिनल मरुळिनन् यवनवन् *
अयर्वरुममरर्हळधिपति यवनवन् * तुयररु शुडरडि तोळुदेळेन् मनने॥ १॥

उदस्तातिशयं यथा तथा अतिशयितान् कल्याणगुणान् बिभर्ति यः, अज्ञानगन्धवर्जम् भक्तिरूपापन्नं ज्ञानम् (मह्यम्) अनुगृहीतवान् यः, अज्ञानात्यन्ताभाववताम् नित्यसूरीणाम् अधिपतिश्च यः, तस्य (परमपुरुषस्य) दुःखापनोदनशीलौ (अतएव) जाज्वल्यमानौ चरणौ हे मामकीन मानस! प्रणिपत्य समुज्जीव।

(विवरणम्.) अपरिच्छिन्नगुणगणसमृद्धस्य, अज्ञानगन्धासहभक्तिरूपापन्नज्ञानप्रदायकस्य, नित्यसूरिनाथस्य च परस्य पुंसः पादयोः प्रणिपतनमेव समुज्जीवनसाधनमित्युक्तं भवति॥

स्वस्मै महत्तरानुपकारान् कृतवतो भगवतः पादारविन्दप्रणिपतनमनुशास्ति मुनिवरः स्वकीयहृदयं प्रति। गाथायां तृतीयपादप्रतिपाद्यमानम् अज्ञानगन्धासहभक्तिरूपापन्नज्ञानप्रसादकत्वमात्रं न भगवत्कृत उपकारः; अपितु प्रथमतृतीयचतुर्थपादेषु प्रतिपादितानां कल्याणगुणवत्त्व-नित्यविभूतिनाथत्व-दिव्यमङ्गलविग्रहवत्त्वानां प्रदर्शनमपि भगवतैव कृतमित्यनुसंदधानो मुनिः कृत्स्नगाथयाऽप्युपकारकत्वातिशयमेव प्रतिपादयतीति प्रतिपत्तव्यम्।

उदस्तातिशयं यथा तथाऽतिशयितत्वं नाम गुणानाम्—असमाभ्यधिकत्वमेव। लोके अस्मादृशामपि केचन गुणास्सन्ति नाम। एते हि सातिशयाः; तत्तत्पुरुषापेक्षया उपर्युपरि अतिशयितगुणवतां भूयसां सत्त्वात्। भगवदपेक्षया अतिशयितगुणशालिनोऽन्यस्य कस्याप्यभावेन तस्य गुणाः उदस्तातिशयं यथा तथा अतिशयिताः कीर्त्यन्ते। मूलगाथायां गुणवाचिनि (नलम् इति) शब्दे सुस्पष्टबहुवचनाभावेन आनन्दाख्यो गुण एक एवात्र विवक्षित इत्यपि व्याचक्षते। तैत्तिरीयोपनिषदि तावदानन्दवल्ली परस्य ब्रह्मण आनन्दगुणं परिच्छेत्तुमुपक्रम्य

* मर्त्योत्थायं विरिञ्चावधिकमुपरि चोत्प्रेक्ष्य मीमांसमाना रङ्गेन्द्रानन्दवल्ली तव गुणनिवहं यौवनानन्दपूर्वम्। न स्वार्थं स्प्रष्टुमीष्टे स्खलति पथि परं मूकलायं निलिल्ये.........* इति (श्रीरङ्गराजस्तवोत्तरशतके) भट्टपादोक्तरीत्या, * यतो वाचो निवर्तन्ते * इत्यौपनिषदोक्तिरीत्या च विश्रान्ताऽभूत्। अपहास्ये तादृशप्रयासे सोऽयं मुनिवरोऽप्रवृत्तस्सन् अपरिच्छिन्नगुणगणाढ्य इति एकयोक्त्या चारुतरमाह। सुनिपुणफणितिरीदृशी हि भवितुमर्हति। * समस्तकल्याणगुणात्मकोऽसौ * बहवो नृप! कल्याणगुणाः पुत्रस्य सन्ति ते * धातूनामिव शैलेन्द्रो गुणानामाकरो महान् * स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगणः * इत्यादीनि प्रमाणानीह भाव्यानि।

अथ द्वितीयपादेन मुनिवरः स्वविषये असाधारणतया कृतमुपकारमनुसंधत्ते। ज्ञानानुदयः, संदेहः, अन्यथाज्ञानं, विपरीतज्ञानं, विस्मृतिरित्येवंरूपाणामज्ञानमिदानीं गन्धमप्यसहमानं सुसमृद्धज्ञानसाम्राज्यं भक्तिं चानुगृहीतवानित्युच्यते। मूलगाथायां ज्ञानं भक्तिश्चेत्युभयमनुगृहीतवानित्यर्थग्राहकसुस्पष्टशब्दविन्यासो नास्ति। एतादृशमर्थमिव भक्तिरूपापन्नं ज्ञानमनुगृहीतवानित्येवंविधमर्थमपि ग्राहयति मूलस्थशब्दसंदर्भः। अतश्च केचिदाचार्याः ज्ञानं भक्तिं च ददावित्यर्थमाहुः। भट्टपादास्तु भक्तिरूपापन्नज्ञानमददादिति निर्वहन्ति स्म। किमत्र स्वारस्यमिति चेत्, श्रीशठकोपमुनेः ज्ञानं भक्तिरिति द्वितयं नास्ति; उत्पन्नं ज्ञानं भक्तिरूपमेव सत् संजातमिति स्फोरणमतिचारु। तदिदं ज्ञानं कस्मै कृतमिति तु मूले नास्ति। स्वस्मै कृतमित्येव विवक्षा। अथापि मह्यमिति कण्ठतोऽनुक्तिः भगवद्विषयीकारात्पूर्वं स्वस्य असत्कल्पतानुसंधानेनेति अतिचारु गृणन्त्याचार्याः। * यो ब्रह्माणं विदधाति पूर्वमित्यादिश्रुतिवाक्ये, "तँ ह देवमात्मबुद्धिप्रसाद" मित्याम्नायते। आत्मविषयिणी या बुद्धिस्तां प्रसादयति देवदेव इति तदर्थः। तादृशः प्रसादः कलियुगोपक्रमे स्वविषये कृतो भगवतेति सानन्दमनुसंधीयते मुनिवरेण। कृतज्ञताप्रकाशनपरेऽस्मिन् वचसि आत्मस्तुतिरूपमवद्यं न मनागप्याशङ्कनीयम्। अन्यथा कृतघ्नता हि स्यादस्य।

अथ तृतीयपादेन नित्यविभूतिनाथत्वमनुसंधीयते। शेषशेषाशनगरुडप्रमुखानन्तनित्यसूरिपरिचरितनिजपादारविन्दयुगलस्स भगवान् संसारकान्तारसंचरणैकनिरतं मां स्मर्तुमपि नार्हति; अथापि सार्वभौमो घटीचेट्यामपि कामुको भवति यथा, तथा नाम स परात्परो जघन्ये मयि निर्हेतुकमनुरक्तस्सन् एवमनुग्रहमाविश्चकारेत्युक्तं भवति। परमसाम्यापन्नैस्सूरिवरैः परिवृतस्स भगवान् मामपि तेषां परिषदि विन्यसितुकाम एवमनुजग्राहेत्युक्तं भवति। स्वस्मै कृतेनानेनानुग्रहेण संसारिणां सर्वेषामपि प्रायस्समुज्जीवनसंभवेन लीलाविभूतिमपि नित्यविभूतिनिर्विशेषां चिकीर्षतीव स भगवानित्यपि व्यञ्जितं भवति।

अथ चतुर्थपादेन, पादत्रयोदितप्रभावशालिनस्तस्य परमपुरुषस्य पादारविन्दप्रणिपतनमेव श्रेयसे भूयसे कल्पेतेति निगद्यते। पादप्रस्तावेन भगवतो विग्रहवैशिष्ट्यमभिहितं भवति। विग्रहसत्त्वे हि तदवयवैकदेशभूतपादसद्भावप्रसक्तिः। स्तनन्धयस्य शिशोः मातुर्वपुषि स्तनमात्रे यथा दृष्टिराभिमुख्यं च, तथा प्रपन्नसंततेर्भगवतो दिव्यमङ्गलविग्रहे पादारविन्दमात्रे रुचिस्संप्रतिपन्नेति द्योतयितुमिह पादमात्रोक्तिः। तथाऽपि कृत्स्नोऽपि दिव्यमंगलविग्रह उपलक्षित एव स्यात्। तेन च विग्रहशून्यतावादिनः अर्थात्प्रतिक्षिप्ता भवन्ति। स्वानुभवमात्रे निष्णातस्य

मुनिसार्वभौमस्यास्य यद्यपि परमतप्रत्याख्याने रुचिः प्रवृत्तिर्वा मनागपि नास्ति; तथाऽपि दीपारोपणे सति स्वतस्तिमिरविलयवत् इह स्वानुभवपरसूक्तैः दुर्मतान्यर्थात्प्रतिक्षिप्तानि भवन्तीति प्रतिपत्तव्यम् ।

दुःखापनोदनशीलत्वं यदस्ति पादविशेषणम्, तत्रायं प्राचामाचार्याणां निर्वाहविशेषः—कस्य दुःखमपनुन्नं भवतीति तु मूले विशिष्य नोक्तम् । भगवतः प्रणतार्तिहरत्वप्रसिद्धिप्राचुर्यतः भक्तदुःखापनोदकत्वं ग्रहीतुं योग्यमिति केचिदाचार्या आशेरत । भगवान् रामानुजमुनिस्त्वत्र एवमनुजग्राह—'तुयररुक्कुम् शुडरडि' इति न, 'तुयररुम् शुडरडि' इति नावद्वक्तुर्मुनेर्विवक्षा; परकीयदुःखनिवर्तकत्वं नात्र विवक्षितम्; अपि तु स्वस्यैव निवृत्तदुःखत्वम् । * अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् । कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ * इति श्रीरामायणसूक्तिः (बालकाण्डे १-८५) प्रसिद्धा ननु; अत्र विज्वरत्वं प्रमुदितत्वं च विभीषणे वक्तव्यमपि नोक्तम् । भक्ते निर्दुःखे सति भगवत्येव तद् भृशं प्रकाशत इति गम्यते । * व्यसनेषु मनुष्याणां भृशं भवति दुःखितः * इति यो भृशं दुःखितत्वेन कथ्यते तस्यैव हि दुःखनिवृत्त्या भवितव्यम् । तथा च भक्तदुःखनिवर्तनमुखेन स्वस्य निवृत्तदुःखत्वं भविष्णु; तदेवात्र कथितमिति ग्रहणं चारुतरमिति भगवद्रामानुजहृदयम् । शठकोपमुनेरस्य अज्ञानविध्वंसनेन भगवान् स्वयं दुःखाद्विमुक्तो जाज्वल्यमानतनुश्चासीदिति सुशोभनोऽयं निर्वाहः ।

ननु शासनानर्हस्य अचेतनस्यान्तःकरणस्य कथमत्र नमस्कारशासनमिति चेत्, मनसि चेतनत्वमारोप्य * जिह्वे ! कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं पाणिद्वंद्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु * इत्यादाविव कविसंप्रदायतः क्रियमाणं शासनं नानुपपन्नमिति वेद्यम् । अन्तरङ्गापदेशेन अन्तरङ्गपर्यायभूता भक्ता एवात्र संबोधिताः शासिताश्चेत्यपि सुवचम् । अत्यन्तप्रियाणामन्तरङ्गत्वेनैव व्यपदेशो व्यवहारदृष्टो हि ।

'हे मानस ! नमस्कुरु' इत्येतावन्मात्रमनुक्त्वा 'नमस्कृत्य समुज्जीव' इति कथनात् कैङ्कर्यपर्यन्तपुरुषार्थप्रेप्सा सूचिता भवति । तथाच गाथयाऽनयाश्रियःपतिरेव परं तत्त्वम्, तच्चरणारविन्दसमाश्रयणमेव परमं हितम्, कैङ्कर्यमेव परमः पुरुषार्थ इति तत्त्वहितपुरुषार्थनिष्कर्षः कृतो भवति । मुनिवरोऽसौ पुंस्त्वं विहाय स्त्रीत्वमावाह्य नायिकावाचा सखीगिरा मातृवचसा च उपरि [चतुर्थदशकात्प्रभृति तत्रतत्र] गाथा अवतारयिष्यति; तत्र च कारणमस्यामेव गाथायां निबद्धमस्ति; भक्तिरूपापन्नज्ञानप्रदानं हि स्वस्मै भगवता कृतमिति कथितमिह; भक्तिरेव श्रृङ्गारवृत्त्या परिणमतीति, भक्तिभूम्नैव अन्यापदेशगिरां [स्त्रीभावनया] प्रादुर्भाव इति च परमार्थः ॥ .... (१)

(गाथा.) मननहमलमर मलर्मिशै येळुदरुम् * मनतुणर्वळविलन् पोरियुणर्वैवैयिलन् *

इननुणर् मुळुनलम् एदिर् निहळ्कळिवितुम् * इननिलनेननुयिर् मिहुनैरैयिलने ॥ २ ॥

मनोगतकामक्रोधादि कल्मषेषु प्रनष्टेषु विकस्वरतां प्राप्तेन उपर्युपरि जृम्भमाणेन मानसज्ञानाख्ययोगज्ञानेन परिच्छेद्याज्जीवात्मनो व्यतिरिक्तः, बाह्येन्द्रियज्ञानगोचरात् अचिद्वस्तुनोऽपि विलक्षणः, इत्थंभूतः, कार्त्स्न्येन ज्ञानानन्दघनः, भविष्यद्वर्तमानभूतरूप कालत्रितयेऽपि स्वसदृशदरिद्रः, स्वाम्यधिकशून्यश्च (परमपुरुषः) ममान्तरात्मा ॥

* मर्त्योत्थायं विरिञ्चावधिकमुपरि चोत्प्रेक्ष्य मीमांसमाना रङ्गेन्द्रानन्दवल्ली तव गुणनिवहं यौवनानन्दपूर्वम् । न स्वार्थं स्प्रष्टुमीष्टे स्खलति पथि परं मूकलायं निलिल्ये ....* इति (श्रीरङ्गराजस्तवोत्तरशतके) भट्टपादोक्तरीत्या, * यतो वाचो निवर्तन्ते * इत्यौपनिषदोक्तिरीत्या च विश्रान्ताऽभूत् । अपहास्ये तादृशप्रयासे सोऽयं मुनिवरोऽप्रवृत्तस्सन् अपरिच्छिन्नगुणगणाढ्य इति एकयोक्त्या चारुतरमाह । सुनिपुणफणितिरीदृशी हि भवितुमर्हति । * समस्तकल्याणगुणात्मकोऽसौ * बहवो नृप! कल्याणगुणाः पुत्रस्य सन्ति ते * धातूनामिव शैलेन्द्रो गुणानामाकरो महान् * स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगणः * इत्यादीनि प्रमाणानीह भाव्यानि ।

अथ द्वितीयपादेन मुनिवरः स्वविषये असाधारणतया कृतमुपकारमनुसंधत्ते । ज्ञानानुदयः, संदेहः, अन्यथाज्ञानं, विपरीतज्ञानं, विस्मृतिरित्येवंरूपाणामज्ञानमिदानां गन्धमप्यसहमानं सुसमृद्धज्ञानसाम्राज्यं भक्तिं चानुगृहीतवानित्युच्यते । मूलगाथायां ज्ञानं भक्तिश्चेत्युभयमनुगृहीतवानित्यर्थग्राहकसुस्पष्टशब्दविन्यासो नास्ति । एतादृशमर्थमिव भक्तिरूपापन्नं ज्ञानमनुगृहीतवानित्येवंविधमर्थमपि ग्राहयति मूलस्थशब्दसंदर्भः । अतश्च केचिदाचार्याः ज्ञानं भक्तिं च ददावित्यर्थमाहुः । भट्टपादास्तु भक्तिरूपापन्नज्ञानमददादिति निर्वहन्ति स्म । किमत्र स्वारस्यमिति चेत्, श्रीशठकोपमुनेः ज्ञानं भक्तिरिति द्वितयं नास्ति; उत्पन्नं ज्ञानं भक्तिरूपमेव सत् संजातमिति स्फोरणमतिचारु । तदिदं ज्ञानं कस्मै कृतमिति तु मूले नास्ति । स्वस्मै कृतमित्येव विवक्षा । अथापि मह्यमिति कण्ठतोऽनुक्तिः भगवद्विषयीकारात्पूर्वं स्वस्य असत्कल्पतानुसंधानेनेति अतिचारु गृणन्त्याचार्याः । * यो ब्रह्माणं विदधाति पूर्वमित्यादिश्रुतिवाक्ये, "तं ह देवमात्मबुद्धिप्रसाद" मित्याम्नायते । आत्मविषयिणी या बुद्धिस्तां प्रसादयति देवदेव इति तदर्थः । तादृशः प्रसादः कलियुगोपक्रमे स्वविषये कृतो भगवतेति सानन्दमनुसंधीयते मुनिवरेण । कृतज्ञताप्रकाशनपरेऽस्मिन् वचसि आत्मस्तुतिरूपमवद्यं न मनागप्याशङ्कनीयम् । अन्यथा कृतघ्नता हि स्यादस्य ।

अथ तृतीयपादेन नित्यविभूतिनाथत्वमनुसंधीयते । शेषशेषाशनगरुडप्रमुखानन्तनित्यसूरिपरिचरितनिजपादारविन्दयुगलस्स भगवान् संसारकान्तारसंचरणैकनिरतं मां स्मर्तुमपि नार्हति; अथापि सार्वभौमो घटीचेट्यामपि कामुको भवति यथा, तथा नाम स परात्परो जघन्ये मयि निर्हेतुकमनुरक्तस्सन् एवमनुग्रहमाविश्चकारेत्युक्तं भवति । परमसाम्यापन्नैस्सूरिवरैः परिवृतस्स भगवान् मामपि तेषां परिषदि विन्यसितुकाम एवमनुजग्राहेत्युक्तं भवति । स्वस्मै कृतेनानेनानुग्रहेण संसारिणां सर्वेषामपि प्रायस्समुज्जीवनसंभवेन लीलाविभूतिमपि नित्यविभूतिनिर्विशेषां चिकीर्षतीव स भगवानित्यपि व्यञ्जितं भवति ।

अथ चतुर्थपादेन, पादत्रयोदितप्रभावशालिनस्तस्य परमपुरुषस्य पादारविन्दप्रणिपतनमेव श्रेयसे भूयसे कल्पेतेति निगद्यते । पादप्रस्तावेन भगवतो विग्रहवैशिष्ट्यमभिहितं भवति । विग्रहसत्त्वे हि तदवयवैकदेशभूतपादसद्भावप्रसक्तिः । स्तनन्धयस्य शिशोः मातुर्वपुषि स्तनमात्रे यथा दृष्टिराभिमुख्यं च, तथा प्रपन्नसंततेर्भगवतो दिव्यमङ्गलविग्रहे पादारविन्दमात्रे रुचिस्संप्रतिपन्नेति द्योतयितुमिह पादमात्रोक्तिः । तथाऽपि कृत्स्नोऽपि दिव्यमंगलविग्रह उपलक्षित एव स्यात् । तेन च विग्रहशून्यतावादिनः अर्थात्प्रतिक्षिप्ता भवन्ति । स्वानुभवमात्रे निष्णातस्य

मुनिसार्वभौमस्यास्य यद्यपि परमतप्रत्याख्याने रुचिः प्रवृत्तिर्वा मनागपि नास्ति; तथाऽपि दीपारोपणे सति स्वतस्तिमिरविलयवत् इह स्वानुभवपरसूक्तैः दुर्मतान्यर्थात्प्रतिक्षिप्तानि भवन्तीति प्रतिपत्तव्यम् ।

दुःखापनोदनशीलत्वं यदस्ति पादविशेषणम्, तत्रायं प्राचामाचार्याणां निर्वाहविशेषः—कस्य दुःखमपनुन्नं भवतीति तु मूले विशिष्य नोक्तम् । भगवतः प्रणतार्तिहरत्वप्रसिद्धिप्राचुर्यतः भक्तदुःखापनोदकत्वं ग्रहीतुं योग्यमिति केचिदाचार्या आशेरत । भगवान् रामानुजमुनिस्त्वत्र एवमनुजग्राह—'तुयररुक्कुम् शुडरडि' इति न, 'तुयररुम् शुडरडि' इति नावद्वक्तुर्मुनेर्विवक्षा; परकीयदुःखनिवर्तकत्वं नात्र विवक्षितम्; अपि तु स्वस्यैव निवृत्तदुःखत्वम् । * अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् । कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ * इति श्रीरामायणसूक्तिः (बालकाण्डे १-८५) प्रसिद्धा ननु; अत्र विज्वरत्वं प्रमुदितत्वं च विभीषणे वक्तव्यमपि नोक्तम् । भक्ते निर्दुःखे सति भगवत्येव तत् भृशं प्रकाशत इति गम्यते । * व्यसनेषु मनुष्याणां भृशं भवति दुःखितः * इति यो भृशं दुःखितत्वेन कथ्यते तस्यैव हि दुःखनिवृत्त्या भवितव्यम् । तथा च भक्तदुःखनिवर्तनमुखेन स्वस्य निवृत्तदुःखत्वं भविष्णु; तदेवात्र कथितमिति ग्रहणं चारुतरमिति भगवद्रामानुजहृदयम् । शठकोपमुनेरस्य अज्ञानविध्वंसनेन भगवान् स्वयं दुःखाद्विमुक्तो जाज्वल्यमानतनुश्चासीदिति सुशोभनोऽयं निर्वाहः ।

ननु शासनानर्हस्य अचेतनस्यान्तःकरणस्य कथमत्र नमस्कारशासनमिति चेत्, मनसि चेतनत्वमारोप्य * जिह्वे ! कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं पाणिद्वंद्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु * इत्यादाविव कविसंप्रदायतः क्रियमाणं शासनं नानुपपन्नमिति वेद्यम् । अन्तरङ्गापदेशेन अन्तरङ्गपर्यायभूता भक्ता एवात्र संबोधिताः शासिताश्चेत्यपि सुवचम् । अत्यन्तप्रियाणामन्तरङ्गत्वेनैव व्यपदेशो व्यवहारदृष्टो हि ।

'हे मानस ! नमस्कुरु' इत्येतावन्मात्रमनुक्त्वा 'नमस्कृत्य समुज्जीव' इति कथनात् कैङ्कर्यपर्यन्तपुरुषार्थप्रेप्सा सूचिता भवति । तथाच गाथयाऽनयाश्रियःपतिरेव परं तत्त्वम्, तच्चरणारविन्दसमाश्रयणमेव परमं हितम्, कैङ्कर्यमेव परमः पुरुषार्थ इति तत्त्वहितपुरुषार्थनिष्कर्षः कृतो भवति । मुनिवरोऽसौ पुंस्त्वं विहाय स्त्रीत्वमावाह्य नायिकावाचा सखीगिरा मातृवचसा च उपरि [चतुर्थदशकात्प्रभृति तत्रतत्र] गाथा अवतारयिष्यति; तत्र च कारणमस्यामेव गाथायां निबद्धमस्ति; भक्तिरूपापन्नज्ञानप्रदानं हि स्वस्मै भगवता कृतमिति कथितमिह; भक्तिरेव शृङ्गारवृत्त्या परिणमतीति, भक्तिभूम्नैव अन्यापदेशगिरां [स्त्रीभावनया] प्रादुर्भाव इति च परमार्थः ॥ .... (१)

(गाथा.) मननहमलमर मलर्मिशै येळुदरुम् * मननुणर्वळविलन् पोरियुणर्वैवैयिलन् *
इननुणर् मुळुनलम् एदिर् निहळ्कळिवितुम् * इननिलनेननुयिर् मिहुनैरयिलने ॥ २ ॥

मनोगतकामक्रोधादि कल्मषेषु प्रनष्टेषु विकस्वरतां प्राप्तेन उपर्युपरि जृम्भमाणेन मानसज्ञानाख्ययोगज्ञानेन परिच्छेद्याज्जीवात्मनो व्यतिरिक्तः, बाह्येन्द्रियज्ञानगोचरात् अचिद्वस्तुनोऽपि विलक्षणः, इत्थंभूतः, कार्त्स्न्येन ज्ञानानन्दघनः, भविष्यद्वर्तमानभूतरूप कालत्रितयेऽपि स्वसदृशदरिद्रः, स्वाम्यधिकशून्यश्च (परमपुरुषः) ममान्तरात्मा ॥

* * * परमात्मस्वरूपं तावत् अन्तरिन्द्रियपरिच्छेद्यजीवात्मतुल्यं न; बाह्येन्द्रियपरिच्छेद्य-अचित्तुल्यं च न; किं तु समाभ्यधिकरहितं ज्ञानानन्दघनं चेति तद्वैलक्षण्यम् अस्यां गाथायां कथितं भवति ॥

मूले परब्रह्मणो जीवात्मतौल्यनिषेधो वा अचित्त्वतौल्यनिषेधो वा न कण्ठतः कृतः; अन्तरिन्द्रिया-परिच्छेद्यत्वं बाह्येन्द्रियापरिच्छेद्यत्वं चेति एतावदेव व्यक्तं प्रतिपादितम् । चेतनाचेतनविसजातीयत्वकथनमेवात्राभि-संहितमिति मर्मविद आचार्या व्याचक्षते। तथाच षट्सहस्रिकायां श्रीकुरुकेशार्यसूक्तिः—"योगाभ्यासपरिशुद्धान्तः करणजन्यज्ञानैकविषयात् परिशुद्धात्मस्वरूपाद्विसजातीयः, बाह्येन्द्रियजन्यज्ञानविषयादचेतनाद्विलक्षणः" इति ।

अथ, यदि चेतनाचेतनविलक्षणत्वमेवात्र परमपुरुषस्य प्रतिपिपादयिषितम्, तर्हि तत् कण्ठत एव वक्तुं योग्यं शक्यं च । किमर्थमेवम् आभ्यन्तरबाह्येन्द्रियापरिच्छेद्यत्वकथनमुखेन तदवबोधनप्रयास ऊरीकृत इति केचिदाशङ्केरन् । अत्रोच्यते । काञ्चनकरीषयोः पिपीलिकापञ्चाननयोः महति वैषम्ये सत्यपि एकेन्द्रियग्राह्यत्वेन साम्यमप्यस्ति । करीषं पिपीलिकां च येन चक्षुषा पश्यामस्तेनैव हि चक्षुषा काञ्चनं पञ्चाननं च पश्यामः; एवं-विधमेकेन्द्रियग्राह्यत्वरूपं साम्यमपि चिदचितोरीश्वरस्य च नेति प्रतिपादनार्थमेव एवं कथितमिति वेदितव्यम् ।

ननु एकेन्द्रियग्राह्यत्वरूपसाम्याभावेन परमात्मनः क उत्कर्षः? तादृशसाम्यवतोः काञ्चनकरीषयोश्च तावता का क्षतिः? न खलु तावता तयोस्स्वाभविकावुत्कर्षापकर्षौ हीयेते। एवं च भगवत एकेन्द्रियग्राह्यत्वरूप-साम्याभावकथनं विफलमिति शङ्का जायेत । अत्रोच्यते । एकेन्द्रियग्राह्यत्वाभावकथनेन तन्निमित्तस्य साजात्यस्य द्रव्यैक्यस्य वा अभावः फलति। सजातीययोर्हि पदार्थयोः केनचिदाकारेण सुमहति वैषम्ये सत्यपि आकारान्तरेण साम्यं च संभवति। यथा पिपीलिकापञ्चाननयोः लघिष्ठत्वगरिष्ठत्वाभ्यां महति वैषम्ये सत्यपि जन्ममरणादिमत्त्वेन साम्यम्। यथा च कांचनकरीषयोरनर्घत्वाल्पत्वाभ्यां वैषम्यसत्त्वेऽपि क्रयलभ्यत्वादिना साम्यम् । एवं भगवतोऽपि तत्वान्तरेण साम्ये सति तद्गतकतिपयस्वभावानां वा तस्मिन् प्रसञ्जनं भवेत् । तच्चावधे पर्यवस्येत् । तादृशावद्य-प्रसक्तिसहसाजात्यनिषेधेन भगवतोऽतिविलक्षणं वैलक्षण्यं सिध्यतीति बोध्यम्। *अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽय-मुच्यते* (२-२५.) इत्यत्र गीताभाष्यश्रीसूक्तिरिहानुसन्धेया—"छेदनादियोग्यानि वस्तूनि यैः प्रमाणैर्व्यज्यन्ते तैः अयम् आत्मा न व्यज्यत इत्यव्यक्तः । अतः छेद्यादिविसजातीयः । अचिन्त्यश्च—सर्ववस्तुविसजातीयत्वेन तत्तत्स्वभावयुक्ततया चिन्तयितुमपि नार्हः । अतश्च अविकार्यः - विकारानर्हः -" इति ।

ननु, यद्यपि भगवतो बाह्येन्द्रियग्राह्यत्वमसंभवीति सुवचम्; तथाऽपि निष्कल्मषान्तःकरणग्राह्यत्वमपि नेति दुर्वचं खलु । सर्वथा ज्ञानस्यैव अगोचरस्स इति सिद्धे वन्ध्यासुतशशविषाणादिवत् तुच्छता खलु प्रसज्येत; बहवो महायोगिनो भगवन्तमन्तःकरणेन वीतकल्मषेण प्रेक्षमाणाः श्रूयन्ते च । सोऽयं शठकोपसूरिश्च तादृशेष्वग्र-गण्यो हि विराजते । एवं च सति कथं परस्य पुंसो वीतकल्मषेणान्तःकरणेनाप्यग्राह्यत्वमभिधीयते? इति चेत्; उच्यते; * दृश्यते त्वग्र्यया बुद्ध्या, * मनसा तु विशुद्धेन * इत्यादिप्रमाणप्रतिपन्नं विशुद्धमनोग्राह्यत्वं परमात्मनो नापलप्यते। इदन्तया, इयत्तया ग्राह्यत्वासंभवमात्रमिहाभिप्रेतमिति वेदितव्यम्। एतदुक्तं भवति—परमात्मनश्शुद्धमनो-ग्राह्यत्वेऽपि तत्स्वरूपस्यापरिच्छिन्नत्वात् शुद्धमनसाऽपरिच्छिन्नत्वमेव तस्येति वैलक्षण्यसिद्धिरिति । * नित्यमिन्द्रिय-पथातिगं महो योगिनामपि सुदूरगं धियः * इति श्रीकूरनाथसूक्तिरिहानुसन्धेया ।

(पोरियुणर्वैयिलन्.) इत्यनेन बाह्येन्द्रियजन्यज्ञानविषयादचेतनवस्तुनो वैलक्षण्यमुच्यते। जीवात्म-वैलक्षण्यकथनेन अचिद्वैलक्षण्यस्य स्वतस्सिद्धत्वात् पुनरस्य पृथक्कथनमनपेक्षितमेव। अथापि कथनं स्फुटत्वाय। अथवा, बाह्येन्द्रियगोचरादचित्तत्त्वाद्यथा विलक्षणः परः पुमान्, तथा परिशुद्धान्तःकरणज्ञानैकविषयात्परिशुद्धात्मस्वरूपादपि विसजातीय इति दृष्टान्तविधयोपादानमित्यपि सुवचम्। * न तत्समश्चाभ्यधिकश्च दृश्यते * इति श्रुतिवाक्यनिर्वाहे, यथा तस्मादभ्यधिको नास्ति, तथा तत्समोऽपि नास्तीति योजना स्मर्तव्याऽत्र। ननु, रामकृष्णादिविभवावतारेषु अर्चावतारेषु च बाह्येन्द्रियग्राह्यत्वं भगवतोऽस्त्येव खलु। कथं तदभाव इहोच्यत इति चेत्, तत्र दिव्यमङ्गल विग्रहस्यैव बहिरिन्द्रियग्राह्यता, न दिव्यात्मस्वरूपस्य; दिव्यात्मस्वरूपमभिकृत्यैवात्रोच्यत इति समाधेयम्।

तृतीयपादादौ [इनन्] इत्थंभूत इत्यर्थः। उक्तस्यानुभाषणमिदम्। अनुभवाम्बुधिमग्नानां विस्मयविवशानामयं व्याहारः। अथ [उणर्मुळुनलम्] कार्त्स्न्यवाचकं मुळु इत्येतन्मध्यवर्ति पदं काकाक्षिन्यायेन पूर्वत्रोत्तरत्र चान्वितं सत् ज्ञानघन आनन्दघनश्चेत्यर्थममिदधाति। * सत्यं ज्ञानमनन्तं ब्रह्म * आनन्दो ब्रह्म * इत्यादि प्रमाणजालमिहानुसन्धेयम्। अथ [एदिर्निकऴ् कळिविनुम् इनन्निलन्] कालत्रयेऽपि स्वसदृशरहित इत्यर्थः। नन्वस्मदीये सिद्धान्ते तत्वत्रयमेव स्वीकृतम्। चिदचिद्वैसादृश्यं प्रथमद्वितीयपादाभ्यामुक्तमेव। सादृश्य-शङ्कासदवस्त्वन्तराभावात् पुनरपीह स्वसदृशरहित इति कथनं निरर्थकमेव खलु, इति चेत्, उच्यते। सामान्यतस्सदृशराहित्यं पूर्वमुक्तम्। इह तु विशिष्य कालत्रयेऽपि तद्राहित्यमुच्यत इति मेदोऽत्रसेय इति केचिदाचार्या ऊचुः। भट्टपादास्तु, साधर्म्यदृष्टान्ताभावः पूर्वमुक्तः, वैधर्म्यदृष्टान्तस्याप्यभाव इहोच्यत इत्याहुः। तदिदं विव्रियते। मुखं न कमलसदृशमित्युक्ते मुखस्य साधर्म्यदृष्टान्तवत्त्वं सिध्यति; मुखं न कमलसदृशमित्युक्ते साधर्म्यदृष्टान्तविरहेण सह वैधर्म्यदृष्टान्तसद्भावसिध्यति। कमलस्य न साधर्म्ये दृष्टान्तता, अपि तु वैधर्म्ये इति। अथ प्रकृतेऽवतरामः। भगवान् चिदचित्सदृश इत्युक्ते भगवतस्साधर्म्यदृष्टान्तवत्त्वं सिद्ध्येत्। भगवान् न चिदचित्सदृशः, अपि तु तद्विसजातीय इत्युक्ते वैधर्म्यदृष्टान्तसत्ता सिध्यति। तादृशवैधर्म्यदृष्टान्तसत्ताऽपि चतुर्थपादे इनन्निलनित्यनेन अपनुद्यत इति भट्टपादानां सूक्तिः। अनया किमुक्तं भवतीति विमर्शनीयम्। भगवान् चिदचिद्विलक्षण इति कथनमप्यसाधु—इत्युक्तं भवति। तर्हि, स चिदचिद्विलक्षणो न, चिदचित्सदृश एव; इति खलु साधितं भवेदिति नाशङ्कनीयम्। प्रसज्यप्रतिषेधमात्रमपि अस्थाने इत्येव कथितं भवेत्। बुद्ध्यारोहार्थं पुनरुपपाद्यते। 'वसिष्ठो न चण्डालतुल्यः' इति कश्चिदाह। अपरः कश्चिदाह, मूर्ख! मैवं वादीरिति। किमेतावता वसिष्ठं चण्डालतुल्यं ब्रूहीति कथितं सिध्येत्? नैव सिध्येत्। वसिष्ठो न चण्डालतुल्य इति प्रतिषेधोऽप्यत्यन्तमचारुरिति हि सिध्येत्। एवम्, 'ईश्वरश्चिदचित्सदृशो नेति कथनमप्यवद्यावहम्' इत्येव भट्टपादहृदयमवसेयम्। यत्र साम्यप्रसक्तिस्तत्रैव खलु तत्प्रतिषेध उपपद्येत। सर्वथाऽपि तदप्रसक्तिस्थले तत्प्रतिषेधोऽनुपपन्नः अवद्यावहश्चेति विपश्चितो विदन्ति। इत्यलम्।

चतुर्थपादे [एनतुयिर्] इत्यस्य ममान्तरात्मा इत्यर्थः। तथा च, चिदचिद्विलक्षणस्समाधिकरहितश्च परमपुरुषः ममात्मा इति समापनं बोध्यम्। अथवा, समाधिकरहितो ममात्मा च यः परमपुरुषः तस्य पादौ नमस्कृत्य समुज्जीव भो मम मानसेति पूर्वगाथया संयोज्यतामित्यप्याचार्या व्याचख्युः॥ .... (२)

(गाथा.) इलनदु उडैयनिदु एन निनैवरियवन् * निलनिडै विशुम्बिडै उरुविनरुविनन् *
पुलनोडु पुलनलन् ओळिविलन् परन्द * अन्नलनुडैयोरुवनै नणुहिनम् नामे ॥ ३ ॥

'तद्वस्तुरहितः' 'एतद्वस्तुविशिष्टः' इत्येवं चिन्तयितुमशक्यः; सर्वेष्वधोलोकेषु सर्वेषु चोर्ध्वलोकेषु वर्तमानानि अचिद्वस्तूनि चिद्वस्तूनिच स्वशरीरतया बिभ्राणः; इन्द्रियग्राह्यवस्तुभिस्सह वर्तमानोऽपि इन्द्रियैरग्राह्यः; कालपरिच्छेदरहितः; देशपरिच्छेदरहितश्च (स परमात्मा); तत्तादृशकल्याणगुणविभूषितमद्वितीयं भगवन्तं वयमाश्रिताः ॥

* * * परिच्छिन्नविभूतिकेषु वक्तव्यां वाचमसहमानम्, पृथिव्यन्तरिक्षादिसकललोकवर्तिचेतनाचेतनात्मकसमस्तवस्तुशेषिणम्, सर्वजगदात्मभूतत्वेऽपि तद्गतदोषैरसंस्पृष्टमद्वितीयं सर्वेश्वरमाश्रिता वयमित्युक्तं भवति ॥

प्रथमपादेन सर्ववस्त्वाश्रयत्वमभिधीयते। लोके परिच्छिन्नविभूतिकव्यक्तिषु सर्वपदार्थवत्त्वं वक्तुं न शक्यम्। वस्तुतो यानि सन्ति कानिचन वस्तूनि, तान्युपादाय एतान्यत्र सन्तीति कथ्येत। वस्तुतो यानि न सन्ति तान्युद्दिश्य एतान्यत्र न सन्तीति कथ्येत। सतां वस्तूनामत्यल्पत्वम् असतां वस्तूनामनल्पत्वं च भगवदितरव्यक्तिषु सिध्येत्। भगवति तु सर्ववस्त्वाधारत्वेन एतदस्त्यत्रेति नास्तीति वा कथनं चिन्तनं च नैव प्रसक्तिमदिति प्रथमपादतात्पर्यम्; अपरिच्छिन्नविभूतिको भगवानित्युक्तं भवति। अथ द्वितीयपादेन सर्वलोकवर्तिचिदचिच्छरीरकत्वमुच्यते। संस्कृते रूपि अरूपि इति पदद्वयं प्रथते। तदेव द्राविड्यां क्रमेण उरु, अरु इति संशब्दयते। अचिद्वस्तूनां रूपित्वम् चिद्वस्तुनः अरूपित्वं च संप्रतिपन्नम्। अधोलोकेषु ऊर्ध्वलोकेषु च यावन्ति सन्ति चिदचिद्वस्तूनि, तानि सर्वाणि भगवति सन्तीति कथनं मूले वर्तते। एतेन चिदचिद्वस्तुशरीरकत्वं [सकलचेतनाचेतनान्तर्यामित्वपर्यवसितम्] भगवतस्सिद्धम्। * जगत्सर्वं शरीरं ते * (रामा. यु. ११०-२५.) इत्यादिभिः प्रमाणैरुपबृंहितो ह्ययमर्थः।

अथ तृतीयपादे [पुलनोडु] इत्यनेन, * यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः ॥ * इति श्रुत्यर्थोऽनुसंधीयते। इन्द्रियग्राह्यैस्सर्वैरपि पदार्थैस्सह वर्तमानो भगवानित्युक्तं भवति; वर्तनं च व्याप्त्या। एवं सर्ववस्तुषु वर्तमानोऽयं किं तद्गतदोषैस्संस्पृश्येत? इत्यत्राह [पुलनलन्] इति। न तद्धर्मा। * द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति * इति श्रुतिरिह व्याख्याता भवति। शारीरकमीमांसायां * संभोगप्राप्तिरिति चेन्न वैशेष्यात् * इति सूत्रमिहानुसन्धेयम्। जीवस्येव परस्यापि ब्रह्मणश्शरीरान्तर्वर्तित्वमभ्युपगतं चेत्, तद्वदेव शरीरसंबन्धप्रयुक्तसुखदुःखोपभोगप्रसङ्ग इति चेन्न; हेतुवैशेष्यात्। न हि शरीरान्तर्वर्तित्वमेव सुखदुःखोपभोगे हेतुः, अपि तु पुण्यपापरूपकर्मपरवशत्वम्। तत्तु अपहतपाप्मनः परमात्मनो न संभवतीति सूत्रार्थः ॥ .... (३)

(गाथा.) नामवनिवनुवन् अवळिवळुवळेवळ् * तामवरिवरुवर् अदुविदुवुदुवेदु *
वीमवैयिवैयुवै अवै नलन्तीङ्गवै * आमवैयायवै आयू निन्नववरे ॥ ४ ॥

वयम्, दूरस्थः, सन्निहितः, अदूरविप्रकृष्टः, दूरवर्तिनी, सन्निकृष्टा, अदूरविप्रकृष्टा, का खिदियमिति पृच्छयमाना पूज्यत्वविशेषिताः त एव (पूर्वोक्ताः) पदार्थाः पूर्वोक्तदूरस्थत्वादिगुणयुक्ता अचित्पदार्थाः, दूरस्थत्वादिगुणेन सह नश्वरत्वगुणेनापि युक्तास्त एव पदार्थाः समीचीना असमीचीनाश्च पदार्थाः भविष्यत्कालिकपदार्थाः भूतकालिकपदार्थाः वर्तमानकालिकपदार्थाश्च (इत्येतत्सर्वं) भगवदायत्तमेव ।

* * *—विविधैर्निर्देशैर्निर्दिश्यमानानां समस्तानामपि वस्तूनां स्वरूपं भगवदधीनमेवेत्युक्तं भवति ॥ अत्र नाम् अवन् इत्यादयश्शब्दास्तत्तच्छरीरकपरमात्मपराः; शरीरवाचिनां शब्दानां शरीरिपर्यन्तत्वस्य अपर्यवसानवृत्तिसिद्धत्वात् । * सर्वेन्द्रियान्तःकरणपुरुषाख्यं हि यज्जगत् । स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः * इति पराशरः, 'यतोऽसौ विश्वशरीरकः ततो जगत् स एव' इत्युक्तवान् । तथाच सामानाधिकरण्यनिर्देशे शरीरात्मभावस्य हेतूकरणात् इहापि शरीरात्मभावनिबन्धनमेव सामानाधिकरण्यम्, न तु स्वरूपाभेदनिबन्धनमिति द्रष्टव्यम् । वक्ष्यते च सुस्पष्टमिदं मुनिवरेणैव उपरि सप्तमगाथायाम् 'उडन्मिशै युयिरेन' इति ।

जगति वर्तमानानि सर्वाण्यपि वस्तूनि भगवदायत्तस्वरूपाणीति विवक्षुर्मुनिवरः जागतानां सर्वेषामपि वस्तूनां प्रत्येकश उपादानं दुश्शकमिति मन्यते स्म । विवेचनमन्तरेण 'सर्वाण्यपि वस्तूनि' इति संहत्य कथने रसो नास्तीति चामन्यत । सुबहु विमृश्य अतिचारुतरप्रक्रियया गाथामिमां निबबन्ध । लघीयस्यामपि गाथायामस्यामेकस्यां लीलाविभूतिवर्तीनि सर्वाण्यपि पदार्थवृन्दानि चातुर्यभूम्ना निर्दिष्टान्यभूवन्निति पश्यत । उत्तमपुरुषनिर्देश्याः, प्रथमपुरुषनिर्देश्याः, एकवचननिर्देश्याः, बहुवचननिर्देश्याः, दूरस्थत्वेन निर्देश्याः, सन्निकृष्टत्वेन निर्देश्याः, अदूरविप्रकृष्टत्वेन निर्देश्याः, चित्त्वेन निर्देश्याः, अचित्त्वेन निर्देश्याः, पूज्यत्वेन निर्देश्याः, पुन्नपुंसकस्त्रीलैः निर्देश्याः, प्रष्टव्यत्वेन निर्देश्याः, भंगुरत्वेन निर्देश्याः, सद्गुणवत्त्वेन असद्गुणवत्त्वेन च निर्देश्याः, भूतभविष्यद्वर्तमानकालवर्तित्वेन निर्देश्याः पदार्था इति, एवं नाम कथनमिदया सर्वमपि पदार्थजातं संगृहीतमिह गाथायामहह । अतिविस्तरमतिसंक्षेपं च विहाय लघुशब्दशरीरेण जागतसर्वपदार्थप्रतिपादनफक्किका सैषा मुनिवरेऽस्मिन्नसाधारणी दृश्यते । प्रदर्शितेष्वेतेषु निर्देशेषु अन्तर्भावमनश्नुवानं वस्तु नैकमपि विद्यते लीलाविभूत्याम् । तथा च सर्वाण्यपि वस्तुजातानि निरवशेषं निर्दिष्टान्यभूवन् । निर्दिश्य किमुक्तमन्ततः? [अवरे] स एव-इत्युक्तम् । सर्वं स एवेत्यमेद उक्तः । * सर्वं खल्विदं ब्रह्मेत्यादिश्रुतिवाक्येष्वद्वैतिनां निर्वाहप्रकारोऽन्यः । श्रीशठकोपमुनीन्द्रसूक्त्युपजीविभगवद्रामानुजसंप्रदायस्थानां निर्वाहप्रकारस्त्वन्यः । शरीरशरीरिभावनिबन्धन ऐक्यव्यपदेश इति अत्र संक्षेपः । * तत्सर्वं वै हरेस्तनुः * इत्युक्तमिति ध्येयम् ॥ .... (४)

(गाथा.) अवरवर् तमतमदु अरिवरिवहैवहै * अवरवरिरैयवर् एनवडियवैवर्हव्व् *
अवरवरिरैयवर् कुरैविलरिरैयवर् * अवरवर् विदिवळि अडैयनिन्ननरे ॥ ५ ॥

सत्वरजस्तमःप्रकृतिकास्ते ते पुमांसः स्वस्वज्ञानानुकूलप्रकारभेदैः तांस्तान् देवताविशेषान् ईश्वरत्वेन मत्वा तत्तद्देवताचरणसमाश्रयणप्रवणा भवन्ति; तैस्तैराश्रितास्तास्ता देवताः फलप्रदानांशे सामर्थ्यविकला न भवन्ति; (कुत इति चेत्,) ते ते समाश्रयितारः स्वस्वभाग्यानुसारेण यथा फलं लभेरन्, तथा सर्वस्वामी भगवान् (तत्तद्देवतान्तर्यामी) तिष्ठति ।

* * * अग्नीन्द्रादिदेवताशरीरकतया तत्तद्देवतोद्देश्यककर्मसमाराध्यः, तत्तत्कर्मफलप्रदाता च स एव परमः पुमानित्युक्तं भवति ॥

भगवान् गीतायां तृतीयाध्याये (११) * देवान् भावयतानेन ते देवा भावयन्तु वः । .... इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः * इत्याह । अयमर्थः—देवताराधनभूतेन कर्मणा मच्छरीरभूतान् मदात्मकान् देवानाराधयत ; यज्ञेनाराधितास्ते देवा मदात्मकाः स्वाराधनापेक्षितान्नपानादिकैर्युष्मान् पुष्णन्तु । यज्ञेनाराधिता मदात्मकास्ते देवा इष्टान् भोगान् [उत्तरोत्तराराधनापेक्षितान् सर्वान् भोगान्] वो दास्यन्तीति । एवं नाम तृतीयाध्याये गूढमुक्तवानसावेव उपरि नवमाध्याये, * येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च * इति सुस्पष्टमाचष्ट । मच्छरीरभूतानामितरदेवतानामाराधनं तदन्तर्यामिभूतमदाराधनरूपमेव भवति । सर्वेषां यज्ञानां भोक्ता अहमेव—तैस्तैर्यज्ञैराराधितोऽहमेव भवामि । प्रभुरेव चाहम्—तत्र तत्र फलप्रदाता चाहमेव इत्यर्थः । एवंविधां भगवदुक्तिं हृदये कृत्वा गाथामिमामन्वग्रहीन्मुनिवर इति ध्येयम् ।

अधस्तनगाथया सर्वेषां स्वरूपं भगवदायत्तमिति कथितम् । अनया गाथया सर्वेषां स्थितिश्च भगवदधीनेति कथ्यते । स्थितिर्नाम रक्षणम् । तच्चापेक्षितफलप्रदातृत्वरूपम् । एवंविधं रक्षणं परमपुरुषादन्यत्र न संभवितुमर्हति । यदाहुर्महर्षयः—* न संपदां समाहारे विपदां विनिवर्तने । समर्थो दृश्यते कश्चित्तं विना पुरुषोत्तमम् ॥ * न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिम् * इति । उपनिषच्च * इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः ॥ * इति । सैषा विव्रियते मनाक् । इष्टम्—यागादिलक्षणं श्रौतं कर्म ; पूर्तम्—खातादिलक्षणं स्मार्तं कर्म ; विश्वम्—अग्नीन्द्रादिदेवताकं कालत्रयवर्ति सर्वं बहुविधं कर्म । बिभर्ति—स्वीकरोति । सर्वकर्मसमाराध्यः स्वयं भवतीत्यर्थः । स क इति चेत्, भुवनस्य नाभिः— सर्वजगदीश्वरो यस्स एवेत्यर्थः । अथ * तदेवाग्निरित्यादिकमुत्तरार्धमेतत्समर्थनपरम् । ननु अग्नीन्द्रादिदेवतोद्देश्यककर्मसमाराध्यत्वमग्नीन्द्रादीनामेव युक्तम् ; कथं नु तत् परमात्मन इत्याशङ्क्य स एवाग्न्यादिशरीरकतया तत्तच्छब्दवाच्य इत्याह * तदेवाग्निरित्यादिना ।

इदमादिश्रुतिस्मृतिप्रथितोऽर्थः गाथयाऽनया सुस्पष्टं प्रतिपाद्यते । लोके तावदधिकारिण उच्चावचाः । प्रायश्शुद्धसात्त्विका मृग्याः । राजसास्तामसा रजस्तमोमिश्रसत्त्ववन्तश्च बहुलाः । ते खलु स्वस्वरुच्यानुगुण्येन 'ममेयं देवता उद्देश्या, ममैषा देवता उद्देश्या' इत्याकलय्य, तास्ता देवतास्संश्रित्याराधयन्ति । अथ तासां देवतानामुत्तमोत्तमफलदानशक्तिविरहेऽपि आश्रितसामान्याधिकारिकाङ्क्षितफलप्रदाने शक्तिरक्षता । सा च शक्तिः परमपुरुषानुप्रवेशकृता—इति तात्पर्यम् ।

गाथा सैषा वाक्यत्रयात्मिका । ते तेऽधिकारिणस्तास्ता देवता यजन्तीति प्रथमवाक्यम् । तेभ्यस्ता देवताः फलप्रदानशक्ता भवन्तीति द्वितीयं वाक्यम् । तादृशफलप्रदानौपयिकतया भगवांस्तासु देवतास्वन्तरात्म-

भावमधितिष्ठतीति चरमं वाक्यम् । ननु भगवान् सर्वदा सर्वत्रैव ह्यन्तरात्मा सन्नवतिष्ठते । अत्र विशिष्य कथनं किमर्थमिति चेत्; सर्वदा सर्वत्र सती व्याप्तिस्साधारणी; अत्र तु 'समाश्रितजनकाङ्क्षितफलप्रदानं कारयेयम्;' इति संकल्पविशिष्टा व्याप्तिरिति विशेषो वेदितव्यः। * विष्णुरात्मा भगवतो भवस्यामिततेजसः * इत्यत्रैव । यदि भगवान् देवतान्तरेष्वन्तरात्मा सन् फलं प्रददाति, तर्हि तद्देवताद्वारैव मोक्षमपि प्रदातुं प्रभवति खलु? इति न मन्तव्यम् । तदनुकूलसंकल्पं तत्र न करोति स इति शास्त्रहृदयम् ।

अत्र द्वितीयपादे 'तत्तद्देवताचरणसमाश्रयणप्रवणा भवन्ति' इति यदुक्तम्, तत्रामुं विचारमाचार्याः कुर्वन्ति—चरणसमाश्रयणमिति व्यवहारस्तावत् केवलं श्रीमति नारायणे; "श्रीमन्नारायणचरणौ शरणं प्रपद्ये" इति हि मन्त्ररत्नशरीरावतारः । देवतान्तराणि तु चरणसमाश्रयणं नैव कामयन्ते, तेन न तृप्यन्ति च । दुराराधदेवतास्ताः प्रजापशुहिंसाभिरेव ह्याराध्यन्ते । तत्कथमिह चरणसमाश्रयणवाक्प्रयोग इति । समादधते चैवम्—नैतन्न जानाति शठकोपमुनिः; तिरुवाशिरियाख्ये द्वितीयप्रबन्धे षष्ठगाथायां कण्ठरवेण कथयति च देवतान्तरदुराराधत्वम् । अथापि चरणसमाश्रयणमात्रेण स्वाराधे भगवति लक्ष्मीनाथे स्वकीयप्रावण्यदार्ढ्यबलेन स्वगोष्ठीप्रसिद्धिमनुसृत्य अवशादिदमुक्तवानिति । श्रीगोदाव्रतप्रबन्धे चतुर्दश्यां गाथायां "तङ्गळ् तिरुक्कोयिल्" इति यदुक्तं तदिह दृष्टान्ततया ध्येयम् । तत्र तावत् परमैकान्तिनामुत्तमाश्रमिणां चर्या निदर्श्यत इत्येको निर्वाहः । केवलं काषायवाससां शैवद्विजानां चर्या निदर्श्यत इत्यपरो निर्वाहः; द्वितीये निर्वाहे 'तिरुक्कोयिल्' इति व्यवहृतेस्तेषां संप्रदाये विरहेऽपि स्वसंप्रदायवासनया तथा प्रोक्तमित्याचार्या उशन्ति । तथैवात्रापीति ।

एतद्गाथाव्याख्यानावसाने, "शास्तृमन्दिरवर्तिगजानां युद्धसामर्थ्ये सति हि देवतान्तराणां स्वतः फलदानसामर्थ्यसंभवः" इत्यर्थकद्राविडसूक्तिरस्ति । अयं भावः—शास्तृमन्दिरं नाम—शास्तेति प्रसिद्धस्य देवतान्तरस्यालयः; तत्र द्वारे कुलालनिर्मिता महत्तरा गजास्तुरगाश्च स्थाप्यन्ते प्रतिदेशम् । तेषां कृत्रिमजन्तूनां केवलं दर्शनीयता, नतु युद्धादिरूपकार्योपयोगितेति सर्वे जानन्ति । यदि प्राणविधुराणां तेषां युद्धसामर्थ्यं स्यात्, तर्हि भगवदनुप्रवेशशून्यानां देवतान्तराणामपि फलप्रदानशक्तिस्स्यादिति ॥ .... (५)

(गाथा.) निन्ऱनरिरुन्दनर् किडन्दनर् तिरिन्दनर् * निन्ऱिलर् इरुन्दिलर् किडन्दिलर् तिरिन्दिलर् *
एन्ऱुमोरियल्विनर् एन निनैवरियवर् * एन्ऱुमोरियल्वोडु निन्ऱवेम् तिडरे ॥ ६ ॥

तिष्ठन्तः, आसीनाः, शयानाः, संचरन्तश्च स्थित्युपवेशनशयनसंचरणविधुराश्च अस्मदीयो दृढप्रमाणसिद्धो भगवानेव; (स पुनः कीदृश इति चेत्;) सततमेकप्रकारप्रकृतिक इति चिन्तनानर्हः; सदैकस्वभावतया स्थितश्च ॥

* * * चेतनाचेतनात्मकसमस्तवस्तूनां समस्तप्रवृत्तिनिवृत्तयश्च परमपुरुषाधीना एवेत्युक्तं भवति ।

गाथायामस्यां प्रथमपादे स्थित्युपवेशनशयनसंचरणरूपकार्येषु प्रवृत्ताश्चेतना उक्ताः; द्वितीयपादे तु तादृशप्रवृत्तितो निवृत्ताश्चेतना उक्ताः; एते सर्वेऽपि भगवदधीना इति गाथावसानस्थितेन [एम् तिडरे] इत्यनेन

सिध्यति । तदिदं सिद्धसाधनं भवति । कथमिति चेत्; अधस्ताच्चतुर्थगाथायाम् * नामवनिवनुवन् * इत्यस्यां सर्वमपि धर्मिजातं संगृहीतमभूत; सर्वस्यापि तस्य भगवदधीनता च तत्रैवोक्ता । अधुनाऽस्यां गाथायां प्रतिपाद्यमानास्तिष्ठन्त आसीना इत्यादयः, अतिष्ठन्तः अनासीनाः इत्यादयश्च तस्यामेव चतुर्थगाथायामुक्तप्राया एव भवन्ति । अधुना किमपूर्वमभिधीयत इति द्रष्टव्यम् । एवं तावद्ग्रहीतव्यम् । यद्यपि गाथायामस्यां प्रवृत्तिशालिनो निवृत्तिशालिनश्चैव स्पष्टमुक्ताः; तथाऽपि तत्तद्व्यक्तिगताः प्रवृत्तयो निवृत्तयश्चैवात्र विवक्षिताः । तत्तद्वस्तुगतप्रवृत्तिनिवृत्तीनामपि तादधीन्यमुच्यतेऽनया गाथया । एतत्तु चतुर्थगाथया नैवोक्तमिति अपूर्वकथनमेव, न सिद्धसाधनम् । वेदे यागसाधनभूतायास्सोमलतायाः क्रयणं गवा कर्तव्यमिति "गवा ते क्रीणानीत्येव ब्रूयात् गोअर्धमेव सोमं करोति" इति वाक्यतो विहितम् । अन्यत्र तु "अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्याम्नातम् । अत्र तावदारुण्यगुणविशिष्टया गवा सोमक्रयणमुच्यते; तथाच आरुण्यविशिष्टबोधने सत्यपि आरुण्यमात्रे तात्पर्यं ग्राह्यम् । कुतः? सोमक्रयणकरणभूतविशेष्यांशस्य (गोः) पूर्वमेव प्राप्तत्वात्, प्राप्तस्य पुनः प्रापणानवसरात्, अप्राप्तपूर्वे आरुण्यमात्रे इह विधितात्पर्यमिति गृह्यते । एवं "लोहितोष्णीषा ऋत्विजः प्रचरन्ती"ति वेदवाक्यमस्ति । अभिचारकर्मणि श्रूयत इदम् । ऋत्विजां सोष्णीषाणां संचरणस्य अन्यतः प्राप्तत्वात्, प्राप्ते तस्मिन्नंशे नात्र विधिः प्रवर्तते । अप्राप्ते (उष्णीष) लौहित्यमात्रे अत्र विधिगोचरता स्वीक्रियते । एवमेव प्रवृत्तानां निवृत्तानां च पुंसां भगवदधीनतायाः प्रागेव प्राप्तत्वात्, अत्र प्रवृत्तिनिवृत्तितादधीन्यमात्रं तात्पर्यविषयभूतमिति ग्रहीतव्यम् । अत एव षट्सहस्रिकासूक्तिः—"चेतनाचेतनात्मकसमस्तवस्तूनां समस्तप्रवृत्तिनिवृत्तयोऽपि परमपुरुषसंकल्पाधीना इत्युच्यते" इति । चिदचित्स्वरूपतादधीन्यस्य प्रागेवोक्तत्वात्, चिन्तितनिमिषितादिलक्षणसर्वव्यापारतादधीन्यमिह कथितं भवतीति संक्षेपः ।

अत्र केषांचिदाशङ्का समजनि-प्रवृत्तिस्तदधीना काममस्तु ! किं निवृत्तिरपि तदधीनेत्यभ्युपगन्तव्यमिति । अत्र गोविन्दभट्टारक एवमूचे—"स्वर्गात्पतन्तं त्रिशङ्कुमुद्दिश्य शक्तिमान् कश्चन मुनिरुवाच तत्रैवावतिष्ठस्वेति; सद्य एव तथा स्वातंत्र्यमभूत्तस्य । एवमेव निवृत्तावपि भगवत्संकल्पसापेक्षता" इति ।

अथ तृतीयपादे-सततमेकविधस्वभाव इति परिच्छेत्तुमशक्य इत्युक्त्वा, चतुर्थपादे सततमेकविधेन स्वभावेन समन्वित इति प्रोक्तम् । तदिदं व्याहतमेव ननु? इति चेत्, नैव व्याहतम् । अत्र द्वेधा समाधेयम् । सततमेकविधस्वभाव इति परिच्छेत्तुमशक्यस्वरूपो योऽयं स्वभावो वर्तते, सोऽयं सततमेकविध एवेति चतुर्थपादतात्पर्यमिति समाधानप्रकार एकः । अथवा, "समाहितैस्साधु सनन्दनादिभिस्सुदुर्लभं भक्तजनैरदुर्लभम्" (वरदराजस्तवे) इतिवत् अभक्तानामपरिच्छेद्यस्वभाव इति सुवचम् । * नमो नमो वाङ्मनसातिभूमये नमो नमो वाङ्मनसैकभूमये" इत्यत्र, "यद्वा, स्वप्रसादभाजां गोपगोपिकादीनामपि वाङ्मनसयोरेकविषयभूतायेत्यर्थः" इति स्तोत्रभाष्योक्तमिह स्मर्तव्यम् ।

गाथान्ते [एम् तिडर्] इत्यनेन दृढप्रमाणसिद्धोऽस्मत्प्रभुरित्युच्यते । नित्यनिरवद्यापौरुषेयवेदप्रमाणं हि भगवतस्साधकम्; तच्च सर्वथा सुदृढमिति ज्ञेयम् । अत्र प्रोक्तं सामानाधिकरण्यं वेदसिद्धमित्यपि सूचितं भवति ॥

भगवान् रामानुजः स्वकीयेषु श्रीभाष्यादिदिव्यग्रन्थरत्नेषु श्रीशठकोपमुनीन्द्रदिव्यसूक्तिलब्धान् स्वादिष्ठान् भूयसोऽर्थविशेषान् न्यवीविशदिति पूर्वाचार्याः प्रतिजानते । तस्याः प्रतिज्ञाया विपुलमुपपादनं द्रमिडोपनिषत्प्रभावसर्वस्वनाम्नि अस्मदीये प्रबन्धे विशदम् । तत्रायमन्यतमो विषयः—अधस्तात् चतुर्थपञ्चमषष्ठगाथाभिः सकल-

चेतनानां स्वरूपम्, स्थितिः (रक्षणम्), प्रवृत्तिभेदाश्च भगवदधीना इति तावत्प्रतिपादितम्। इदमेवानुसृत्य भगवान् रामानुजः, "स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदम्" इति श्रीसूक्तिं भगवद्विशेषणरूपां तत्रतत्र प्रयुङ्क्ते। [श्रीरङ्गगद्यश्रीवैकुण्ठगद्ययोरुपक्रमे सूक्तिरेषा दृश्यताम्।] गाथात्रयेणापि क्रमेण योऽर्थस्सिद्धः स एव हि सूक्तयात्र निबद्धः। ननु, अयमर्थ उपनिषदादिसिद्धश्च स्यादेव खलु। ग्रन्थान्तरेषु नास्त्ययमर्थ इति न हि प्रतिज्ञातुं शक्यम्। सहस्रगीतित एव भगवता रामानुजेन तद्विशेषणमुपनिबद्धमिति कथमिदमुच्यते? इति चेत्; उच्यते। नैष विषयः उपनिषदादिग्रन्थान्तरेषु एवं क्रमेण निबद्धः। चेतनाचेतनानां स्वरूपं भगवदधीनमिति कचित्कोणे कथितं स्यात्। तेषां स्थितिश्च तदधीनेति कोणान्तरे कथितं स्यात्। प्रवृत्तिनिवृत्तिविषयेऽपि तथा। त्रितयस्यापि क्रमेण चारुफक्किकया प्रतिपादनं सहस्रगीत्यामत्रैवेति प्रतिज्ञातुं शक्यम्। उपनिषत्सु प्रवीणा मतान्तरस्था अपि भगवतो विशेषणानि निर्दिशन्ति खलु। तेष्वेवंविधम्, एतत्समानाकारकं वा विशेषणं दृश्यते वेति विमृश्यताम्। कथं दृश्येत? नैव दृश्येत। श्रीशठकोपमुनीन्द्रदिव्यसूक्तिशरणानामेव सैषा वैखरी संपद्यत इति सर्वं समञ्जसम्॥.... .... (६)

(गाथा.) तिडविशुम्बेरि वळि नीर् निलमिवैमिशै * पडर् पोरुळ् मुळुवदुमाय् अवैयवैदोरुम् *
उडन्मिशै युयिरेन करन्देङ्गुम् परन्दुळन् * शुडर्मिहुशुरुदियुळ् इवैयुण्ड शुरने॥ ७॥

दृढ आकाशः, अग्निः, वायुः, आपः, पृथिवी इत्येतत्पञ्चभूताश्रितभौतिकपदार्थास्सर्वेऽपि स्वयं भूत्वा, तेषु तेषु पदार्थेषु शरीरान्तर्गतजीवन्यायेन तत्तदविदिततया सर्वत्रान्तःप्रविश्य बहिश्च व्याप्य स्थितः, एतत्सर्वं प्रलये संहृतवांश्च देवः (अपौरुषेयत्वलक्षण) तेजसा अतिशयितायां श्रुत्यां प्रतिपाद्यतया वर्तते॥

* * * सकलभूतभौतिकपदार्थेष्वन्तः प्रविश्य नियन्तृतया सर्वशरीरकः सर्वसंहर्ता च देवः अपौरुषेयश्रुतितात्पर्यगोचर इत्युक्तं भवति। अधस्तनगाथासु सामानाधिकरण्येनैव निर्देशः कृतः; तच्च सामानाधिकरण्यं जगदीश्वरयोश्शरीरशरीरिभावप्रयुक्तमिति गाथयाऽनया प्रतिपाद्यते। अस्मदीयं शरीरं यथा ह्यात्मा नियन्तृतया व्याप्यावतिष्ठते, तथा भगवानपि पृथिव्यादिभूतपञ्चकं तदारब्धसमस्तवस्तुजातं च नियन्तृतया व्याप्यावतिष्ठते। शरीरस्यात्मनश्च वस्तुतो भेदसत्त्वेऽपि यथा 'श्यामो देवदत्तो बुद्धिमान्, उन्नतो यज्ञदत्तो विद्वान्' इत्यादिव्यवहारेषु शरीरात्मनोरभेदप्रतिसन्धानम्, तथैव शरीरभूतयोश्चेतनाचेतनयोः शरीरिणः परमात्मनश्च वस्तुतो भेदसत्त्वेऽपि "ज्योतींषि विष्णुर्भुवनानि विष्णुः" इत्यादिष्वभेदप्रतिसंधानमपि शरीरात्मभावनिबन्धनमेवेति प्रतिपादनं गाथाया अस्याः परमतात्पर्यविषयभूतम्।

गाथोपक्रमे दृढार्थकं यद्विशेषणपदमस्ति तत् अनुपदवर्तिनभःपदमात्रे अन्वेतीति स्वीकारे, वाय्वादिभूतान्तरापेक्षया आकाशस्य चिरकालस्थायित्वाद्दार्ढ्यमुक्तमिति मन्तव्यम्। उपरितनेषु सर्वेष्वपि पदेषु तदन्वयस्वीकारे, अबाधितप्रमाणसिद्धस्वरूपदार्ढ्यमुक्तमिति विभावनीयम्। चत्वार्येव भूतानीति आकाशवर्जं भूतचतुष्टयस्वीकर्तृमतनिरासाय आकाशे दार्ढ्यं विशेषितमित्यप्याहुराचार्याः।

[उडल्मिशै उयिरेन] शरीरस्य आत्मा धारको नियामकश्शेषी च यथा वर्तते, तथा चिदचितोर्धारको नियामकश्शेषी च परमपुरुष इति यावत्। "यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च, तत्तस्य शरीरम्" इति भगवद्भाष्यकृदनुगृहीतं शरीरलक्षणं कृत्स्नप्रपञ्चे समन्वेतीति द्रष्टव्यम्। [करन्दु] * यः पृथिव्यां तिष्ठन्नित्याद्यौपनिषद्वाक्यसमुदाये, * यं पृथिवी न वेद, यमापो न विदुः,.........यमात्मा न वेद * इत्याम्नातमिहानुसंधेयम्। व्याप्यपदार्थैरविदितस्सन् अन्तर्बहिश्च सर्वं व्याप्य वर्तते इत्युक्तं भवति।

[शुडर्मिहु शुरुदियुळ् उळन्] अर्थापत्त्यनुमानादिभिः प्रमाणान्तरैः परं ब्रह्म साधयन्तः परे * तर्काप्रतिष्ठानादित्यादिब्रह्मसूत्रनिरस्ता भवन्ति। प्रमाणमूर्धन्यश्रुत्येकसमधिगम्यं परं ब्रह्मेत्यभ्युपगच्छतां परमवैदिकानामग्रेसरोऽयं मुनिवर इति ध्येयम्। केवलं श्रुत्यामित्युक्तिः, अपौरुषेयत्वनित्यत्वनिरवद्यत्व अविच्छिन्नपरम्पराप्राप्तत्वादिविशेषद्योतनार्थमिति भाव्यम्। अत एव हि वेदस्य प्रमाणमूर्धन्यता।

[इवैयुण्डशुरने] सृष्टिस्थित्योर्भगवदधीनत्वं पुरस्तादेवोक्तम्; संहृतिरपि तदधीनेति अत्रोक्तं वेदितव्यम्॥....(७)

(गाथा.) शुररिवरुनिलै विण्मुदल् मुळुवदुम् * वरन् मुदलायवै मुळुदुण्ड परपरन् *
पुरमोरु मून्नेरिचु अमरर्कुमरिवियन्दु * अरनयनेन उलहळिचमैचुळने॥ ८॥

ब्रह्मादिदेवानामपि दुरवबोधस्थितिकस्य मूलप्रकृत्यादिसमस्तपदार्थवर्गस्य असहायहेतुर्भूत्वा तत्सर्वं प्रलये संहृतवान् परात्परः (सर्वेश्वरः) रुद्ररूपधरो भूत्वा त्रिपुरसंहारकर्ता, (अन्ततः) लोकसंहारं च कुर्वाणः ब्रह्मसंज्ञको भूत्वा देवेभ्यो ज्ञानप्रदाता लोकसृष्टिकर्ता च सन् विराजते॥

* * * कृत्स्नप्रपञ्चानां निरपेक्षकारणभूतो भगवानेव चतुर्मुखान्तर्यामी सन् सृष्ट्यादिनिर्वाहकः; रुद्रान्तर्यामी सन् त्रिपुरदहनादिनिर्वाहकश्च भवतीति प्रतिपादनमुखेन विधिरुद्रयोः परमशङ्कानिवारणपूर्वकमवरत्वं तयोर्द्रढयति गाथयाऽनया मुनिवरः।

मूले प्रथमपादे आकाशार्थको (विण्) शब्दो योऽस्ति, स तावदिह वेदान्तप्रक्रियया मूलप्रकृतिमाचष्ट इति पूर्वाचार्या आशेरते। गार्गिविद्यायां * कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च * इत्यत्राकाशशब्दार्थो मूलप्रकृतिरिति * अक्षरमम्बरान्तधृतेरिति सूत्रभाष्ये निर्णीतम्। द्राविड्याम् आकाशवाचिनो विण्शब्दस्यापि तादृशार्थकत्वमुपपद्यत इति; उभयोरपि वेदान्तयोरैककण्ठ्यान्नात्र विप्रतिपत्तिः कार्या। आकाशवाचकत्वमात्राङ्गीकारेऽपि कार्यवाचिशब्दः कारणेऽपि वर्तत इति ग्राह्यम्। मूलप्रकृतेः स्वरूपस्वभावादिकं देवा अपि न जानन्तीति प्रथमपादतात्पर्यम्। तादृशप्रकृतिमूलकानां सर्वेषामपि कार्यवर्गाणां वरिष्ठो हेतुर्भगवानेवेति कथ्यते। लोके कार्यसामान्यं प्रति त्रिविधकारणमपेक्षितम्। घटजनने मृदुपादानकारणम्, दण्डचक्रादि सहकारिकारणम्, कुलालो निमित्तकारणम्। पटजनने तन्तुरुपादानकारणम्, तुरीवेमादि सहकारिकारणम्। तन्तुवायो निमित्तकारणम्। एवं

सर्वत्र द्रष्टव्यम् । इत्थं त्रिविधकारणमन्तरा कार्यानुत्पत्तिदर्शनेन प्रपञ्चरूपकार्यस्यापि एवं त्रिविधकारणसद्भावावश्यकतां मन्वानाः सर्वेश्वरस्य निमित्तकारणतामात्रं स्वीकृत्य, उपादानकारणं सहकारिकारणं च किमन्यदिति पृच्छन्ति । वेदान्तिनस्तु सर्वेश्वर एव त्रिविधकारणमपीत्युशन्ति ।

* पुरिसपहाणसरीरो भुवणाणं होसि अच्चुअ उवायाणम् ।
णिअसंकप्पसणाहो वहसि णिमित्तत्तणं वि अब्भुअसत्ती ॥

(छाया.) पुरुषप्रधानशरीरो भुवनानां भवस्यच्युतोपादानम् ।
निजसंकल्पसनाथो वहसि निमित्तत्वमप्यद्भुतशक्तिः ॥ *

इत्यच्युतशतकश्लोकरत्नमिहानुसन्धेयम् । गाथायां तृतीयपादोपक्रमे प्रयुक्तं वरिष्ठत्वरूपं कारणविशेषणम् एतदेव कथयति । एकाकिनः स्वस्यैव त्रिविधकारणत्वमेव वरिष्ठत्वमिति वेदितव्यम् ।

[अवै मुळ्दुण्ड परपरन्] * यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः, मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः * इत्याम्नातरीत्या * अत्ता चराचरग्रहणादितिसूत्रसिद्धान्तरीत्या च सकलसंहारकश्च स एव परमः पुमान् । तृतीयपादे [पुरमोरु मून्रॆरिचु] इत्यनेन त्रिपुरदाहकत्वमपि परमपुरुषकृत्यमेवेत्युच्यते । हन्त ! कथमिदं संघटते ? इतिहासपुराणादिषु रुद्रस्यैव हि त्रिपुरदाहकत्वं पठ्यत इति केचिदाशङ्केरन् । महाभारते कर्णपर्वणि— * विष्णुरात्मा भगवतो भवस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः ॥ * इति सुस्पष्टमुक्तम् । अमिततेजसोऽपि रुद्रस्य त्रिपुरदहनकाले विष्णुर्विशिष्य आत्मा बभूव, तस्मादेव स कार्यकुशलोऽभूदिति वस्तुस्थितिः प्रतिपादिता । तैत्तिरीययजुष्यपि षष्ठकाण्डे द्वितीयप्रपाठके * तेषामसुराणां तिस्रः पुरः आसन् * इत्युपक्रम्य त्रिपुरसंहारकथा आम्नाता । तत्र च, * विष्णुं तेजनम् * इत्युक्तम् । तथाच विष्णोरेव तेजसा त्रिपुरदहनकार्यं रुद्रेण संपादितमिति प्रमाणगणप्रतिपन्न एवार्थ इह मुनिवरेण प्रत्यपादीति प्रतिपत्तव्यम् ।

अथ विरिञ्चस्य कृत्यमपि भगवदधीनमेवेति प्रतिपाद्यते [अमरर्कुमरिवियन्दु] इत्यनेन । चतुर्मुखो देवानां ज्ञानमदिशदिति काचन प्रथा वर्तते । अत्रापि कृते विमर्शे श्वेताश्वतरोपनिषदि * यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै * इत्याम्नानात् भगवानेव ब्रह्माणं निजनाभीकमले समुत्पाद्य तस्मै वेदानप्युपादिशदित्यवगमात् वेधसस्स्वतन्त्रकृत्यं न किमपीत्यवधार्यते । * एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादर्शितपन्थानौ सृष्टिसंहारकारकौ ॥ * इति मोक्षधर्मप्रमाणच्छाययैव गाथेयमनुगृहीता मुनिवरेणेति सुगमम् । * यस्य प्रसादादहमच्युतस्य भूतः प्रजासृष्टिकरोऽन्तकारी । क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्माच्च मध्ये पुरुषः परस्मात् ॥ * इत्यादीनि बहूनि प्रमाणानि षट्सहस्रिकायामुपात्तान्यत्रानुसन्धेयानि । तथाच "श्रुतिप्रसिद्धस्सर्वेश्वरः जगत्सृष्टिक्षमत्वेन प्रसिद्धो ब्रह्मा स्यात्, जगत्संहारक्षमत्वेन प्रसिद्धो रुद्रस्स्या"दिति कथयन्तः कुदृष्टयो गाथयाऽनया निरस्ता वेदितव्याः ॥ .... (८)

(गाथा.) उळनेनिलुळन् अवनुरुवमिव्वुरुवुहळ् * उळनलनेनिल् अवनरुवमिव्वरुवुहळ् *
उळनेन विलनेन इवैगुणमुडैमैयिन् * उळनिरुतहैमैयोडु ओळिविलन् परन्दे ॥ ९ ॥

(ईश्वरः) अस्तीति चेदुच्येत, ईश्वरोऽस्त्येव; (ईश्वरे सिद्धे सति) परिदृश्यमानानि सर्वाण्यपि स्थूलवस्तूनि भगवतः स्थूलशरीराणीति सिध्यति। (ईश्वरो) नास्तीत्युक्तेऽपि ईश्वरसत्तैव सिद्धा भवति; (तदानीम्) सर्वाण्यपि सूक्ष्मवस्तूनि भगवतस्सूक्ष्मशरीरभूतानीति सिध्येत्। (तथाच) अस्तित्वनास्तित्वरूपेण धर्मद्वययोगे वर्ण्यमाने स्थूलप्रपञ्चशरीरकतया, सूक्ष्मप्रपञ्चशरीरकतया च सिद्धसत्ताको भगवान्; सिध्यन् स भगवान् सर्वान्तरात्मा सन् सिध्यति॥

* * * गाथयाऽनया सर्वशून्यवादी निरस्यते। अधस्तादष्टाभिर्गाथाभिस्संपन्नोऽनुभवो भगवतस्सद्भावमवधार्य प्रवृत्तः। वस्तुतो भगवानिति कस्यचिद्वस्तुनस्सद्भावे खलु तदनुभव उपपद्यते। भगवानेव नास्तीति वदतां वादे बलवति सति तत्प्रत्याख्यानमकृत्वा भगवदनुभवोपबृंहणेन किं फलमिति केचिन्मन्येरन्निति निरीश्वरवादनिरसननिपुणामिमां गाथामवतारयति मुनिवरः। सैषा गाथा सर्वशून्यवादप्रत्याख्यानपरेति पूर्वाचार्या व्याचक्षते। गाथागतानां वचनसंदर्भाणां परामर्शे तु निरीश्वरवादप्रत्याख्यानमेव प्रतीयते। तत्कथं सर्वशून्यवादप्रत्याख्यानपरतामाचार्या आचक्षत इति चेदवधेयम्। वस्तुतस्सर्वशून्यवाद एव निरस्यतेऽत्र। सर्वं शून्यमिति वादे ईश्वरस्य शून्यताऽप्यन्तर्भवति खलु। तत्प्रत्याख्यानेन ईश्वरसद्भावः प्रतिष्ठापितश्चेत् तदा सिध्यन्नीश्वरः स्वविभूतिभूतसकलप्रपञ्चैस्सहैव सिध्येदिति कृत्वा निरीश्वरवादनिरासवैयग्री केवलं मुनिवरेण स्पष्टीकृतेति बोध्यम्। कञ्चन पुमांसमधिकृत्य अयमस्ति वा न वेति विवादस्संवृत्त इति गृह्यताम्। नास्तीति कश्चिदाह; अस्तीत्यपर आह। अथ प्रवृत्ते विचारे नास्तीतिवादभञ्जनेन अस्तित्वं साधितमित्यपि गृह्यताम्। तदा सिध्यन् पुमान् चक्षुश्श्रोत्रजिह्वाघ्राणाद्यवयवसंघातसमन्वित एव खलु सिध्येत्। एवमेव भगवान् परमः पुमान् अस्ति न वेति विवादे, नास्तीति वादे खण्डिते, अस्तीतिवादे च सत्यूर्जिते, सिध्यतस्तस्य स्वशरीरभूतसर्ववस्तुसमेतस्यैव सिद्धिरव्याहता खलु। तथा च भगवतस्सद्भावं साधयन्ती सैषा गाथा सकलवस्तुसद्भावसाधनप्रवणा संपन्ना। तेन च सर्वशून्यवादखण्डनपरत्वव्याख्यानमाचार्याणामनवद्यमिति निष्पन्नम्।

जगदिदं चिदचिदीश्वराख्यतत्त्वत्रयसंघातात्मकमस्ति। चेतनवस्तुभिरचेतनवस्तुभिस्तदधीश्वरेण चापूरितमिदं जगत् नास्तीति वदति स सर्वशून्यवादी। अस्य खण्डने प्रवृत्तो मुनिवरः ईश्वरस्यैकस्य सद्भावसाधनमात्रेण स्वस्य कृतकृत्यताममिमेने। ईश्वरसद्भावं स्थापयितुं बहवश्शास्त्रान्वेषणप्रयासमनुभवेयुः। यद्यपि समुचित एव स पन्थाः, तथाऽपि शास्त्रमप्यसदिति वदतः पामरान् शास्त्रेण निरस्याम इति कथनं न चारु। वादिनो वाचमेवावलम्ब्य वादिनः प्रत्याख्यानमिति सुशोभनः पन्था अत्राद्रियते।

भगवानस्तीति कश्चिदाह चेत्, अनेन वचसा भगवतस्सद्भावस्साध्यत इति विद्मः। एवम्, भगवान्नास्तीति कश्चिदाह चेत्, अनेन वचसा भगवतोऽसद्भावस्साध्यत इति च। नैषा तु वस्तुस्थितिः। भगवानस्तीति वचसः,

भगवान्नास्तीति वचसश्च वस्तुतस्समानार्थकत्वमेव सेत्स्यति। अस्तीतिवचसा यथा सद्भावस्सिध्यति, तथा नास्तीति वाचाऽपि सद्भाव एव सिध्यतीति शपथं करोति मुनिवरः। अस्तिनास्तिवचसोः पर्यायप्रायतामेव प्रतिजानीते मुनिवरः। स एष विषयो मितमतीनां धियं नैवाधिरोहेत्। उपपादयामः; अवधत्त।

घटो नास्ति, पटो नास्तीति कश्चिदुवाचेति गृह्यताम्। वचसाऽनेन घटपटयोरभावोऽवबोधितो भवतीति मन्यध्वे। वस्तुतस्स नावबोध्येत। तयोस्सद्भाव एव बोध्येत। कथमिति चेत्; प्रकारद्वयेन सद्भावस्सिध्येत्। प्रकारद्वयमपि निरूपयामः। चैत्रो मैत्रसकाशं गत्वा घटं देहीति याचते; देवदत्तो यज्ञदत्तसकाशं गत्वा पटं देहीति याचते। उभावपि नेत्यवोचताम्। एतेन, मैत्रः स्वसकाशे घटो नास्तीत्युक्तवान्, यज्ञदत्तश्च स्वसकाशे पटो नास्तीत्युक्तवान् इत्येव खलु ज्ञायेत। घटो वा पटो वा जगत्येव नास्तीति ताभ्यामुक्तमिति तु नैव प्रतीयेत। नास्तीतिशब्दः अत्र नास्ति, इदानीं नास्ति, मत्सविधे नास्ति इत्येव स्वार्थबोधं जनयेत्। सर्वथाऽपि नास्तीत्यर्थप्रतीतिरनुभवविरुद्धा। अत्र नास्तीत्युक्ते अन्यत्रास्तित्वं सिद्धमेव। इदानीं नास्तीत्युक्ते कालान्तरेऽस्तित्वं सिद्धमेव। स्वसकाशे नास्तीत्यनेन पुरुषान्तरसकाशेऽस्तित्वं सिद्धमेव। तथा च नास्तीति शब्देन अस्तित्वमेव सिद्धमिति प्रदर्शितमभूत्। अयमेकः प्रकारः। अथ प्रकारान्तरं च निरूपयामः।

क्वचिदेको घट आसीत्। स च भग्नोऽभूत्। तदा घटो नास्तीति व्यवहार उत्पद्यते। एवं पटादितत्तद्वस्तुविषयकव्यवहारा अप्युत्पद्यन्त इति गृह्यताम्। एतादृशस्थलेष्वपि वस्तुनस्सर्वथाऽप्यभावो नैव सिध्येत्। घटो नेत्युक्ते कम्बुग्रीवादिमत्त्वरूप-आकारविशेषविशिष्टं वस्तु नास्तीत्येव कथितं स्यात्। घटे हि भग्ने शकलानि दृश्यन्त एव। पटे च शिथिले कन्था दृश्यत एव। शकलानामपि कन्थानामपि च विनाशे सूक्ष्मावयवा अवश्यमेव स्युः। तथा च स्थूलाकारविरहेऽपि सूक्ष्माकारसत्ता नैव निह्नवार्हा भवेत्। (सिद्धान्ते) उत्पत्तिविनाशशब्दयोरर्थोऽवधेयः। नवीनतया न किमपि वस्तु जायेत। तथा वस्तुन आत्यन्तिको विनाशश्च न भवेत्। सूक्ष्माकारं विहाय स्थूलाकारप्राप्तिरेवोत्पत्तिः; स्थूलाकारं विहाय सूक्ष्माकारप्राप्तिरेव च विनाशः।

अथ प्रकृतगाथायामवतरामः। यत्किमपि वस्तु निर्दिश्य इदं नास्तीत्युक्ते, तदर्थो द्वेधा सिध्येत्प्राङ्निरूपितदिशा। (१) अत्र नास्ति, इदानीं नास्तीति सिध्येत्। अथवा (२) स्थूलाकारेण नास्ति सूक्ष्माकारेणास्तीति सिध्येत्। उभयथाऽपि वादिनस्सिषाधयिषिता सर्वशून्यता वा भगवतो नास्तिता वा नैव सेद्धुमलम्। भगवानस्तीत्युक्ते स्थूलचिदचिद्विशिष्टस्य ब्रह्मणस्सत्ता गम्यते। भगवान्नास्तीत्युक्ते सूक्ष्मचिदचिद्विशिष्टस्य तस्यैव सत्ता गम्यते। आत्यन्तिकी असत्ता तु न मनागपि कथंचिदपि। तथाच ईश्वरोऽस्ति, ईश्वरो नास्तीत्युभयोरपि वचसोः ईश्वरसत्ताबोधन एव विश्रान्तता परिनिष्पन्ना। सर्वमस्तीति प्रतिज्ञया यत्सिध्यति, तदेव सर्वं नास्तीति प्रतिज्ञयाऽपि सिध्यतीति सुदृढमिदं प्रतिपत्तव्यम्।

शारीरकमीमांसायां द्वितीयाध्यायद्वितीयपादे * सर्वथाऽनुपपत्तेश्चेति सूत्रम् इतरभाष्यकारैरतिसंक्षेपतो व्याख्यातम्। सूत्रकारविवक्षितोऽर्थो न मनागपि तत्र निर्गलित इति स्पष्टं विदुषाम्। भगवद्रामानुजभाष्यं तु विद्वद्भिरवश्यं विमर्शनीयम्। तत्रत्यसूक्तिततिरेतद्गाथाविवर्तमयी। अत एव तस्यास्सूत्रकारहृद्गतार्थप्रकाशनपटुतेति अधुना निरूप्यते। श्रीभाष्यसूक्तिरेषा—किं भवान् सर्वं सदिति प्रतिजानीते? (तथा सति) तवाभिप्रेतं तुच्छत्वं

न संभवति । किं भवान् असदिति प्रतिजानीते ? (तदाऽपि) तुच्छत्वं न संभवति ? शून्यमिति प्रतिजानता सदिति प्रतिजानतेव सर्वस्य विद्यमानस्य अवस्थाविशेषयोगितैव प्रतिज्ञाता भवतीति तुच्छता न कुतश्चिदपि सिध्यतीति ।

अत्र, "किं भवान् सर्वं सदिति प्रतिजानीते ? तथा सति तवाभिप्रेतं तुच्छत्वं न संभवती"त्येतद्वाक्यम् एतद्गाथाप्रथमपादस्यैव रूपान्तरमिति निस्संदेहम् । अथ च, "किं भवान् असदिति प्रतिजानीते ?" इत्यादिकस्सूक्तिशेषस्तु द्वितीयादिपादत्रयस्य स्वच्छविवरणरूपः । इति सर्वमवदातम् ॥ .... (९)

(गाथा.) परन्दतण् परवैयुळ् नीर्तोरुम् परन्दुळन् * परन्दवण्डमिदेन निलविशुम्बोळिवर *
करन्द शिलिडन्तोरुम् इडन्तिहळ् पोरुडोरुम् * करन्देङ्गुम् परन्दुळन् इवैयुण्डकरने ॥ १० ॥

विस्तृतशिशिरजलनिधौ जलकणिकासु सर्वास्वपि अतिविशालब्रह्माण्डमण्डले यथा तथा (व्यक्तिषु जातिवत्) परिसमाप्तवृत्तिकः ; भूम्यामन्तरिक्षे च विच्छेदमन्तरेण अतिसूक्ष्म-अत्यल्पस्थलेषु सर्वेषु तत्तद्देशवर्तिषु सर्वात्मस्वपि परैरविदिततया अन्तर्व्याप्य बहिश्च व्याप्य वर्तते (क इति चेत्) प्रलयकाले सर्वस्य चास्य प्रपञ्चस्य अत्ता भगवान् यः, स एव ॥

* * * भगवतस्सर्ववस्तुषु पूर्णत्वमुच्यते गाथयाऽनया । परात्परस्य इदमपि लक्षणं खलु । समुद्रजलपरमाणुषु, पृथिव्यन्तरिक्षादिलोकान्तर्वर्तिष्वतिसूक्ष्मेष्वचिद्वस्तुषु च व्याप्य, तदन्तः प्रकाशमानेषु चिद्वस्तुषु च सुमहत्खण्डमण्डले इव आयासलेशमन्तरेण असंकुचितवृत्तिकः, जगत्संहर्ता च सुदृढप्रमाणसिद्धो यो भगवान्, तस्य पादारविन्दयुग्मं प्रणम भो हृदय ! इति प्रथमगाथया सह योजना चारुतरेति हृदयमाचार्याणाम् ।

अत्रेदमवधेयम् । उपनिषत्सु * अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः * इत्युक्ता व्याप्तिरेव गाथायामस्यामन्वग्राहि । उदाहृतश्रुतिवाक्ये 'सर्वम् अन्तर्बहिश्च व्याप्य स्थितः' इति पदेषु प्रत्येकशो दृष्टिर्निधेया । पदार्थवर्गेषु एकमप्यवर्जयित्वा सर्वेषु च व्याप्तिः, अन्तश्च व्याप्तिः, बहिश्च व्याप्तिः भगवतोऽत्र कथिता । अणुपदार्थेषु अन्तर्व्याप्तिर्न संभवितुमलमिति परे प्रत्यवतिष्ठन्ते । सावयवानामेव पदार्थानामन्तर्देशबहिर्देशव्यवहारप्रसक्तिः । निरवयवानामणुपदार्थानां तादृशव्यवहारप्रसक्तिविरहेण भगवतस्तेष्वन्तर्व्याप्तिर्न सुवचा । किंच, नैकस्मिन्नपि वस्तुनि भगवतः परिसमाप्य वर्तमानता स्वीकर्तुं शक्या । यद्येकस्मिन्नेव वस्तुनि तस्य स्वरूपं परिसमाप्तं स्यात्तर्हि वस्त्वन्तरे व्याप्तेरवकाश एव नास्ति । तथाच परिसमाप्यव्याप्तिकथनमसंगतम् । इत्येतत् परकीयं वादद्वयमपि गाथयाऽनया सुष्ठु प्रत्याख्यायते इति द्रष्टव्यम् ।

अत्र किंचिद्विव्रियते । शारीरकमीमांसायां * कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति पूर्वपक्षसूत्रम् । अथ सिद्धान्तसूत्रम् * श्रुतेस्तु शब्दमूलत्वादिति । शास्त्रप्रतिपन्नेष्वर्थेषु कुतर्कमूलकचोद्यपरिकल्पनां विहाय शास्त्रोक्तोऽर्थस्साञ्जलिबन्धं स्वीकर्तव्य इति तावच्छिक्षयति सिद्धान्तसूत्रमिदम् । * अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः * इति श्रुतिस्तावत्सुस्पष्टमाचष्टे व्याप्तिम् । "एकैकस्मिन् जलपरमाणौ अतिविशालब्रह्माण्ड इव व्यक्तिषु जातिवत् पर्याप्तवृत्तिः" इति दशोपनिषद्भाष्यकारसूक्तिश्च जागर्ति । श्रीमान् वेङ्कटनाथार्योऽपि न्याय-

सिद्धाञ्जने ईश्वरपरिच्छेदे परिसमाप्यवृत्तित्वविषयकमाक्षेपमुपक्षिप्य * श्रुतेस्तु शब्दमूलत्वादिति ब्रह्मसूत्रमेव प्रदर्श्य "यथागमं सर्वत्र पूर्ण एव भगवान्" इत्युपसंजहार। वेदार्थसंग्रहव्याख्यायां तात्पर्यदीपिकायां च "निरंशे प्रतिपदार्थं पूर्णवर्तिन्यपि स्वरूपे अंशशब्दव्यवहारः एकस्मिन्नेव वस्तुनि स्वरूपस्य पूर्णवर्तितया अन्यत्र वृत्त्ययोग्यत्वशङ्काव्युदासार्थः" इत्येषा दिव्यसूक्तिरुल्लसति। परिसमाप्यवृत्तित्वविषये परैर्यच्चोद्यं क्रियते, तदेव ह्युपक्षिप्य निरस्तं श्रुतप्रकाशिकाचार्यैः। "अन्यत्र वृत्त्ययोग्यत्वशङ्काव्युदासार्थः" इति सूक्त्याऽनया किं प्रतिपाद्यत इति हन्त परे नावदधते। एकस्मिन्नेव वस्तुनि भगवत्स्वरूपं पूर्णवर्ति चेत् तदन्यत्र कथं स्थातुं शक्नुयादिति शङ्का निरस्ताऽभूदिति खलु कथितमिह। निरस्तत्वेन निर्धारितायास्तस्या एव शङ्कायाः पुनः पुनरुत्थापकाः कथमिव भगवद्भाष्यकारसिद्धान्तपथानुवर्तिनो भवितुमर्हन्ति? "एकत्र समाप्तस्वरूपस्य अन्यत्र वृत्तियोग्यत्ववादो व्युदस्यते" इति श्रीसूक्तिशैलीसत्त्वे परेषां चोद्यं प्राण्यात्। न तथा खलु दृश्यते श्रीसूक्तिः।

जिज्ञासाधिकरणश्रुतप्रकाशिकायां च, * "य आत्मनि तिष्ठन्नित्युक्ते वेद्यामग्निस्तिष्ठति, तिले तैलं तिष्ठतीतिवत् बहिरबहिःस्थितिसाधारण्यात् तन्निरासार्थमाह— * आत्मनोऽन्तर इति" इत्येषा सूक्तिर्विलसति। एतया स्फुटीकृता ननु अणावात्मनि भगवतोऽन्तर्व्याप्तिः। सहस्रनामाध्याये. * अणुर्बृहत् कृशस्स्थूलः * इत्यत्र अणुपदं व्याचक्षाणा भट्टपादाः, "अतिसूक्ष्मदहराकाशाव्यक्तजीवानुप्रवेशसामर्थ्यात् अणुः" इत्यनुजगृहुः। तथाच अणुपदार्थेष्वन्तर्व्याप्तिः, प्रतिवस्तु परिसमाप्यवर्तनं चेत्युभयमपि भगवद्रामानुजसंप्रदायस्थसकलपूर्वाचार्यसम्मतमिति, विषयद्वये ऽस्मिन् कुचोद्यानामुत्थापनम् अर्वाचीनानामेव केषाञ्चित्कृत्यमिति च निर्धारणीयं भवति। अन्ततः इदमेकं सारमुपहरामः। भगवान् रामानुजो वेदान्तदीपे—"यथा जातिवादिनो जातिरेकैव अमूर्ताखण्डमुण्डादिषु अत्यन्तविलक्षणे ष्वनन्तेष्वपि परिसमाप्यैव वर्तते, न तत्र इतरवस्तुचोद्यमिति" इत्यनुगृहीतवानिति प्रसिद्धमेतत्। 'जातिः प्रतिव्यक्ति परिसमाप्य वर्तते' इत्युक्ते ओमित्यङ्गीकुर्वन्ति। सकलवस्तुविलक्षणं शास्त्रैकवेद्यम् अचिन्त्याप्रमेयाद्भुतशक्तियुक्तं परं ब्रह्म प्रतिपदार्थं परिसमाप्य वर्तत इत्युक्ते महत्तरं चोद्यमुपक्षिपन्ति हन्त!' इत्याचार्या एव स्वयं विस्मयन्ते विषीदन्ति च॥ अस्मदीय-ब्रह्मव्याप्तिपरिष्क्रियादिग्रन्थेषु विस्तरो द्रष्टव्य इति विरम्यते॥ .... (१०)

(गाथा.) करविशुम्बेरि वळि नीर्निलमिवै मिशै * वरनविल् तिरळ्वलि अळिपोरैयाय् निन्र *
परनडिमेल् कुरुहूर्च्चडहोपन् शोल् * निरनिरैयायिरत्तु इवै पत्तुम् वीडे॥ ११॥

दह्राकाशतेजोवायुजल पृथिवी-समवेतानां श्रेष्ठशब्द, दहनसामर्थ्य, बल, शैत्य, क्षमागुणानां निर्वाहकस्य परमपुरुषस्य दिव्यपादविषये कुरुकापुरावतीर्णे श्री शठकोपमुनिना विज्ञापिते शब्दार्थपुष्कलगाथासहस्रे एतद्दशकम् मोक्षप्रदम्॥

* * * सहस्रगीत्यामस्यां प्रतिदशकं च अन्ते फलश्रुतिगाथा निबध्यते। आप्तोक्तत्वप्रत्ययाय स्वनामनिर्देशः क्रियत इति वेदितव्यम्। श्रीसरोयोगिप्रभृति-श्रीभक्तिसारमुनीन्द्रपर्यन्ताश्चत्वारः, श्रीपाणसूरिश्चेति पञ्चैते दिव्यसूरय एवं फलश्रुतिगाथायां नानुजगृहुः। श्रीशठकोप-मधुरकवि-कुलशेखर-भट्टनाथ-गोदा-भक्तांघ्रिरेणु-पर-

कालमुनीन्द्रास्तु फलश्रुतिगाथाप्रणेतारश्च। अनन्यप्रयोजना उत्तमाधिकारिणो न किमपि फलं कामयेरन्निति स्थिते परमैकान्तिनो दिव्यसूरयः किमर्थं फलश्रुतिं निबध्नन्तीति नाशङ्कनीयम्; भगवान् भक्तानां सकलफलप्रद इति तत्प्रभावप्रख्यापने पर्यवसानमस्य बोध्यम्। फलविशेषलिप्सया केचित् प्रबन्धेऽस्मिन् प्रवणा भवेयुरित्यपि अभिसन्धिस्स्यादिव। स्वकृतिविषयभूतः परमपुरुषः पादद्वयेन विशेष्यते। पञ्चभूतगुणपञ्चकस्य नियामकस्स इत्युक्तं भवति। प्रथमपादे निर्दिष्टानां पञ्चानां भूतानां गुणाः क्रमेण द्वितीयपादे निर्दिश्यन्ते। आकाशस्य गुणश्शब्दः, तेजसो गुणो दहनशक्तिः, वायोर्गुणो बलम्, जलस्य गुणश्शैत्यम्, पृथिव्या गुणः क्षमा। एवंविधगुणपञ्चकस्वरूपः परमपुरुष इति सामानाधिकरण्येन कथनं निर्वाह्यनिर्वाहकभावनिबन्धनम्। भूतानीव भूतानां गुणा अपि परमपुरुषायत्ता इत्युक्तं भवति।

प्रथमदशकस्यास्यैवावसाने सहस्रगाथाप्रस्तावः सहस्रगाथाविज्ञापनसंकल्पवत्तां स्वस्य कथयतीति न मन्तव्यम्। यतो हि तादृशेन संकल्पेन नोपचक्रमे मुनिवरः। अपि तु स्वानुबुभूषितस्य भगवतः स्वरूपरूपगुणविभूतिचेष्टितानामानन्त्येन सहस्रं गाथा अवतरेयुरिति ज्ञानदशा समीक्ष्य समुदीरितमिति प्रतिपत्तव्यम्॥(११)

॥ श्रीरस्तु ॥

॥ द्रमिडोपनिषत्सङ्गतिप्रबन्धः ॥

[श्रीमद्वरवरमुनीन्द्रचरणारविन्दसमाश्रितपरम्परायामवतीर्णेन, प्रायस्त्रिशतसंवत्सरतः पूर्वं स्थितेन, श्रीकाञ्ची वरदाधिराजभगवन्मन्दिरप्राच्यगोपुरसन्निहितमठस्थापकेन, श्रीकाञ्च्यां नानाविधात्युत्तमकैङ्कर्यनिर्वाहकतया प्रसिद्धेन च वादिकेसरि-सुन्दरजामातृयतिवरेण प्रणीतोऽयं प्रबन्धः एकैकदशकसारार्थसंग्राहकः।]

—ः तत्र उपोद्घातः ः—

यश्चकार सकलार्थसम्पदां व्यञ्जनीं द्रविडवेदसंगतिम्।
तं द्वितीयशठकोपमन्वहं स्तौमि सुन्दरवराह्वयं मुनिम्॥

आचार्योदितपद्धत्या द्राविडाम्नायसंगतिम्। अभिधास्ये विशेषज्ञैरादराद्गृह्यतामियम्॥

श्रीमान् गुणाम्बुधिरवाप्तसमस्तकामः शौरिः शठारिमनुजन्म परिभ्रमन्तम्।
आकस्मिकेक्षणवशादतिनित्यमुक्तं वृन्दाग्रणीकरणशक्तिधरश्चकार॥

आद्ये वयस्यपि ततोऽनुभवन्मुरारिम् अस्तन्यपानरसिकः शठजिन्मुनीन्द्रः।
आस्थाय मौनमवधीर्य च लोकवृत्तम् आषोडशाब्दमतिवाहितवान् दिनानि॥

ये राघवे भरतलक्ष्मणजानकीनाम् ये गोपमुग्धसुदृशामपि नन्दसूनौ।
भावा रसैकवपुषः प्रथिताः शठारिस्तानेव वा तदधिकानुत तत्र लेभे॥

प्रह्लादनारदमुखप्रभवा च भक्तिः स्नेहस्तथा दशरथार्जुनवान्धवोत्थः ।
सर्वे च ते शठजितः पुरुषे परस्मिन् आनन्दने पदजुपामतिमात्रमासन् ॥

इत्थं हरेरनुभवामृतवारिराशिः अन्तर्मुनेः शठरिपोरमितश्शरीरे ।
सूक्त्या वहिः परिवहन् सुतरां जगन्ति सद्यस्सिपेच घनसंसरणानलानि ॥

मातापितृप्रभृतितोऽपि च वत्सलत्वात् सर्वोपकारचपलाच्छठजिन्मुनीन्द्रात् ।
वेदश्चतुर्विधतया विदितस्स साक्षादाविर्बभूव हि निवन्धचतुष्टयात्मा ॥

शब्दस्य संस्कृततया यदि गौरवं स्यात् बौद्धादिशास्त्रवचसामपि तत्प्रसङ्गः ।
वाच्येन चेत्कथितमुत्तमवाच्यमेषु भाषानिकर्ष इह तेन न शक्यशङ्कः ॥

पुंस्त्वं नियम्य पुरुषोत्तमताविशिष्टे स्त्रीप्रायभावकथनाज्जगतोऽखिलस्य ।
पुंसां च रञ्जकवपुर्गुणवत्तयाऽपि शौरेः, शठारियमिनोऽजनि कामिनीत्वम् ॥

या प्रीतिरस्ति विषयेष्वविवेकभाजां सैवाच्युते भवति भक्तिपदाभिधेया ।
भक्तिस्तु काम इह तत्कमनीयरूपे तस्मान्मुनेरजनि कामुकवाक्यभङ्गी ॥

यश्चैतसैव विशदानुभवः परस्मिन् संश्लेष एष गुणरत्नमहाम्बुराशौ ।
विच्छित्तिरस्य विरहस्त्विह याऽङ्गसङ्गालाभव्यथा विरचिता मुनिपुंगवस्य ॥

तत्राऽऽर्थयद्भवशमं प्रथमे प्रबन्धे शौरेर्गुणं शठजिदन्वभवद् द्वितीये ।
तृष्णामवर्धयत भोक्तुमिमं तृतीये यावन्मनोरथमलब्ध फलं चतुर्थे ॥

कैङ्कर्यमस्य नियमावधिवैर्युपायतत्स्वीक्रियाः विषयवाधनिराशते च ।
शीलं हरेरधिगताधिगमं शठारिस्तुर्यप्रबन्धशतकैर्दशभिर्जगाद ॥

—: प्रथमदशकसारार्थसंग्रहश्लोक एष :—

तत्रादिमे तु शतके दशके तदाद्ये सम्यग्गुणाकृतिविभूतिसमेतमीशम् ।
अध्यक्षयन्परमनुग्रहतस्तदीयाचद्दास्ययोजितमनाः शठजिद्बभूव ॥

श्रीमते रामानुजाय नमः । श्रीमद्वरवरमुनये नमः ॥

॥ अथ द्वितीयं दशकम्—वीडुमिन्मुत्तवुम् ॥

व्याख्यानावतारिका ॥ परोपदेशे प्रवर्तते मुनिवरोऽस्मिन् दशके । अधस्तनदशके संपन्नो भगवत्परत्वानुभवो विलक्षणमहोत्सवानुभवनिर्विशेषो ह्यासीन्मुनिवरस्य । तथा नाम परमं पुमांसमनुभूतवान्मुनिवरः तत्ताद्दशात्स्वानुभवादुपरतस्सन् परोपदेशे प्रवर्तत इतीदं हन्त कथं समघटत ? अनुभूतस्य विषयस्य किमहो सीमामवैक्षत ? उताहो अलमनुभूतेनेति विरज्यतेस्म ? इति चेत्; न न; परमयोगिनामपि वाङ्मनसापरिच्छेद्यस्वरूपस्वभावो भगवानिति असकृत् स्वयमेव कथयन् मुनिवरः सीमां समवलोकितवानिति न मनसाऽपि चिन्तयितुं शक्यम् ।

अलमनुभूतेनेति विरक्तिश्च सुतरां दुर्वचा मुनिवरस्य । यतो ह्यसौ स्वात्मानमुपरिष्टाद्वक्ष्यति * सदातनत्वेऽपि तदा-तनत्ववन्नवीभवत्प्रेमरसप्रवाहकम् । * एप्पोळुदुम् नाळ् तिङ्गळाण्डूळियूळिनोरुम् - अप्पोळुदैक्कप्पोळुदेन्नारावमुदमे * [२-५-४] इत्येषा गाथा मुनिवरस्य भगवदनुभवे अत्यन्तापर्याप्तिं हि दर्शयति । अनुक्षणमम्बुधिवदभिवर्धमान-प्रेमसंपद्भरस्यास्य मुनेः अलमनुभूतेनेति विरक्तिस्सर्वथाऽपि न शक्यशङ्का । कथं तर्हि परोपदेशे प्रवृत्तिः? किमस्य आचार्यपदवीप्रेप्सा समजनि? इति चेत्; हा हन्त! * नीशनेन् निरैयोन्रुमिलेनित्यादिभिः स्वात्मानम-धमाधममसकृदनुसंदधानस्यास्य साऽप्यसंभविनी । उच्यते, श्रूयताम् । परोपदेशसमयेऽपि स्वानुभववैकल्यं नास्य मनागपीति प्रथमतोऽवधारणीयम् । स्वानुभवस्यैव परिपाकदशा काचिदियं परोपदेशो नाम ।

लोके महाप्रवाहेऽवगाहमानो जनस्तावदेकाकी नावतरति, अपि तु भूयसस्संधानन्विष्यतीति दृष्टमिदम् । तथा अम्भोनिधेरप्यतिशयिते भगवति विगाहनं स्वस्यैकाकिनो दुष्करमासीत् । * एकस्स्वादु न भुञ्जीत भुञ्जीत बहुभिस्सहेति कथितत्वाच्च सहयोगार्थमन्यानवैक्षत । * मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परमिति गीतोक्तरीत्या च परेषां सहयोगः काङ्क्षणीय आसीत् । * कैङ्कर्यनित्यनिरतैर्भवदेकभोगैः नित्यैरनुक्षणनवीनरसार्द्रभावैः । नित्या-भिवाञ्छितपरस्परनीचभावैः मद्दैवतैः परिजनैस्तव संगसीय ॥ * [श्रीवैकुण्ठस्तवे] इत्युक्तरीत्या उत्तमाधिकारि-भिस्सह संभूय अनुबुभूषुरसन् भौमेषु जनेषु कटाक्षपातमतनोत् । हन्त! सर्वेऽपि जना अनन्तक्लेशभाजने घोरे संसारसागरे निमग्ना अन्नपानादिलिप्सापरवशाः परिभ्रमन्त आसन् । भगवद्विषये स्वात्मनो रुचिरिव तेषां शब्दा-दिविषयान्तरेष्वतिवेलाऽभिरुचिरभिवर्धत इत्यवैक्षत । तत्तादृशैरनुभूयमानान् क्लेशांश्च न सोढुमशक्नोत् । अथ तेषां विनयने समुदपद्यत सुमहत्तरं कुतूहलं मुनिवरस्य । कथमेषां विनयनं सुकरमिति विमर्शोऽप्यजनि । 'एते खलु चैतन्यशालिनो वर्तन्ते; विषयान्तरेषु असमीचीनान्युपेक्ष्य समीचीनान्युपाददते ह्यमी; भोज्येषु शाकशलाटु-कादिष्वपि सदसद्विवेचनेन असन्ति परित्यज्य सन्ति परिगृह्णन्ति खलु । एतादृशा अमी यदि परिपूर्णविवेकशक्तिं प्रयुञ्जीरन् तर्हि अनायासतो विनीता भवितारः । भगवद्विषयभोग्यतां विषयान्तरदुस्स्थतां च यदि वयं सम्यगुप-पादयेम, तर्हि स्वयं विमृश्य हेयविषयविसर्जनपूर्वकं प्राप्तविषयप्रवणा अवश्यमेव भवेयुः, अतश्च किंचिदुपदिशेम' इति समालोच्य, उपादेयविषयसाद्गुण्यसमृद्धिं हेयविषयदौर्गुण्यपूर्तिं च अतिसंक्षिप्ताभिरतिमधुराभिर्दिव्यसूक्तिभि-रुपदेष्टुमुपक्रमते ।

ननु * परीक्ष्य लोकान्कर्मचितान्......स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् * तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ * इत्याद्युक्तरीत्या प्रणिपाता-भिवादनपरिप्रश्नसेवावैयग्रयेण चिरमनुवृत्तिशीलेभ्यः आस्तिक्यामानित्वादिशिष्यलक्षणसंपन्नेभ्यस्सच्छिष्येभ्यः चिर-परीक्षणपूर्वकमपद्कर्णतयोपदेष्टव्यान् महार्थान् कथमसौ मुनिवर एवमवलीलया समुपदेष्टुमुपचक्रमे? भगवानपि विशिष्य ह्यादिशति * इदं ते नातपस्काय नाभक्ताय कदाचन । नचाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति * इति । सर्वमिदं जानन्नपि भगवान् मुनिवरोऽसौ साधारणीं प्रार्थनामपि विना कथमुपदिशति? इति चेदुच्यते । मुनिवरस्यास्य भक्तिर्यथा शास्त्रमर्यादायां नावतिष्ठते, तथा एतादृशी चर्याऽपि शास्त्रमर्यादां नैवानुवर्तते । शास्त्र-विधीनवधाय उपदेष्टारः अनुवृत्तिप्रसन्नाचार्याः कीर्त्यन्ते । परानर्थासहिष्णुत्वभूम्ना अनुपदिश्य वर्तितुमशक्नुवाना एवंविधा उत्तमपुरुषा मृग्या एव हि भूतले । प्रह्लादो, विभीषणो, मैथिलीति कतिचिदेव व्यक्तिविशेषा ईदृग्गोष्ठ्यां गण्यन्ते । सर्वथा तानप्यतिशयानोऽसौ मुनिवरः भगवन्तं रामानुजार्यमेव केवलं स्वसाम्ये सहते ।

उत्तमानां परोपदेशं प्रति कारणचतुष्टयमस्ति। (१) भगवता वयमुपदेशार्थमेव प्रेषितास्स्म इत्यनुसन्धानम्, (२) उपदेश्यानामभ्यर्थना, (३) अभ्यर्थनाभावेऽपि तदनर्थासहिष्णुता, (४) उपदेशं विना स्वात्मधारणाशक्तता चेति। अत्र द्वितीयस्यैकस्य कारणस्य विरहेऽपि अवशिष्टकारणत्रयसत्तया अक्षतत्वेन तत्कार्यभूतोऽयमुपदेशो निरवद्यगन्ध इति निश्चेयम्। परमकारुणिकेन भगवता स्वयमुपेक्षितानपि संसारिजनानुपदेशतो विनेतुं काममानस्यास्य मुनिवरस्य कृपातिशयो वाचामभूमिरित्येतावदेव प्रतिपत्तव्यमास्तिकैः। अत एवास्य साक्षाच्छिष्यो मधुरकविराह स्वप्रबन्धे * अरुळ् कोण्डाडुमडियवरिन्बुर........अरुळ् कण्डीरिव्वुलहिनिल् मिकदे * (छाया) स्वामी श्रीशठकोपसूरिरतुलां विष्णोः कृपां शंसतां भक्तानां स्वकृपाबलं प्रकटयन्.......... तस्यैतस्य कृपैव भूतल इह प्राबल्यमासीदिति ॥ इति ॥ .... *

॥ द्वितीयदशकप्रारम्भः ॥

(गाथा.) वीडुमिन् मुट्रवुम् * वीडु शेय्दु *
उम्मुयिर् वीडुडैयानिडै * वीडुशेय्मिने ॥ १ ॥

भगवद्व्यतिरिक्तसर्वविषयसङ्गं त्यजत। तथा त्यागं कृत्वा युष्मदीयमात्मवस्तु मोक्षनिर्वाहके भगवति समर्पयत ॥

* * * भगवद्व्यतिरिक्तविषयवैराग्यमन्तरा भगवद्भक्तेः प्रतिष्ठितत्वासंभवेन प्रथमत इतरविषयविरक्तिं विधत्ते। इतरविषयसङ्गविधूननपूर्वकमात्मसमर्पणं भगवति कुरुतेत्युपदिष्टमनया गाथया। अत्र षट्सहस्रिकायां श्रीकुरुकेशार्याः—"आत्मसमर्पणं नाम आत्मवस्तुनस्तच्छेषत्वसंवादः" इत्यनुजगृहुः। तच्छेषतायां विवादप्रहाणमेव समर्पणमित्युक्तं भवति। मूलगाथायां सर्वं त्यजतेत्यनुक्त्वा त्यजत सर्वमित्युक्तम्। शिशुः कश्चन स्वहस्ते यदि सर्पं गृहीत्वा तिष्ठेत्, प्रथमतो विजहीहि, विजहीहीत्युक्त्वा अनन्तरमेव खलु सर्पम् इति कथ्यते। तथैवात्रापि त्याज्यवस्तुक्रौर्यातिशयं द्योतयति त्यजतेति पुरस्तादुक्तिः। त्यक्तव्यं वस्तु किमित्यपेक्षायां सर्वमित्युच्यते। अहंकारममकारदूषितेषु वस्तुबृन्देषु 'इदमुपादेयम् इदं त्याज्यम्' इति विभागो हि नास्त्यत्र। कार्त्स्न्येनैव हि त्याज्यम्। श्रीरामचन्द्रपादाब्जसविधमागच्छन् विभीषणः * त्यक्त्वा पुत्रांश्च दारांश्च, * परित्यक्ता मया लङ्का * इति खलु सर्वसङ्गपरित्यागमाचख्यौ। भगवद्विषयस्वीकरणापेक्षया हेयविषयपरित्याग एव मुख्य इति द्योतितं भवति त्यागस्य प्रथमत उपदेशेन। त्यजतेति बहुवचनबलेन कृत्स्नभूतलवर्तिनस्सर्वेऽपि संसारिण उपदेशलक्ष्यभूता इति गम्यते। नहि खलु कश्चन शान्तो दान्तश्च सन्नुपेत्य प्रार्थ्य मुनेरुपदेशं लभते। केवलं निरवग्रहेण स्वानुग्रहेण क्रियमाण उपदेशस्सर्वजनतोद्देश्यक एव हि भवितुमर्हति।

सर्वविषयसङ्गं त्यजतेति कथनानन्तरं तथा त्यागं कृत्वेति यद्वर्तते तदिदं किमावश्यकम्? 'त्यजत, भजत' इति हि वक्तव्यम्। अथवा त्यक्त्वा भजतेति वक्तव्यम्। त्यजतेति पुरस्तात्कथनम्; अथ च 'त्यागं कृत्वेति तदनुवदनं च किमर्थमिति चेत्; अयमनुवादः त्यागमात्रस्य परमप्रयोजनतां व्यञ्जयितुमित्याचार्याः। भोग्यतातिशयशालिनो ह्यर्थस्य भवत्याम्रेडनम्। लोके असत्सङ्गदूषितं कमपि बन्धुजनमुद्दिश्य असत्सङ्गवर्जनं सत्सङ्गवरणं चेति द्वितयमुपदेश्यं भवत्याप्तानाम्। सत्सङ्गवरणविरहे सत्यपि असत्सङ्गवर्जनमतिप्रधानमिति विभाव्यते खलु। तदेव परमप्रयोजनतया चावधार्यते। तद्वदेव संसारिणां भगवद्विषयस्वीकरणविरहेऽपि असद्वि-

षयप्रहाणममिरामतरमिति मुनिवरो मन्यते। कृतापराधो राजपुत्रः कारागारवासं लम्भितोऽभूदिति गृह्यताम्। तस्य कारावन्धाद्विमोचनं राज्याभिषेचनमिति यद्यपि द्वितयमुद्देश्यम्; तथाऽपि राज्याभिषेचनादपि बन्धाद्विमोचनमत्यन्ताभिमतं खलु ॥

मूलगाथाया उत्तरार्धं द्राविडत्वावसन्निवेशे बहुविधानर्थान् सहते। युष्मदीयस्य आत्मनश्शरीरस्य च यस्स्वामी तत्सकाशे समर्पयतेति संस्कृतानुवादस्तं भवितुमर्हति। युष्मदात्मानं स्वावसथत्वेन स्वीकृतवान् यः तत्सकाशे समर्पयतेत्यपि स्यात्। युष्मदात्मसमर्पणे समुद्दिष्टे सति स्वामिनि समर्पयत इत्यपि स्यात्। युष्मदात्मानं परमव्योमनिकेतने भगवति समर्पयत इत्यपि स्यात्।

अधस्तात्प्रथमदशके उद्देश्यं दैवतं प्रति नारायण इति वा विष्णुरिति वा नामविशेषो नैवोद्घाटितः। परात्परः, दृढप्रमाणसिद्धः इत्यादिसामान्यशब्दैरेव निरदिश्यत। तद्वदेवात्रापि स्वामीति, मोक्षनिर्वाहको भगवानिति च सामान्यत एव निर्देशः क्रियते। विवक्षितो देवताविशेषः को नामेति जिज्ञासातिशयमुत्पाद्य परस्ताद्विशदेन विवक्षति मुनिवरः। दशकेऽस्मिन् दशमगाथायामेव नारायणनाम निर्देक्ष्यति।

वीडु शेय्मिने इति पाठवत् वीडु इशैमिने इति पाठोऽपि सांप्रदायिकः। स्वारस्यातिशयोऽप्यत्र वर्तते। युष्माभिरात्मसमर्पणं न कर्तव्यम्। तत् क्रियतामिति केनचिदुक्ते तत्र आक्षेपाकरणमेव वरमिति भावः। * यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः। तेन चेदविवादस्ते मा गङ्गां मा कुरून्गमः ॥ * इति मनूक्तं श्लोकरत्नमिह स्वादिष्टं व्याख्यायते पूर्वाचार्यैः। गाथाया अस्याः परमतात्पर्यमेतत्—* योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥ * इत्युक्तरीत्या भगवत्स्वामिकात्मद्रव्यापहाररूपमहापातकमूलस्य भवरोगस्य * अच्युताहं तवास्मीति सैव संसारभेषजम् * इत्युक्तरीत्या स्वामिविषये स्वात्मनस्तदीयताप्रतिपत्तिमन्तरेण नान्यत्किमपि भेषजमस्तीति ॥ .... (१)

(गाथा.) मिन्निन्निलैयिल * मन्नुयिराक्कैहळ् *
एन्नुमिडत्तु * इरैयुळुमिन् नीरे ॥ २ ॥

शाश्वतिकेनात्मना परिगृहीतानि शरीराणि तडिदपेक्षयाऽप्यस्थिराणीत्यमुं विषयम् (हे संसारिणः!) यूयमेव मनागवधत्त ॥

* * * संपदस्स्वप्नसंकाशा यौवनं कुसुमोपमम्। तडिच्चञ्चलमायुश्च कस्य स्याज्जानतो धृतिः॥ * इत्यस्य श्लोकस्योत्तरार्धं विशिष्यानुचिन्त्य गाथामिमामाह मुनिवरः। गाथाया अस्या हृदयं द्वेधा निर्वोढुं योग्यम्। अधस्तनगाथया कृतमुपदेशं श्रुतवन्तस्संसारिणः, "अस्तु तावत्, तथैव करिष्यामः; क्षिप्रं तत्कर्तव्यमिति को निर्बन्धः? द्रक्ष्यामः क्रमशः" इति मन्येरन्निति कृत्वा, हा हन्त! क्षणभङ्गुरतामस्य शरीरस्य नावगच्छथ यूयम्; * गृहीत इव केशेषु मृत्युना धर्ममाचरेत् * इति खलु महान्त उपदिशन्ति; अतश्च मदुक्तिनिर्वर्तने त्वरितव्यं युष्माभिः—इत्युच्यत इति। अथवा, उपदेष्टव्यत्वेनाभिमतेष्वर्थेषु अयमप्यन्यतमोऽर्थ इति कृत्वा उपदिश्यत इति। [मन्नुयिर्] इत्यनेन आत्मनो नित्यत्वमुच्यते। * न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः। अजो नित्यश्शाश्वतोऽयं

पुराणो न हन्यते हन्यमाने शरीरे . * इत्यादिप्रमाणप्रतिपन्ना ह्यात्मनो नित्यता। शरीरवदात्मनोऽपि नश्वरत्वे श्रेयस्साधनवैयग्री कस्यापि नोत्पद्येत। हे जनाः! नश्वरस्य शरीरस्य किमपि श्रेयस्संपादयितव्यमिति नाहमुपदिशामि; शरीरे नष्टेऽपि य आत्मा शाश्वतिको विराजिष्यते, तस्यैव श्रेयस्संपादनमाशासे-इति सूचितं भवति। यूयमेव मनागवधत्त त्वनेन प्रमाणानपेक्षः, सदाचार्योपदेशनिरपेक्षश्चैष विषयो विवेकिनां स्वत एव सुगम इत्युक्तं भवति॥ .... (२)

(गाथा.) नीर् नुमदेन्रिवै * वेर्मुदल् माय्त्तु *
इरै शेर्मिनुयिर्क्कु * अदन् नेर् निरैयिल्लै॥ ३॥

अहंकारममकारौ सवासनं विनाश्य सर्वेश्वरं समाश्रयत; आत्मनः तत्सदृशी पूर्तिरन्या नास्ति॥

* * *—* अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः। अविद्यातरुसंभूतिबीजमेतत् द्विधा स्थितम्॥ * इत्युक्तरीत्या देहतदनुबन्धिविषयकाहंकारममकारलक्षणसंसारहेतुपरिहरणपूर्वकं भगवन्तं भजत; न तत्सदृशं हितान्तरमस्तीत्युक्तं भवति। * संसारार्णवमग्नानां विषयाक्रान्तचेतसाम्। विष्णुपोतं विना नान्यत् किंचिदस्ति परायणम्॥ * इति प्रमाणदृष्टथा गाथेयं कीर्तिता। मूले, अहंकारममकाराविति वक्तव्ये त्वंकारतवकारावित्येवास्ति कथितम्। स्ववाचा अहं ममेति अनुवादरूपेण कथनमप्यनर्थाय कल्पेतेति मुनिवरस्य हृदयमिव॥....(३)

(गाथा.) इल्लदुमुल्लदुम् * अल्लदवनुरु *
एल्लैयिलन्नलम् * पुल्कु पत्तु॥ ४॥

(समाश्रयणीयत्वेन कथ्यमानस्य) तस्य भगवतस्स्वरूपम् विकारास्पदत्वेन असच्छब्दवाच्यादचेतनाद्विलक्षणम्; विकारानास्पदत्वेन सच्छब्दवाच्याचेतनादपि विलक्षणम्; निरवधिकानन्दमयं च; (तादृशं भगवन्तम्) विषयान्तरसङ्गं विहाय समाश्रयस्व॥

* * * उपादेयतया उपदिश्यमानस्य वस्तुनो भोग्यताया अप्रदर्शने परिग्रहरुचिर्न भवेत्खलु; अतस्तां भोग्यतामाह गाथयाऽनया। हेयप्रत्यनीकतया कल्याणैकतानतया च चेतनाचेतनविलक्षणस्वरूपः, निरवधिककल्याणगुणविशिष्टतया निरवधिकभोग्यताशाली चायं भगवान्। अतश्च हेयविषयसङ्गपरित्यागपूर्वकं स सेव्य इत्युक्तं भवति।

गाथायाः पूर्वार्धे चेतनाचेतनवैलक्षण्यं विवक्षुर्मुनिवरः चेतनपदं वा अचेतनपदं वा न प्रायुङ्क्त; सच्छब्दम् असच्छब्दं चैव प्रयुक्तवान्। सदसच्छब्दाभ्यां चेतनाचेतनयो र्व्यवहारो वेदान्तिनां गोष्ठीषु सुप्रसिद्धः। * ज्योतींषि विष्णुर्भुवनानि विष्णुरित्यादिपुराणरत्नश्लोके (२-१२-३८) * यदस्ति यन्नास्ति च विप्रवर्य * इति कथितं प्रथितम्। तत्र विष्णुचित्तार्या एवं व्याचचक्षिरे—"यतश्चाचिद्वस्तु क्षेत्रज्ञकर्मानुगुण परिणामास्पदम्, ततः तत् नास्तिशब्दाभिधेयम्; इतरत् अस्तिशब्दाभिधेयमिति अर्थादुक्तम्" इति। अतश्च संस्कृतभाषायां

सदसच्छब्दाविव द्राविडभाषायाम् 'उळदु, इलदु' शब्दावपि चिदचितोर्वाचकाविति सिद्धम्। भगवतस्स्वरूपं नश्वरेणाचेतनवस्तुना न तुल्यम्; अचित्संसर्गेण 'अहं सुखी, अहं दुःखी' इत्यध्यवस्यता चेतनवस्तुनाऽपि न तुल्यमित्युक्तं भवति। तर्हि कीदृशमिदमिति चेत्; * आनन्दमयः * समस्तकल्याणगुणात्मकोऽसौ * इत्याद्युक्तरीतिकम्। एतादृशं भगवन्तं सेवस्वेति वक्तव्ये [पुलू हु] इति तावन्मूले कथितम्। परिष्वजस्वेति तदर्थः। संसारिणः अङ्गनात्परिष्वङ्गे भोग्यतातिशयमभिमन्यन्त इति दर्शनात् भगवत्परिष्वङ्गः कीदृश इति पश्यतेति वदन्निव मुनिवरः परिष्वजस्वेत्याह। अधस्तनगाथात्रयेऽपि उपदेश्यविषये बहुवचनप्रयोगदर्शनात् अत्रापि बहुत्वविवक्षैव सुनिश्चया। संसारिवृन्दस्य संबोध्यमानत्वं बोध्यम्॥ .... (४)

(गाथा.) अत्तदु पत्तेनिल् * उत्तदु वीडुयिर् *
शेत्तदु मत्तुरिल् * अत्तिरै पत्ते॥

प्राकृतविषयसङ्गे प्रनष्टेऽपि कैवल्यात्मभोगरुचिः प्रसज्येत; तामपि कैवल्यरुचिं विधूय भगवच्छेषैकरसस्वरूपानुरूपपुरुषार्थलिप्सायां सत्याम् विषयान्तरसङ्गविधूननक्षण एव 'भगवद्भोग एव पुरुषार्थः' इति मत्वा भजनं वरम्॥

* * * आत्यन्तिकभगवदनुभवविरोधिभूतस्य स्वरूपाननुरूपस्य कैवल्यमोक्षस्यापि हेयताज्ञापनपूर्वकं स्वरूपानुरूपभगवदनुभवप्रावण्यमेव वरमित्युपदिश्यते गाथयाऽनया।

लोको भिन्नरुचिरिति न्यायेन जनानां रुचिरुच्चावचा। ऐहलौकिकं समग्रमैश्वर्यं केचन कामयन्ते। * ते तं भुक्त्वा स्वर्गलोकं विशालम् * इत्युक्तं विशङ्कटं स्वर्गभोगमन्ये कामयन्ते। तथा आत्मानुभवरूपकैवल्यमोक्षमपि केचन कामयन्ते। आत्मा हि संसारसागरे निमग्नो यदा पङ्कदिग्धो मणिरिव स्वकीयनैसर्गिकप्रभाविमुक्तो मालिन्याभिभूतो भवति, स एव संतीर्णसंसारार्णवस्सन् विधूतपङ्कसङ्गमणिवत् समिन्धानस्वाभाविकप्रभापुञ्जः स्पृहणीयो भवेत्। तादृशं स्वात्मानमेवानुभोक्तुं केषांचन कामना जायते। त एव केवला इति, कैवल्यमोक्षेच्छव इति च कथ्यन्ते। परमभोग्यभगवदनुभवैकशीलानामात्मनामेष कैवल्यमोक्षोऽपि हेयो भवति। अत एव श्रीवत्साङ्कमिश्रैरनुगृहीतं वरदराजस्तवे—* भोगा इमे विधिशिवादिपदं च किंच स्वात्मानुभूतिरिति या किल मुक्तिरुक्ता। सर्वं तदूषजलजोषमहं जुषेय हस्त्यद्रिनाथ! तव दास्यमहारसज्ञः॥ * इति। कैवल्यस्याप्यपुनरावृत्तिलक्षणमोक्षतायाश्शास्त्रसम्मतत्वेन आत्मभोगे प्रवृत्तानां यावदात्मभावि तस्मिन्नेव क्षोदीयसि भोगे निष्णाततया अवर्जनीयत्वापत्त्या तत्र रुचिमात्रमपि मा भूदिति परमकृपयोपदिशति मुनिवरः॥ .... (५)

(गाथा.) पत्तिलनीशनुम् * मुत्तवुम् निन्ननन् *
पत्तिलैयाय् * अवन् मुत्तिलडङ्गे॥ ६॥

सर्वेश्वरोऽपि सङ्गस्वभावस्सन् सर्वसमो विराजते; त्वमपि विषयसङ्गरहितस्सन् तस्य भगवतः सर्वेषु कैङ्कर्येषु अन्वयं प्राप्नुहि॥

* * * भगवति परमपुरुषेऽनुसंधीयमानं परात्परत्वं सर्वथा जघन्यानां संसारिणामुद्वेगाय खलु कल्पेत; तत्तादृशः परात्परो भगवान् कथमतिनीचानामस्माकं भोगार्हो भवितेति शङ्का ह्यवर्जनीया। तादृशीं शङ्कामपोहति सेयं गाथा। अत्र षट्सहस्रिकासूक्तिरेषा—"भगवन्तं यद्यपि वयं वृणीमहे, स तु सर्वेश्वरःखलु; स किमस्मान् विषयीकुर्या-दित्यत्राह; सर्वेश्वरोऽपि सन् आश्रितेषु सर्वेष्वपि समरूपस्नेहस्वभावस्सः; ततश्च त्वमपि तद्विषये स्नेहस्वभावो भूत्वा तद्विषयकसर्वशेषवृत्तिष्वन्वयमवाप्नुहि" इति।

गाथाया उपक्रमे स्थितं [पत्तिलन्] इति पदं स्नेहविरहित इत्यर्थकमिति भायात्। अस्तु तावदर्थस्सः। सङ्गस्वभाव इत्यर्थोऽपि तस्य पदस्य शोभनः। आश्रितैस्सह ऐकरस्येन वर्तनमेव तस्य स्वभाव इत्युक्तं भवति। भगवान् वासुदेवो यदा कंसवधार्थं मधुरापुरीमयासीत् तदा कुब्जासमर्पितदिव्यचन्दनानुलिप्तगात्रस्सन् पुष्पलिप्सया मालाकारगृहं स्वयमेव ययौ। तदात्वे स भक्तवरो माल्यकृदाह * प्रसादपरमौ नाथौ मम गेहमुपागतौ। धन्यो-ऽहमर्चयिष्यामि * इति। श्लोकरत्नमिदमिह पूर्वाचार्यैरतिमधुरं व्याख्यायते। अत्र पूर्वार्धे गाढदृष्टिर्निधेया। कृष्णबलरामावत्र विवक्षिताविति द्विवचनम्। प्रसादपरमत्वं नाथत्वं चेति द्वितयमत्रोच्यते। प्रसादः परमः ययोस्ताविति प्रसादपरमौ। प्रसादो नाम सौशील्यपरमकाष्ठा। सैवं भगवति भृशं शोभते। नाथत्वं तु अवर्ज-नीयतया स्थितम्। परत्वविरहे सति न खलु सौशील्यं प्ररोचनं भविष्णु। उपरि * मम गेहमुपागताविस्यनेनापि विशेषणेन तदेव सौशील्यमूर्जितं क्रियते। एतौ हि शेषिणौ शेषभूतं मां स्वसविधे समाहूय कर्तव्यमाज्ञापयितुं प्रभवन्तावपि हन्त मम गेहमुपागतौ - इति तावद्विद्धो भवति माल्योपजीवनः।

गाथादौ वर्तमानस्य [पत्तिलन्] इति पदस्य सङ्गविरहित इत्यर्थस्सर्वेषां प्रथमप्रतीतिगोचरो भवति। तमिममर्थं श्रीभट्टपादा आद्रियन्ते। * वासुदेवोऽसि पूर्णः * इत्युक्तरीत्या समस्तकल्याणगुणात्मको ज्ञानानन्दामल-स्वरूपो नित्यसूरिपरिषत्प्रभुरपि स सर्वेश्वरो नित्यसूरिषु प्रेमवान् न भवति; परं तु अस्मादृशेषु संसारिष्वेव सर्वेषु प्रेमवान् भवति। अतस्त्वमपि विषयान्तरेषु प्रेमविधुरस्सन् तस्मिन्नेव प्रेमवान् भूत्वा * वासुदेवस्सर्वमिति तमेव सर्वस्वं प्रतिपद्येथा इत्यर्थं इत्याहुः॥ .... (६)

(गाथा.) अडङ्गेळिल् सम्पत्तु * अडङ्गक्कण्डु *
ईशन् अडङ्गेळिलह्देत्तु * अडङ्गुह उळ्ळे॥ ७॥

कार्त्स्न्येन परमभोग्याम् भगवद्विभूतिमखिलामवेक्ष्य "सर्वाऽप्येषा विभूतिः अस्मत्प्रभोः खलु" इति मत्वा (त्वमपि) भगवच्छेषभूतविभूतिमध्ये अन्तर्भव॥

* * * स भगवान् सङ्गस्वभावो भवतु कामम्। अपरिच्छिन्नोभयविभूतिविशिष्टो हि सः। अतिक्षुद्राणां क्षोदिष्ठो-पकरणानां चास्माकं स कथं सन्निहितो भवेदित्येवं भृशमाविलहृदयान् संसारिजनान् प्रति कथ्यते गाथेयम्।

भगवान् अपरिच्छिन्नविभूतिक इति तु सत्यमेव। सर्वाङ्गरमणीयां सर्वामपि तदीयां संपदमवलोक्य 'इयं सर्वाऽपि संपत् सर्वेश्वरस्य अस्मत्पितुर्हि विभूतिः' इत्यनुसंधाने कृते अथ आविलमनस्कताया नाल्पोऽप्यवकाश इति निपुणतरमुपपाद्यते।

अत्र लौकिककथाद्वयमुदाहरन्ति पूर्वाचार्याः। क्वचन कश्चित् वणिजां वरिष्ठ आसीत्। स च वाणिज्येन विशेषतस्संपिपादयिषुरर्थराशिं द्वीपान्तरयात्रामकामयत। सोऽयं निजपत्नीमन्तर्वत्नीं सत्यां प्रतस्थे द्वीपान्तरम्। अथ द्वित्रमासेभ्यः परस्तादन्तर्वत्नी सा प्रसुषुवे कुमारम्। स च कुमारः क्रमादभिवर्धते। अवगतपुत्रोत्पत्तिवृत्तान्तो वणिगतितरामानन्दकन्दलितान्तरङ्गोऽपि यथाकामं स्वदेशं प्रत्यावर्तितुमपारयन् वाणिज्ये धैयप्रयेण तत्रैव द्वीपान्तरे कालमतिवाहयति। कुमारस्तु समेधमानवयाः स्वयमपि निजं कुलकृत्यमेव बहुमन्वानो वाणिज्य एव निष्णातः कालं नयति। कुमारो विंशे वयसि पदं निदधे। अद्याप्यदसीयः पिता द्वीपान्तरमेवाधिवसति वाणिज्यविवशः। पितेव स्वयमपि कमपि द्वीपमुपगम्य पण्यभारानानीय स्वदेशे वाणिज्यं कर्तुकामः पुत्रो द्वीपान्तरं गत्वा वस्तूनि संगृह्य नौकाध्वना समागच्छति। यस्यां नौकायामयं समायाति तस्यामेव तदीयः पिताऽपि दिष्ट्या समायाति सह बहुभिः पण्यपूलकैः। यदा च सेयं नौका निजमवस्थानघट्टं प्रापत्, तदा वणिक्पुत्रोऽयं सपण्यभारः अवरोहणसज्जोऽभूत्; तथा पिताऽपि च सः। नौकावतारस्थलसन्निहिते यस्मिन् स्थले पुत्रकोऽयं स्वकीयान् पण्यभारानवरोपयितुं सन्नह्यति, तत्रैव स्थले तदीयः पिताऽपि स्वानीतवस्तुवर्गमवतारयितुमिच्छति। उभावप्येतावज्ञातपरस्परसंबन्धौ—अस्मदीयोऽयं पुत्र इति न जानाति पिता, ममायं जनक इति न जानीते पुत्रः। संबन्धज्ञानस्य का प्रसक्तिरनयोः? यदयं पिता पुत्रप्रसवात्प्रागेव प्रस्थितो द्वीपान्तरम्, नाद्यावधि पुत्रमुखमपश्यत्। अत एव कोऽप्ययं वैदेशिको वणिगिति पुत्रो मन्यते; पिताऽपि तथैव मन्यते पुत्रम्। स्थलविषयको विवादस्तयोर्विजजृम्भे; मयैवेदं स्थलं प्रथमतः पर्यवेक्षितमिति द्वावप्यश्रान्तमाक्रोशन्तौ चिरं कलहायेते।

अथ द्वयोरप्यनयोः पितृपुत्रभावसम्बन्धं विजानन् तटस्थः कोऽपि वणिगुभयोरपि सम्बन्धमावेद्य, पितृपुत्रयोर्युवयोः किमिदमकाण्डकलहताण्डवमिति सस्मित माचचक्षे। पश्चात् किं प्रवृत्तं स्यादिति मन्यध्वे? यदा च सम्बन्धोऽवगतः सद्य एव द्वयोरपि वस्तुजातमेकस्वामिकमभूत्। कलहश्च प्रशान्तः। एवमेतत्।

अपरा चेयं बालककथा—कश्चन राजपुत्रोऽर्भकः वाह्यान्युपवनादीनि दिदृक्षते स्म। राजपुरुषस्तं बहिर्नीत्वा वैनोदिकवस्तूनि प्रदर्शयन्नटतिस्म। तदा विलक्षणपुष्पफलद्रुमादिशोभितः कश्चन महानारामश्चक्षुर्विषयतां गतः; आरामद्वारे च खड्गहस्तौ द्वारपालाववलोक्य अर्भकोऽयं मनागिव चकितः राजपुरुषसकाशे वदति—'महानुभाव! आरामान्तः प्रविश्य दिदृक्षा मम बलवती वर्तते; भयानकरूपयोर्द्वारपालकयोर्हस्ते यत्किंचिद्धनं प्रदाय मामन्तर्नेतुं शक्नोति वा भवान्?' इति। स तावदारामो वस्तुतो महाराजस्य। स्वपितुरेवेदमुद्यानमित्यनभिज्ञानादर्भक एष चकित एवमुवाच। अथ राजपुरुष आह—'आयुष्मन्! तव पितुरेव खल्वयमारामः, निश्शङ्कमन्तः प्रवेष्टुमर्हसि' इति। अनन्तरमर्भकः अविकारधोरण्या खल्वन्तः प्रविशति। एतेन किमवगतम्? संबन्धज्ञानविरहे सति भीतिः, तत्सत्त्वे तु महती धीरता, हृष्टता, धृष्टता चेति। एवमेव भगवता संबन्धसद्भावमविज्ञाय वयं

क्रियामहे; संबन्धज्ञाने सति हि संपन्ने क्लेशगन्धस्यापि न प्रसक्तिरित्युक्तं भवति ॥ अत्रेयं भूमाधिकरणश्रीभाष्यश्रीसूक्तिरप्यवधेया—"कर्मवश्यानां क्षेत्रज्ञानां ब्रह्मणोऽन्यत्वेनानुभूयमानं कृत्स्नं जगत् तत्तत्कर्मानुरूपं दुःखं च भवति। अतो ब्रह्मणोऽन्यतया परिमितसुखत्वेन दुःखेन च जगदनुभवस्य कर्मनिमित्तत्वात्कर्मरूपाविद्याविमुक्तस्य तदेव जगत् विभूतिगुणविशिष्टब्रह्मानुभवान्तर्गतं सुखमेव भवति। यथा पित्तोपहतेन पीयमानं पयः पित्ततारतम्येनाल्पसुखं विपरीतं च भवति; तदेव पयः पित्तानुपहतस्य सुखायैव भवति। यथैव राजपुत्रस्य पितुर्लीलोपकरणमतथात्वेनानुसन्धीयमानं प्रियत्वमनुपगतं तथात्वानुसन्धाने प्रियतमं भवति। तथा निरतिशयानन्दस्वरूपस्य ब्रह्मणोऽनवधिकातिशयासङ्ख्येयकल्याणगुणाकरस्य लीलोपकरणं तदात्मकं चानुसन्धीयमानं जगन्निरतिशयप्रीतये भवत्येव ॥" इति ॥ .... (७)

(गाथा.) उळ्ळमुरै शेयल् * उळ्ळविम्मूऩ्ऱैयुम् *
उळ्ळिक्केडुत्तु * इऱैयुळ्ळिलॊडुङ्गे ॥ ८ ॥

मनोवाक्कायरूपेण वर्तमानं त्रितयं परिशील्य करणत्रयमपि विषयान्तरप्रवणमेव हन्तास्तीति ज्ञाने सति तत्प्रावण्यमपोह्य स्वामिभूतस्य भगवतो विषये प्रावण्यं वह ॥

* * * भगवति कैङ्कर्यं कीदृशैरुपकरणैः कर्तव्यमित्याशङ्कायामुच्यते गाथैषा। नूतनतया उपकरणान्वेषणप्रयासो माभूत्; स्वतस्सिद्धानां वाङ्मनःकायात्मनामुपकरणानां भगवत्परिचर्यार्थपरिकल्पितत्वानुसन्धानपूर्वकं तेषां करणानां भगवद्व्यतिरिक्तविषयेभ्यो विनिवर्तनं कर्तव्यमित्युपदिश्यते। मानसिकेन ध्यानेन, वाचिकेन स्तवेन, कायिकेन किंचित्कारेण च केवलं समाराध्यो भगवानित्युक्तं भवति।

* विचित्रा देहसंपत्तिरीश्वराय निवेदितुम्। पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता ॥ * इति वचनमिह स्मर्तव्यम्। करणत्रयस्थितिपर्यालोचना प्रथमतः कर्तव्या। अस्मदीया मनोवाक्कायाः कीदृशे कर्मणि व्यापृतास्सन्तीति तावद्विमर्शनीयमथ। विमर्शे तु अपथे प्रवृत्तिरेव गम्येत स्वतः। अथ च सा प्रवृत्तिर्विलोपनीया। कुर्वद्रूपाणां करणानां कुत्रचित् प्रवृत्तिरवर्जनीया स्यात्। स्वरूपप्राप्तं भगवद्विषयप्रवर्तनं तेषां क्रियतामित्युपदेशसारः ॥ ... . (८)

(गाथा.) ऒडुङ्गवन् कण् * ऒडुङ्गलुमेल्लाम् *
विडुम्पिन्नुमाक्कै * विडुम्पोऴुदॆण्णे ॥ ९ ॥

भगवति सर्वेश्वरे करणत्रयप्रावण्ये समासञ्जिते सति ज्ञानानन्दादिसंकोचास्सर्वे विमुच्येरन्; अथ च वर्तमानशरीरस्य वियोगकालम् प्रतीक्षस्व ॥

* * * भगवद्भजनविरोधिबाहुल्यमनुचिन्त्य खिन्नानां संसारिणां खेदनिवृत्तये गीयते गाथैषा। विरोधिनिवृत्तिसमनन्तरं भगवत्सेवा कर्तव्या वा, भगवत्सेवानन्तरं विरोधिनिवृत्तिर्भवति वेति विमर्शे, भगवत्सेवनमन्तरा विरोधि-

निवृत्तेरसंभवात् विरोधिनिवृत्त्यनन्तरं भगवतस्सेवनमित्येतदसंभवपराहतम्। सेव्यमानेनौषधेन रोगनिवृत्तिरिव, क्रियमाणेन भगवत्सेवनेन विरोधिनिवृत्तिरित्येव सुवचत्वात् भगवत्सेवानन्तरं विरोधिनिवृत्तिरित्यपि न। भगवत्सेवनस्य यावदात्मभावित्वेन तदनन्तरमिति वक्तुं योग्यः काल एव नास्ति। वर्तमानकालावच्छिन्नभगवत्सेवनेन विरोधिनिवृत्तिरभिमता। लोके व्याधिनिवृत्तये सेव्यमानेष्वौषधेषु कानिचन व्याधिं न निवर्तयन्ति। कानिचन प्रातिकूल्यपरुषाणि व्याधिमभिवर्धयन्ति। कतिचित्तु स्वसेवनसमनन्तरं क्रमशो व्याधिमपगमयन्ति। स्वसेवनोपक्रमकाल एव आनुकूल्यप्रदर्शनक्षमाण्यौषधानि तु मृग्याणि। पराशरमहर्षिणा * भेषजं भगवत्प्राप्तिरिति भेषजत्वेन प्रतिपादितं भगवत्सेवनं तु उपक्रमसमय एव विरोधिनिवर्तनक्षमं भवतीति विशेषः। * मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणः। केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति॥ * इत्यनुभवरसिका आचक्षते। लोके भिषगन्यो भेषजमन्यत्। अत्र तु भिषगेव भगवान् स्वयं भेषजमपि भवतीति बोध्यम्। * निर्वाणं भेषजं भिषक् *।

स्वरूपानुरूपे कर्मणि क्रियमाणे स्वरूपविरोधिवृन्दं सकलमपैति। प्राप्ते कृत्ये कृते सति अप्राप्तमखिलमनुपदमेव व्यपैति। मूले [ओडुङ्गळ्] इत्यनेन अविद्याकर्मवासनारुचिप्रभृति सकलं विवक्षितम्। भगवति आभिमुख्यमात्रेण स्वरूपसंकोचकसर्वविधविरोधिनिवृत्तिः प्रतिपादिता भवति।

अथ उत्तरार्धस्य हृदयम्। * प्रायो ह्यकृतकृत्यत्वात् मृत्योरुद्विजते जनः। कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्॥ * इति प्रमाणमनुसृत्य प्रोक्तमुत्तरार्धम्। विरोधिषु निवृत्तेषु हेयशरीरनाशो निस्सन्देह एव; स तावत् स्वयमेवोपनमतीति नैर्भर्यमालम्बनीयमित्युक्तं भवति। हेयशरीरनाशं प्रति किं चिन्तनीयमस्तीत्यपि शब्दार्थो भवति॥ भगवदनुभवकुतूहलेन हेयदेहनिवृत्तिकालं प्रतीक्षस्वेत्यपि॥ .... (९)

(गाथा.) एण्पेरुक्कन्नलत्तु * ओण्पोरुळीरिल *
वण्पुहळ् नारणन् * तिण्कळल् शेरे॥ १०॥

असंख्येयान् ज्ञानानन्दस्वभावशालिनः जीवात्मवर्गान् नित्यसिद्धकल्याणगुणांश्च बिभ्रतः नारायणस्य आश्रितरक्षणैकशीलौ चरणौ भजस्व॥

* * * एतावतीभिर्गाथाभिः परात्परत्वेन सेव्यत्वेन च प्रोक्तं दैवतं नारायणशब्दाभिलप्यमिति गाथयाऽनया प्रकाश्यते। अतिविलक्षणानाम् अनन्तानां च जीवराशीनां स्वामी, असंख्येयानवधिककल्याणगुणगणनिधिश्च यो भगवान्, स नारायणनामा; तस्यैव चरणसमाश्रयणं प्राप्तमिति प्रतिपादितं भवति। यद्यप्यत्र नारायणशब्दमात्रं निर्दिष्टम्, तथाऽपि श्रीमदष्टाक्षरमहामन्त्रविवक्षयात्रेति संमतमाचार्याणाम्। नारायणस्य यद्विशेषणद्वयमिह निवेशितम् तत् नारायण शब्दार्थप्रतिपादनरूपं वेद्यम्। अनन्तानां स्वप्रकाशरूपाणां जीवानामाश्रयत्वं नित्यनिरवद्यकल्याणगुणानामाश्रयत्वं चैव हि नारायणशब्दप्रवृत्तिनिमित्तम्।

मूले [ओणूपोरुळ्] इति शब्देन 'विलक्षणं वस्तु' इत्यर्थकेन जीवात्मान उच्यन्ते। तेषामेव विशेषणम् [एणूपेरुक्कु] इति, [अन्नलम्] इति च। क्रमेण अनन्तसंख्याकत्वं प्रजापतिवाक्योदितकल्याणगुणशालित्वं च तदर्थः। जीवात्मानस्संख्यानन्त्ययुक्ता इति हि वेदान्तिनः। तथा * य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसंकल्पः * इति प्रजापतिवाक्यप्रसिद्धकल्याणगुणशालिनश्च ते। एतादृशानां जीवानाम् [ओण्पोरुळ्] इतिशब्देन प्रतिपादनं तु * अत्रायं पुरुषस्स्वयंज्योतिर्भवतीति प्रमाणानुरोधेनेति प्रतिपत्तव्यम्।

अथ [ईरिल वण्पुहळ्] इत्यनेन अनन्तकल्याणगुणकता कथिता भवति। स्वरूपनिरूपकाः, निरूपितस्वरूपविशेषण भूताः, दिव्यमंगलविग्रहाश्रिताः, आश्रयणसौकर्यापादकाः, आश्रितकार्यापादकाश्च यावन्तस्सन्तो गुणाः प्रथिताः, तावन्तोऽप्यत्र ग्राह्याः। नित्यैस्त्रिविधचेतनैः नित्यसिद्धैः कल्याणगुणगणैश्च समन्वितस्य नारायणस्य श्रीमदष्टाक्षरमहामन्त्रमालम्बनत्वेन स्वीकृत्य भजतेति प्रकृतगाथाहृदयं प्रतिपादयन्त्याचार्याः।

अत्रायमितिहासोऽनुसन्धेयः। श्रीपराशरभट्टार्यः (तदनुजः) श्रीराममिश्रार्य इत्युभौ यमलौ श्रीवत्साङ्कमिश्रपुत्रप्रवरौ। एतयोश्शैशव एव भगवता रामानुजेन गोविन्दभट्टारकः [एम्बार् नामा गुरुवरः] आचार्यपदे निवेशित इति गुरुपरंपराप्रसिद्धमिदम्। अत एव भट्टपादकृति-भगवद्गुणदर्पणाख्य-सहस्रनामभाष्योपक्रमे * वन्दे गोविन्देति स एव गोविन्दभट्टः प्रधानाचार्यत्वेनोपश्लोकितः। एतौ भट्टपादश्रीराममिश्रौ स्वपितृपादसन्निधौ सहस्रगीत्या अस्या अर्थग्रहणनिरतावास्ताम्। तदात्वे प्रकृतगाथार्थविवरणे प्रसक्ते सति, "श्रीमदष्टाक्षरमहामन्त्रार्थगर्भिताया अस्या गाथायाः स्वाचार्यसकाश एवार्थश्रवणं युक्तम्; ततः स्वाचार्यसविधे गत्वा शृणुतम्" इति प्रथमत आदिश्य, अनुपदमेव "अस्मिन् दशके द्वितीयगाथायां शरीरास्थिरत्वमुक्तं खलु; अतश्च विलम्बो न सह्यः; अत्रैव शृणुतम्" इत्याज्ञाप्य मूलमन्त्रोपदेशपूर्वकमेतद्गाथार्थमुपपाद्य, "इयं गाथा श्रीमदष्टाक्षरमहामन्त्रार्थमयीति प्रतिपद्येयाम्" इत्यन्वग्रहीत् (पिता) श्रीवत्साङ्कमिश्रगुरुः—इति व्याख्यातार आचार्यवर्या अनुगृह्णन्ति। अत एव श्रीपराशरभट्टार्यस्य उभावाचार्यौ प्रथितौ। तदिदं * वन्दे गोविन्दतातौ * इति श्रीसूक्त्या च ससंवादमित्यवसेयम्।

गाथायामस्यां भगवतश्चरणयोः दृढत्वमुक्तम्; तत् आश्रितरक्षणे सततजागरूकत्वरूपमवगन्तव्यम्। भगवतः अच्युतत्वप्रसिद्धिं चरणावेव परिपालयत इति ग्रहीतव्यम्। * अनतिक्रमणीयं हि चरणग्रहणम्॥ (१०)

(गाथा.) शेर् तड * त्तेनूकुरहूर् शठकोपन् शोल् *
शीर् त्तौडैयायिरत्तु * ओर् त्तविप्पत्ते ॥ ११ ॥

जलाशयभरितायाम् दक्षिणदिग्वर्ति श्रीकुरुकापुर्याम (अवतीर्णस्य) श्रीशठकोपमुनेः दिव्यसूक्तिभूते अतिविलक्षणशब्द संदर्भसमन्विते गाथासहस्रे इदं दशकम् विमर्शपूर्वकमुक्तम्॥

* * * एतद्दशकम् * आलोड्य सर्वशास्त्राणि विचार्य च पुनःपुनरित्युक्तरीत्या सारासारविमर्शपुरस्सरमन्वग्राहीति प्रतिपादितमनया चरमगाथया। फलश्रुतिगाथेति प्रसिद्धासु दशकान्त्यगाथासु नियमेन फलप्रतिपादनमेव कार्यमिति न

नियन्त्रणा। दशकस्वरूपकथनादिभिरपि चरमगाथाः क्वचिन्निबध्यन्ते। अत्र दशकस्वरूपकथनमात्रमेव। "भगवद्गुणप्रतिपादकेऽस्मिन् सहस्रे इदं दशकं भगवन्तं विमृश्य कथितम्" इति (द्राविडी) षट्सहस्रिकासूक्तिः।

गाथोपक्रमस्थम् [शेर्] इतिपदं क्रियापदत्वेन स्वीकृत्य 'इदं दशकं सेवस्व' इत्यर्थमपि वर्णयन्त्याचार्याः। एकवचनं जात्यभिप्रायमिति प्रागेवोक्तम्॥ .... (११)

—: द्रमिडोपनिषत्संगतौ—एतद्दशकसारार्थसंग्राहकश्लोक :—

संसारिणोऽप्यनुजिघृक्षुरसौ दयालुः अल्पास्थिरेतरपुमर्थरुचिं निरस्यन्।
तत्त्यागपूर्वहरिभक्तिसुधां दुहानाम् उद्दीपनीमुपदिदेश मुनिर्द्वितीये॥

इति सहस्रगीत्यां प्रथमशतके द्वितीयदशकं समाप्तम्॥

॥ अथ प्रथमशतके तृतीयं दशकम्—पत्तुडैयडियवर् ॥

व्याख्यानावतारिका॥ सर्वस्मात्परो भगवानिति प्रथमदशके प्रत्यपादि। स एव भजनीय इति द्वितीयदशके प्रत्यपादि। अथ भजनीयत्वौपयिकं सौलभ्यमिह तृतीयदशके निरूप्यते।

अधस्तनदशके उपदेशपात्रतयाऽभिसंहितानां संसारिणां हृदये इयमाशङ्का स्यात्;—परात्परं भजतेति कथिते कथमिदं भजनं संघटताम्? उभाभ्यामपि बाहुभ्यां विरहितं कमपि पुरुषमुद्दिश्य गजराजमधिरोहेति कथनमहो कथमर्थवत् स्यात्? सर्वेश्वरस्तावत् * कश्श्रीश्श्रियः परमसत्त्वसमाश्रयः कः कः पुण्डरीकनयनः पुरुषोत्तमः कः। कस्यायुतायुतशतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभागवृत्तम्॥ * इत्यादिप्रमाणशतोपबृंहितनिरतिशयप्रभावशाली स कथमिव नीचैस्संसारिभिर्भजनीयस्स्यादिति। तामिमामाशङ्कां निरसितुमेव प्रकृतदशकावतारः। बाहुद्वयविरहितस्य पुंसः स्वयमेव गजाधिरोहणं यद्यपि दुश्शकम्; तथाऽपि सुशकमेव ननु स एव गजराजो यदि स्वात्मानमारोहणानुकूलं नमय्य दिशेत्। तथा भगवान् हेयानामपि संसारिणां सुखेन भजनीयस्सन् स्वात्मानं बहुभिः प्रकारैरवनमयतीति स्वादिष्ठमुपपादनमत्र संपद्यते।

लौकिकेषु वस्तुवृन्देषु काष्ठलोष्टादिकं काञ्चनादिकं च पश्यामः। काष्ठलोष्टादिकमतिसुलभम्, काञ्चनादिकमतिदुर्लभमिति स्थितम्। तथा च सौलभ्यदौर्लभ्ययोर्वैयधिकरण्यं सिद्धम्। सुलभैः पदार्थैर्नास्माकं प्रयोजनातिशयः; यैरस्ति प्रयोजनातिशयस्ते हन्त दुर्लभाः। गौरवशालीनि वस्तूनि दुर्लभानि भवन्ति, लाघवास्पदानि तु सुलभानि भवन्तीति प्रत्यक्षसिद्धम्। ये सर्वथाऽप्युपेक्षणीयाः पुरुषाः, ते रथ्यासु शतशस्सहस्रशश्च पर्यटन्ति। ये तु स्पृहणीयप्रेक्षणा महाराजादयः, ते मृग्या एव विलसन्ति। यदि व्यक्तिविशेषे परत्वसौलभ्ययोस्सामानाधिकरण्यमनुभाव्यं स्यात्, स एक एव भगवान्नारायण इति निश्चप्रचम्। भगवति परत्वमिव सौलभ्यमपि असमाधिकं झुलुपति। परत्वदृष्ट्या भीतेरनुत्पादाय सौलभ्यं स्थितम्; सौलभ्यदृष्ट्या अनुपेक्षणाय परत्वं स्थितम्।

* अनन्याधीनत्वं तव किल जगुर्वैदिकगिरः पराधीनं त्वां तु प्रणतपरतन्त्रं मनुमहे * इति श्रीकूरनाथगुरुवरः (वरदराजस्तवे) आश्रितपारतन्त्र्यलक्षणं सौलभ्यमेव भगवतो नैसर्गिको वेष इति निर्धारयति। भाग्याधिका भक्तजना भगवतस्सौलभ्यभूमानमेव भृशमनुभूय हर्षप्रकर्षमनुविन्दन्ति; शिशुपालसधर्माणो दौर्भाग्योपहतास्तु तदेव सौलभ्यं गर्हास्पदं कृत्वा हन्त प्रणश्यन्ति। स्नानपानसदनुष्ठानाद्यर्थमुपकल्पिते तटाके कण्ठे बध्वा शिलां गुर्वीम् निपत्य नश्यन्तीति, प्रदीपे शलभाः पतित्वा प्रणश्यन्तीति च ननु पश्यामः। एवमेव अनुभवरसिकानां दिव्यानुभवयोग्यं सौलभ्यं पापिनः केचन विदूष्य विनश्यन्ति चेत् कामं विनश्यन्तु। तावता भाग्याधिकानां भागधेयस्य का क्षतिः? श्रीपराङ्कुशपरकालादीनां दिव्यसूरिवराणां भगवति परत्वानुभवापेक्षयाऽपि सौलभ्यानुभवे सुमहत्तरं कुतूहलमभवत इति पश्यामः। भगवानपि सौलभ्यप्रकाशनार्थमेव रामकृष्णादिविभवावतारान् वितनोति। सौलभ्यपरमकाष्ठारूपकार्यवृन्दमध्ये गोवर्धनोद्धरणाद्यतिमानुषकार्यकरणं च सौलभ्यगौरवसंपादनार्थमेवेति परमार्थः। नवनीतचौर्यापराधनिमित्तेन दण्डनार्थं मात्राऽभिद्रुतो दधिभाण्डं शरणं वृण्वंश्च कृष्णस्तस्मै मुक्तिं प्रददाति। उलूखले दामनि सन्निबद्धस्सन् नारदशापाद्यमलार्जुनतां गतयोः कुबेरपुत्रयोश्शापविमोक्षणविचक्षणो भवति। एवंविधाश्चर्याः कुहनागोपस्य पारेपरार्धम्। तदस्य स्वाभाविको वेषः परत्वं वा, उत सौलभ्यं वेति निर्णेतुमशक्यम्। भगवांस्तु स्वयं गायति * तस्याहं सुलभः पार्थ! नित्ययुक्तस्य योगिनः * इति। पाण्डवदूत्यपार्थसारथ्यादिचरितविशेषैश्च सौलभ्यसीमानमेव समुल्लासयति। अवतारान्तरे च * इमौ स्म मुनिशार्दूल! किंकरौ समुपस्थितौ। आज्ञापय यथेष्टं वै शासनं करवाव किम्॥ * इत्यादिकमाचक्षाणः, स्वात्मनः * अहं वेद्मि महात्मानमित्याद्युक्तपरत्ववैदेशिकतां सौलभ्यैकनिरूपणीयतां च प्राचीकशत्।

सहस्रनामभाष्ये * विजितात्मा विधेयात्मा * इत्यत्र भाष्यकर्तारश्शङ्कराचार्या अविधेयात्मेति प्रतीकग्रहणपूर्वकं भगवतः परत्वप्रतिपादनपरतया तदिदं नाम व्याचचक्षिरे। भगवद्गुणदर्पणकृतो भट्टपादास्तु विधेयात्मेत्येव प्रतीकमुपादाय सौलभ्यपरतया व्याचख्युः। विजितात्मेति नाम च परे जितेन्द्रियत्वपरसमापन्त। न कोऽपि रसोऽत्रेति मन्यमाना भट्टपादास्तु, "भक्तैर्विजितः सर्वथा स्वायत्तीकृत आत्मा यस्य" इति परमोत्तुङ्गमर्थं बभाषिरे। दिव्यप्रबन्धरसिकानां भगवद्गुणविद्धानामेवंविधव्याख्याननिदानभूतमिदं दशकमिति, तत्रापि प्राथमिकी गाथा सारभूतेति च वेदितव्यम्।

कदाचिद्भगवान् रामानुजः स्वशिष्यप्रवराय गोविन्दभट्टारकाय भगवतस्सौलभ्यं सुविशदमुपादिशत्। स च श्रोता महान् गुणविशेषेऽस्मिन्नतितरां रसिकश्च विद्धश्चाभूत्। तदात्वे रामानुजमुनीन्द्रेणैवमनुगृहीतम्— "इतरे जनास्तावदिदं सौलभ्यमाकर्ण्य भगवन्तमतितरां हेयं मन्यन्ते। भाग्यभूम्ना हि भवानत्र रसिकश्च विद्धश्च भवति" इति, इदं व्याख्यातारः पूर्वाचार्याः विलिखन्ति॥ .... *

प्रथमगाथावतारिका॥ भगवतः परत्वं सुचिरमप्यनुभोक्तुं शक्यम्। सौलभ्यं तु मनसाऽपि चिन्तयितुमशक्यम्। 'तत्तादृशः परात्परः एवं खलु प्रह्वोऽभवत्' इति चिन्तनमात्र एव गात्रे रोमोद्गमः, कण्ठे स्वरगद्गदता, नयनयोर्बाष्पपूरश्च भवति गुणविद्धानाम्। * आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान्। सदा परगुणाविष्टः द्रष्टव्यस्सर्वदेहिभिः॥ * इति महर्षिभिरपि प्रशस्यमाना अधिकारिणस्सत्यं त एव खलु ये हि नाम

भगवतस्सौलभ्यानुभवे विस्मरहृदयाः । भगवान् शठकोपमुनिस्त्वधुना कृष्णचेष्टितविशेषे सौलभ्यसीमभूते प्रवणहृदयस्सन्नतितरां व्यामुह्यति ॥ ....

(गाथा.) पत्तुडै यडियवर्क्केळियवन् पिऱर्गळुक्करिय वित्तहन् * मलर्मह्ळ् विरुम्बुम् नमरुम् पेरलडिहळ् *
मत्तुरुक्कडैवेण्णेय् कळविनिल् उरविडैयाप्पुण्डु * एत्तिरमुरलिनोडु इणैन्दिरुन्देङ्गियवेळिवे ॥

भक्तिसंपत्समृद्धस्य दासजनस्य सुलभः अभक्तानां दुर्लभः - अत एव विस्मयनीयः सरसिजवासिन्याः श्रियः स्पृहाविषयभूतः स्वकृपावलम्बनंरा दुष्प्रापः अस्मत्स्वामी मन्थदण्डकृतमथनसमुत्पन्न नवनीतमोषणनिमित्तेन उरःप्रदेशे (अथवा) उदर प्रदेशे बद्धो भूत्वा उलूखलेन सह ऐक्यं प्राप्य खिन्न आसीदिति चरितेनानेन प्रतिपन्नम सौलभ्यं हाहन्त कीदृग्विधम्! [सर्वात्मना विस्मयनीयमिति व्यामुह्यति मुनिसार्वभौमः]

* * * भगवान् सुलभ इत्युक्ते कस्य सुलभ इति पृच्छा अवतरति । सर्वेषां सुलभ इति तु न वक्तुं शक्यम् । मणिमाणिक्यादीनि दुर्लभानि सन्त्यपि केषांचित् सुलभानि भवन्ति, ये खलु महासंपन्नाः । एवमेव भगवानपि भक्तिसंपत्समृद्धानां सुलभः । भक्तौ पर्वभेदास्सन्ति बहवः । केषांचिद्भक्तिरङ्कुरदशायां स्यात् । इतरेषां तु पल्लवदशायां स्यात् । अपरेषां तु कोरकदशायां स्यात् । एवं नाम दशाविशेषा उच्चावचा हि भक्तेः । कीदृशदशापन्नभक्तिशालिनां सुलभो भगवानिति पृच्छा स्यात् । * मित्रभावेन संप्राप्तं न त्यजेयं कथंचन * इति वक्तुर्भगवतो हृदयमनुरुद्ध्य खलु अत्र प्रतिवक्तव्यम । तथा च अङ्कुरावस्थभक्तिमतामपि सुलभस्स इति वक्तुं योग्यम् । भक्त्युत्पत्तेः प्राक्तनी दशा काचिदस्ति, या खल्वद्वेषदशेत्यभिधीयते । तस्यां वर्तमानानामपि सुलभो भगवानित्युक्ते सत्यं भगवतः परिपूर्णतृप्तिरुदियात् । यतो हि सः अद्वेषवतोऽपि जनान् परमभक्तियुक्तानां स्थाने परिगणयति । भगवानित्युक्तिमात्रेऽपि 'कोऽसौ भगवान्नाम? कुत्र वर्तते सः? किमहो त्वं तं दृष्टवानसि?' इत्येवमधिक्षिपद्भिरेव धूर्तैस्सान्द्रे जगत्यस्मिन् अद्वेषशाली कश्चिदुपलभ्येत चेत्, स प्रह्लादविभीषणनिर्विशेषो हि मन्तव्यो भवति ।

मूले भक्तानां सुलभ इत्यनुक्त्वा भक्तिसंपन्नानां दासानां सुलभ इत्युक्तिदर्शनात् आत्मनस्संप्रतिपन्ना संपत् भक्तिरेवेत्युक्तं भवति । रावणेन * त्वां तु धिक्कुलपांसनमिति धिक्कृतम्, रामचन्द्रकिङ्करैस्सुग्रीवादिभिरप्याक्षिप्तं सर्वथा निरालम्बं विभीषणमधिकृत्य * अन्तरिक्षगतश्श्रीमानिति खल्वाह वाल्मीकिर्महर्षिः । तदात्वे विभीषणनिष्ठा श्रीः काचिदिति पर्यालोचनीयम । रामदासो भूयासमित्याशंसामात्रमेव हि तदात्वे तस्य वर्तते । तावतैव हि स श्रीमानिति निरदिश्यत । तथाविधानां सुलभ इत्युक्ते कोऽर्थः? तन्नियोगानुसारेण कार्यकरणसन्नद्ध इत्यर्थः । विभीषणस्योपसर्पणात्पूर्वम् * तपसा सेतुबन्धेन सागरोच्छोषणेन वा । सर्वथा सुसमर्थोऽस्मि सागरस्यास्य लंघने * इत्यवलीलया कथितवान् दाशरथिः विभीषणस्वीकरणसंपत्तिसमनन्तरं सागरतरणविषये विभीषणनिदेशं प्रत्यवैक्षत ; विभीषणश्चाह * समुद्रं राघवो राजा शरणं गन्तुमर्हतीति । अथ रामो * ममाप्येतद्धि रोचते * इति तस्यैवादेशमवतंसयन् सागरशरणागतौ प्रावर्तत । * सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत! * इति पार्थेन नियुक्तस्सन्

सधस्तथाऽकरोदित्यादीनि चरितान्यत्रानुसन्धेयानि। अस्माभिः क्रीतं वस्तु यथा ह्यस्माकं यथेष्टविनियोगार्हं भवति, तथैव भवति भक्तिक्रीतो जनार्दनः। "दूतो भव नः" इति निस्संकोचं नियोज्यश्च खल्वासीदसौ।

अथ, 'इतरेषां दुर्लभः' इति विशेषणं भक्तजनसमाश्वासनाय कल्पते। यदि भगवान् भक्तानामिव अभक्तानामपि तथा विधेयस्स्यात्, तर्हि सुमहान् खलु भवेदपायः। अतथात्वाय अभक्तानां दुरासद इति कण्ठरवेण कथनीयमासीत्। भगवति साधनत्वविश्रम्भविरहिता ये, ते खल्वितरे। तेषां दुरवगमो दुरधिगमश्च। 'भगवान् न केवलमुपेयः, उपायश्चापि' इति दृढाध्यवसायबलात् अचेतनक्रियाकलापेषु साधनताधियं स्वल्पशोऽपि ये न बिभ्रति परमैकान्तिनः, तेषामेवासौ सर्वथा धुरन्धरो बोभवीति; साध्योपायसहकृतस्सन्नेव स भगवान् कार्यं कर्तुं कुशलस्स्यान्नान्यथेति धिया अचेतनक्रियाकलापेष्वेवानुरक्तानां तु विषये स्वयमुदासीन एव भवतीति प्रथमपादतात्पर्यं सर्वस्वम्। अर्जुनदुर्योधनाविह स्मर्तव्यौ। उभावपि कृष्णसकाशमायातौ युद्धसाहाय्यलिप्सया। * कृष्णाश्रयाः कृष्णबलाः कृष्णनाथाश्च पाण्डवाः * इति प्रथा दुर्योधनपक्षे नैव बभूव। अत्र च महाभारतकथा यथायथमनुसन्धेया।

अथ च विस्मयनीय इति तृतीयं विशेषणं भगवति भूयोभिः प्रकारैस्स्थितमाश्चर्यावहत्वं नाभिप्रैति। प्रकृते यदुक्तं भक्तानां विषये सौलभ्यमितरेषां विषये दौर्लभ्यं चेति, अत्रैव विस्मयनीयता। * देवानां दानवानां च सामान्यमधिदैवतमिति प्रमाणप्रतिपन्नोऽपि भगवान् भक्तेषु विधेयश्च, इतरेषु दुरासदश्चास्तीति विस्मयः।

अथ च [मलर्मह्ळ् विरुम्बुम्] इत्यनेन विशेषणेन श्रियःपतित्वमुच्यते। अनन्तरदशकावसाने नारायण इति प्रोक्तम्। अधुना लक्ष्मीपतिरित्युच्यते। शारीरकमीमांसायां तावत् नैकस्मिन्नपि सूत्रे नारायण-नामनिर्देशोऽस्ति; न चापि लक्ष्मीपतिरित्युक्तिः। तस्मिन् शास्त्रे निगूहितानां विषयाणामेवंविधानां भूयसाम् अस्मिन् शास्त्रे सुष्ठु प्रकाशनमित्येष विशेषोऽवधेयः। अत्र च लक्ष्मीपतिरित्यपि कण्ठतो नोक्तम्; लक्ष्मीस्पृहा-विषयभूत इति तावदुक्तम्। तदिदं चारुतातिशयशालि रसिकभक्तभाषितं मन्तव्यम्। सर्वेऽपि जनाः श्रियं कामयन्ते, सा हि भगवन्तं कामयते इति रसघनो व्याहारः। सा चात्र श्रीरितिपदेन वा लक्ष्मीरिति पदेन वा न निर्दिष्टा। अपितु सरसिजवासिनीपदेन निर्दिष्टा। परमसुकुमारे सरसिजकुसुमे लब्धनिवासाऽपि सा * पादारुन्तुदमेव पङ्कजरजः * इति मत्वा, 'न मे स्थलमिदं शोभनम्, पुष्पहाससुकुमारस्य भगवत उरस्स्थलमेव मम प्राप्यम्' इत्याकलय्य, तदुपेक्ष्य अत्र महतीमुत्कण्ठां प्रकाशयतीति प्रोच्यते। सा हि भगवतस्संबन्धेन स्वस्योत्कर्षं मन्यते। अहह! मनोरमेयं घटना। * श्रद्धयाऽदेवो देवत्वमश्नुते * इति भगवती श्रुतिराह। तदिदमुपबृंहयति * अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा * इति इतिहासरत्नम्। [श्रद्धया—श्रीमहालक्ष्म्येत्यर्थः ॥]

अथ च [अरुम् पेरल्] इति विशेषणेन दुर्लभत्वमुच्यते। हन्त किमर्थमिदमिदानीमुच्यते? भक्तानां सुलभ इतरेषां दुर्लभ इति तावत्पुरस्तादेव ननूक्तम्। पुनरपि दुर्लभ इति कथने को विशेष इति चेत्; दुर्लभत्व-गिरा 'उत्तमोत्तमं वस्तु' इत्येतावदेव प्रत्याय्यते। लक्ष्मीसनाथत्वकथनसमनन्तरं ह्येतदुच्यते। दीप्त्या खलु रत्न-मुत्कृष्यते। भगवान् रत्नम्; श्रीस्तु दीप्तिः। श्रीयोगेन भगवतो यः अतिशय उत्पन्नः, स तावदत्रानुसन्धीयत इति प्रतिपत्तव्यम्। अथ च अस्मत्स्वामीति विशेष्यनिर्देशः। दिव्यदम्पत्योरभिमाने वर्धमाना वयमिति संतोषसीमोक्तिः।

गाथायामस्यामनुसंधित्सितस्य सौलभ्यस्य सम्यगुपपादनाय भगवतः कृष्णकिशोरस्य चर्याविशेषः प्रस्तूयते। भगवतो नन्दनन्दनस्य नवनीते महती समुत्कण्ठेति जानीमहे। अस्तु। नवनीतचोर इति गव्यमोषक इति च

प्रथाऽस्य समजनि। किमर्थमनेन स्तेयं कर्तव्यमिति विचार आवश्यकः। नवनीतं मे प्रदेहीति यद्ययं मुक्तकण्ठं काङ्क्षेत्, तर्हि कृत्स्नोऽपि व्रजः कृत्स्नमपि गव्यं सादरं सबहुमानं चास्मै यावच्छक्ति प्रदातुं सज्ज एव ननु। कृष्ण एव परं दैवमित्यध्यवस्यति व्रजे सर्वस्वदानसमुत्सुके मोषणप्रसक्तिरेव नास्त्यस्येति किमु वक्तव्यम्? कुतस्तर्हि सोऽयं नवनीतचौर्ये प्रवृत्त इति पर्यालोचनायामिदं व्यक्तीभवति-नवनीतसमुत्कण्ठा व्याजमात्रम्। चौर्यापराध-निमित्तेन बद्धो भवानीति भृशमुत्कण्ठितोऽसौ; प्रार्थनया गव्यमुपलभ्य यद्ययमश्नीयात्तर्हि उलूखलबन्धादिशिक्षा-प्रसक्तिर्नैव स्यात् खलु। स्वकीयमत्यन्तविधेयत्वं प्रदर्शयितुं ह्यस्य महती रुचिः। तस्करवृत्तिमन्तरा तन्न सुकरमिति मेने। अत एव * मुहुः प्रवृत्तं नवनीतचौर्ये वत्सान् विमुञ्चन्तमदोहकाले * (यादवाभ्युदये) इत्युक्तरीत्या गव्यमोषणादिषु दुश्चरितेषु बहुषु प्रववृते। यस्माद्दृशां संसारबन्धमोक्षणविचक्षणोऽयं महापुरुषः स्वकीयं बन्धं स्वयं विमोचयितुमशक्तस्ताम्यति हा बतेति महामतीनामपि चित्तं द्रवयितुं बन्धस्थितिं स्वयमेव स्पृहयते स्म।

कृष्णो मुष्णातीति संविदाना यशोदा 'यदाऽयं हस्तगतो भवति तदा बद्धव्यः' इति धिया गृहे तत्रतत्र दामानं निगुह्य निक्षिपेत्। कृष्णस्तु तद्विदित्वा (गव्यमोषणप्रवृत्तेः प्राक्) दामानं तां शिथिलयित्वा तदनु मोषणे प्रवर्तेत। अदसीयासु लीलासु इदमप्यन्यतमं ध्येयम्। रहसि मुषित्वा भुक्त्वा परैरगृहीत एव सन् अन्यतो गन्तुं समर्थोऽप्यसौ बन्धलोलुपतामूलैव मातुश्चक्षुर्गोचरो ग्रहणविषयश्च बोभवीति। कदाचन मातुश्चक्षुर्गोचरोऽपि सन् अग्राह्य एव धावति च। तदास्तां नाम। यदा गृहीतो भवति तदा * उलूखले कुत्रचिदात्तपुण्ये बन्धुं सतां बन्धुमियेष माता * (यादवाभ्युदये) इत्युक्तरीत्या बन्धं प्रापयितुमिच्छन्ती माता करेणैकेन गृहीत्वाऽमुं रज्जुमादातुं प्रयतते। अथ पश्यति च सा दाम्नां शिथिलीकृतत्वम्। बन्धनाद्भीतेन कृष्णडिम्भेनैवं कृतमिति च प्रतिपद्यमाना सा त्वामद्य दाम्ना बद्धं करिष्याम्येवेति कथयन्ती शिथिलीकृतानां दाम्नां सन्धाने प्रयतते। एकेन करेण कृष्णं गृहीत्वा अपरेण करेण दामग्रथने प्रवर्तते सा। कथञ्चित् प्रग्रथितया दाम्ना बन्धने समुद्युक्तायां तस्याम्, मायामानुषविग्रहः कृष्णः स्वात्मनो देहं पृथूकरोति यथा वा तया दाम्ना बन्धो न सुशकस्स्यात्। सा च तदात्वे बन्धनमशक्यं विदन्ती 'अद्य गच्छतु तावदयम्' इति विमोक्तुमिच्छति। तदवबुध्य कृष्णो 'हन्त! बन्धप्राप्त्यर्थ-मेव खलु मया मोषणं कृतम्; तदधुना अवश्यं बद्धो भवानि' इत्यध्यवस्यन् पृथूकृतं स्वशरीरं स्वयमेव कृशीकरोति। * अणोरणीयान् महतो महीयान् खल्वेषः। तदात्वे शक्यबन्धन एवायमिति मत्वा यशोदा * दाम्ना चैवोदरे बध्वा प्रत्यबध्नादुलूखले * इति पुराणरत्नोक्तरीत्या ससन्तोषमिमम् उलूखले निबद्धमारचयति। अत्रैष यादवाभ्युदय-श्लोकोऽनुसन्धेयः—* आनीतमग्रे निजबन्धनार्थं दामाखिलं संहितमप्यपूर्णम्। विलोक्य निर्विण्णधियो जनन्याः संकोचशक्त्या स बभूव बध्यः॥ * इति। एवं नाम बन्धनमुलूखले प्रापितोऽयं कृष्णकिशोरः परमानन्दकन्दलित-स्वान्तोऽपि सन् प्राकृतजनवत् परितापमभिनयन् प्रलपति विलपति; मात्रा बिभीषितो मुक्तकण्ठं विलपितुमशक्त-स्ताम्यति च। तादृशीं दशामनुसंदधानो मुनिवरोऽसौ [* एत्तिरमुरलिनोडु इणैन्दिरुन्देङ्गियवेळिवे *] इति तस्मिन् सौलभ्ये विद्धहृदयस्सन्नवसीदति। अत्र चैतदैतिह्यमनुसंधेयम्—इमां गाथाममिधाय शठकोपमुनीन्द्रोऽयं मासषट्कं व्यामुग्ध आसीदिति। तदिदं सूचितं च श्रीकूरनाथगुरुवरैरतिमानुषस्तवे—* त्वामन्यगोपगृहगव्यमुषं यशोदा गुर्वी त्वदीयमवमानममृष्यमाणा। प्रेम्णाऽथ दामपरिणामजुषा बबन्ध तादृङ्न ते चरितमार्यजनास्सहन्ते॥ * इत्यनेन पद्यरत्नेन। अत्र च 'आर्यजना' इतिपदं श्रीशठकोपमुनीन्द्राभिप्रायकम्। 'न सहन्त' इत्येतत् व्यामुग्धत्वप्रतिपादकम्॥ .... (१)

(गाथा.) एळिवरु मियल्वविनन् निलै वरम्बिल पल पिरप्पाय् *
ओळिवरु मुळुनलम् मुदलिल केडिल वीडाम् *
तेळितरु निलैमैयदोळिविलन् मुळुवदुमिरैयोन् *
अळिवरु मरुळिनोडु अहत्तनन् पुरत्तननमैन्दे ॥ २ ॥

सौलभ्यैकस्वभावः, व्यवस्थां नियमं च हित्वा नानायोनिषु जायमानः, तादृशेन जननेन मालिन्यलेशमप्यनुद्वहन् शाणोल्लीढमणिवदत्यन्तमौज्ज्वल्यमधिवहद्भिः उत्पत्तिविनाशविरहित-नित्याभिव्यक्तशुभगुणैः सदा विभासुरः, मोक्षाख्यसुप्रसन्नस्थानविशेषप्रदत्वरूपं स्वसैकान्तिकं स्वभावं कदाऽप्यविजहत् निर्हेतुककृपाविशिष्टस्सन् अन्तरङ्गभक्तानामत्यन्तसन्निकृष्टः बहिरङ्ग-जनानां दवीयांश्च भवति भगवान् ॥

अधस्तनगाथायां गोपालचूडामणेः कृष्णस्य नवनीतस्तेयनिबन्धनं दामबन्धनमनुसंहितवान् मुनिसार्वभौमः षण्मासावधि व्यामुग्ध एवावतस्थे इति सम्प्रदायपरम्पराप्राप्तमैतिह्यमाचार्या विलिलिखुः । श्रीकूरनाथगुरुचरणाश्च अतिमानुषस्तवे—* त्वामन्यगोपगृहगव्यमुषं यशोदा गुर्वी त्वदीयमवमान ममृष्यमाणा । प्रेम्णाऽथ दामपरिणा-मजुषा बबन्ध तादृक्न ते चरितमार्यजनास्सहन्ते ॥ * इति यदनुजगृहुः तत्र "तादृक्ते चरितमार्यजना न सहन्ते" इत्येतत् उक्तमैतिह्यमेव स्मारयति । अत्र आर्यजना इत्यनेन श्रीपराङ्कुशमुनीन्द्रा एव विवक्षिताः ; इति प्रथमगाथाटीकायामवोचाम । एवं षण्मासान् व्यामुग्ध स्थितो मुनिवरः कालपाकेन प्रबुध्य, अधस्त-नगाथायां स्वात्मना भगवान् भक्तसुलभ इति कीर्तितोऽभूदिति विज्ञाय, भक्तसुलभ इति कथनं नोचितम् ; लोके परत्वसीम्नि स्थितानां चक्रवर्तिप्रमुखानामपि तादिदं भक्तजनसौलभ्यं कदाचिद्घटेत कामम् ; भगवति नैवं वक्तव्य-मिति प्रतिपद्यमानः सौलभ्यैकस्वभाव इति विशिष्य कथयति । स्नेहेनां जनानां सुलभ इति कथने किमस्ति वैभवम् ? सौलभ्यमेवास्य स्वाभाविको वेष इति हृदयम् । भगवान् यदा भक्तेषु सौलभ्यसौशील्यादिगुणान् प्रकाशयति, तदा अनुभोक्तारो रसिका मन्यन्ते 'अस्य परत्वमागन्तुकमेव' इति ।

अथ [व्यवस्थां नियमं च हित्वा नानायोनिषु जायमानः] इत्यत्र निर्वाहभेदोऽन्वेयः । 'अमुके योनौ जायेय, अमुके योनौ न जायेय' इति व्यवस्थाविरहेण * पिता पुत्रेण पितृमान् योनियोनौ * इति काठकश्रुत्याम्नातरीत्या सर्वेष्वपि योनिषु प्रादुर्भावो यः स व्यवस्थाविरहेण जननम् ; 'अमुकं चेष्टितं करवाणि, अमुकं चेष्टितं न करवाणि' इति संकल्पभिदाविरहेण निर्विशेषं सर्वचेष्टितकरणेन (चेष्टिते) नियमाभावः—इति प्राचामाचार्याणां निर्वाहः । श्रीपराशरभट्टार्यास्तु—प्रोक्तमर्थद्वयमपि * व्यवस्थां हित्वे-त्यत्रैवोपन्यस्य, अथ नियमं च हित्वेत्यस्य 'अवतीर्य सुलभताप्रकाशनावसरे परत्वस्यापि प्रकाशनम् नियम-प्रहाणम्' इत्यन्वगृह्णन् ; पार्थसारथिर्भूत्वा नैच्यं प्रकाशयन्नपि विश्वरूपप्रदर्शनमप्यकरोत् खलु ; * पुत्रीयया किल वरं वव्रे वृषाङ्कादित्युक्तरीत्या वृषध्वजसकाशे पुत्रवरं याचमानोऽपि सन् घण्टाकर्णाय मोक्षं प्रददौ खलु ; एवमादयश्चर्याविशेषा भट्टपादहृदि स्थिताः ॥

[नानायोनिषु जायमानः] संसारिणो वयमपि नानायोनिषु जायामहे; * पिता पुत्रेण पितृमान् योनियोनौ * इति उदाहृतचर काठकश्रुत्याम्नातरीत्या भगवानपि नानायोनिषु जायते; अस्माकं जननं कदाचिद्विरमति; भगवतो जननं तु न कदाऽप्युपरमति; किं कारणम्? अस्माकं जन्मनो हेतुः पुण्यपापरूपं कर्म; भगवतो जन्मनो हेतुः करुणा। * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति * इत्याम्नातरीत्या अस्मदीयस्य कर्मणः कदाचिद्विधूननसंभवेन कर्मनिबन्धनस्य जन्मनो विनाशस्संभवति; भगवज्जनन-हेतुभूतायाः करुणायाः कदाऽपि विनाशावकाशविरहेण तादृशकरुणानिबन्धनजन्मनः कदाऽप्युपरतिर्न भवति। तथा च नानायोनिषु जायमान इति वर्तमानार्थकशानजन्तप्रयोगस्सुशोभनः। अथ [तादृशेन जननेन मालिन्यलेशमप्यनुद्वहन्] इति। संसारिणो वयं तु कर्महेतुकैर्जन्मभिर्मालिन्यमश्नुमहे; भगवांस्तु नैवम्; * स उ श्रेयान् भवति जायमानः * इति हि श्रुति राम्नाति। श्रुतेरस्याः स्वादीयानर्थोऽवबोध्यताम्। * स उ श्रेयानित्यत्र, उः—अवधारणार्थकः। [प्रणवे इव.] अयमुकारः कुत्रान्वेति? सः, श्रेयान्, भवति, जायमानः इत्येतेषु चतुर्ष्वपि पदेषु अव्याहतान्वय एषः। स एव जायमानः श्रेयान् भवति। स जायमान एव श्रेयान् भवति। स जायमानः श्रेयानेव भवति; स जायमानः श्रेयान् भवत्येव = इत्थं नाम चतुर्विधोऽप्यन्वयश्चारुतरः। सत्यप्यन्वयचातुर्विध्ये निष्पद्यमानोऽर्थस्त्वेक एव। स एवार्थ स्समनन्तरमेव मुनिवरेणैव स्वयं प्रपञ्च्यते [शाणो-ल्लीढमणिवदत्यन्तमौज्ज्वल्यमधिवहद्भिः] इत्यादिना। जन्मसु जन्मसु गुणोत्कर्षमप्रमेयमवाप्नोति भगवा-नित्युक्तं भवति ॥

अथ [मोक्षाख्यसुप्रसन्नस्थानविशेषप्रदत्वरूपं स्वस्यैकान्तिकं स्वभावं कदाऽप्यविजहत्] इत्यनेन विशेषणेन मोक्षप्रदत्वं भगवतोऽसाधारणमहिमेति संप्रदाय सरण्याम् अत्यन्तमन्तरङ्गभूतोऽर्थः प्रकाश्यते। * यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति, तद्ब्रह्म * इत्युपनिषदा, * जन्माद्यस्य यतः * इति ब्रह्मसूत्रेण च सृष्टिस्थिति संहाराख्यं कृत्यत्रयमेव परस्य ब्रह्मणः प्रत्यपादि। भगवान् यामुनार्यः स्तोत्ररत्ने * त्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसारविमोचनादयः * इत्यनया सूक्त्या मोक्षप्रदत्वरूपं संसारविमोचनमपि सृष्टिस्थितिसंहारैस्सह समयोजयत्। श्रीभाष्यमङ्गलश्लोके * अखिलभुवनजन्मस्थेम भङ्गादि-लीले * इत्यादौ * विनतविविधभूतव्रातरक्षैकदीक्षे * इति द्वितीयपादेन मोक्षप्रदत्वं पृथगुक्तम्। पूर्वत्र भङ्गादी-त्यत्र आदिपदेन मोक्षप्रदत्वस्य ग्रहीतुं शक्यत्वेऽपि * अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा * इत्युपनिषदुक्त-अन्तःप्रवेशनियमने आदिपदग्राह्ये भूयास्ताम्, मोक्षप्रदत्वं तु कण्ठत एव वक्तव्यमित्याशयेनैव द्वितीयपादेन प्रत्येकशः तदनुगृहीतम्। अत्र श्रुतप्रकाशिका संसेव्या। एवं नाम यामुनार्योक्तौ श्रीभाष्यकारोक्तौ च निदानम् प्रकृतगाथासूक्तिरेवेति सत्सम्प्रदायवृद्धाः। मोक्षस्य सुप्रसन्नस्थानत्वेन व्यपदेशः प्राकृतभूमेरस्याः कलुषमयत्वं स्मारयति ॥ शेषं सुस्पष्टम् ॥ .... (२)

(गाथा.) अमैवुडै यरनेरि मुळुवदु मुयर्वर वुयर्न्दु * अमैवुडै मुदल्केडल् ओडिविडै यर निलमदुवाम् *
अमैवुडै यमररुम् यावैयुम् यावरुम् तानाम् * अमैवुडै नारणन्मायैयै अरिपवर्यारे ॥ ३ ॥

सातिशयान् धर्ममार्गानशेषान् अविकलमनुष्ठाय सर्वोत्कर्षेण विराजमानानाम् सृष्टिसंहारावान्तरसंहारकार्येष्वत्यन्तकुशलानां ब्रह्मादिदेवानाम् अथ च सर्वेषामपि चेतनाचेतनवस्तूनां वाचकाः शब्दा यस्मिन् भगवति पर्यवसन्ति, एतादृशातिशयवतो भगवतो नारायणस्य आश्चर्यशक्तियोगं को वा जानाति हन्त! ॥ (न कोऽपि ज्ञातुं प्रभवतीति यावत्।)

भगवतोऽवताररहस्यं कस्यापि बुद्धेरगोचर इत्युच्यते गाथयाऽनया। स भगवान् कीदृश इतिचेत्, सर्ववस्तुसामानाधिकरण्यार्ह इत्यभिधीयते। लोके यस्यकस्यापि वस्तुनो वाचको यः कोऽपि शब्दः अपर्यवसानवृत्त्या भगवद्वाचको भवतीति वेदान्तिनां सिद्धान्तः। ब्रह्मरुद्रादीनां वाचकाः शब्दा अपि भगवति नारायण एव पर्यवस्यन्तीति विवक्षन्मुनिवरः प्रथमतस्तान् ब्रह्मादिदेवान् प्रस्तौति। ते विशेष्यन्ते सातिशयान् धर्ममार्गानशेषाननुष्ठायेत्यादितः। * युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः। पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम ॥ * महादेवस्सर्वमेधे महात्मा हुत्वाऽऽत्मानं देवदेवो बभूव ॥ * इत्यादि प्रमाणशतप्रतिपादितरीत्या अतिशयितान् धर्ममार्गानशेषाननुष्ठाय सर्वोत्कर्षेण विराजमानास्ते अमरप्रवराः। पुनः कीदृशास्ते? सृष्टौ संहारे अवान्तरसंहारे च भगवदाज्ञाबलेन प्राप्ते सति, तन्निर्वाहे अत्यन्तकुशलाः। 'किमेतानि कृत्यानि परमपुरुषेणैव कृतानि?' इति शङ्कितुं योग्यतया तत्तत्कार्यनिर्वाहनिपुणा इति यावत्। तत्तत्कार्यनिर्वहणे ते निपुणा भवन्तीत्युक्तं भवति। तेषां वाचकाः शब्दा भगवति पर्यवस्यन्ति। भगवत्पर्यन्ताभिधायकास्ते ते शब्दा इति यावत् ॥

न केवलमेतावदेव; तादृशदेवताविशेषवाचकाः चेतन वाचकाश्च तथा निखिलचेतना शब्दा अन्ततो यं परमपुरुषमभिधाय विश्राम्यन्ति, तत्तादृशवैभवशालिनो भगवतो नारायणस्य अवतार रहस्यं न कोऽपि ज्ञातुमीष्टे। सर्वथा स्वप्रकारभूतेषु प्राणिषु अन्यतमेन केनचित्प्राणिना मदीयोऽयं पुत्र इत्यभिमन्तुं योग्यतयाऽवतीर्णस्य तस्य अवताररहस्यं विपुलविज्ञानशालिनामपि दुरवबोधमित्युक्तं भवति। अत एव गीतायाम् अवताररहस्याध्याय इति प्रसिद्धे चतुर्थाध्याये * जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ * इति स्वेनैव गीयते स्म। * पिता पुत्रेण पितृमान् योनियोनौ। नावेदविन्मनुते तं बृहन्तम् * इति श्रुत्यर्थो गाथयाऽनया विवृतोऽभूदिति प्रतिपत्तव्यम् ॥ मूले "नारायणस्य आश्चर्य शक्तियोगं को वा जानाती" त्यनेन वाक्येन विवक्षितम् अवतार रहस्यज्ञानस्य दुरवगमत्वमेव ॥ को वा जानातीत्यत्र आचार्याणा मेष रसघनः सूक्तिविन्यासः;—नित्यमुक्ताः परत्वानुभवनिरतास्मन्तो न जानन्त्येतत्; संसारिणो नास्तिक्येन न विदन्ति; ब्रह्मादयो देवास्तु अवलेपभूम्ना नावबुध्यन्ते। पराङ्कुशादिसूरिवराणां तु व्यामोहो बोधप्रतिबन्धको भवति। स्वतस्सर्वज्ञस्सर्वेश्वरोऽपि * सो अङ्ग वेद यदि वा न वेद * इति श्रुत्याम्नातरीत्या संदेग्धि केवलम् ज्ञाते ॥ .... (३)

(गाथा.) यारुमोर्निलैमैयनेन अरिवरिय वेम्बेरुमान् * यारुमोर्निलैमैयनेन अरिवेळियवेम्बेरुमान् *
पेरुमोरायिरम् पिरपल वुडैयवेम्बेरुमान् * पेरुमोरुरुवमुम् उळदिल्लै यिलदिल्लै पिणक्के ॥

अतिशयितज्ञानवतामपि सताम् इत्थंभूतोऽयमिति स्वयत्नेन निर्धारयितुमशक्यः, निजनिर्हेतुकानुग्रहलक्ष्यभूतानां जघन्यजनानामपि सतां निर्धारयितुं शक्येन स्वभावेन

विशिष्टः, परस्सहस्रैर्नामभिः तदनुगुणरूपविशेषैश्चोपलक्षितोऽस्मत्स्वामी नामरहितो रूपरहित इति केषाञ्चित्प्रतिपत्तिभाजनम्; नामरूपविशिष्ट एवेति वैदिकानां प्रतिपत्तिभाजनम्। अत्र हन्त! नित्यमनुवर्तते विवादः ॥

श्रीपराशरभट्टार्याः श्रीरङ्गराजस्तवोपक्रमे * अस्ति वस्त्विदमित्थंत्व प्रसंख्यानपराङ्मुखम्। श्रीमत्यायतने लक्ष्मीपदलाक्षैकलक्षणम् ॥ * इत्यनुजगृहुर्यत्, तदस्या गाथायाः प्रथमपादसमीक्षया। इदंत्वेन इत्थंत्वेन च प्रसंख्यातुमयोग्यं वस्तु यत्, तत् तुच्छमेव खलु भवितुमर्हतीति नाशङ्कनीयम्; तादृशशङ्काव्युदासायैव हि * अस्तीत्युपक्रान्तम्। सदेव वस्तु स्वरूपरूपगुणविभूत्यादीनाम् आनन्त्यात् उत्तुङ्गताभूम्ना च अस्मादृशां मितम्पचमतीनाम् इदंत्वेन इत्थंत्वेन च प्रसंख्यातुमशक्यं भवति। भगवद्यामुनार्याः स्तोत्ररत्ने * नमो नमो वाङ्मनसातिभूमये नमो नमो वाङ्मनसैकभूमये * इतिपूर्वार्धं निबध्य, एतेन पादद्वयेनोक्तमर्थं स्वयमेव व्याचक्षते उत्तरार्धेन * नमो नमोऽनन्तमहाविभूतये नमो नमोऽनन्तदयैकसिन्धवे * इति। अत्रेदं विव्रियते मनाक्। अपरिच्छेद्यमहाविभूतिकत्वेन हेतुना वाङ्मनसातिभूमिर्भवति भगवान्। अनन्तदयैकसिन्धुत्वेन हेतुना वाङ्मनसैकभूमिश्च स भवति। * यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह * यद्वाचाऽनभ्युदितम् * इत्यादिष्वभिप्रेतं परमयोगिनामपि वाङ्मनसाभ्याम परिच्छेद्यत्वं यदस्ति भगवद्विभूतीनाम्, तत्तस्य परस्य पुंसो वाङ्मनसातिभूमित्वं जनयति। गोपगोपिकादीनामपि वाङ्मनसयोरेकभूमित्वं यदस्य समजनि, तत् तदीयाप्रतिमपरमकृपाबलप्रयुक्तं भवतीति भावः। एवमेवात्रापि अतिशयितज्ञानवतामपि सताम् इत्थंभूतोऽयमिति स्वयत्नेन निर्धारयितुमशक्य इति कथनम् अपरिच्छेद्यविभूतिकत्वप्रयुक्तम्; भगवदनुग्रहपात्रत्वविरहप्रयुक्तं वा भवितुमर्हति। * समाहितैस्साधु सनन्दनादिभिस्सुदुर्लभम्, भक्तजनैरदुर्लभम् * इति श्रीकूरनाथगुरुवरसूक्तिश्चात्रानुसन्धेया वरदराजस्तवीया। * दाशाय कीशाय च राक्षसाय * इत्युक्तरीत्या, * निषादानां नेता कपिकुलपतिः काऽपि शबरी कुचेलः कुब्जा सा व्रजयुवतयो माल्यकृदिति * इत्युक्तरीत्या च क्षोदीयांस इति भावयितुमर्हाणां गुहादीनामपि हि सुलभस्सुगमश्च समभूद्भगवान् ॥ * नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् * इत्यौपनिषदी सरस्वती चात्र साक्षिणी ब्रोभवीति।

[परस्सहस्रैर्नामभिः तदनुगुणरूपविशेषैश्चोपलक्षितः] महाभारते भीष्मः प्राह—* सहस्रास्यस्सहस्राक्षः सहस्रचरणो विभुः। सहस्रबाहुस्सर्वज्ञो देवो नामसहस्रवान् ॥ इति। कल्याणगुणवत्ताप्रकाशकत्वेन स्वरूपवाचकत्वेन च प्रथमानानि भगवन्नामानि परस्सहस्राणि; तत्तन्नामावबोधितानि रूपाणि च तथा। एवं सत्यपि भगवदनुग्रहपात्रताविरहितैः विमतजनैः हन्त! नामरूप विरहितत्वेन प्रतीयते। अत्र यद्यपि विमतानां विवादोऽस्ति, परमैकान्तिनां तु नैव विवादगन्धोऽपि ॥ .... (४)

(गाथा.) पिणक्कर वरुवहैच्चमयमुम् नेरियुळ्ळि युरैत्त * कणक्करु नलत्तनन् अन्दमिलादि अम्भगवन् * वणक्कुडै त्तवनेरि वळिनिन्ऱु पुरनेरि कळैकट्टु * उणक्कुमिन् पसैयर अवनुडै युणर्वुकोण्डुणर्न्दे ॥

वैदिकसमयविप्रतीपानां सांख्ययोगकाणादजैनबौद्धपाशुपताख्यानां षण्णां दर्शनानां वैदिक समयेन सह स्थितस्य विरोधस्य शमनार्थम् असंख्येयकल्याणगुणगणशालिना अपरिच्छिन्नवै-

भवशालिना जगन्निदानभूतेन च भगवता परमात्मनाऽवतारिते गीताशास्त्रे निष्णातास्सन्तो भो जनाः! तत्रोक्तभक्तिमार्गे प्रतिष्ठिता भूत्वा विषयान्तरसङ्गं सवासनं विहाय तस्य परमात्मनो भजनप्रकारं बुद्ध्वा प्रकृतिसंबन्धं सवासनं शोषयत॥ [इति परेभ्य उपदिशति॥]

गाथायामस्यां गीताशास्त्रं प्रमाणीक्रियते। * वेदेषु पौरुषं सूक्तं पुराणेषु च वैष्णवम्। भारते भगवद्गीता धर्मशास्त्रेषु मानवम्॥ * इत्युक्तप्रक्रियया महाभारतमात्र सारभूतं न गीताशास्त्रम्; अपि तु सर्वोपनिषत्सारभूतं च प्रथते। सद्वारकशास्त्रेभ्योऽपि अद्वारकशास्त्रस्य अभ्यर्हितत्वात् भगवता वासुदेवेन स्वयमवतारितमिति हेतुना विशिष्यते चैतद्गीताशास्त्रम्। तदिदमस्यां गाथायां कस्मिन्नंशे प्रमाणीक्रियत इतिचेत्; अवस्तनगाथाप्रस्तुतो विवादो न प्रामाणिक इत्यंशे, भजनोपायबोधनांशे च। बाह्यसमयषट्कस्य वैदिकसमयेन सह विरोधो वर्तत इत्येतत् सुप्रसिद्धमेव ननु वेदान्तिनां समाजे। भगवद्गीताप्रपञ्चितार्थसार्थतः बाह्यदर्शनार्थं प्रत्याख्यानसंभवेन विरोधशमनं जायत इत्यभिसन्धिः। तथाच बाह्यदर्शनार्थं निरासक गीताशास्त्र प्रदायकत्वरूपं वैभवमिह भगवतः प्रतिपादितं भवति। स भगवान् कीदृशः? [कणकरु नलत्तनन्] असंख्येय कल्याणगुणगण विभूषितः। अथवा अपरिच्छेद्यप्रेमभरितः। * न काङ्क्षे विजयं कृष्णेत्यभिधाय विसृज्य सशरं चापं रथोपस्थ उपविष्टः पाण्डुतनयो यद्यपि * पृच्छामि त्वा धर्मसंमूढचेताः शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्। यच्छ्रेयस्स्यान्निश्चितं ब्रूहि तन्मे * इति प्रार्थितवान्, तथाऽपि अधुना गीतायामुपलभ्यमानाना मुपायविशेषाणा मशेषा मुपदेष्टव्यतां स मनसाऽपि नाकलयतिस्म; तस्य युद्धप्रोत्साहनार्थं यावदुपदेष्टव्यम्, न हि खलु तावदेवोपदिष्टमिह; तत्तदधिकारानुरूपाणां भूयसामुपायानां यदस्ति प्रतिपादनमिह, तत्सत्यमस्मादृशेषु संसारिषु प्रेमपारवश्यादेव खलु; तदेव सूच्यते अपरिच्छेद्यप्रेमभरितत्व विशेषणेन।

स भगवान् पुनः कीदृशः? भगवच्छब्दवाच्यत्वेन अपरिच्छिन्नवैभवशाली, जगन्निदानभूतश्च। "निदानं त्वादिकारणम्।" एतादृशेन भगवताऽनुगृहीते अध्यात्मशास्त्रनलुजे श्रीमति गीताशास्त्रे * मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां मत्या तुष्यन्ति च रमन्ति च॥ * मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥ * इत्यादितः प्रतिबोधिते तपोरूपभक्तिमार्गे निष्णाता भूत्वा विप्रतीपमार्गश्रद्धाव्युदसनपूर्वकं व्याप्रियध्वम्। * विषया विनिवर्तन्ते निराहारस्य देहिनः। रसवर्जं, रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥ * इति गीतोक्तरीत्या परमपुरुषदृष्ट्यनन्तरभाविनिवृत्तिको रसोऽपि यथा नाम अत्रैव शुष्येत्तथा व्याप्रियध्वम्॥ .... (५)

(गाथा.) उणर्न्दुणर्न्दु इळिन्दहलु उयर्न्दुरु वियन्द विन्निलैमै *
उणर्न्दुणर्न्दु उणरिलुम् इरैनिलै युणर्वरिदुयिर्हाळ् *
उणर्न्दुणर्न्दु उरैत्तुरैत्तु अरियय नरनेन्नु मिवरै *
उणर्न्दुणर्न्दु उरैत्तुरैत्तु इरैञ्जुमिन् मनप्पळुदोमे॥ ६॥

ज्ञातृत्वैकस्वरूपम् ज्ञानतस्सर्वगतम् प्रकृतिविनिर्मुक्तस्वरूपं(जीवात्मस्वरूपम्) यद्यपि यथायथं विशदमवबोद्धुं शक्येत, तथाऽपि आश्रयणरुचिशालिभक्तजनसमाश्रयणीयत्व-

ष्यादिरूपेणावतीर्ण स्स एष सर्वेश्वरो ब्रह्मा वा? शिवो वा? नारायणो वा? इति संदेहमपहाय निष्कृष्टार्थाववोधनम् असुलभम्। तर्हि का गतिरिति चेत्, हरिः अजः हर इत्येतास्तिस्रो देवता अधिकृत्य बहुशास्त्रश्रवणमनननान्याकलयत। तथा करणे एकैव देवता संप्रतिपन्नसर्वेश्वरत्वेन भायाद्; अथ तामाश्रयत॥

सूरिवरस्यास्योपदेशं श्रुतवतां संसारिणामियं पृच्छा समजनि—भगवन् मुनिसार्वभौम! अवतारे सनाश्रयतेत्युपादेशि तत्रभवता; * मध्ये विरिञ्चिगिरिशं प्रथमावतारः * (श्रीरङ्गराजस्तवे) इत्युक्तरीत्या ब्रह्मरुद्रयोर्मध्ये अवतरणं प्रथमावतरणं श्रूयते; तत्र त्रयो देवास्तुल्यकार्यत्रयाधिकृता इति हेतुना त्रयोऽपि देवाः प्रधानभूताः किमु? त्रिष्वेकः प्रधानतमः किमु? उताहो त्रिभ्योऽप्यन्यः कोऽप्यभ्यर्हितः? इत्येवमेवं संदेहा उपजायन्ते नः; निस्संदेहं निष्कृष्य सम्प्रतिपन्न देवताश्रयणेन समुज्जीवितुमशक्तानामस्माकं परदेवतापारमार्थ्यनिष्कर्षपूर्वकम् आश्रयणीय वस्तुनिर्देशः किं न क्रियेत तत्रभवतेति। तत्रोत्तरमुदीर्यते गाथयाऽनया। 'प्रत्यक्षपरिदृश्यमानो देह एवात्मा' इत्येवंविधं भ्रममपहाय देहातिरिक्तं किमप्यात्मवस्तु अस्तीत्यवबोधो न सुलभः; कथञ्चित्तत्सौलभ्ये संजातेऽपि, ब्रह्मरुद्रादिशरीरकस्य सर्वान्तर्यामिणस्सर्वेश्वरस्य प्रक्रिया दुरवबोधा कामम्; श्रृणुत; यूयं न तावदचेतनाः, चैतन्य फलभूताया विवेकशक्तेः किमहो प्रयोजनं नार्जनीयम्? ननु भवन्त एव विविञ्चताम्। हरिश्च अजश्च हरश्चेति देवतात्रितयस्य स्वरूपं स्वभावं च श्रवणमननादिभिस्सम्यक् परिशीलयत; तथा नाम परिशीलने कृते 'वेदापहार गुरुपातकाद्यापदाश्रयभूतं देवताद्वितयम्; तत्तादृशापद्विमोचन महिष्ठफलप्रदानादिभि रनन्यसामान्य रक्षणक्रियास्पदभूतो देवताविशेषः' इति स्वत एव मनसि भायात्; पक्षे पननमन्तरा, मनसि स्फुरन्तीमेकां देवतामाश्रयत। सा च नारायण एव—इति॥

अत्र केचित्प्रत्यवतिष्ठन्ते गुरुकुलवासविमुखाः; "श्रीमान्नारायण एव युष्माकमाश्रयणीया देवता" इति सुदृढमवधार्य प्रतिपादयितव्ये तथा प्रतिपादनमुत्सृज्य मनसि प्रतिभातां कामपि देवतां समाश्रयतेति प्रतिपादनमिह सूरिवरस्यास्य तटस्थतां पिशुनयति; एवंस्थिते तत्त्वे नारायणपारम्यप्रतिपादनपरत्वेन व्याख्यानमभिमानकृत्यमिति। इदमिहावधेयम्। श्रीशठकोपमुनीन्द्रस्य चतुर्थोऽयं दिव्यप्रबन्धः; गतेषु त्रिषु प्रबन्धेषु श्रीमन्नारायणस्यैव परत्वं भूरिशो निर्णीतम्। अस्यामपि सहस्रगीत्याम् अधस्तादुपरिष्टाच्च स एष निर्णयो निराबाधः। एवं च प्रबन्धुरभिसन्धे रनुरूपतयैव व्याख्येयत्वात् विप्रतीपव्याख्यानमुत्सृष्टमिति सर्वथा साधु। प्रामाणिकाना माप्तानां सूक्तिवैखरी तावदुच्चावचा; तास्वियमन्यतमेति प्रतिपत्तव्यम्। समनन्तरगाथाश्चैनमर्थं व्यवस्थापयन्तीति प्रेक्षितव्यं प्रेक्षकैः। अष्टमगाथायाम् "श्रियः पत्युरस्मत्स्वामिन श्चरणारविन्दे नमस्कुरुते"ति सुस्पष्टमनुगृहीतमवधेयम्। तत्त्वहितपुरुषार्थेषु सुनिष्कृष्टज्ञानशालिषु दिव्यसूरिषु मध्ये स एष दिव्यसूरिवरोऽग्रेसर इति न कदाऽपि विस्मर्तव्यम्॥ .... (६)

(गाथा.) ओन्नेन प्पलवेन भरिवरुम् वडिविलुळ् निन्न *
नन्नेळिळ् नारणन् नान्मुहन् अरनेन्नु मिवरै *
ओन्न नुम्मनत्तु वैत्तु उळ्ळि नुम्मिरुपशै यरुत्तु *
नन्नेन नलम्शेय्वदु अवनिडै नम्मुडै नाळे॥ ७॥

नारायणश्चतुर्मुखो हर इत्येतन्मूर्तित्रयम् एकात्माधिष्ठितं वा? अनेकात्माधिष्ठितं वेति प्रतिपत्तुमयोग्ये प्रकारेऽवस्थितं तन्मूर्तित्रयमुद्दिश्य श्रवणमननादिकमवहितेन मनसा कलयत। मूर्तित्रये तस्मिन्नेकैवमूर्तिस्सर्वैश्वर्यसम्पन्नेति वो मनसि भायात्। ब्रह्मरुद्रयोस्सर्वात्मनाऽप्यसंभावितान् कल्याणगुणान् बिभ्राणो नारायण एव तादृशी व्यक्तिरिति सत्यं भायात्। ततश्च तद्व्यतिरिक्तब्रह्मरुद्रविषयिणीमीश्वरत्वशङ्कामुत्सृज्य भगवन्नारायण एकस्मिन्नेव अनन्यप्रयोजनतया अस्मदीयशरीराद्युपकरणैर्वरिवस्याविरचनेन कालयापनं संप्रतिपन्नम्। अस्थिरस्य जीवितकालस्य मोघीकरणं माभूत्॥

अवस्तनगाथाया एव शेषभूता सेयमपि गाथा। विशेषांशस्तु—अल्पायुष्ट्वमात्मनामनामुष्य वृथाकालहरणमयुक्तम्; आवापोद्वापतो विमर्शपूर्वकमेकैव देवता सर्वाधिकेति विनिश्चित्य तस्यां क्षिप्रं प्रवणा भवतेत्युक्तिः। मूर्तित्रयमेकात्माधिष्ठितं वा? अनेकात्माधिष्ठितं वेति निर्धारणमशक्यमिति यदत्र प्रतिपाद्यते, तत्रेदं प्रतिपत्तव्यम्। आत्मा तु प्रतिशरीरं भिन्न इति जानन्ति नाम सर्वे। ब्रह्मरुद्रनारायणाख्यमूर्तित्रये एक एवात्मा व्याप्यावस्थाय वर्तते वा? उत भिन्नभिन्न आत्माऽवतिष्ठते वा? इति विचिकित्सायां जातायाम्, यदा मूर्तयस्तिस्रः, तदा आत्मानोऽपि त्रय इति कश्चन कल्प उदियात्। अथ च "यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यम्, तच्छेषतैकस्वरूपम् तत्तस्य शरीरम्" इति परिष्कृतस्य शरीरलक्षणस्यैव प्रजापतौ पशुपतौ च सद्भावेन शरीरमात्रमेव तौ, आत्मा तु नारायण एव इति अपरः पक्ष उदियात्। वस्तुतः अयमेव ध्रुवमुदारः कल्पः; तथाऽपि कल्पेऽस्मिन् दृढप्रत्ययस्य दुर्घटत्वात् प्रतिष्ठितप्रज्ञा असंभविनीत्यभिसन्धिना "प्रतिपत्तुमयोग्ये" इति मुनिवरः प्राह।

सुबालोपनिषदि * एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः * इति यदाम्नातं तदेव हृदि निदधानो मुनिवरोऽत्र द्वितीयपादोपक्रमे नारायणं सविशेषमुपादत्ते [* नन्मेळिल् नारणन् * इति।] * रूपश्रिया परमया परमेण धाम्ना चित्रैश्च कैश्चिदुचितैर्भवनश्चरित्रैः। चिह्नैरनिह्नवपदैरपरैश्च कैश्चिन्निश्चिन्वते त्वयि विपश्चित ईशितृत्वम्॥ * इति [श्रीवैकुण्ठस्तवे] श्रीकूरनाथगुरुवरोपपादितरीत्या परत्वस्य असाधारणास्पदभूतो नारायण इति तदर्थः। उपात्तसुबालोपनिषद्वाक्यस्य तावदयमर्थः; —[एष सर्वभूतान्तरात्मा] अत्र भूतशब्दस्य सत्तायोगिवस्तुवाचकत्वात् उभयविभूत्यन्तर्गतं चिदचिद्वस्तुजातमनेन भूतशब्देन निर्दिश्यते। [अपहतपाप्मा] पूर्वोक्त पृथिव्यादितमःपर्यन्तेषु वस्तुषु अन्तर्यामितया सन्नपि तद्गतदोषैरसंस्पृष्टः। [दिव्यः] दिवि स्थितः; परमपदनिलय इत्यर्थः। [देवः] द्योतनादिगुणविशिष्टः। [एकः] अद्वितीयः; समाभ्यधिकरहित इत्यर्थः। * एकश्चोलनृपस्सम्राडद्वितीयोऽस्ति भूतले। इति तत्तुल्यनृपतिनिवारणपरं वचः॥ न तु तद्भृत्य तत्पुत्रकलत्रादिनिवारणम॥ * इति भगवद्यामुनार्यसूक्तिरत्नमिहानुसन्धेयम्॥ तथा चैतादृशवैलक्षण्यविशिष्टे नारायणे चिन्तितमात्रे सत्येव तस्य स्वव्यतिरिक्तसर्ववस्तुप्रकारित्वम् इतरयोर्विधिशिवयोः सृष्टिसंहारोपकरणत्वं च मनसि प्रतिष्ठितं भविष्णु; ततश्च * न्यायस्मृतिप्रभृतिभिर्भवता निसृष्टैर्वेदोपबृंहणविधावुचितैरुपायैः। श्रुत्यर्थमर्थमिव भानुकरैर्विभेजुः त्वद्भक्तिभावितविकल्मषशेमुषीकाः॥ * इति [श्रीवैकुण्ठस्तवे] श्रीकूरनाथगुरुवरोक्तरीत्या न्यायश्रुत्यादिसहकारेण च सुविमर्शे कृते नारायणस्यैव परिबृढत्वम् इतरयोरवरत्वं च हृदयमवगाहेत वः। तदा तस्यामेव परदेवतायामनन्यप्रयोजनभक्तिविरचनं वरम् इत्युक्तं भवति॥

एवं कथयति मुनिवरे "भवतु नाम; भविष्यति तावत् कालक्रमेण; का खिदिदानीं त्वरा?" इति स्थितेषु संसारिषु, अथ विशेषतोऽभिधीयते [नम्मुडैनाळे] इति। स्वकीयमल्पायुष्ट्वं नावगच्छथ यूयमिति प्रोक्तं भवति। * नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमिते रवौ। आत्मनो नावबुध्यन्ते मनुष्या जीवितक्षयम्॥ * इति भरतं प्रति रामश्चित्रकूटे प्राह यत् तदिह स्मर्तव्यम्। [आदित्ये उदिते नन्दन्ति] यदा सूर्य उदेति, तदा द्रव्यार्जनकालस्समुपस्थित इति मोदन्ते मर्त्याः। [रवावस्तमिते च नन्दन्ति] उदिते सूर्ये अस्तं गच्छति च 'आर्जितद्रव्यविनियोगेन क्षुद्रविषयोपभोगकालस्समुपस्थित इति प्रमोदन्ते। आयुषो वृथाक्षयमवेक्ष्य शोचन्मनुष्यो नैकोऽपि हन्त। * यन्मुहूर्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते। सा हानिस्तन्महच्छिद्रं सा भ्रान्तिस्सा च विक्रिया॥ * एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते। दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं नृणाम्॥ * इत्यादि प्रमाणगतीरहह! नानुसंदधते जडा जना इति मुनिवरस्य हार्दो निर्वेदः शब्दसंदर्भगर्भितः॥ .... (७)

(गाथा.) नाळु निच्चुडु नमपळमै अङ्गोडुविनै युडने
माळुम् * ओर् कुरैविल्लै मननह मलमर कळुवि *
नाळु नन्दिरुवुडै यडिहळ्दम् नलङ्कळल वणङ्गि *
माळु मोरिडचिलुम् वणकोडु माळ्वदु वलमे॥ ८॥

मानसं त्रिमूर्तिसाम्याशङ्काजनितसंशयात्मकमलविहीनम् अत एव विशुद्धं विधाय, श्रियः-पत्युः परमपुरुषस्य परमभोग्यचरणारविन्दवन्दने कृते निरन्तरमस्माकं विविधां बाधामुत्पादयन्ति अनादिकालसञ्चितानि भगवदनुभवविरोधीनि पापानि सद्य एव क्षीयेरन्; न काचिदपि भवित्री न्यूनता। निर्याणकालेऽपि वा * द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित् * इत्युक्तवतो रावणस्येव विषमं व्रतं विसृज्य प्रह्वीभावेन मरणं वरम्॥

उपदेशपात्रभूतासु जनतासु स्वकीयदुरितप्राबल्यमनुचिन्त्य 'प्रबलदुरितभरितानामस्माकं हन्त! कथमिव घटेत मुनीन्द्र! भवदीयोपदेशसार्थक्यसम्पादनम्' इति विचारविह्वलासु सतीषु * मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणः। केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति॥ * इत्यादिप्रमाणगतीरनुसंदधानो मुनीन्द्रः प्रतिजानीते भगवत्प्रणत्याभिमुख्यमात्रे जाते सकलपापक्षयस्सद्यो भवितेति। गाथायामस्यां साधनं साध्यं चेत्युभयमुपदिश्यते। निःशेषपापविलयः साध्यम्। लक्ष्मीपतिचरणारविन्दवन्दनं साधनम्। भगवच्चरणारविन्द-वन्दनमात्रेण सकलदुरिततिततिविलयः प्रोच्यमान इह कथमिव घटेत? पाप्मनामनुभवैकविनाश्यत्वं हि व्याहरन्ति * नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादीनि शास्त्राणि? इतिचेत्; तिष्ठन्तु नाम तथाविधानि सामान्यवचनानि। * तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेत एवंहास्य सर्वे पाप्मानः प्रदूयन्ते * यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते * तस्यैवात्मा पदवित्तं विदित्वा। न कर्मणा लिप्यते पापकेन * इत्यादीन्यौपनिषदवचनानि बलीयांसि हि जाग्रति। ब्रह्मविदां विषये पूर्वाघविनाशः उत्तराघाश्लेषश्च प्रामाणिक इति प्रतिपत्तव्यम्। भगवच्चरणारविन्दवन्दनसमनन्तरक्षण एव पापानि सकलानि प्रणश्येयुरिति यदत्र प्रतिपादितम्, तदिदं ब्रह्मविद्यापर्यन्तसिद्धिमद्विषयमेवेति ग्राह्यम्। * तमेवं विद्वानमृत इह भवति। नान्यः पन्था

अयनाय विद्यते * इत्यादीन्यपि प्रमाणान्यत्रानुसन्धेयानि । अव्याजकरुणानिधिर्भगवान् ब्रह्मविद्यासिद्धिविरहितानपि भक्तान् स्वचरणकमलप्रणाममात्रत एव प्रसन्नस्सन् यदि निष्पन्नब्रह्मविद्यानिवानुगृह्णीयात्तदा नैष परमपुरुषो दण्डवारितो भवितुमर्हतीति सहस्रनामभाष्ये मद्पादानामनर्घामिप्रन्धिप्रदर्शनमिहानुसन्धेयम् ॥

[न काचिदपि भवित्री न्यूनता] इत्यस्य हृदयं द्वेधा; (१) विरोधिव्यपगममात्रमेव न; सकलविधसम्पत्समृद्धिरपि स्यादिति। (२) युष्माभिराचर्यमाणं वन्दनं फलं प्रदाय न विरमेत्; * शुभानि पुण्यानि न जातु हीयते * इतिवत् भगवन्तश्चेनसि नित्यप्रतिष्ठितं स्यादिति च ॥ तृतीयपादे लक्ष्मीसनाथस्य भगवतः पादवन्दनविधानवलेन * लक्ष्मीः पुरुषकारत्वे निर्दिष्टा परमर्षिभिः। ममापि च मतं ह्येतन्नान्यथा लक्षणं भवेत् ॥ * इति भगवच्छास्त्रसिद्धपुरुषकारत्वविशिष्टां श्रियं पुरस्कृत्य भगवन्तं प्रपद्यमानानां न फलव्यभिचार इति शास्त्रार्थोऽवबोध्यते। श्रीपराशरभट्टार्यसकाशे नञ्जीयर्नामा वेदान्तियतिवरः पप्रच्छ-स्वतःपरमकारुणिकस्य भगवतः प्रपदने किमहो फलं व्यभिचरेत्? काचिदावश्यकता लक्ष्मीपुरस्करणे? इति। तदा भट्टार्य इमामेव गाथां प्रमाणमूर्धन्यत्वेनोपन्यास्थदित्याचार्याः ॥

[निर्याणकालेऽपि वां प्रह्वीभावेन मरणं वरम्] इत्यनेन, स्वत एवानुग्रहोन्मुखस्य भगवतो यत्किञ्चिद्व्याजमात्रप्रतीक्षिता प्रोक्ता भवति। यावच्छरीरपातं प्रातिकूल्ये व्यवसिताः स्थिता अपि अन्त्यकाले यदि प्रह्वीभूतास्सन्तो म्रियेरन् तर्हि द्वारकांकूक्षी भगवान् मामयं प्रणमन्नेव प्रामीयतेति प्रमोदमानः प्रसीदेदित्युक्तं भवति। * द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित् * इति कृतसंकल्पाद्रावणादल्पीयसीं व्यावृत्तिमेव निरीक्षते लक्ष्मीपतिरिति वस्तुस्थितिः ॥ * सर्वज्ञोऽपि हि विश्वेशः सदा कारुणिकोऽपि सन्। संसारतन्त्रवाहित्वाद्र(क्ष्या)क्षापेक्षां प्रतीक्षते ॥ * इति प्रमाणोदितरक्षापेक्षायाम् इदमप्यन्तर्भावयति भगवानिति मुनिवरस्य हृदयमिव ॥ .... (५)

(गाथा. वलत्तनन् तिरिपुर मेरित्तवन् इडम्पेर चुन्दि
त्तलत्तु * एल्लदिशैयुहन् पडैत्त नल्लुहमुम् तानुम् *
पुलप्पड प्पिन्नुम् तनुलहत्तिल् अहत्तनन् ताने *
शोलप्पुहिल् इवैपिन्नुम् वयित्तुळ इवैयवन् तुयके ॥ ९ ॥

त्रिपुरदहनकर्ता रुद्रो दक्षिणपार्श्वमाश्रित्य लब्धसत्ताकः; चतुर्मुखोऽपि स्वोत्पादितभुवनवर्गेण सह सविकासनाभीकमलमाश्रित्य लब्धसत्ताकः। स च भगवान् स्वयं सकलमनुजनयनविषयतां प्रेप्सुर्जगति नानावतारान् वितनोति केवलनिजेच्छया। अवतीर्य तेन कृतानां क्रियमाणानां च चेष्टितानाम् अपरिच्छेद्यतया, बहुशः कथनेऽपि सक्षेपतैव सत्यम्। तस्य माया च महती बत! ॥

अधस्ताद् ब्रह्मरुद्रयोरवरत्वम् श्रीमतो नारायणस्य पारम्यं च प्रत्यपादि। अधुनाऽस्यां गाथायाम् ते उभे अपि दैवते भगवन्तमाश्रित्य लब्धसत्ताके इति प्रतिपादनपूर्वकम् भगवतोऽवतारचेष्टितानामपरिच्छेद्यत्वं

व्यामोहकत्वं च प्रतिपाद्यते । अवतारावसरेषु स्वकीयपरत्वनिह्नवमपि कासुकासुचिद्गाथासु प्रदर्शयति यतः, तत एव व्यामोहकत्वप्रतिपादनमप्यत्र जातम् ।

संदेश के इस पहले दशक के दसवें पद्य में आळ्वार, जगत्सृष्टि करने की चिंता करते हुए महार्णव में शयन करनेवाले भगवान के पास संदेश भेजते हैं। अतः आचार्यों का यह अभिप्राय है कि यह सारा दशक भगवान की व्यूहदशा में संदेशप्रेषण है। यहां ऐसी शंका उठेगी कि—निर्हेतुक परमकृपानिधि भगवान स्वयं पधारकर भक्तों से मिलने के स्वभाववाले हैं; ऐसे आप अब आळ्वार की उपेक्षा क्योंकर कर रहे हैं? एवं यह निश्चय कैसे किया जा सकता है कि ऐसी उपेक्षा करनेवाले आप संदेश भेजने मात्र से प्रसन्न हो जायंगे? इसका उत्तर सातवीं गाथा में अतिमनोहरतया दिया जायगा। प्रारंभ में भगवान अपनी असीम कृपा से प्रेरित होकर हमसे मिले। फिर हमारे अनंत अपराध देखकर हमें दंड देने के उद्युक्त-से हो गये। यह तो निश्चित है कि हम पूर्ण पापी हैं। तथापि भगवान हमारे पापों पर क्यों कर ध्यान देते हैं? उन्हें क्या अपना क्षमागुण विस्मृत हुआ? अभी भी उस महागुण की याद दिलाने पर वे जरूर इधर पधारेंगे। ऐसे एक विलक्षण विश्वास से प्रेरित होकर आळ्वार अब दूत भेजने की चेष्टा में लग रहे हैं।। [अवतारिका समाप्त हुई।] .... *

(गाथा.) अञ्जिरैय मडनाराय् अळियत्ताय् * नीयुमुनिन्
अञ्जिरैय शेवलुमाय् आवावेन्नु एनक्करुळि *
वेञ्जिरै प्पुळ्ळुयर्त्तार्क्कु एन्विडुत्तूदाय् चेन्नक्काल् *
वन्शिरैयिल् अवन् वैक्किल् वैप्पुण्डाल् एन्शेय्युमे ॥ १ ॥

सुन्दरपक्षतिशालिनि बलाके! मद्विषये त्वमनुकम्पितुमर्हसि; त्वं सौम्यपक्षयुक्तेन त्वदीयेन दयितेन सह हाहेति मयि कृपां प्रदर्श्य, तीक्ष्णपक्षाञ्चिततार्क्ष्यकेतोर्भगवतस्सविधे मदर्थं दूतकृत्यनिरता सती गच्छसि चेत्, स आभिमुख्यमनाकलय्य विमुखतामाविष्कुर्याच्चेदपि तावता का हानिर्भवित्री? (त्वया कर्तव्यं कृत्यं त्वं कृतवती भव ॥)

इदानीं स्त्रीभावे वर्तते मुनिवर इति स्मर्तव्यम्। यद्यपि गाथायामस्यां स्त्रीभावसूचकपदसंनिवेशो नास्ति, तथाऽप्युपरि तृतीयादिगाथासु स्त्रीवाक् सुस्पष्टमेव निवेशितेति तदानुगुण्याय दशकमिदं कृत्स्नं स्त्रीभाव-भाषितमिति सुनिर्णयम्। भगवता सह संश्लिष्य विश्लिष्टाया स्सीतासधर्मिण्या दिव्यवनिताया भाषितमिति ध्येयम्। बलाका दूतकृत्ये प्रेर्यतेऽत्र। बलाका नाम बकस्त्री। सा स्वदयितेन सह गत्वा स्वकार्यं साधयितुमर्हतीत्यभि-प्रेत्य प्रार्थ्यते। * मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परमिति गीतोक्तरीत्या भगवद्गुणानां परस्परं बोधनेन कालं क्षेप्तुं सततं संश्लिष्य वर्तमानाः परमभागवताः प्रार्थ्यन्त इति परमार्थः। बकजातेस्सर्वात्मना शुद्धवर्णत्वं प्रात्यक्षिकम्। एवम् * स बाह्याभ्यन्तरः शुचिः * इत्युक्तबाह्याभ्यन्तरशौचयुक्ता उत्तमाधिकारिणोऽत्र विवक्षिताः। किञ्च स्वाहारभूता मत्स्याः क्षुद्रा दृश्यन्ते यदि, तानुपेक्ष्य स्थूलमत्स्यसमागमे प्रतीक्षाशालित्वं बकजातेस्स्वभावः। एवम् असारेष्वल्पसारेषु च शास्त्रार्थेषु दृष्टिमनिधाय सुमहत्तरशास्त्रार्थेषु दत्तदृष्टयो महाविवेकिनो विवक्षिताः। किञ्च, बकाः स्वाहारलिप्सया प्रायस्सागरवेलासु कालं क्षिपन्ति; तदा उद्वेलानामूर्मिमालानामुपनिपातेऽपि ते मात्रयाऽपि न चलन्ति नचाप्युद्विजन्त इति पश्यामः; एवम् * गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः। अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः ॥ * इति श्री भागवतोक्तरीत्या सांसारिकव्यसनवीचिपरम्परासु भूयसीषु सम्पतन्तीष्वपि व्ययालेशमप्यनाप्नुवन्तो विरक्ता विवक्षिताः। एवंरीत्या बकसाधर्म्यं भागवतेषु सुबहूह्नेयम्।

उपक्रमे सुन्दरपक्षतिवैशिष्ट्ये दृष्टिर्निधीयते। मातुरवयवेषु बहुषु सत्सु स्तनन्धयशिशोर्यथा मातुः पयोधरे दृष्टिर्लगति, तथा शिष्य आचार्यस्य ज्ञानानुष्ठानयोर्दत्तदृष्टिर्भवतीति स्थितम्। अत्र च सुन्दरपक्षतिशालित्व कथनम् * उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां प्राप्यते पुरुषोत्तमः ॥ * इत्युक्त-रीत्या आचार्यगतज्ञानानुष्ठानसम्पत्समृद्धिकथनरूपं विभाव्यम्। आचार्यस्य शिष्यविषये सततं दयमानमनस्कत्व-मावश्यकम्; अन्यथा शिष्योज्जीवनमनायासतो न घटेत; तदेवात्रोच्यते मद्विषये त्वमनुकम्पितुमर्हसीति। अत्र बलाकां संबोध्य भर्त्रा बकेन सह त्वं मदीयं कार्यं निर्वर्तयेथा इति प्रार्थनया श्रियः पुरस्करणपूर्वकं श्रीधरा-त्कार्यसंपादनसंप्रदायः स्मारितो भवति। [हाहेति मयि कृपां प्रदर्श्य] इत्यनेन दयास्वरूपं सम्यक् प्रदर्शितं भवति; परदुःखदर्शनावसरे यस्य हाहाकारः प्रसभं प्रादुर्भवति स एव हि दयालुर्नाम। अत एव च दयाया

अनुकम्पा, अनुक्रोश इत्यादीनि नामानि प्रथन्ते । क्रोशन्तमनुसृत्य यः क्रोशति सोऽनुक्रोशी ; कम्पमानमनुसृत्य यः कम्पते सोऽनुकम्पी । तथाच इदानीन्तनी स्वकीया दशा परेषां हाहाकारयोग्येति सूचितं भवति ।

[तीक्ष्णपक्षाञ्चिततार्क्ष्यकेतो भगवतस्सविधे] संदेशप्रापणार्हस्थलमुच्यतेऽनेन । भगवद्वाहनभूतस्य तार्क्ष्यस्य तीक्ष्णपक्षाञ्चितत्वकथनं विरोधिनिरसनप्रागल्भ्यकथने पर्यवस्यति । युष्मत्संदेशश्रवणसमनन्तरमेव विरोधिनिरसनपूर्वकं सद्यस्समागन्तुं तत्सकाशे परिकरो वर्तत इति प्रोक्तं भवति । अथवा तार्क्ष्ये विवक्षितं तीक्ष्णत्वं तत्पक्षतावारोप्य कथ्यत इत्यपि सुवचम् । भगवता सह संश्लेषो यदा मम संवृत्तः तदा निर्दयस्सन् तार्क्ष्य एव हि विश्लेष्य नीतवानिति रोषेण कथ्यते । अक्रूरः कंसचोदितस्सन् व्रजमागत्य यदा कृष्णकिशोरं स्यन्दनमधिरोप्य निनाय, तदा व्रजयोषितस्सर्वाः * अक्रूरः क्रूरहृदयो हयान् प्रेरयते जवात् * इति तं यथाऽधिचिक्षिपुः तथैवैतत् ।

[मदर्थं दूतकृत्यनिरता सती गच्छसि चेत्] परार्थं दूतकृत्यकरणम् अलभ्यलाभः खलु । भगवान्नन्दनन्दनोऽपि पाण्डवार्थं दूतकृत्यमाकलय्य हि पाण्डवदूतसमाख्यां प्राप्य प्रजहर्ष । तथा युवयोरपि हर्षप्राप्तिरवर्जनीयेत्युक्तं भवति । "मदर्थं दूतकृत्यनिरता सती" इत्यत्र अत्यद्भुतं भावमभिवर्णयन्त्याचार्याः ; हनुमान् रामार्थं दूतकृत्यं प्रथमं चक्रे, अथ सीतार्थं च तच्चक्रे । यदा रामार्थं दूतकृत्यमन्वतिष्ठत्तदा तस्य लङ्कायामुच्चावचाः परिभवास्समभूवन् बन्धप्राप्तिर्लाङ्गूलदहनप्राप्तिरित्यादयः । यदातु वैदेह्याः कृते स एव दूतस्सन् प्रतिनिवृत्तः, तदा * एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः । मया कालमिमं प्राप्य दत्तस्तस्य महात्मनः ॥ * इति कथयता रामचन्द्रेण गाढाश्लेषप्रदानरूपपरमसत्कारं हि प्रापितोऽभूत् । तथाच वनितार्थं दूत्यकरणे परमपुरुषार्थलाभो भवितेति वेदितव्यमिति । मूलगाथायां चतुर्थचरण एवमस्ति—(त्वं दूती सती गच्छसि चेत्) "कठिने कारागारे स यदि स्थापयति, तत्र स्थितौ का क्षतिः ?" इति । स भगवान् स्वसकाशे दूततया आगतान् कारागारे स्थापयतीति नैतत्संभवि । एतावदेवात्र तात्पर्यम्—स युष्मान् आभिमुख्येनानुगृह्णन् विमुखो भवति चेत् कामं भवतु ; स यद्वातद्वा करोतु नाम ; मत्प्रार्थनापरिपूरणं युष्माकं भर इति ॥ ... (१)

(हिंदी) हे सुंदर पक्षवाली बगले की स्त्री! मेरे प्रति तुम दया करो। तुम अपने सुंदर पक्षवाले पति के साथ, हाहाकार पूर्वक मुझ पर दया करती हुई, तीक्ष्णपक्षयुत गरुडध्वज भगवान के पास मेरी दूती बन कर यदि जाओगी, और वे यदि अभिमुख न होकर तुम्हारे विमुख ही रह जायंगे, तो उससे तुम्हें कौन-सी हानि होगी? (तुम अपना काम करके कृतकृत्य बनो।)

यह बात याद रखने की है कि अत्र आळ्वार स्त्री-भावना से विभूषित हैं। यद्यपि इस गाथा में स्त्री-भावना का सूचक कोई भी पद नहीं मिलता। तथापि तीसरी गाथा से शुरूकर स्त्री-भावना स्पष्ट प्रतीत होगी। अतः इस सारे दशक को ही स्त्रीभावनाप्रोक्त मानना उचित होगा। अर्थात् भगवान से मिलकर फिर वियुक्त, सीतादेवी के सदृश किसी दिव्य महिषी की यह वाणी है। इस गाथा में किसी एक

वक पक्षी की स्त्री से दूती होने की प्रार्थना की जाती है। अर्थात् नायिका, यों मानती हुई कि वह पक्षी अपने पति के साथ जाकर अपना (नायिका का) काम सिद्ध कर देगी, उससे प्रार्थना करती है। वस्तुतस्तु, "मच्चित्ता मद्गतप्राणाः बोधयन्तः परस्परम्" इत्यादि भगवद्गीतोक्त प्रकार, एक दूसरे से भगवद्-गुणों का संकीर्तन करते हुए, आपस में मिलकर ही रहने के इच्छुक परमभागवत लोग यहां प्रार्थित हो रहे हैं। ऐसे महात्मा लोग अनेक प्रकारों से वकपक्षी के सदृश होते हैं। तथा हि—वकपक्षी शुभ्रवर्णवाला है; भक्त लोग भी अंदर और बाहर सर्वथा स्वच्छ रहते हैं। मत्स्य पकडने के इच्छुक वक, जलाशय के पास खडा होकर बडी सावधानी से देखता रहता है; पानी में छोटे छोटे मत्स्य देखने पर वह उनकी उपेक्षा कर, शांति से बडे मत्स्य की ताक में ही रहता है; शास्त्राभ्यास करनेवाले महात्मा लोग शास्त्रसागर में असार व अल्पसार अर्थों की पूरी उपेक्षा कर, सारतम अर्थों का ही ग्रहण करते हैं। मत्स्य की ताक में रहता हुआ जब वक समुद्रतट पर खडा हो जाता, तब बडी बडी लहरें देखकर वह डरता नहीं, हिलता नहीं; किंतु अपने स्थान में ही स्थिर रहता है; भक्तजन भी संसार सागर के सुखदुःख तरंगों से अविकृत होकर, उनकी परवाह न करते हुए अपनी निष्ठा में स्थिर रहते हैं। श्री भागवत में गोवर्धनोद्धरण कथा प्रसंग में यह एक बडा सुंदर पद्य आता है जो इस विषय में प्रमाण होगा—गिरयो वर्षधाराभिः हन्यमाना न विव्यथुः। अभिभूयमाना व्यसनैः यथाऽधोक्षजचेतसः॥ यह तात्पर्य है—सांसारिक व्यसनों से पीडित भगवद्भक्तों की भांति गोवर्धन पर्वत के डुंगर वर्षा से पीडित होने पर भी विकृत नहीं हुए। ऐसे अनेक प्रकारों से भक्तों और वकपक्षी में सादृश्य होता है।

गाथा के उपक्रम में वकपक्षी को सुंदर पक्षयुत कहा गया है। अवतारिकोक्त प्रकार पक्ष शब्द का अर्थ है ज्ञान व अनुष्ठान; उनका सौंदर्य माने श्रेष्ठता; तथा च आचार्य के अतिश्रेष्ठ ज्ञानानुष्ठानों का यह वर्णन हुआ। माता के दूसरे सभी अवयव छोडकर, केवल उसके स्तनोंपर ही दृष्टि डालनेवाले दुधमुँहे बच्चे की तरह, शिष्य भी आचार्य के ज्ञानानुष्ठानों पर ही दृष्टि डालता है। अतः इनकी प्रशंसा करना आवश्यक होता है। एवं शिष्य का कल्याण आचार्य की कृपा से ही होगी; अतः उसकी माँग की जाती है [तुम दया करो] इति। वकस्त्री से यह प्रार्थना की रही है कि तुम अपने पति के साथ जाकर मेरा काम सिद्ध करो। इससे यह सांप्रदायिक अर्थ सूचित किया जाता है कि हमें लक्ष्मीजी का पुरस्कार करते हुए नारायण से कार्यसिद्धि पानी चाहिए। [हाहाकार पूर्वक दया करती हुई] कहने से दया शब्द का अर्थ बताया जाता है। अर्थात् वही मानव दयालु कहा जाता है जो कि दूसरों का दुःख देखकर स्वयं दुःख से हाहाकार करता है। संस्कृतसाहित्य में दया को अनुकम्पा, एवं अनुक्रोश कहते हैं। इसका यह अर्थ है कि दया उस गुण का नाम है जिसे मानव दुःख से कांपनेवाले दूसरे को देखकर स्वयं भी कांपेगा, और चिल्लानेवाले को देखकर स्वयं भी चिल्लाएगा। तथा च यह अर्थ सूचित किया जाता है कि नायिका की अबकी दयनीय दशा दूसरों को हाहाकार करने योग्य है।

[तीक्ष्णपक्षयुतगरुडध्वज भगवान के पास] कहने से संदेश पहुंचाने का स्थान बताया जाता है। भगवान के ध्वज व वाहनभूत गरुडजी को तीक्ष्णपक्षयुत कहने का यह भाव है कि आप विरोधियों

का निरास करने में समर्थ हैं; अर्थात् पक्षियों से संदेश पाते ही विरोधियों को दूर हटाकर नायिका के पास पहुंचने अपेक्षित पुष्कल साधन भगवान के पास है। अथवा पक्षों को तीक्ष्ण कहने का अभिप्राय गरुडजी को ही तीक्ष्ण कहना है। यों कहनेवाली नायिका का यह भाव है—जब भगवान मेरे ऊपर कृपा करते हुए यहां विराजमान थे (अर्थात् मुझसे संश्लिष्ट थे) तब यह क्रूर गरुडने ही उनको अपने ऊपर बैठाकर दूर ले गया। यह तो रोष की बात है। जब कि कंसप्रेरित अक्रूर जी ने व्रज आकर श्रीरामकृष्णों को मथुरा ले गया, तब भगवान के विरह प्रसंग से दुःखी गोपियों ने "अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान्" (क्रूरहृदय यह अक्रूर घोडों को बहुत शीघ्र चला रहा है) कहती हुई उनकी निंदा करने लगीं। इसी प्रकार यहां पर विरहिणी नायिका गरुडजी को दोष दे रही है।

[मेरी दूती बनकर यदि जाओगी] इत्यादि। दूसरों के उपकारार्थ उनका दूत बनने में महान लाभ है। भगवान श्रीकृष्ण ने भी पांडवों का दूत बन कर पांडवदूत नामक विरुद पाया। इसी प्रकार मेरी दूती बनने पर तुम भी प्रकृष्ट व प्रहृष्ट हो जाओगी। इस शब्द-संदर्भ में, कि "मेरी दूती बनकर," हमारे पूर्वाचार्य एक बडा सुंदर अर्थ बताते हैं। हनुमानजी पहले श्रीरामचंद्रजी के दूत हुए और बाद में सीताजी के। जब वे श्रीरामचंद्रजी के दूत बनकर लंका गये, तब उन्हें बंधन, लांगूलदाह इत्यादि नानाप्रकार की यातनाएं मिली। परंतु जब वे ही सीताजी के संदेशवाहक होकर, लंकासे लौटकर श्रीरामचंद्रजी के पास गये, तब, अहो! उन्हें कैसा सन्मान मिला! "एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः। मया दत्तः" कहते हुए स्वयं श्रीरामचंद्रजी ने उनका आलिंगन किया। इससे यह अर्थ सूचित किया जाता है कि नायिका के लिए दूतकृत्य करने पर महान पुरुषार्थ मिलेगा।

मूलगाथा के चौथे पाद का यह शब्दार्थ है—(तुम मेरी दूती बनकर जब भगवान के पास जाओगी, तब) यदि वे तुम्हें सख्त कैद में डाल दें, तो कैद में रहने से तुम्हें कौनसी हानि होगी? परंतु यह काम असंभावित है कि भगवान अपने पास आनेवाले दूतों को कैद में डाल दें। अतः इस वाक्य का तात्पर्य इतना ही होगा कि वे भगवान अपनी इच्छा के अनुसार तुमसे सादर मेरा संदेश सुनें अथवा अपने काम में मस्त होकर तुमसे विमुख रहें; तुम इस बात की चिंता मत किया करो। परंतु मेरी प्रार्थना सफल बनाना ही तुम्हरा कर्तव्य होगा॥ .... (१)

(गाथा.) एनुशेय्य तामरैक्कण् पेरुमाना कैंनुदाय् *
एनुशेय्यु मूरेत्तकाल् इनकुयिलहान्द नीरलिरे *
मुनशेयृद मुळविनैयाल् तिरुवडिकीळ् कुचेवल् *
मुनशेय्य मुयलादेन् अहल्वदुवो विदियिनमे॥ २॥

अयि संघीभूताः कोकिलाः! मदीयसरसीरुहाक्षभगवत्सविधे मदर्थं दूततया गत्वा संदेशप्रापणे हन्त! किं व क्लिष्टम्? किमहो युष्माकं प्रकृतिर्विपर्यस्ताऽभूत्? आचरितपूर्वपापकर्मफलतया भगवत्पादसेवाभाग्यविकलाया मम किमद्यापि विश्लेष एव गतिः? (इति कथयत॥)

अधस्तनगाथायां बलाकासंबोधनपूर्वकं संदेशप्रापणप्रार्थना कृता। संदेशवाक्यं तु तत्र न किमपि कथितम्; तदिह कोकिलान् संबोध्य कथ्यते। प्रथमतो या व्यक्तिस्संबोधिता तस्यै खलु संदेशवाग्वक्तव्या, कथमन्यथा क्रियते? इत्याचार्या आशङ्क्य एवमनुगृह्णन्ति—आविलचेतसां हि कृत्यमीदृशम्; भगवद्विषये प्रवृत्तानामेतादृशं कालुष्यमाविर्भवति नो चेत् पामरजनानिमिनिन्द्रशपात्रभूतविषयान्तरेभ्यो भगवद्विषयस्य को विशेषः? एवंविधकालुष्यसम्पादनमेव हि भगवद्विषयस्योत्कर्ष इति। अत एव यतिराजविंशत्युपक्रमेऽनुगृहीतम् * श्रीमाधवांघ्रि-जलजद्वयनित्यसेवाप्रेमाविलाशयपराङ्कुशेति। * रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा * इत्युक्तरीत्या प्रसन्नतैक-निरूपणीयस्य सात्त्विकाग्रेसरहृदयस्य आविलत्वविशेषणं कथमिति केचिदुद्भ्रान्ता भवेयुः; प्रसन्नचेतसामपि सतां भगवद्विषये आविलमनस्कता भूषणमेव न तु दूषणमित्यास्थेयम्।

अयि संघीभूताः कोकिलाः! इति संबोधनम् * कैङ्कर्यनित्यनिरतैर्भवदेकभोगैः नित्यैरनुक्षणनवीन-रसार्द्रभावैः। नित्याभिवाञ्छितपरस्परनीचभावैर्मद्दैवतैः परिजनैस्तव संगसीयेत्युक्तरीत्या परस्परविश्लेषासहत्वेन सदा संमिलितास्सन्तो विराजन्ते ये परमभागवताः तेषां संबोधनं मन्तव्यम्। तेषु च कोकिलसाधर्म्यं बहुधा निर्वाहमर्हति। कतिपयान्निर्वाहप्रकारान् प्रदर्शयाम इह। (१) कोकिलाः प्रायः पुन्नागवृक्षवासिनो भवन्तीति शठकोपमुनीन्द्रगोदादेव्यादिगाथाभिरवगम्यते। एवमस्मदीयाः पूर्वाचार्याः श्रीरङ्गदिव्यक्षेत्रे पुन्नागवृक्षतलच्छाया-मुपाश्रित्य जीवितवन्त इति श्रीपराशरभट्टार्यसूक्त्याऽवबुध्यते; (श्रीरङ्गराजस्तवे) * श्रीरङ्गराजकरलम्बितशाखि-काभ्यो लक्ष्म्या स्वहस्तकलितश्रवणावतंसम्, पुन्नागतल्लजम् अजस्रसहस्रगीतिसेकोत्थदिव्यनिजसौरभमामनामः॥* इति श्लोकरत्ने प्रतिपादितो विलक्षणो विशेषोऽत्रानुसन्धेयः। अत्र "अजस्रसहस्रगीतिसेकोत्थदिव्यनिजसौरभम्" इति पुन्नागविशेषणम् ऐतिह्यविशेषगर्भितम्। तदात्वे पूर्वाचार्याः श्रीरङ्गवासिनस्सर्वेऽपि तत्र चन्द्रपुष्करिणी तटविराजमानपुन्नागवृक्षच्छायामुपाश्रित्य सहस्रगीतिमूलप्रवचनं तदर्थप्रवचनं च कुर्वन्त आसतेति। सहस्रगीतिव्याख्यायामप्ययमर्थस्तत्रतत्र प्रकाशितोऽस्ति। तथात्र तत्पुन्नागाश्रिता बहुश्रुता इह कोकिलत्वेन विवक्षिताः। (२) कोकिला वनप्रियाः कथ्यन्ते अमरसिंहेन। वनशब्देन बृहदारण्यकाद्युपनिषद्वनं विवक्षितम्; तत्प्रिया आचार्या इहाभिप्रेताः। (३) कोकिलेषु परभृतत्वंच प्रथितम्; एवमाचार्याधीनपोषणाः शिष्याः इह विवक्षिताः। (४) कोकिलाः प्रथमतश्चूतकिसलयखादनेन कषायितवदनास्सन्तः अथ पनसफलमधुरसंचूषणेन तृप्ता भवन्तीति श्रीपरकालमुनीन्द्रः स्वकीये बृहत्सूक्ते (५-३-४.) कथयति। एवं प्रथमतः काव्यनाटकादि-ग्रन्थेषु सामान्यशास्त्रेषु च व्यासङ्गेन कषायितहृदया भूत्वा अथाध्यात्मशास्त्राभ्यासङ्गेन हृष्यन्तोऽधिकारिविशेषा इह विवक्षिताः। (५) * वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः * इति कवयोऽपि ननु कथयन्ति। वसन्तर्तौ पिका विशेषतः स्वकण्ठनादं प्रदर्शयन्ति यथा, तथा समयविशेषेष्वतिमधुरगम्भीरवाग्विशेषप्रपञ्चनेन रसिकजनहृदयान्यावर्जयन्तो वाग्मिन इह विवक्षिताः। (६) * पिकः कूजति पञ्चममित्यभिधीयते; * रे रे कोकिल! मा भज मौनं किञ्चिदुदञ्चय पञ्चमरागम्। नो चेत्त्वामिह को जानीते काककदम्बकपिहिते चूते॥ * इति पण्डितराजश्च प्राह। पिककूजितं पञ्चमध्वनिरिति व्यपदिश्यते। येषां वाग्विततिश्चतुर्वेदतोऽप्यभ्यधिका सती "किमयं पञ्चमवेदाविर्भावविशेषः!" इत्युल्लेखयोग्या विजृम्भते ते विवक्षिता इह। (७) सुभाषितकौस्तुभे वेङ्कटाध्वरी प्राह * वाचाटोकौ वागमृते वा शुकनीनां स्तोकप्रज्ञा स्तुल्यदशो हन्त! भवन्ति। गोमायूनां

कोकिलयूनामपि शब्देष्वेकाकारा मानसवृत्तिर्महियाणाम ॥ * इति। एवम् अरसिकजनदुरवबोधान् रसिकजनैकहृद्यान् वाग्विभवान् ये बिभ्रति ते महाविद्वांसोऽत्र विवक्षिताः। एवंविधा व्यङ्ग्यार्थविशेषा निशितमतिभिरन्तर्वाणिभिरुन्नेयाः ॥

[मदीयसरसीरुहाक्षभगवत्सविधे] * पतिं विश्वस्येत्याम्नातरीत्या सर्वलोकसाधारणे भगवति मदीयत्वोक्तिः प्रेमविशेषप्रयुक्ता। प्रेमभङ्गमुत्पाद्य विश्लिष्टेऽपि तस्मिन् मदीयत्वेन व्यपदेशः गाढरूढप्रेमबन्धनिबन्धन इत्याचार्याः। संश्लेषकाले स भगवान् पराङ्कुशनायिकामिमां प्रति "त्वदीय एव खल्वयं जनः" इत्यसकृदम्यदधादिव; अत एव विश्लेषव्यथायामपि मदीयः, मदीय इतीयमुक्तिरनुवर्तते इत्यपि रसघनं व्याचक्षते। [सरसीरुहाक्षभगवत्सविधे] इति कथनं तस्य असाधारणचिह्नप्रदर्शकम्। * कः पुण्डरीकनयनः पुरुषोत्तमः कः * इति भगवद्यामुनाचार्याः पुण्डरीकनयनत्वं पुरुषोत्तमत्वव्याप्यं खल्वाचचक्षिरे। * तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी * इत्युपनिषदपीह स्मर्तव्या। संश्लिष्य बहिः प्रस्थानकाले स भगवान् स्वकीयविकस्वरनयनकमलेन परिपूर्णकटाक्षमारचय्य प्रययौ; अत एवेदमुच्यते। [मदर्थे दूततया गत्वा संदेशप्रापणे किं वश्छिन्नम्?] उन्मत्तकसंश्लेषानुभवो यदाऽऽवयोर्जातः तदा एवं दूतप्रेषणप्रसक्तिस्स्यादिति हन्त! मनसाऽपि न चिन्तितं मया; तादृश्यहमिदानीम् अहह! दूतप्रेषणव्यग्रा भवामि। मां पश्यत। किमहं न दयनीयाऽस्मि। किमहं भगवन्तमिहानेतुमभ्यर्थये? केवलं मदुक्तिप्रापणमेव हि प्रार्थये। "वाचा धर्ममवाप्नुही"ति सीताऽपि ननु जगाद। एवं वाचिकोपकारकरणेन का हानिर्भवित्री भवताम्। उत्तमोत्तमपुरुषार्थलाभो हि भविता वः।

[किमहो! युष्माकं प्रकृतिर्विपर्यस्ताऽभूत्] प्रार्थितानां कोकिलानामाभिमुख्यानवेक्षणेन खिन्ना सती एवं कथयति। इयता कालेन पुरुषकारकृत्यैकनिरूपणीयतया स्थितानां युष्माकं कथमिवाधुना एवमुपेक्षणशीलत्वमुदियाय? तद्विश्लेषानन्तरं किं यूयमन्ये संवृत्ताः? इति पृच्छयते।

एवमुक्तेषु कोकिलेष्वाभिमुख्यं प्रदर्श्य क्षमां च याचित्वा 'संदेशार्थः कः! कथ्यताम्' इत्यनुयुक्तवत्सु कथयति आचरितपूर्वपापेत्यादि। जन्मान्तरेषु मया कलितानि दुरितान्यनवधिकानि स्युः; तत्फलतयैव भगवत्पादमूले कैङ्कर्यप्रच्युतिरभूदिति सत्यमवधारयामि; विश्लेषस्यास्य कश्चिदन्तो नास्तीति विज्ञापयत इत्युक्तं भवति ॥ .... (२)

(हिंदी) हे जत्था बनकर रहनेवाले कोकिल! मेरे कमलनयन भगवान के पास मेरे दूत के रूप में पहुँचकर संदेश सुनाने से तुम्हें कौनसी हानि पहुँचेगी? क्या तुम्हारा स्वभाव ही बदल गया? पहले के अपने पापों के फलस्वरूप अभी तक उनके श्रीपादों की सेवा करने के भाग्य से मैं विरहित रही। क्या मुझे अब भी उनसे विरहित ही रहनी चाहिए? (यही संदेश है।)

पूर्व गाथा में बकी से भगवान के पास संदेश ले जाने की प्रार्थना की गयी; संदेश का प्रकार तो नहीं बताया गया। अब प्रकृत गाथा में कोकिलों को संबोधित कर वह संदेश बताया जाता है। यहां यह शंका होगी कि, पूर्व गाथा में संबोधित बकी से ही यह संदेश कहना उचित था; उसे छोड कर

कोकिलों से कहना कैसे उचित होगा। इसका, आचार्यों का अनुगृहीत समाधान यह है कि कलुषित मनवालों का काम ही ऐसा असंबद्ध होता है। यह भाव है—भगवद्विषयक असीम प्रेमवाली नायिका का मन हाल में विरहदुःख से इतना कलुषित हो गया है कि वह ठीक नहीं समझ सकती कि मैं किससे कौन सी बात कर रही हूं; अतः इस गडबडी में वह परस्पर-विरुद्ध बात कह रही है। पामरजनों के अभिमत क्षुद्रलौकिकविषयों की अपेक्षा भगवद्विषय की यही विशेषता है कि वह ऐसा विलक्षण कालुष्य पैदा करता है। अत एव यतिराजविंशति के प्रारंभश्लोक में श्रीवरवरमुनि स्वामीजी ने श्रीशठकोपसूरी का विशेषण दिया—"श्रीमाधवाङ्घ्रि जलजद्वय नित्यसेवा प्रेमाविलाशय पराङ्कुश (माने श्रियः पतिके पादारविंदों की सेवा करने के अत्यधिक प्रेम से कलुषितचित्त परांकुशमुनि)। यद्यपि, "रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा" (यह तीर्थ सत्पुरुषों के मन की भांति अत्यंत रमणीय व प्रसन्न है) इत्यादि रामायणोक्त प्रकार परमसात्विक साधुओं का मन सर्वथा स्वच्छ ही रहता है; तथापि हाल में भगवद्विषयक प्रेमातिशय से कलुषितचित्त रहना आल्वार के लिए भूषण है, न तु दूषण।

[जत्था बनकर रहनेवाले कोकिल] पुकारने से परस्पर विश्लेष का सहन न करते हुए नित्य मिलकर ही रहनेवाले परमभक्ताग्रेसर संबोधित किये जाते हैं। श्री कूरेश स्वामीजी इनका यों वर्णन करते हैं—कैङ्कर्यनित्यनिरतैर्भवदेकभोगैः नित्यैरनुक्षणनवीनरसार्द्रभावैः। नित्याभिवाञ्छितपरस्परनीचभावैः मद्दैवतैः परिजनैस्तव संगसीय॥ (श्री वैकुंठस्तव ७७) यह तात्पर्य है—हे भगवन्! मैं आपके भक्तों से मिलना चाहता हूं, जो इस प्रकार के होते हैं—वे हमेशा आपके कैंकर्य करने में ही निरत होते हैं; आपका ही अनुभव करने के इच्छुक हैं; क्षणे क्षणे नये नये दीखनेवाले आपके अनुभवरस से आर्द्र भाववाले हैं; सर्वदा एक दूसरे के दास होने की ही इच्छा करनेवाले हैं; और वे ही मेरे प्राप्य देव हैं। ऐसे भक्तों को कोकिल पुकारना भी सकारण है। तथाहि—श्रीशठकोपसूरी और गोदादेवी कहते हैं कि कोकिलपक्षी पुंनागवृक्ष पर रहते हैं; हमारे आचार्यलोग भी श्रीरंगक्षेत्र में मंदिर के अंदर चंद्रपुष्करिणी के तटपर विराजमान एक दिव्यपुंनागवृक्ष के नीचे विराजकर सहस्रगीति का अध्ययन, चर्चा इत्यादि करते थे। श्री पराशरभट्टार्य स्वामीजी के विरचित श्रीरंगराजस्तव (पूर्वशतक ४९) में इसका बड़ा सुंदर वर्णन किया गया है—"श्रीरङ्गराजकरनमित शाखिकाभ्यो लक्ष्म्या स्वहस्तकलित श्रवणावतंसम्। पुन्नागतल्लज मजस्रसहस्रगीतिसेकोत्थ दिव्यनिज सौरभमामनामः॥ (श्रीरंगनाथ भगवान अपने श्रीहस्त से इस पुंनागवृक्ष की ऊंची शाखाएं नमाते हैं; तब लक्ष्मीजी उससे अपने कर्णालंकार पुष्प (अथवा पल्लव) गुच्छ लेती हैं; और निरंतर सहस्रगीतिध्वनि का सेक पाने से उस वृक्ष में मनोहर दिव्य सुगंध भी भरी है।) सहस्रगीति-व्याख्यान इत्यादि पूर्वाचार्यों के दूसरे ग्रंथों में भी तत्र तत्र यह अर्थ उपवर्णित है कि उक्त पुंनागवृक्ष के नीचे विराजकर ये महात्मा लोग नानाप्रकार की शास्त्रार्थचर्चाएँ किया करते थे। तथाच ऐसे बहुश्रुत भक्तों को कोकिल कहना उचित होगा। (२) संस्कृत साहित्य में कोकिल "वनप्रिय" पुकारा जाता है; वन-शब्द सुनते ही वेदांती लोग "बृहदारण्यक" नामक उपनिषद् का स्मरण करते हैं; तथा च उक्त, एवं तत्सजातीय अन्य उपनिषदों के प्रिय ज्ञानी महात्मा लोग वनप्रिय अथवा कोकिल कहलाते हैं।

(३) कोकिल को परभृत कहते हैं; अर्थात् कोकिल अपने माबापों से नहीं, वरन् दूसरों से (माने काकों से) पोषित किया जाता है; इससे आचार्य से पोषित शिष्य की सूचना की जाती है। (४) श्रीपरकालसूरी बृहत्सूक्त में (५-३-४) कहते हैं कि कोकिल, पहले आम के पल्लव खाकर अपना मुख कडवा बना देता है और बाद में पनस फल का मधुर रस चूसकर तृप्त होता है; आचार्यलोग भी बचपन में काव्यनाटकादि ग्रंथों तथा तर्कव्याकरणादि सामान्यशास्त्रों का अभ्यास कर, उससे कषायित-हृदय बनकर, फिर अध्यात्म-शास्त्राभ्यास से बडा हर्ष पाते हैं। (५) "वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः" इत्याद्युक्त प्रकार कोकिल वसंत-ऋतु में अपना सुमधुर कंठनाद करता हुआ, काक से अपनी विशेषता का परिचय देता है; वाग्मी आचार्य लोग कोई कोई अवसर प्राप्त कर अपनी मधुर व गंभीर वाणी से साधारण जनता से अपना वैलक्षण्य दिखाते हैं। (६) कोकिल की वाणी पंचमस्वर कहलाती है; ज्ञानी महात्माओं की वाणी चार वेदों से भी श्रेष्ठतया बढकर, सुननेवालों की "ओह! यह क्या पंचमवेद है?" इत्यादि प्रशंसा का पात्र होती है। (७) वेंकटाध्वरी नामक कवि ने अपने "सुभाषितकौस्तुभ" नामक ग्रंथ में कहा है कि, "जैसे भैंस, सृगाल की और कोयल की वाणियों को एकसमान मानता है, ठीक ऐसे ही मूर्खलोग मूर्ख की वाणी व सुकवि के वागमृतों को एक-समान मानते हैं।" इस प्रकार महाविद्वान आचार्य भी अरसिकों के दुरवबोध, किंतु रसिकों के सादर प्रशंसनार्ह दिव्यवाग्वैभववाले होते हैं। ऐसे अनेक प्रकारों से आचार्यों में कोकिल का साम्य समझ लेना चाहिए।

[मेरे कमलनयन भगवान] "पतिं विश्वस्य" इत्यादि वेदवाक्योक्त प्रकार समस्तलोकों के स्वामी भगवान को "मेरे भगवान" कहना विलक्षण प्रेम का कार्य है। प्रेमका भंग करते हुए दूर पधारकर हाल में नायिका को विरहदुःख देनेवाले भगवान को 'मेरे भगवान' कहना इस गाढानुराग का ही काम है। अथवा, संश्लेष काल में भगवान इस परांकुश नायिका से बारंबार यों कहा करता कि, "यह वस्तु (भगवान) तुम्हारी ही है" इत्यादि। अतः नायिका के मन में यह अर्थ सुदृढ प्रतिष्ठित हो गया है कि "भगवान मेरे हैं"। अतः वियोग में भी वह यही शब्द रटती है। भगवान को कमलनयन कहने से उनका असाधारण लक्षण बताया जाता है। परतत्वनिर्णय करनेवाले श्री यामुनाचार्य स्वामीजी ने "कः पुण्डरीकनयनः" कहते हुए कमलनयन को ही पुरुषोत्तम बता दिया। "तस्य यथा कप्यासः पुण्डरीकमेवमक्षिणी" इत्यादि प्रसिद्ध कप्यासश्रुति भी यही अर्थ बताती है। संश्लेष के बाद बाहर पधारने के समय भगवान ने नायिका को अपने नयनकमलों के परिपूर्ण कटाक्ष का पात्र बना दिया था; उसीका स्मरण करती हुई नायिका अब भगवान को यह विशेषण देती है। [मेरे दूत के रूप में जाकर संदेश सुनाने से तुम्हें कौनसी हानि पहुंचेगी?] जब हमें असीम आनंददायक संश्लेष चलता था, तब मैंने अपने मन में कभी नहीं सोचा कि शीघ्र ही मुझे दूतप्रेषण करने की दुर्दशा होनेवाली है; ऐसी मैं अब इस दूतप्रेषण कार्य में लग रही हूं। मेरी दुर्दशा देखो तो सही। क्या मेरे ऊपर दया न करोगे? क्या मैं तुमसे भगवान को इधर लाने की प्रार्थना कर रही हूं? नहीं; उनसे मेरी विनंती सुनाने की हीं प्रार्थना कर रही हूं। सीताजी ने भी हनुमानजी से कहा, "वाचा धर्ममवाप्नुहि।" (अर्थात् भगवान से यह मेरी दुर्दशा

सुनाकर, इस वाचिक सेवा से तुम धर्म के भागी बनो।) इस प्रकार यदि तुम भी मेरे लिए वाचा उपकार करोगे, तो उससे तुम्हें कौनसी हानि होगी? कुछ नहीं। परंतु अत्युत्तम पुरुषार्थ ही मिलेगा। इतनी प्रार्थना सुनने पर भी प्रसन्न न होनेवाले कोकिलों से दुःखी नायिका पूछती है—[क्या तुम्हारा स्वभाव ही बदल गया?] अभी तक पुरुषकार करने में ही निरत तुम्हें अब यह विमुखता किधर से आयी?

यह सुनकर कोकिल नायिका के अभिमुख हुए और क्षमा माँगकर बोले कि, "कहो, भगवान को तुम्हारा क्या संदेश है?" अतः अब नायिका संदेश का प्रकार बताती है [पहले किये गये पापों के फलतया] इत्यादि से। पहले के अनेक जन्मों में मैं ने बहुत पाप किये; उनके फलतया ही मुझे अभी भगवान की सेवा से वंचित रहना पडा। मैं ठीक ठीक यह अर्थ जानती हूं। अब मैं इतना ही जानना चाहती हूं कि क्या इस मेरे वियोगदुःख का कभी अंत होगा कि नहीं। यही मेरा संदेश है। .... (२)

(गाथा.) विदियिनाल् पेडैमणकुम् मेन्नडैय अन्नङ्गाळ् *
मदियिनाल् कुरळ्माणाय् उलहिरन्द कळ्वर्कु *
मदियिलेन् वल्विनैये माळादोवेन्नु * ओरुत्ति
मदियेला मुळ्ळुलन्दि मयङ्गुमा लेन्नीरे ॥ ३ ॥

विधितः परिगृहीतगृहस्थाश्रमप्रवेशाः! ललितगतिविभ्रमशालिनो भो राजहंसाः! मतिबलेन वामनवटुरूपमास्थाय कृतजगद्भिक्षणवञ्चकभगवत्सविधे—"मतिहीनाया ममैकस्या एव दुरितं किमहो अनश्वरम्?" इति पृच्छामीत्यभिधाय "काचिदद्वितीया ललनाव्यक्तिः आन्तं क्षुभितप्रज्ञासर्वस्वा सती व्यामुह्यति" इति कथयत ॥

अधस्तनगाथायाम् पूर्वाचरितपापफलभूतो विश्लेष एव वा मम नित्यानुभाव्य इति प्रस्तावस्समजनि। तदुपरि * अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् * इति प्रमाणगतिमनुचिन्त्य 'कृतकर्मफलोपभोगः प्राप्त एव ननु' इति भगवान् प्रत्युत्तरयेदपीति मत्वा तत्रोत्तरमिव संदिशति राजहंसद्वारा। श्रीविष्णुपुराणे - श्रीकृष्ण-वेणुगानगोष्ठीप्रवेशभाग्यविधुराया गुरुजनचकितायाः कस्याश्चन गोपिकायाः [चिन्तयन्तीति कृतनामधेयायाः] चर्यामुपवर्णयन् पराशरो महर्षिः प्राह—* तच्चित्तविमलाह्लादक्षीणपुण्यचया तदा। तदप्राप्तिमहादुःखविलीना-शेषपातका। चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्। निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ॥ * इति। तस्या महानुभावायाः पुण्यपापरूपकर्मसन्तानस्य क्षणमात्रविनष्टतां शृणुमः; किमहं तादृशभाग्यभाजनं न भवामि; किमहो ममैकस्या एव कर्मसमुच्चयो द्राघीयान् भूत्वा यावच्छरीरपातमथ यावदात्मभावि वा अनुभाव्यो भवितेति भगवन्तं पृच्छतेति दूतत्वेन प्रेषयितुमिष्टाः केचन हंसाः कथ्यन्ते पराङ्कुशनायिकया।

विधितः परिगृहीतगृहस्थाश्रमप्रवेशा इति राजहंसविशेषणं प्राथमिकम्। विधितः—शास्त्रोक्त-प्रक्रियया इत्यर्थः। यथाविधि गृहस्थाश्रमे वर्तमाना भोः इत्यामन्त्रणेन कश्चन शास्त्रार्थो बोध्यते। इतरेषां समये संन्यासिनां तदनुबन्धिनामेव च मुक्तिप्राप्तिरिति निर्णयो वर्तते। श्रीवैष्णवसंप्रदाये तु न तथा। यतीनामिव

गृहस्थानामपि मुक्तिप्राप्तिरव्याहतेति नस्संप्रदायः। अत एव भगवद्रामानुजमुनीन्द्रैः तत्पुनरवतारभूतैस्सौम्यजामातृमुनीन्द्रैरपि संन्यासिन इव गृहस्था अपि बहव आचार्याः पीठपतित्वं प्रापिताः प्रयन्ते। * निवृत्तरागस्य गृहं तपोवनम् * इति महर्षयोऽपि प्राहुः। कालिदासो निबध्नाति—रघुमहाराजः स्वसविधमुपागतं वरतन्तुशिष्यं कौत्सं प्रति—* अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय। कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥ * इति पप्रच्छेति। अत्र सर्वोपकारक्षमत्वेन गृहस्थाश्रमस्य विशेषणमवधेयम्। अत्र व्याख्याता * यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः। वर्तन्ते गृहिणस्तद्वदाश्रित्येतर आश्रमाः * इति मनुवचनमुदाहरति। [गृहिण इति द्वितीयान्तं पदम्।] एवं नाम प्रशस्तो गृहस्थाश्रमोऽप्याचार्याणामनुरूप एवेति द्योतनार्थमत्र विधितः परिगृहीतगृहस्थाश्रमप्रवेशा इति विशेषणं विन्यस्तम्। 'विधित' इति पदमिह बहु भावगर्भम्। भो राजहंसाः! यूयं यथाविधि विवाहसम्पादनेन अप्रच्युतभोगा नित्यानन्दभाजो वर्तध्वे; पापिन्या मम तु गान्धर्वेणैव विवाहेन भगवत्सङ्गो जातः; अत एव नित्यविश्लेषतः परितप्ये। यद्यहमपि यथाविधि परिणीतपरमपुरुषा स्याम्, तर्हि नैव स्यात् खलु युष्मत्पादपतनम्। इत्येको भावः। अपरश्च * दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः * इति कोशरीत्या भाग्यार्थको विधिशब्दः। मम भाग्येनेति यावत्। दयिताविश्लिष्टो दाशरथिर्यदा सुग्रीवमहाराजं सहायमकामयत, तदा स प्रनष्टराज्यदारादिक आसीत्; अतः प्रथमत स्तत्क्लेशाः परिहर्तव्या बभूवू रामचन्द्रस्य; मम तु न तादृशं दौर्भाग्यम्। ममैव भाग्येन यूयं सहचरसहिता रमध्वे। अहमपि यूयमिव यथा सहचरसहिता स्याम्, तथा करणं युष्माकं धर्म इति। एवमर्थविशेषाः प्रतिपदमुन्नेयाः। विस्तरभयादुपरि गच्छामः।

[ललितगतिविभ्रमशालिनो भोः] हंसानां गतिलालित्यं सुप्रसिद्धम्। अन्यापदेशो श्लेषः। स्वापदेशे आचार्याणां सच्चरितसुभगत्वं विवक्षितम्। हंससाधर्म्यमाचार्येषु बहुधा निर्वहणार्हम्। * अनन्तपारं बहु वेदितव्यम् अल्पश्च कालो बहवश्च विघ्नाः। यत्सारभूतं तदुपाददीत हंसो यथा क्षीरमिवाम्बुमिश्रम् ॥ * इत्युक्तरीत्या सारासारविवेककुशलः प्रथितो हंसः। * सारासारविवेचने पटुमुखो हंसो यथेति कवयोऽप्याहुः। एवम् * असारमल्पसारं सारं सारतरं च परित्यज्य रत्नाकरे अमृतमिव शास्त्रेषु सारतमं भजन्तो महामतय इह हंसत्वेन विवक्षिताः। किञ्च, * न बध्नाति रतिं हंसः कदाचित्कर्दमाम्भसि * इति यथा हंसाः पङ्किलस्थलादुद्विजन्ते तथा आचार्या अपि संसारकर्दमदवीयांसः। अपिच, भगवानपि शास्त्रोपदेशाय हंसवपुः परिजग्राह; एवं शास्त्रोपदेशौपयिकदिव्यमङ्गलविग्रहशालिनो गुरुवराः। विलक्षणविवाहघटनायां प्रसिद्धो हंसः [नैषधीयचरिते]; एवं पराङ्कुशमुनीन्द्रपरमपुरुषयोस्संश्लेषघटनायां समर्था विवक्षिताः।

अथ संदेशो यं प्रति प्रापणीयस्तस्य वर्णनमातन्यते [मतिबलेन वामनवटुरूपमास्थाय कृतजगद्भिक्षणस्य भगवत] इति। मतिबलेनेति चारुतरमुक्तमिह। महाबलेर्दौरात्म्यविशेषान् यदा वासवो व्यजिज्ञपत् तदा वालिन इव तस्यापि वधः प्राप्तः। दीर्घदर्शी भगवान् "परमौदार्यरूपधर्मविशेषविशिष्ट एष न हन्तव्यः; उदारसविधे भिक्षुकत्वेन गमनमुचितम्; तदा तस्यापि स्वरूपं सिध्यति, वासवस्यापि समीहितं सिध्यति" इति प्रतिपद्यमानो हि वामनवटुरूपभिक्षुवर्ष्म पर्यगृह्णात्। महाबलिमनोहरणाय सौन्दर्यातिशयप्रदर्शनार्थं वामनता। भिक्षाया लाभे अलाभेऽपि समुचितवृत्तिकत्वप्रदर्शनाय भिक्षणस्यौचित्याय च ब्रह्मचारिता।

कार्यसिद्धये भिक्षुकता। तदिदमन्वग्राहि मद्दपादैः * दैत्यौदार्येन्द्रयाच्ञाविहतिमपनयन् वामनोऽर्थी त्वमासीः * इति। मतिवलेनेत्यत्र अन्यदप्याकूतमतिमनोहरम्। * स्मृतिर्व्यतीतविषया मतिरागामिगोचरा। बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता * इति हि शास्त्रज्ञाः। आगामिगोचरा हि मतिः। स भगवान् वामनवटुरूपभिक्षुकस्समभूवत् तन्न देवेन्द्रकार्यार्थमन्यार्थं वा; एतादृशेन चरित्रेण पराङ्कुशनायिका वशीकृता भवित्रीति सदुपायज्ञानेन तत्सर्वमकरोदिव इति भगवद्रामानुजनिर्वाह इत्याचार्याः। श्रीपराङ्कुशमुनिवाच मनुसृत्य कथयन् श्रीपरकालमुनीन्द्रोऽपि बृहत्सूक्ते (९-४-२.) "पुरा वामनवटुरूपमाश्रित्य भिक्षणं कृतवतः प्रभोरेव चर्यायामहं चित्तपारवश्यमवापम्" इत्याह।

अथ संदेशप्रकारविज्ञापनमुत्तरार्धे मतिहीनाया ममैकस्या एवेत्यादि। मतिहीनाया इति कथने हार्दो भाव एषः; मतिसद्भावे मम भगवद्विषये अवगाहनमेव नोदियात्। मुहुः क्लेशानुभवायैव कल्पेत भगवद्विषयावगाहनमिति मया न ज्ञातचरं मतिविरहादेव खलु। ये नाम लौकिका जना भगवद्विषयवासनामेव न जानन्ति, ते तावत्सांसारिकनानाविषयोपभोगेन सन्तत हर्षप्रकर्षशालिन एव सन्त एवंविधदुःखगन्धवैदेशिका विराजन्ते; तद्वदेवाहमपि वर्तितुमर्हा सत्यपि, हन्त! भगवद्विषयेऽवगाहनादेव खल्वेवं दुःखभागिनी भवामि। यदा भगवान् मां स्वयमेव स्वीकर्तुमाजगाम, तदैव 'भगवन्नपयाहि; तव क्षणिकसंश्लेषसुखमपि मा भूत्, पश्चाच्चिरं विश्लेषव्यथाऽपि मा भून्मम' इति वक्तव्यमासीन्मया। तथा प्रोच्य वैराग्येऽवलम्बिते ममापि हिंसा न स्यात्, मया युष्माकमपि हिंसनं न स्यात् भो हंसाः; हाहा! अहं मतिविरहिता सती स्वयंकृतानर्थभागिन्यभूवम् इति परिक्लिश्यते पराङ्कुशनायिका। अथवा, तस्मिन् भगवति विश्लेषोन्मुखे सति सदुपायैस्तस्य गमनं निरुध्य निर्बन्धतस्तं सहैवावस्थापयितुमशक्ताऽभूवं मतिदौर्बल्यादिति खिद्यते। "ममैव क्रूरपापं किमु अक्षय्यम्" इति कथनस्य हार्दो भाव एषः; श्रीशठकोपमुनीन्द्रस्य वस्तुतो न किमपि पापमस्ति। सुकृतमेव दुष्कृतशब्देनापदिशति। भगवतस्संश्लेषो वा स्यात् विश्लेषो वा स्यात्, नात्र काऽपि भिदा; संश्लेषे विश्लेषे च अविशेषेणैव हि गुणानुभवो बोभवीति। प्रत्युत संश्लेषकालादपि विश्लेषकाले अत्यन्तमतिशयेनापि गुणानुभवो भवति। ततश्च "मम सुकृतमिदमक्षय्यं भूयात्" इत्याशास्यते। भावोऽयं प्रकरणाननुगुणस्सन्नपि मुनीन्द्रहृदयगतो भृशमभिराम एव। तत्रतत्रैष वाचनिकतयाऽभ्युद्धाव्यते।

[काचिद्द्वितीया ललनाव्यक्तिः आन्तं क्षुभितप्रज्ञासर्वस्वा सती व्याप्नुवतीति कथयत]

काचिद्द्वितीया व्यक्तिरिति परमशोभनं वचनमिदम्। संदेशदातृव्यक्तिविशेषनामधेयं किं न वक्तव्यमिति चेत्, नैव वक्तव्यम्; अद्वितीया काऽपि व्यक्तिरिति कथनं पर्याप्तम्; संसारमण्डले एवं नाम परितप्यमाना व्यक्तिः पराङ्कुश मुनीन्द्रादन्या न काऽपि भवितुमर्हतीति स एव भगवान् स्वयं ज्ञास्यति। यतो हि व्यक्त्यन्तरे एतादृशज्ञानप्रेमबीजावापस्तेन नैव कृतः तत एव 'परितप्यमाना व्यक्तिस्सा का नाम?' इति स नैव प्रक्ष्यति; मद्विश्लेषेण व्यथमाना व्यक्तिः पराङ्कुशमुनिरेवेति स ध्रुवं जानीयादेवेति योऽयं निर्णयो मुनीन्द्रमनसि विराजते सोऽयमद्भुतः। एवंविधं हृदयमवगत्य पूर्वाचार्या यद्व्याचचक्षिरे तदत्यद्भुतम्। [अद्वितीया] यथा परं ब्रह्म एकमेवाद्वितीयम्, तथा स एष मुनिवरश्चैक एवाद्वितीयः। संसारिणस्तावदशनाच्छादनैक गवेषणतत्परा भगवद्विषयविमुखाः। मुमुक्षवस्तु ग्रन्थकालक्षेपनिरताः। मुक्ता नित्याश्च विश्लेषानभिज्ञानेन संश्लेषरसस्याप्यनभिज्ञाः। भगवांस्तु सर्वज्ञो-

ऽपि परत्वेन वलितः * सो अङ्ग ! वेद यदि वा न वेदेत्युक्तरीत्या स्वस्यानुभावं स्वयं ज्ञातुमशक्तः। ततस्सत्य-मयमेको मुनिवरस्संसारमण्डल्यामद्वितीयः। सरोमुनिप्रभृतयोऽप्यन्ये दिव्यसूरयो नैवं रसविदः। वस्तुतस्ते मुनि-वरस्यास्य अवयवभूताश्च। [आन्तं क्षुमितप्रज्ञासर्वस्वा सती व्यामुह्यति] आदौ भगवता दत्ता या प्रज्ञा सा प्रेमरूपेति हेतुना क्षुमिता बभूवेति कथयत। अशोकवनिकायां वैदेही * मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् * इति येनाध्यवसायेन प्राह सोऽध्यवसायो वेण्युद्ग्रथनवेलायां नैव खल्वासीत्; तदवस्थाऽहमस्मीति कथयत। 'बहिः किञ्चित् क्षुमितत्वेऽपि क्रमशः प्रमन्नता स्या' दिति स कथयेत्; आन्तं क्षुमितमिति कथयत। 'मत्प्रदत्तप्रज्ञायाः क्षोभे सत्यपि स्वेनाभिवर्धितायाः प्रज्ञायाः क्षोभो नैव भवितेति स कथयेत्; क्षुमितप्रज्ञासर्वस्वेति कथयत। मृतोऽयं जन इत्यपि युष्माभिस्सुवचम्, 'तर्हि तत्रागत्याहं किं कर्तास्मी'ति स कथयेत्; व्यामुह्यतीति कथयत। मुमूर्षुदशापन्नाऽस्मीति कथयतेति यावत्॥ [कथयत] कथनमात्रेण भूयं कृतकृत्या भवत। कथि-तेऽपि यदि स नागन्ता, तस्यैव ह्यवद्यम्। आर्तध्वनिं न सहेत सः; अतः कथयत। कथनेन भवतां स्वरूप-सिद्धिः, तस्य गुणसिद्धिः, मम तु सत्तासिद्धिः। एतावतश्च निदानं युष्माकमुक्तिमात्रम्॥ ... (३)

(हिंदी) विधि पूर्वक गृहस्थाश्रम पानेवाले सुंदर गमनवाले हे राजहंसों! मतिबल से वामन-ब्रह्मचारि का रूप धारणकर जगत की भिक्षा मांगनेवाले कपटी भगवान से कहो कि, "कोई एक अद्वितीय नायिका, यों पूछती हुई कि 'क्या मतिहीन मुझ एकका ही पाप अनंत है?' पूर्णरूप से क्षुब्ध सारी मतिवाली होकर, हाय! मोह पा रही है।"

पिछली गाथा में यह प्रश्न किया गया कि, "क्या पूर्वजन्मकृत पाप के फलस्वरूप मुझे यह वियोग ही नित्य अनुभाव्य होगा?" फिर नायिका ने यों सोचा कि शायद भगवान मेरे प्रश्न का यह उत्तर देंगे कि, 'अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्' इत्यादि प्रमाणानुसार प्रत्येक मानव को अवश्य ही अपने कृत पुण्यपापफलों का अनुभव करना चाहिए। अतः वह प्रकृतगाथा में राजहंसों के द्वारा पूर्वोक्त भगवद्वचन का प्रत्युत्तररूप संदेश भेजती है। श्रीविष्णुपुराण में रासक्रीडावर्णन के प्रकरण में एक गोपी का चरित्र वर्णित है, जो दूसरियों की भांति उस रासगोष्ठी में प्रवेश नहीं कर सकी। तथाहि—जब एक शरत्पूर्णिमा की रात श्रीकृष्ण ने संकेतस्थल पधारकर, अपनी दिव्य मुरली बजायी, तब सभी गोपियां उधर आ गयीं; परंतु एक गोपी गुरुजनों से डरती हुई घर से बाहर निकल न सकी। तब वह अपने कमरे में बैठकर आँख बंद कर श्रीकृष्ण का ध्यान करने लगी। बडे योगी की तरह उसकी भी समाधि-जैसी अवस्था हुई। उसने अपने मन से भगवान का परिपूर्ण अनुभव किया और महान आनंद पाया; जिससे उसका सारा पुण्य नष्ट हो गया। उतने में उसके मन में भगवान के साक्षात् दर्शन पाने की इच्छा उत्पन्न हुई; परंतु, हाय! वे न मिले। इससे उस गोपी के मन में इतना अधिक दुःख हुआ कि उससे उसका सारा पाप नष्ट हो गया। इस प्रकार अपने समस्तपुण्यपापों के (माने कर्म के) नष्ट हो जाने पर, वह गोपी सर्वथा परिशुद्ध होकर शरीर छोड कर परमपद चली गयी। ये हैं विष्णुपुराण के वचन—"तच्चित्तविमलाह्लाद क्षीण पुण्यचया तदा।

तदप्राप्ति महादुःख विलीनाशेषपातका । चिन्तयन्ती जगत्सूर्ति परब्रह्म स्वरूपिणम् । निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ।" सुखदुःख देना ही पुण्यपापों का काम है । प्रकृत गोपी के (जिसे हमारे आचार्य 'चिन्तयन्ती' कहते हैं) एक क्षण के मानसिक भगवदनुभव से उसके सारे पुण्य का फल महान आनंद मिल गया; और दूसरे क्षण में भगवद्वियोग से, उसके सारे पाप का फल महान दुःख मिला । तथा च बहुत शीघ्र ही वह अपने कर्मबंधन से मुक्त हुई । अब श्रीशठकोपनायिका यों पूछती है कि क्या मेरा विरहदुःख चिंतयंती के दुःख से कम है, जो एक क्षण में नष्ट नहीं होता? क्या मुझ एकका ही पाप इतना प्रबल है, जो कि इस शरीर के रहने तक अथवा इस आत्मा के रहनेतक न मिटेगा? यह प्रश्नरूप संदेश इस गाथा में हंसों के द्वारा भेजा जाता है ।

हंसोंका यह विशेषण है [विधि से गृहस्थाश्रम पानेवाले ।] विधि शब्द का अर्थ है शास्त्रविधि से, अर्थात् शास्त्रोक्त नियमों के अनुसार । इससे एक बडा सुंदर शास्त्रार्थ की सूचना की जाती है । तथा हि—दूसरे संप्रदायवाले यों मानते हैं कि संन्यासी ही मोक्ष पा सकते हैं । अपने (माने श्रीवैष्णव) संप्रदाय में यह नियम नहीं है । हमारे संप्रादाय में संन्यासी की भांति गृहस्थ भी मोक्ष पा सकते हैं । अत एव श्रीरामानुजस्वामीजी से तथा उनके अपरावतार श्रीवरवरमुनिस्वामीजी से प्रतिष्ठापित (क्रमशः ७४ व ८) आदिपतियों में संन्यासियों के साथ कितने ही गृहस्थ आचार्य भी विराजते हैं । ऋषियों का वचन है कि "निवृत्तरागस्य गृहं तपोवनम्" (माने हार्द वैराग्य के विना केवल संन्यासी का वेषधारण करके अरण्य में जाने से कोई लाभ नहीं है; विरक्त के लिए गृह ही तपोवन के सदृश होगा ।) कालिदास कवि ने भी अपने विरचित रघुवंश महाकाव्य में रघु-कौत्स संवाद में गृहस्थाश्रम को "सर्वोपकारक्षम" कहा । इसका यह तात्पर्य है कि गृहस्थ ही ब्रह्मचारी संन्यासी आदियों की सेवा कर सकता है । दूसरे आश्रमवाले गृहस्थ की मदद से अपने अपने धर्म का ठीक अनुष्ठान कर सकते हैं; अतः गृहस्थाश्रम सब को उपकार करनेवाला है । यहां पर रघुवंश काव्य के व्याख्याता ने मनुस्मृति का एक पद्य उद्धृत करता है, जिसका यह अर्थ है—जैसे समस्त प्राणी माता के आश्रय से जीवन करते हैं, वैसे ही दूसरे सभी आश्रमवाले गृहस्थ के आश्रित होते हैं । तथा च हाड में इस अर्थ की सूचना की जाती है, कि उक्तप्रकार श्रेष्ठ गृहस्थाश्रम का स्वीकार करना भी आचार्यों के लिए उचित है । [विधि से गृहस्थाश्रम पानेवाले] कहने के भाव अनेक प्रकार के होते हैं । एक यह है—"हे राजहंस! तुम शास्त्रोक्त प्रकार विवाहित हो, अतः तुम्हारा संयोग नित्य है, आनंद भी नित्य है । मेरा तो भगवान से गांधर्व विवाह ही हुआ । फलतया मुझे नित्यवियोग ही प्राप्त हुआ है । यदि मैं भी तुम्हारी भांति उनसे शास्त्रोक्त प्रकार विवाहित होती, तो हाल में विरह से संतप्त होकर उन्हें संदेश पहुंचाने के लिए अब तुम्हारे पैर न पकड़ती ।" विधि शब्द का "भाग्य" भी एक अर्थ है । तथा च यह भाव हुआ—मेरे भाग्य से ही अब मुझे प्रेयसी के साथ रहनेवाले तुम (राजहंस) दूत के रूप में मिले हो । अर्थात्, जब सीतावियुक्त श्रीरामचंद्रजी ने ऋष्यमूक पर्वत पर सुग्रीव से सहायता मांगी, तब वह वानर पत्नी राज्यादि खोकर दुःखी, और उस

अवस्था में सहायता करने में अशक्त था; अतः श्रीरामचंद्रजी को पहले उसका दुःख मिटाकर उसे प्रसन्न करना पडा। परंतु मेरे भाग्य से तुम प्रेयसी से मिली ही रहते हो। अतः मुझको भी अपनी भांति प्रियसंयुक्त बनाना तुम्हारा धर्म होगा। ऐसे और भी अनेक अर्थ समझने योग्य हैं, जो ग्रंथविस्तरभय से छोडे गये हैं।

[सुंदरगमनवाले हे हंस!] हंसगति की प्रशंसा करना कविसंप्रदाय है। इससे व्यंग्यरीति से आचार्यों का श्रेष्ठ चारित्र्य बताया जाता है। 'हे सदाचरणवाले आचार्य!' यह है उक्त संबोधन का भाव। अनेक प्रकारों से आचार्यों में हंस का सादृश्य बताया जा सकता है। तथाहि—हंस का यह स्वभाव प्रसिद्ध है कि वह दूध व पानी के मिश्रण से दूध अलग कर सकता है। इसी प्रकार आचार्य भी शास्त्रों में असार, अल्पसार इत्यादि अर्थ छोडकर सारतम अर्थ का ही ग्रहण कर सकते हैं। "न बध्नाति रतिं हंसः कदाचित्कर्दमाम्भसि" इत्युक्तप्रकार स्वच्छपानी में ही विहार करनेवाला हंस कभी कीचड को पसंद नहीं करेगा; एवं आचार्य भी संसार रूपी कीचड से उद्वेग पाते हैं। एक समय ज्ञानोपदेश करने के लिए भगवान ने हंसावतार लिया था; आचार्य भी उपदेश देने आवश्यक दिव्य मंगल विग्रहवाले होते हैं। नलोपाख्यान में हम पढते हैं कि एक हंस विलक्षण स्त्रीपुरुष, दमयंती व नल के विवाह का कारण हुआ; आचार्य भी इस चैतन के भगवान के साथ होने वाले विवाह के निमित्त बनते हैं।

संदेश के लक्ष्य भगवान का वर्णन किया जाता है—[मतिबल से वामन ब्रह्मचारी का रूप धारणकर] इत्यादि। यहां मतिबल शब्द बडा सुंदर है। जब महेन्द्रने अपने विषय में महाबलि के अपराधों का वर्णन किया, तब वाली की भांति उसका भी वध करना आवश्यक मालूम पडा। परंतु भगवान ने दूसरा ही एक विचार किया "देवेंद्र को दुःख देने पर भी महाबलि में औदार्य नामक एक महान गुण है; अतः इसका वध करना अनुचित है। भिक्षुक के रूप से उसके पास जाकर उसके औदार्य को सफल बना दूंगा और अर्थात् महेंद्रकी इच्छा भी पूर्ण करूंगा।" ऐसे विलक्षण विचार से भगवान एक अत्यद्भुत रूपवाले वामन ब्रह्मचारी बन गये। इसमें, महाबलि के मन का अपहरण करने के लिए वामनरूप लेना पडा; भिक्षा लेने योग्य, एवं भिक्षा मिलें या नहीं मिलें, दोनों अवस्थाओं में हर्षदुःखों के बिना समचित्त रहनेवाले आश्रम, ब्रह्मचर्य का ग्रहण हुआ; और कार्यसिद्धि के लिए भिक्षुक वेष का आश्रयण करना पडा। अर्थात् उस समय भगवान के परिगृहीत उस विलक्षण वामन ब्रह्मचारी के रूपका एकैक अंश भी एकैक विलक्षण प्रयोजन के लिए था। यह था भगवान का मतिबल। अथवा इस शब्द को दूसरा एक अत्यद्भुत भाव बताते हैं। साधारणतया लोग मानते हैं कि मति, बुद्धि, प्रज्ञा, इत्यादि सभी शब्द पर्याय (माने समानार्थक) हैं; परंतु शास्त्रज्ञ इनमें एकैक शब्द के अर्थ में भी थोडा थोडा अंतर बताते हैं। "स्मृतिर्व्यतीतविषया मतिरागामिगोचरा। बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता॥" (पूर्वकाल की वस्तु का ज्ञान स्मृति है; भविष्यत्कालिक वस्तु का ज्ञान मति है; इत्यादि।) इस प्रमाण के अनुसार भाविवस्तु जाननेवाले ज्ञान

को मति कहते हैं। अब भगवान को मतिबलवाले कहने का यह भाव हुआ कि उन्होंने भविष्य के किसी विषय की चिंता करके ही वामन ब्रह्मचारि-वेष का ग्रहण किया, न तु तत्काल महेंद्र की रक्षा करने के लिए। भगवान ने अपनी मति से जान लिया कि भविष्य में एक शठकोपनायिका का अवतार होगा, जो इस वामनवेष तथा चरित्र से आकृष्टचित्त हो कर मेरे (भगवान के) वश होगी। अर्थात् श्रीशठकोपनायिका को अपने वश करने के लिए ही भगवान ने परमसुंदर वामनब्रह्मचारी के रूप का ग्रहण किया। आचार्य कहते हैं कि यह अर्थ श्रीरामानुजस्वामीजी से बताया गया। यह तो अवश्य हीं आळ्वार का हृदयानुसारी है; क्यों कि भगवान के अवतारादि सभी चेष्टितों को अपने (आळ्वारों के) लिए अनुष्ठित मानना आळ्वारों का स्वभाव है। श्री परकाल सूरी ने अपने बृहत्सूक्त में (९-४-२) गाया कि, "पूर्वकाल में वामनब्रह्मचारी के वेष से भिक्षा मांगनेवाले प्रभु की चेष्टा में मेरा मन परवश हो गया।"

गाथा के उत्तरार्ध से प्रापणीय संदेश बताया जाता है [मति हीन एकका] इत्यादि से। अपनेको मतिहीन कहने वाली नायिका का यह भाव है—यदि मैं मतिमती होती तो भगवद्विषय में प्रवेश ही नहीं करती; क्यों कि मति के अभाव से ही मैं यह समझ न सकी कि भगवान पर प्रेम करनेवाले को नित्य विरहदुःख ही भोगना पड़ेगा। भगवद्विषयक वासना से भी दरिद्र लौकिक जन नानाविध क्षुद्रविषयों का उपभोग करते हुए, ऐसे कठोर विरह दुःख से सर्वथा विरहित होकर कैसे आनंद में मग्न रहते हैं! मुझे भी ऐसा ही आनंद मिलनेवाला था; परंतु, हाय! दौर्भाग्य से मैं इस भगवद्विषय में प्रवेश कर अब दुःखी हो रही हूं। जब शुरू में भगवान, केवल अपनी इच्छा से मेरा स्वीकार करने के लिए यहां पधारे, तभी मुझे उनसे कहना था कि, "हे प्रभो! कृपा कर यहां से दूर जाते रहो; मैं एक क्षण का तुम्हारा संश्लेष सुख भी न चाहती, और बाद में अनंतकाल तक तुम्हारा वियोगदुःख भी पाना नहीं चाहती। तुम्हारा संबंध ही मुझे अनपेक्षित है; अतः दूर चलो।" हे हंस! उस समय मैं यदि यों कहकर वैराग्य का अवलंबन करती, तो अब मुझे यह मानसिक पीड़ा नहीं मिलती, और मेरे कारण तुम्हें भी यह झंझट न मिलती। परंतु अब कहने से क्या लाभ है? उस समय अपनी मति खोने से, अब मैं स्वयंकृतानर्थ की भागी होकर दुःखी हूं। अथवा श्रीशठकोपनायिका का यह दुःख होगा कि, "जब मेरे साथ रहनेवाले भगवान मुझे छोड़कर बाहर पधारने को तैयार हुए, तभी, उचित उपायों से उनको रोकना था। परंतु हाय! मतिहीन मैं वह काम नहीं कर सकी।" [क्या मेरे पाप ही अनंत हैं] कहने का यह अर्थ नहीं समझना चाहिए कि वास्तव में ही आळ्वार का भी कुछ पाप है। किंतु अब आप पुण्य को ही पाप पुकार रहे हैं; क्योंकि अब के विरह का कारण पुण्य है, नतु पाप। तथाहि—आळ्वार के लिए भगवान के संश्लेष वा विश्लेष दोनों एकसमान हैं; दोनों में कोई विशेष अंतर नहीं है। क्योंकि दोनों अवस्थाओं में आपका भगवद्गुणानुभव एकसमान ही चलता है। अथवा, विश्लेष काल में संश्लेषकाल की अपेक्षा अधिकतया गुणानुभव होता है। अतः हालमें आळ्वार अपनी ऐसी इच्छा प्रकाशित करते हैं कि, संश्लेष से भी अधिकतया परमविलक्षण भगवदनुभव देनेवाले इस विश्लेष का हेतु मेरा पुण्य ही (जिसे मैं विपरीतलक्षणा से पाप कहती हूं) अक्षय बनी रहें। यद्यपि यह भाव प्रकरण के अनुकूल नहीं प्रतीत होता है; तथापि आळ्वार के हृदयानुसारी है ही; और तत्र तत्र इसकी सूचना भी मिलती है।

[एक अद्वितीय नायिका पूर्णरूप से क्षुब्ध सारी मतिवाली होकर मोह पा रही है]। संदेश भेजनेवाली नायिका अपने नाम धामादि का परिचय न देती हुई, अपनेको 'अद्वितीय व्यक्ति' कहती है। यह बहुत सुंदर निर्देश है। भगवान ठीक जान सकते हैं कि इस विशाल संसारमंडल में आळ्वार के सिवाय दूसरी कोई व्यक्ति विश्लेष से ऐसा दुःख न पा सकेगी; क्यों कि दूसरी किसी व्यक्ति में उन्होंने (भगवान ने) ऐसा प्रेमबीज नहीं बोया। अतः उन्हें दूत से यह पूछने की आवश्यकता न रहेगी कि, "दुःख पानेवाली व्यक्ति कौन है, किधर है?" इत्यादि। अर्थात् आळ्वार अपने मन में यह अत्यद्भुत व सुदृढ विश्वास रखते हैं कि भगवान संदेशाक्षर सुनते ही समझ लेंगे कि मेरे वियोग से दुःख पानेवाला आळ्वार ही है। आळ्वार के ऐसे अध्यवसाय की, एवं उसे ठीक जानकर ऐसे सुंदर व्याख्यान लिखनेवाले हमारे पूर्वाचार्यों की प्रतिभा की, कौन पर्याप्त प्रशंसा कर सकेगा ! [अद्वितीय] वेद पुकारता है कि "एकमेवाद्वितीयं ब्रह्म" ऐसे आळ्वार भी अद्वितीय हैं; अर्थात् आळ्वार जैसे दूसरी कोई व्यक्ति, उभयविभूतियों में भी नहीं मिल सकती। तथाहि–संसारी लोग अन्न वस्त्र कमाने में निरत रहकर भगवान के परिचय से भी दरिद्र हैं। मुमुक्षु जन केवल ग्रंथकालक्षेप में निरत हैं। परमपदस्थ नित्य व मुक्त लोग, जो कि भगवान के नित्यानुभव किया करते हैं, वे विश्लेष के तो सर्वथा अनभिज्ञ होते हैं, और, कहना पडता है कि अत एव वे संश्लेष रसके भी ठीक अज्ञाता हैं। भगवान, सर्वज्ञ होते हुए भी, अपने परत्व से मस्त रहते हैं और "सो अङ्ग वेद यदि वा न वेद" (भगवान अपनी महिमा जानते हैं, अथवा नहीं भी जानते होंगे) इत्याद्युक्त प्रकार स्वयं अपने अनुभव के प्रकार नहीं जान सकते। अतः यह बात सर्वथा सत्य निकली कि आळ्वार उभयविभूति में अद्वितीय हैं। अब दूसरे आळ्वारों की बात रहेगी। परंतु कहना पडता है कि वे भी आळ्वार जैसे रसवेत्ता नहीं हैं। अत एव उनके दिव्य प्रबंधों को सहस्रगीति की जैसी मान्यता नहीं मिली है। अथवा दूसरे आळ्वार, श्रीशठकोपसूरी के अवयव ही माने जाते हैं; अतः वे इनसे अलग नहीं हैं। [पूर्णरूप से क्षुब्ध सारी मतिवाली होकर]— हे हंस! भगवान से कहो कि प्रारंभ में उन्होने मुझे जो ज्ञान दिया, वह शुष्क ज्ञान न होकर प्रेम रूप था; अतः उसी कारण से मैं क्षुब्ध हो रही हूं। अशोक वनिका में सीताजी यह अध्यवसाय रख बैठी थीं कि, "मां नयेद्यदि काकुत्स्थः तत्तस्य सदृशं भवेत्" (भगवान स्वयं यहां पधारकर अपने तीक्ष्ण बाणों से सारी लंका क्षुभित कर यदि मेरा उद्धार करेंगे, तो वही उनके योग्य होगा; अर्थात् इस विषय में मुझे उतावली न बननी चाहिए।) परंतु एक दिन वे यह अध्यवसाय दूर छोडकर आत्महत्या करने में उतर गयीं। अब कहो कि मेरी भी ऐसी ही दुर्दशा हो गयी है। भगवान शायद तुम्हें यह प्रत्युत्तर देंगे कि आळ्वार को थोडा विवेक खोने में कोई आपत्ति नहीं है; क्यों कि धीरे धीरे आप ठिकाने पहुंच जायंगे। अतः उन्हें स्पष्ट बता दो कि पूर्ण रूप से उनकी मति क्षुब्ध हो गयी। फिर भगवान कहेंगे कि आळ्वार की मेरी दत्त मति क्षुब्ध हो गयी होगी; उनकी अपने स्वाभाविक मति तो अभी भी ठीक रहेगी ही। अतः उनसे कहो कि उसकी सारी मति क्षुब्ध हो गयी। यद्यपि तुम कह सकते हो कि 'वह नायिका मर ही गयी,' क्यों कि मेरी दशा ऐसी है। तथापि यह सुनकर वे कह डालेंगे, "तो, फिर मेरे उधर जाने से क्या लाभ है!" अतः इतना ही कहो कि, "वह मरने को तैयार है।" [कहो] संदेश कहने मात्र से तुम कृतकृत्य बन जाओगे। यह सुनने के बाद भी यदि वे न आयंगे, तो वह उन्हींका दोष होगा।

वस्तुतस्तु वे आर्तनाद का सहन नहीं करेंगे; अतः उनसे कहो। कहने से तुम्हें स्वरूपसिद्धि, उन्हें गुण सिद्धि, और मुझे सत्तासिद्धि भी मिलेगी। इतने फलों का कारण तुम्हारा कथनमात्र होगा॥ .... (३)

(गाथा.) एन्नीमैं कण्डिरङ्गि इदुतहा देन्नाद *
एन्नील मुहिल्वण्णर्कु एन्नोल्लि यान्नोल्लुहेनो *
नन्नीमैं यिनियवर्कण् तङ्गादेन्नु ओरुवाय्चोल् *
नन्नील महन्रिल्हाळ् नल्हुदिरो नल्हीरो॥ ४॥

भो मेचकक्रौञ्चपक्षिणः! मदीयां परिस्थितिमवेक्ष्य निर्वेदं प्रकाश्य 'एवं नाम विश्लेषणमनुचितम्' इति प्रतिपत्तिविहीनस्य मदीयस्य नीलवलाहकसवर्णस्य भगवतोऽहं हन्त! कं वा संदेशं दिशेयम्? [निष्फलसंदेशप्रापणे नास्ति मम समुत्साहः।] तथाऽपि एवं संदेष्टुमिच्छामि; "इतः परं तद्व्यक्तौ सत्ता न घटेत" इति। एवंविधमेकं वाक्यं तत्सविधे विज्ञापयिष्यथ वा न वेति न जाने॥

नीलक्रौञ्चपक्षिविशेषानुद्दिश्य संदेशो गाथायामस्यां निबध्यते। कुररी नाम पक्षिविशेषः प्रसिद्धः। क्रौञ्चपक्ष्यपि तज्जातीयः। सहचरविश्लेषमणुमात्रमपि न सहते विहगोऽयमिति द्राविडग्रन्थैर्बहुभिः प्रतीयते। सहचरवियोगतः सदा रोदनमेव पक्षिणोऽस्य निरूपकमिति निगदन्ति। * कुररि! विलपसि त्वं वीतनिद्रा न शेषे * इत्यादि श्रीभागवतश्लोकतोऽपि सुगममेतत्। एवं भगवद्विश्लेषकातरास्तीव्रभक्तियुक्ता महान्त इह विवक्षिताः। पराङ्कुशनायिका स्वकीयपरिस्थितिमवेक्ष्य दयामकुर्वते निर्घृणाय भगवते हन्त! किमस्ति वक्तव्यमिति प्रथमतो वैराग्यमाविष्कृत्य, अथापि किमपि कथयानीति कथयत्युत्तरार्धेन। पुरा कोऽपि द्रमिडपण्डितः श्रीपराशरभट्टार्याणां सविधे काञ्चिदाशङ्कामुदघाटयत्; (किमिति.) 'इदं तावद्दशकं विश्लेषकालिकम्, न तु संश्लेषकालिकमिति व्यक्तम्। एतदीयायाः परिस्थितेः श्रवणमेव खलु योग्यं विश्लेषकाले; अवेक्ष्येति कथमिह कथ्यते? निशम्येति खलु युक्तम्' इति। स च एव भट्टार्याः प्रत्यूचिरे। तत्सारांश एषः;—विश्लेषकालिकपरिस्थितिरत्र न विवक्षिता; अपि तु भगवता बहुशस्साक्षात्कृता संश्लेषकालिकी परिस्थितिरेव विवक्षिता। गाढाश्लेषदशायामपि मध्येमध्ये आश्लेषस्य मनाक् विच्छेदो भवेत् खलु; तादृशक्षणिकविच्छेदावसरेऽपि असहिष्णुतया क्लेशमनुभवन्त्यासीदियं नायिका। तदिदं प्राथमिकप्रबन्धभूते तिरुविरुत्ताख्ये दिव्यप्रबन्धे द्वित्रगाथाभिराविष्क्रियते। लोके साधारणललनानामप्येष स्वभावो द्राविडकवितासु क्षुण्णः। तादृशानि कतिपयान्युत्तुङ्गग्रन्थस्थानि द्राविडपद्यान्युदाहृत्य भट्टार्याः "भोः पण्डितप्रकाण्ड! 'मदीयं विश्लेषासहत्वरूपं स्वभावं संश्लेषकाले परिरम्भशैथिल्यतः प्रजातेनाङ्गविकारेण स्वयं साक्षात्कृत्यापि हन्त विश्लिष्टस्य निर्घृणो भगवान्' इति तावदत्र कथ्यते; काचिदनुपपत्तिरिह?" इति पप्रच्छुः। स चैतन्निशम्य समाहितमना बभूव; प्रशशंस च भट्टपादानां मेधाविलासम्। असह्यशोकसमयेऽपि "मदीयस्य नीलवलाहकसवर्णस्य" इति कथनेन भगवतो भव्यतातिशयः स्वदिव्यमङ्गलविग्रहसुषमया वशीकर्तृत्वं च प्रकाश्येते। स भगवानिदानीमत्रागत्य मदीयां परिस्थितिमवेक्षेत चेदवश्यमेव तस्य मनसि निर्वेदो

जायेत; अस्या विप्रयोगस्सर्वथा नोचित इत्यपि स मन्येत; एवमकुर्वतस्तस्य भगवतः—इत्यपि प्रथमपादार्थस्सुवचः। एतादृशेऽर्थे मदीयां परिस्थिति मित्यनेन इदानीन्तन्याः स्थितेरेव विवक्षणं नानुचितमिति प्रोक्तं भवति।

निष्फलसंदेशप्रापणे नास्ति मम समुत्साह इति नैराश्यं प्रकाश्यापि पुनः संदेशप्रदाने यदौत्सुक्यमजायत, अत्र व्याख्यातारो महामतय आचार्यवर्या अतिशोभनमुदाहरणं निदर्शयन्ति। यदा नन्दनन्दनो भगवान् व्रजान्मथुरां पुरीं प्रतस्थे तदा गोप्यस्सर्वा अपि * मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति। नगरस्त्रीकलालापमधु श्रोत्रेण पास्यति॥ * इत्यादिकमभिधाय निर्विण्णा बभूवुः। अथ च कालान्तरे कृष्णो गोपीरनुस्मृत्य तासां पुरतः स्वयं गन्तुं चकित इव * संदेशैस्साममधुरैः प्रेमगर्भैरगर्वितैः। रामेणाश्वासिता गोप्यः * इत्युक्तरीत्या अग्रजं बलरामं प्रजिघाय व्रजं व्रजयोपितामाश्वासनाय। अथ व्रजमागतं हलायुधमवलोक्य काश्चन गोप्यः कृष्णकुशलविचारप्रवणा बभूवुः। तदात्वे अपरा गोप्य आहुः * अथवा किं तदालापैः क्रियन्तामपराः कथाः * इति। एवं नाम नैस्पृह्यं प्रकाशितवत्योऽपि मध्ये कथयन्ति * अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति * इति; पुनस्तमुपालभन्ते * पिता माता तथा भ्राता भर्ता बन्धुजनश्च किम्। संत्यक्तस्तत्कृतेऽस्माभिः अकृतज्ञध्वजो हि सः॥ * इति। पुनश्च स्पृहां प्रकाशयन्ति * तथापि कच्चिदालापमिहागमनसंश्रयम्। करोति कृष्णो वक्तव्यं भवता राम! नानृतम्॥ * इति। तदिदं श्रीविष्णुपुराणे पञ्चमांशे चतुर्विंशाध्याये सुविशदम्। तदेतदत्र सुचारु निदर्शनम्। रोषकषायितहृदामपि भगवति नैराश्यं चिरमनुवर्तितुं न प्रभवति, क्षणभङ्गुरमेव स्यादित्युक्तं भवति।

इतः परं स्वस्य सत्ता न घटेतेति संदिश्यत इह। चिन्तयन्त्या इव स्वस्यापि प्राणाः प्रसभमुत्क्रामेयुरिति मन्यमाना हि पराङ्कुशनायिका एवमाचष्टे। सत्यमस्मादृशां भाग्यवशादेव मुनिवरस्यास्य जीवितमनुवर्तत इव। सहस्रगीतिरूपदिव्यसूक्तिलाभात्मकं महाभाग्यमस्मासु संकल्पितं खलु सत्यसंकल्पेन परमपुरुषेण। "तत्सविधे विज्ञापयत" इत्यनुक्त्वा "विज्ञापयिष्यथ वा न वेति न जाने" इति कथनम् अवसादातिशयद्योतकम्। युष्माकमितः प्रस्थानावधि जीविष्यामि वा न वाऽहमिति हार्दो भावः॥ .... (४)

(हिंदी) हे काले क्रौञ्चपक्षियो! मेरा स्वभाव देखने पर भी दया-प्रकाशन पूर्वक, जो इतना भी ख्याल न करते हैं कि यह वियोग इसके लिए अनुचित है, ऐसे मेरे नीलमेघश्याम भगवान को मैं कौनसा संदेश भेजूं? [अर्थात् व्यर्थ संदेश भेजने में मुझे उत्साह नहीं होता।] तथापि यह एक वचन सुनाना चाहती हूं कि अब से वह (नायिका) जीवित न रहेगी। मै यह नहीं जान सकती कि क्या तुम उनसे यह एक बात सुनाओगे कि नहीं॥

इस गाथा में काले क्रौंच नामक पक्षियों का संबोधन किया जाता है। कुररी नामक एक पक्षी प्रसिद्ध है। क्रौंच भी इसी जाति का है। द्राविड साहित्य में यों कहा गया है कि यह पक्षी क्षण भर के भी वियोग का सहन नहीं कर सकता। वियोग होने पर सदा रोते रहना इसका स्वभाव है। श्रीभागवत में एक कुररीगीत भी प्रसिद्ध है। तथाच क्रौंच शब्द से इस पक्षी की भांति क्षणमात्र के भी भगवद्वियोग का सहन नहीं कर सकनेवाले, अर्थात् ऐसे तीव्रभक्तिवाले महात्मा लोग संबोधित किये जाते हैं। परांकुशनायिका, अपने विरहासहिष्णुस्वभाव देखकर भी दया नहीं करनेवाले निर्दय भगवान को संदेश भेजना व्यर्थ मानती

हुई, पहले वैराग्य का अवलंबन कर, फिर कुछ सोचकर, कुछ न कुछ संदेश भेजना चाहती है, गाथा के उत्तरार्ध से। यहां पर आचार्य एक ऐतिह्य बताते हैं—एक द्राविडी पंडित ने श्री पराशर भट्टार्य स्वामीजी से इस गाथा के बारे में एक प्रश्न किया। तथाहि—इस दशक में विश्लेष दशा का वर्णन है, नतु संश्लेष का। इस समय आळ्वार की दशा को भगवान सुन ही सकते हैं, न तु देख सकते हैं। अतः कहना उचित था कि "मेरा स्वभाव सुनकर।" इससे विरुद्ध, प्रकृत गाथा में "मेरा स्वभाव देखकर" कैसे कहा गया? भट्टर स्वामीजी ने तुरंत इसका यह प्रत्युत्तर दिया—प्रकृत वाक्यखंड में उपवर्णित आळ्वार की दशा विश्लेष काल की नहीं है; अपितु बहुशः भगवान के परिचित संश्लेष काल की ही है। तथाहि—गाढ आलिंगन करने के समयों में भी मध्ये कदाचित, हाथ बदलने के जैसे प्रसंगों में, अल्प विश्लेष होना स्वाभाविक है। प्रकृत परांकुशनायिका का स्वभाव इतना कोमल है कि वह इस अत्यल्प विश्लेष का भी सहन न कर सकती थी, जिसे भगवान भी ठीक जानते थे। यह अर्थ आळ्वार से ही तिरुविरुत्त नामक अपने पहले ग्रंथ में दो तीन जगहों बताया गया है। एवं द्राविडसाहित्य में अन्यत्र भी अनेकत्र विलक्षण नायिकाओं का यह सुकोमल स्वभाव उपवर्णित है। श्रीभट्टर स्वामीजी ने ऐसे दो ती. प्रसिद्धग्रंथस्थ उदाहरण बताकर उस पंडित से कहा कि, "पंडितराज! श्री परांकुशनायिका का यह कहना है कि, 'संश्लेष काल में आलिंगन की थोडी सी ढिलाई हो जानेपर भी मुझे विश्लेष का दुःख लगता और मेरा शरीर विवर्ण हो जाता था। मेरे ऐसे असाधारण विरहासहन स्वभाव को प्रत्यक्षतः देखकर जाननेपर भी निर्दय भगवान ने हाल में मुझे यह विश्लेषदुःख दिया है।' अब कहो, इसमें कौनसी अनुपपत्ति है?" यह सुनकर वह पंडित बहुत प्रसन्न हुआ और भट्टर स्वामीजी की बुद्धिमत्ता की खूब प्रशंसा करने लगा। ऐसे महान विश्लेष दुःख के समय में भी, [मेरे नीलमेघश्याम] कहनेवाली नायिका का यह भाव है कि, "जो भी हो, भगवान मेरे परवश हैं, और अपनी शरीरकांति से मुझको अपने वश कर लेते हैं।" अथवा पहले पाद का यह भी अर्थ हो सकता है कि, "मेरी अब की स्थिति देखकर कृपा न करनेवाले।" इसका यह तात्पर्य है—यदि वे भगवान अब यहां पधारकर मेरी दशा देखेंगे, तो अवश्य ही अपने मन में पछताते हुए यों कहेंगे कि 'इसे वियोगदुःख देना सर्वथा अनुचित है।' परंतु यह अर्थ जाननेवाले निर्दय वे इधर आते ही नहीं।

हमारे आचार्य, भगवान के पास व्यर्थ संदेश भेजने में अपना अनुत्साह बताकर, तो भी, फिर संदेश भेजने की चेष्टा करनेवाली नायिका के इस विलक्षण चेष्टित के एक बहुत ही सुंदर दृष्टांत देते हैं। जब भगवान श्री कृष्णचंद्र अक्रूर के साथ व्रजसे मथुरा पधारे, तब गोपियां विश्लेष से बहुत दुःखी हो गयीं। कुछ दिनों के बाद भगवान को इनका स्मरण हुआ। तब उन्होंने शायद स्वयं इनसे मिलने में सकुचाते हुए बलराम जी के द्वारा इन्हें गर्वरहित, मृदु व मनोहर संदेश भेजा। तब व्रज आये हुए उन बलराम को देखकर सभी गोपियाँ उनसे मिलने गयीं। कितनी ही गोपियों ने उनसे श्री कृष्णका कुशल पूछा। दूसरी कितनियों ने रोष से कहा, "अथवा किं तदालापैः क्रियन्तामपराः कथाः। यस्यास्माभिर्विना तेन विनास्माकं भविष्यति॥ (उसकी बात छोडकर दूसरी कोई बात करो; जिसका हमारे विना काम चल सकता है, उसके

विना हमारा काम भी अवश्य चलेगा; अर्थात् जब श्रीकृष्ण अपनी भक्त हमारी याद किये बिना आनंद से रहता है, तब क्या हम उसकी याद किये बिना न रह सकेंगी? अतः निर्दय उसकी बात बंद करो।) रोष से यह कहने के बाद वे पूछती हैं "हमारी बात जैसी भी हो; क्या श्रीकृष्ण अपनी माता के दर्शनार्थ भी एकबार व्रज नहीं आयंगे?" इसके बाद फिर रोषकी बात चलती है—"हमने उसके लिए अपने माता, पिता, भाई, पति, और दूसरे बंधुओं को भी छोड दिया; परंतु वह सर्वथा कृतघ्न बन बैठा है।" इसके बाद फिर आशा प्रकट करती हैं—"अहो राम! सत्य कहो। क्या श्री कृष्ण फिर कभी इधर आनेकी बात कर रहा है?" यह वृत्तांत श्री विष्णुपुराण में (५-२४) उपवर्णित है। इस प्रकरण का यह फलितांश है कि भगवान के प्रति भक्तों के मन में उत्पन्न होनेवाली निराशा (एवं तत्प्रयुक्त रोष, विरक्ति इत्यादि) बहुत समय तक टिकेगी नहीं; किंतु शीघ्र मिट जायगी। इसी प्रकार हाल में श्रीपरांकुशनायिका भी अपनी निराशा छोडकर, फिर भगवान से मिलने की आशा से उन्हें संदेश भेजती है।

संदेश यह है कि "अब से मेरी सत्ता न रहेगी।" आळ्वार का यह अभिप्राय है कि चिंतयन्ती की भांति अपना भी शरीर अब छूट जायगा। यह बात बिलकुल सत्य है; परंतु हमारे जैसे संसारियों के भाग्य से ही उनकी आयु कुछ बढती रहती है। अर्थात् सत्यसंकल्प भगवान संकल्प कर चुके कि संसारियों के उद्धार के लिए आळ्वार के श्रीमुख से सहस्रगीति निकालना ही चाहिए। अतः तब तक आळ्वार का इस संसार में विराजना भी निश्चित हुआ। इसके अतिरिक्त, दूसरे किसी कारण से आप इस भूमंडल पर नहीं रह सकते। कहना था कि "भगवान से यह विनती करो।" उसके बदले में "न जाने तुम यह काम कर चुकोगे या नहीं" कहना आळ्वार के सीमातीत दुःख का द्योतक है। उनका भाव हैं कि "न जाने, तुम्हारे यहां से प्रस्थान करने तक मैं जीवित रहूंगी या नहीं॥" .... (४)

(गाथा.) नल्हिचान् कात्तळिकुम् पोलिलेल्लम् विनैयेर्कै *
नल्हत्ता नाहादो नारणनै कण्डक्काल् *
मल्हुनीर् प्पुनर्प्पडप्पै इरैतेर्वण् शिरुकुरुहे *
मल्हुनीर् कण्णेर्कु ओर् वाशहम् कोण्डरुळाये ॥ ५ ॥

समृद्धसलिलसंभृतेषूद्यानवनेष्वशनगवेषणपरतया स्थित भो धवलबालबक! अश्रुसमृद्धनयनाया मम सकाशात् संदेशं संगृह्य नारायणसकाशे कृपया प्रापय। (अथवा) तत्सकाशे निवेद्य ततः प्रत्युक्तिं मां प्रापय। स नारायणो दृष्टश्चेदेवं कथय। (किमिति) सप्तलोकीमपि स्वयंप्रयोजनतामियाऽभिरक्षतस्तस्य नारायणस्य पापिन्या ममैकस्या एव रक्षणं किमहो दुश्शकमिति॥

गाथाया अस्या हार्दमभिसन्धिमाचार्या मर्मग्राहं गृहीत्वोपवर्णयन्ति—अद्य स्थित्वा अद्यैव वा श्वः परश्वो वा निर्यास्यन्त्या मम कथा दूरे तावदास्ताम्; शाश्वतिकस्य तस्य नारायणत्वं तावदवश्यमभिरक्षणीयम्; मदेकवर्जमवशिष्टस्य कृत्स्नस्य जगतोऽभिरक्षणे कृतेऽपि नारायणत्वं वैकल्यमेव प्राप्नुयाद्धन्त! तथा नाम तस्य वैकल्यसम्पादनश्रद्धा माभूदिति कथयतेति संदेशसारः। ननु किं नाम नारायणत्वम्? नारशब्दवाच्यानां

सर्वेषामपि चिदचिदात्मकानां वस्तूनां स्वस्मिन्नवस्थितत्वम्, स्वस्य तेष्ववस्थितत्वं च केवलं न नारायणशब्दप्रवृत्ति-निमित्तम्; अपि तु * माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायणः * इत्युपनिषदाम्नातरीत्या सर्वविध-बन्धुभावेन सर्वजनसंरक्षणमेव हि तत्। मामिव अन्यानपि कति कति भक्तानेवमुपेक्षत इति न जाने। एव-मुपेक्षकस्य नारायणत्वं कथमिव प्रतिष्ठितं भवेदिति प्रोच्यतामिति संदिश्यते। स नारायणो दृष्टश्चेदिति कथनस्यायमाशयः। * न चक्षुषा पश्यति कश्चनैनम् * न मांसचक्षुरभिवीक्षते तम् * इत्याद्याम्नातप्रक्रियया चक्षुरविषयभूतस्स भगवान् * इच्छागृहीताभिमतोरुदेहः * इत्युक्तप्रक्रियया, * तासामाविरभूच्छौरिः स्मयमान मुखाम्बुजः। पीताम्बरधरस्स्रग्वी साक्षान्मन्मथमन्मथः * इत्याद्युक्तप्रकारेण च निरतिशय सौन्दर्यलावण्यनिधि-दिव्यमङ्गल विग्रहपरिग्रहेण, * दशशतपाणिपादवदनाक्षिमुखैरखिलैरपि निजवैभवरूप्य विभवैः * इत्याद्युक्तवैभवरूप्य परिग्रहेण च मया सह संश्लिष्य इतस्सारमुपार्श्व निष्क्रान्तः पुनरपि तदेव रूपम् [* न मांसचक्षुर मिवीक्षते तम् * इत्याद्युक्तं] परिगृहीतवानिव। अतस्तस्य दर्शनं दुर्घटम्; यदि स कदाचित् * भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन! इति श्लोकरीत्या भवादृशां भक्तिधनानां चक्षुर्विषयस्स्यादिति।

बकसंबोधनमिह निबद्धम्; अत्र वक्तव्या अर्थविशेषाः प्रथमगाथाविवरणे प्रोक्ताः प्रेक्ष्याः। (बकस्य) स्वाभाविकस्यापि धावल्यस्य कथनम् * मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् * इति वानरेन्द्रप्रोक्त-शुद्धिविशेषपरं ध्येयम्। बालत्वोक्तिश्च * पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् * इत्याम्नातबालत्वद्योतिका। समृद्धसलिलसंभृतेषूद्यानवनेष्वशनगवेषणपरतोक्तिश्च सुसमृद्धार्थभरितशास्त्रेभ्यो नानाविधस्वादुतमार्थसंग्रहण-समुत्सुकताव्यञ्जनी विभाव्या। अश्रुसंभृतनयनाया ममेति कथनं स्वस्य तथाविधनामविशेषवत्त्वप्रकाशनाय। * आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान्। सदा परगुणाविष्टो द्रष्टव्यस्सर्वदेहिभिः॥ * इत्यादिवचनविषय-भावे मुनिवरोऽयमेव हि प्राथमिकपदमञ्चति। प्रथमप्रबन्धे [तिरुविरुत्ते] द्वितीयगाथायामेव हि स्वस्य प्रवहदश्रुपूरत्व-मभ्यदधादसौ॥ .... (५)

(हिंदी) समृद्ध जलयुत सुशीतल उपवनों में शिकार की प्रतीक्षा करनेवाले हे श्वेत बालबक! अश्रुपूर्णनयनवाली मेरी ओर से संदेश लेकर, उसे कृपया नारायण को पहुंचा दो। (अथवा उन्हे संदेश पहुंचाकर उनका प्रत्युत्तर लेते आवो।) यदि वे नारायण दीखेंगे तो उनसे यह बात कहो कि, प्रयोजन निरपेक्ष होकर सातों लोकों का रक्षण करनेवाले नारायणविरुद-धारी उन्हें, क्या अकेली मेरा रक्षण ही अशक्य है?"

हमारे आचार्य इस पद्य का निगूढ. भाव जानकर यों बताते हैं—"मैं (श्री परांकुशनायिका) आज जीवित होती हुई भी कल या परसों मरनेवाली हूं; अतः मेरी चिंता सुदूर छोड दी जाय। परंतु शाश्वत विराजनेवाले भगवान के नारायणत्व का रक्षण अवश्यकर्तव्य है। मुझ एकके सिवाय समस्तलोकगत दूसरी सारी जनता की रक्षा करने पर भी नारायणत्व अधूरा ही रह जायगा। अतः उनसे कहो कि इस प्रकार अपने नारायणत्व को अपूर्ण करना अनुचित है। यह तो एक समस्या. सा है। अतः इसका कुछ विवरण अपेक्षित है।. साधारणतया लोग नारायणशब्द का यह अर्थ जानते हैं कि भगवान 'नार'

कहलानेवाले समस्त चेतनाचेतन पदार्थों के आधार हैं; और स्वयं उनके अंतर्यामी भी हैं। परंतु उस शब्द का यह पूरा अर्थ नहीं। "माता पिता भ्राता निवासः शरणं सुहृत् गतिः नारायणः" इत्याद्युपनिषद् के अनुसार, प्रत्येक चेतन के मातापितेत्यादि समस्तविध बंधु रहकर सर्वदा उनकी रक्षा करनेवाले ही नारायण कहलाते हैं। परंतु ऐसे रहने योग्य भगवान, न जाने, मेरी (परांकुशनायिका की) भांति और भी कितने भक्तों को सता रहे हैं। अतः उनसे पूछो कि यों उपेक्षा करनेवाले वे कैसे नारायण विरुदधारी हो सकेंगे। [यदि वे नारायण दीखेंगे तो] इत्यादि कहने का यह तात्पर्य है—"न चक्षुषा पश्यति कश्चनैनम्" (कोई भी अपने नेत्र से भगवान को देख नहीं सकता।) इत्यादि वेदवाक्योक्त प्रकार भगवान आंखों के विषय न बनते हैं। तथापि वे कदाचित्, "इच्छागृहीताभिमतोरुदेहः" (अपनी इच्छा से परिगृहीत, अपने इष्ट श्रेष्ठ दिव्यमंगलविग्रहवाले), "तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः। पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः॥" (रासक्रीडा के मध्य में अकस्मात् अदृश्य हुए श्रीकृष्ण भगवान के विरह से संतप्त होकर जब गोपियां बहुत दुःखी हुई थीं, तब फिर भगवान पीतांबर और दिव्यमालाओं से अलंकृत होकर, एवं मन्मथ के भी चित्त का मथन करने में समर्थ अत्यद्भुत सौंदर्यवाले होकर, मंदहास दिखाते हुए, उनके सामने प्रकट हुए।) इत्याद्युक्त प्रकार असीम सौंदर्य लावण्यादियुत दिव्य मंगल विग्रह लेकर, एवं हजारों सिरपादनेत्रादिवाला विश्वरूप भी लेकर, यहां पधारकर, मुझसे मिलकर, मेरा सारा सार निकालते हुए लौटकर, पुनरपि शायद उन्होंने अपने अतींद्रिय रूप का ही स्वीकार कर लिया। अतः यद्यपि उनके दर्शन मिलना कठिन है। तथापि "भक्त्या त्वनन्यया शक्यः" इत्यादि श्रीमुख की वाणी के अनुसार, वे तुम्हारे जैसे भक्तों के प्रत्यक्ष भी होते होंगे।

इस गाथा में वक का संबोधन किया गया है। वकशब्द का व्यंग्यार्थ पहली गाथा की टीका में बताया गया है।. वक तो स्वभाव से सफेद ही रहता है, तथापि उसे फिर 'श्वेत वक' कहने से, वक शब्द के विवक्षित महात्माओं की अंतश्शुद्धि सूचित की जाती है; जैसे कि विभीषणशरणागतिप्रकरण में, श्रीरामचंद्र जी से ठीक समझाये जाने पर सुग्रीव जी ने कहा, "मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम्।" (मेरी आत्मा भी विभीषण को शुद्ध मानती है।) इस वाक्य का यही तात्पर्य होगा कि विभीषण का मन शुद्ध है। बाल वक कहने से बालक की तरह निष्कपट एवं निराडंबर व्यक्ति सूचित की जाती है। [समृद्ध जलयुत सुशीतल उपवनों में शिकार] करने का यह अर्थ है कि मधुर रसभरित शास्त्रों से नानाविध सरस अर्थ ढूंढ निकालना। [अश्रुपूर्णनयनवाली मेरी] कहने से आल्वार अपने उस स्वभाव का वर्णन करते हैं, जो "आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान्। सदा परगुणाविष्टः द्रष्टव्यस्सर्वदेहिभिः॥" इत्यादि से बताया गया है। उक्त पद्य का यह भाव है—नेत्र से शीतल आनंदाश्रु बहानेवाले, रोमांचित शरीरवाले, और भगवद्गुणों में तनमन लगानेवाले भक्त के दर्शन प्रत्येक मानव को अवश्य कर्तव्य है। इस भक्तलक्षण का पहला लक्ष्य आल्वार ही हैं। प्रथम प्रबंध "तिरुविरुत्तम्" की दूसरी गाथा में ही आल्वार ने अपने आनंदाश्रुवाहकत्व का वर्णन कर दिया। अतः हाल में भी इसी अर्थ की सूचना की जा सकती है॥ .... (५)

(गाथा.) अरुळाद् नीररुळि अवरावि तुवरामुन् *
अरुळाळि प्पुळ्कडवीर् अवर्वीदि योरुनाळेन्नु *
अरुळाळि यम्मानै कण्डक्काल् इदुशोल्लि अरुळ् *
आळि वरिवण्डे याम्रुमेन् पिळैत्तोमे ॥ ६ ॥

अयि गभीरस्वभावाञ्चित सुन्दरभ्रमर! करुणावरुणालयो भगवानवलोकितश्चेत् तमुद्दिश्य कथयतादेवम्; 'अद्यापि निर्घृणो भवान् स्वाभाविकीं घृणां प्रदर्श्य [कुरुकापुरवासिनः शठकोपनाम्नः] तस्य व्यक्तिविशेषस्य पञ्चताप्राप्तेः पुरस्तादेव परमकारुणिकं गरुत्मन्तं तद्वीथीपथेन सकृदपि वा संचालय भगवन्।' इति। इत्थं त्वया कृपा कर्तव्या भो भृङ्गराज! किमपराद्धमस्माभिर्हन्त ॥

अधस्तनगाथायां स्वकीया नारायणसमाख्या संरक्षणीयेति कथयेति बकपक्षिणमुद्दिश्य प्रोक्तम्। एवं प्रोक्ते सति भगवानथ किमपि दारुणमुत्तरं ब्रूयादिति मेने पराङ्कुशनायिका; (किं तदिति चेत्;) मदीयं नारायणत्वं भज्यतां कामम्; दोषभूयिष्ठया तया सह संश्लिष्य अवचलाभादपि नारायणत्वभङ्गसम्पादनं वरमिति मन्ये—इति भगवान् प्रत्युत्तरयेदपि इति मेने। मत्वैवमस्यां गाथायामाह—तस्याप्यवचं मा भूत्; ममापि सत्ताहानिर्मा भूत्; तथा नाम कमपि कथयाम्युपायविशेषम्; भगवतस्तस्य वीथीषु स्वच्छन्दविहारः, गजेन्द्रादि-भक्ताभिरक्षणार्थं यात्राप्रस्थानम् इत्येवंप्रकाराः प्रयाणविशेषास्सन्ति खलु निसर्गतः; तादृशसञ्चारमर्यादया ममापि वीथीपथेन सकृत्प्रयातु नाम; एवं सति तस्य न किमपि स्यादवचम्; मया सह संश्लेषे खल्ववचं स्यादिति स मन्यते; संश्लेषस्तु मा भूत्कामम्; पतगराजमारुह्य सकृदेव मम वीथ्यां प्रयातु; तावता मे सत्ता समुन्मिषेत्—इति ॥ भ्रमरापदेशेन आचार्या एव विवक्षिताः; तत्रैता उपपत्तयोऽवधेयाः। (१) भ्रमरचञ्चरी-कादिव्यपदेशाः सततभ्रमण-सन्ततसञ्चरण प्रयुक्ता हि भवन्ति भृङ्गजातेः। एवम् * श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रिसिंहाचलौ श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम्। श्रीमद्द्वारवतीप्रयागमथुरायोध्यागयापुष्करं सालग्रामगिरिं निषेव्य रमते रामानुजोऽयं मुनिः ॥ * इत्याद्युक्तरीत्या नानादिव्यदेशसन्तत सञ्चरणशीला महान्तो-ऽभिविवक्षिताः। (२) भृङ्गजाते मधुपानलोलुपत्वं तदन्यविमुखत्वं च प्रसिद्धम्, अत एव मधुपशब्दाभिधेयता च। एवं * विष्णोः पदे परमे मध्व उत्सः * इति श्रुत्युक्तरीत्या, * तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छ-तीति भगवद्यामुनार्यसूक्तिरीत्या च भगवत्पादारविन्दमधुपानसमुत्सुकाः परमरसिका विवक्षिताः। [मध्व उत्सः] मधुन इत्यर्थे मध्व इति छान्दसं रूपम्। उत्सः-प्रवाहः॥ (३) भगवन्मन्दिरान्तः प्रवेशे अस्मादृशां क्षुल्लकानां प्रतिरोधो यद्यपि भवति, भ्रमराणां तु स नैव भवति; स्वच्छन्दमनायासतश्चान्तः प्रविश्य भगवतस्सर्वेषु दिव्यावयवेष्वपि हि वलन्ते ते। एवम् भगवदन्तरङ्गास्थानेषु सर्वत्र चाप्रतिहतगतयः भगवतस्सर्वावयवसंश्लेषभाग्यभाजश्च महाचार्या विवक्षिताः। पुरा कश्चन महाविद्वत्तल्लजः श्रीनिवासभगवत्सिसेविषया श्रीवेङ्कटाद्रिमयासीत्; तत्र कतिपयानि दिनानि स्थित्वाऽपि मन्दिरान्तः प्रवेशलेशमप्यलभमानस्ताम्यन् * ऐश्वर्यमदमत्तोऽसि मां न जानासि माधव। परैः परिभवे प्राप्ते मदधीना तव स्थितिः ॥ * इति विज्ञाप्य प्रणम्य प्रयाणोन्मुखो यदाऽऽसीत्तदा अर्चकमाविश्य परमकृपामयी भगवा-

मनुगृह्य विद्वद्वरेण्यं तं सरभसमन्तरानाय्य परिपूर्णानुभवं प्रादादितीतिहासः प्रथते। एवं निरवग्रहानुग्रहपात्रभूता महानुभावाः कालत्रितयेऽपि सुलभा ननु। (४) श्रीशठकोपमुनिवरोऽसौ स्वकीयप्रथमप्रबन्धे [तिरुविरुत्ते—५५.] भगवत्सविधे संदेशप्रापणाय स्वेनाहूयमानान् द्विरेफानुद्दिश्य कथयति "जलजातेषु स्थलजातेषु तरुजातेषु च पुष्पेषु मधुपानेन सानन्दं चरतां वां किमपि ब्रवीमि भोः!" इति। कमलादीनि जलजातानि; मल्लिकामालती प्रभृतीनि स्थलजातानि; वकुलपाटलपारिजातादीनि पुष्पाणि तरुजातानि। एवं त्रिविधेष्वपि कुसुमेषु लोलुपता भृङ्गजातेर्नैसर्गिकी। आचार्या अप्येवम्। क्षीराब्धिनाथं व्यूहाधिष्ठितवासुदेवमुपभुञ्जाना महान्तो जलजन्मकुसुमोप भोक्तारः। स्थलविहरणेन मोदमानानां रामकृष्णादि विभवमूर्तीनामर्चामूर्तीनां चानुभवोत्सुकाः स्थलजन्मकुसुमानुभव सक्ताः। उत्तुङ्गस्थाने परमे पदे विराजमानं श्रीवैकुण्ठनाथमिहैवानुभवन्तो महान्तस्तरुमूर्धजपुष्पोपभोक्तारः। अस्मदीयपूर्वपुरुषाणामेव केवलं योग्याभि र्भोग्याभिश्चैवंविधविलक्षणानुभवप्रणालीभि र्भृङ्गसाधर्म्यघटना सुशोभना।

[अयि गभीरस्वभावाञ्चितसुन्दरभ्रमर!] इत्युक्तिबलेन, [त्वया कृपा कर्तव्या] इति प्रार्थनाबलेन च महागुरुचरणा एवात्र विवक्षिता इत्यवधारणमनर्गलम्। * अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम * मित्रभावेन संप्राप्तं न त्यजेयं कथञ्चन * इत्यादिभगवदुक्तिप्रसादेन प्रकाशितपरमकरुणावत्त्वस्य भगवतो विषये "अद्यापि निर्घृणो भवान्" इत्युक्तिर्मुनिवरस्यास्य मुखात्कथमिव निस्सरतीति न विद्मो हन्त! आर्त्यतिशयः खल्वेवमाख्यापयति। पतगराजारूढभगवत्सिसेविषाप्रकाशनमिह स्थितम्; * केचित्तत्वविशोधने पशुपतौ पारम्यमाहुः परे व्याजहुः कमलासने नयविदामन्ये हरौ सादरम्। इत्येवं चलचेतसां करधृतं पादारविन्दं हरेस्तत्त्वं दर्शयतीव संप्रति नृणां तार्क्ष्यः श्रुतीनां निधिः॥ * इत्युक्तरीत्या वेदात्मना विहगेश्वरेण करधृतिव्याजेन अयमेव परमः पुमानिति सुस्पष्टं संदर्श्यमानं परमतत्वं सर्वेऽपि विदित्वा सुप्रसन्नचेतसो भवन्त्वित्यभिसन्धिना। स्ववीथीपथेन संचरणप्रार्थनमिह यदातन्यते तत्रेदमवबोद्धव्यम्। श्रीकुरुकापुर्यां श्रीमदादिनाथभगवन्मन्दिरान्तस्तिन्त्रिणीमूलधाम्ना सता मुनिवरेण तावदियं सूक्तिरनुगृह्यते; तत्र वीथी न काचिदस्ति; तथाऽप्येवं प्रार्थितवतो मुनिवरस्य हृदयमाकर्णयत। पश्चात्तत्रतत्र दिव्यदेशेषु स्वस्य मन्दिरप्रतिष्ठा भवित्री; तच्च मन्दिरं यत्र वर्तते तत्र "आऴ्वार् तिरुवीथी"ति प्रथा भवित्री; तस्यां वीथ्यां भगवतो गरुडारूढस्य यात्रा भूयादिति। सत्यमियमाशंसा काञ्च्यां श्रीहस्तिगिरिक्षेत्रे चिरात्फलेग्रहिर्भवतीति सर्वेऽपि साक्षात्कुर्वते। अत एव प्रथमप्रबन्धप्रथमगाथायास्तृतीयचरणे, अस्यास्सहस्रगीतेः प्रथमगाथायास्तृतीयचरणे च देवाधिराजभगवन्नामग्रहणं दैवेच्छया समजनि। श्रीमान् वेङ्कटनाथार्योऽपि * प्रथमशतके वीक्ष्य वरदम् * इति पूर्वाचार्यपरम्परासमागतमैतिह्यमन्ववादीत्—इति रस्यं रहस्यम्। अधस्ताद्दशकस्यास्य प्रथमगाथायां पतगराजप्रस्तावे तस्य तैक्ष्ण्यमुक्तवत्या पराङ्कुशनायिकयाऽत्र गरुत्मतः परमकारुणिकत्वेन विशेषणम् स्वकार्यस्य निष्प्रत्यूहसिद्धये। कस्याश्चन ललनाया वीथ्यामसकृत्सञ्चारे यः कोऽपि लोकापवादस्समुन्मिषेदिति स मा स्म विभेदिति विवक्षुरिव सकृदिति संगदति। पञ्चताप्राप्तेः पुरस्तादेवेत्यश्लीलवाचोऽपि व्याहरणमपरिच्छेद्यमार्त्यतिशयमाविष्करोति। गरुत्मन्तमधिरुह्य समागच्छतादित्यनभिधाय "गरुत्मन्तं सञ्चाल्य भगवन्"इति प्रार्थनया व्यज्यत एतत्—भगवन्तं स्वस्कन्धमधिरोप्य समागतो गरुत्मान् ज्ञानभक्तिसौरभसंभृतमस्या दिव्यमङ्गलविग्रहमवेक्ष्य ततश्चलितुमशक्तस्सन् तत्रैवावतिष्ठेत; तदा 'चलो चलो' इति भगवता कथयितव्यं भवेदित्युन्नयतीति॥ .... (६)

(हिंदी) हे गंभीरस्वभाववाले सुंदर भ्रमर! दयासागर भगवान को देखने पर उनसे यह कहो—"अभी तक निर्दय रहनेवाले आप, अपनी स्वाभाविक कृपा दिखाते हुए, (कुरुकापुरी के शठकोपसूरी अथवा परांकुशनायिका नामक) उनका शरीर छूटने के पहले ही, परमकारुणिक गरुडजी को उनके मार्ग से (माने उनके घरके सामने से) अंततः एक ही बार चलाइये।" हे भ्रमरराज! तुम मेरे ऊपर इतनी कृपा करो तो सही। हाय! मैंने कौनसा अपराध किया?

पिछली गाथा में नायिका ने भगवान के अपने नारायणत्व की रक्षा करने पर जोर दिया। फिर उसने सोचा कि, "मेरा यह संदेश सुनकर भगवान अवश्य ही अप्रसन्न होंगे और यह फटकार सुनायंगे कि, 'मैं वेशक अपना नारायणत्व खो बैठ सकूंगा; न तु अतिदोषयुत उससे (नायिका से) मिल कर स्वयं भी दोषी बन सकूंगा।" अतः प्रकृत गाथा में भगवत्कृपा पर जोर डालकर यह संदेश भेजती है—मैं ऐसा एक सुंदर उपाय बताऊंगी जिससे भगवान को दोष न लगेगा, और मैं भी अपना सत्तानाश होने से बच जाऊंगी। भगवान गजेंद्रादियों की रक्षा करने के लिए और लीलाविहार के लिए गरुडारूढ होकर कभी कभी वीथियों में निकलते हैं न? ऐसी यात्रा के बहाने आप कदाचित् मेरी वीथी से भी यदि निकलने की कृपा करें, तो उतने मात्र से भी मैं कृतकृत्य हो जाऊंगी, और उन्हें भी कोई दोष न लगेगा। मुझसे मिलने पर ही उन्हें दोष लगेगा। मैं मिलना नहीं मांगती; गरुडारूढ उनके, मेरे घर के आगे से निकलने मात्र से मेरी सत्ता सुरक्षित हो जायगी।

इस गाथा में भ्रमरशब्द से आचार्यों का ही संबोधन किया जा रहा है। इसमें औचित्य इस प्रकारों का है—(१) भ्रमर, चंचरीक इत्यादि अपने नामों के अनुसार, भँवर सदा चलने फिरनेवाला प्राणी है; आचार्य भी तीर्थयात्रा, धर्मोपदेश इत्यादि व्याज से सदा फिरते रहते हैं; जैसे कि श्रीरामानुजस्वामीजी के बारे में गाया जाता है—श्रीरङ्गं करिशैल मञ्जनगिरिं तार्क्ष्याद्रि सिंहाचलौ इत्यादि। [इसका यह भाव है—श्री रामानुजस्वामीजी, श्री रंग, श्री कांची, श्री वेंकटाचल, श्री यादवाद्रि, श्री बदरीनाथ, नैमिशारण्य, श्रीद्वारका, प्रयागराज, श्री मथुरा, श्री अयोध्या, गया, श्री पुष्करक्षेत्र, श्री सालग्रामक्षेत्र इत्यादि दिव्यदेशों का सेवन कर आनंदित रहते हैं।] (२) मधुप कहलानेवाला भँवर मधु पीने में ही आसक्त होकर दूसरा कुछ नहीं पीता; "तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति" इत्यादि स्तोत्ररत्नोक्त प्रकार, आचार्य भी भगवत्पादारविन्द मधु का ही पान करनेवाले परमरसिक होते हैं। (३) हमारे जैसे साधारण लोग कभी कभी भगवान के मंदिर में प्रवेश नहीं कर पाते हैं; भ्रमर तो कीसी रोकटोक के विना सदा अंदर जा सकते हैं और साक्षात् भगवान के दिव्यावयवों का भी अनुभव कर सकते हैं; एवं भगवान के अंतरंग कैंकर्य में निरत श्री कांचीपूर्णस्वामी, श्री पराशरभट्टरस्वामी इत्यादि महान लोग मंदिरों में संकोच के विना भगवत्संनिधि तक पहुंच सकते हैं और उनका अनुभव भी कर सकते है। इस विषय में यह एक ऐतिह्य जानने योग्य है—किसी समय एक महाविद्वान श्रीनिवास भगवान के दर्शन करने के उद्देश्य से श्री वेंकटाद्रि गये। परंतु बहुत प्रयत्न करने पर भी कितने ही दिनों उन्हें दर्शन नहीं मिले। तब बहुत दुःखी

होकर उन्होंने द्वार पर ही भगवान को लक्ष्य कर प्रणाम करते हुए यह विनती की—"ऐश्वर्यमदमत्तोऽसि मां न जानासि माधव। परैः परिभवे प्राप्ते मदधीना तव स्थितिः ॥" अर्थात् हे माधव! ऐश्वर्यमद से मस्त होकर अब तुम मुझ पर ध्यान नहीं दे रहे हो। अस्तु; परंतु याद रखो कि जब दूसरे लोग आकर तुम्हारे ऊपर नानाविध आक्षेप करें (अर्थात् निरीश्वरवाद का अथवा देवतांतर पारम्यवाद का प्रकाशन करते हुऐ तुमको अनीश्वर बतावें), तब तुम्हारी सत्ता मेरे अधीन रहेगी। (अर्थात् जबतक मैं तुम्हारा पक्ष लेकर उन दुर्वादियों के मत खण्डन कर तुमको ही भगवान सिद्ध न करूं, तब तक कोई तुमको भगवान नहीं मानेगा।) इतना कहकर, जब उस पंडित ने वहाँ से लौटना चाहा, तब भगवान ने अपने अर्चकपर आविष्ट होकर, उसे सबहुमान मंदिर के अंदर लिवाकर, अपने परिपूर्ण दर्शन भी दिलाये। इस प्रकार भगवान के विलक्षण अनुग्रह के पात्र कोई कोई महात्मा लोग तीनों कालों में मिलते हैं। (४) श्री शठकोपसूरी अपने पहले प्रबंध "तिरुविरुत्तम्" में (गाथा ५५) भगवान के पास भ्रमरों को दूत बनाकर भेजते हुए, उनका यों वर्णन करते हैं—जल, स्थल व वृक्ष में समुत्पन्न पुष्पों में मधु पीकर सानंद फिरनेवाले हे भ्रमर!" यह तो स्वभावोक्ति है कि भ्रमर, पानी में उगनेवाले कमल इत्यादि, भूमिपर उगनेवाले मल्लिका इत्यादि, तथा वृक्षों पर फूलनेवाले चंपक पाटली इत्यादि, कुल तीन प्रकार के पुष्पों से मधु चूसते हैं। परंतु इससे क्षीरसागर-शायी भगवान के, श्री रामकृष्णादिरूप से तथा अनंत अर्चारूपों से भूतल पर विराजमान भगवान के, एवं श्री वैकुंठ नामक, वृक्ष जैसे ऊंचे स्थल पर विराजमान भगवान के कल्याणगुणों का अनुभव करनेवाले महात्माओं की सूचना अवश्य ही मिलती है। अतः हमारे पूर्वाचार्य, अपने ही असाधारण ऐसे अनेक प्रकारों से भ्रमर के समान माने जा सकते हैं।

भ्रमर को [गंभीर स्वभाववाले सुंदर भ्रमर] कहने से, एवं उनकी दया मांगने से यह स्पष्ट सूचित किया जाता है कि आचार्यों का ही यह संबोधन है। "अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम," (मैं अपनी शरण में आनेवाले को समस्त भूतों से अभय देता हूं) "मित्रभावेन संप्राप्तं न त्यजेयं कथंचन" (मित्र की भावना से मेरी शरण में आनेवाले का, मेरा कुछ भी हो, त्याग नहीं करूंगा) इत्यादि परमशोभन अभयप्रदान करनेवाले परमकारुणिक भगवान को, उनकी कृपासे पूर्ण परिचित आळ्वार, अब [अभीतक निर्दय रहनेवाले] कह रहे हैं! यह तो अवश्य ही अत्याश्चर्य की बात है। सीमातीत दुःख ने ही उनके मुख से यह वचन निकाला है। यहां पर आळ्वार गरुडारूढ भगवान के दर्शन करना चाहते हैं। इसका यह तात्पर्य है—भगवान के अनेक वाहन होते हैं; परंतु गरुडजी में एक विशेषता है, जिसका वर्णन "केचित्तत्वविशोधने पशुपतौ" इत्यादि पद्य में किया गया है। (पूरा पद्य संस्कृत विभाग में दिया गया है।) पद्य का यह भाव है—परतत्वनिर्णय करने में प्रवृत्त कितने ही लोगों ने शिवजी को परतत्व माना; किन्हींने ब्रह्माजी को परतत्व बताया; दूसरों ने हरि को ही परतत्व कहा। इस प्रकार विवाद होने से साधारण जनता व्याकुल हो उठी। यह दुरवस्था देखकर स्वयं वेदात्मा गरुडजी, अपनी दोनों हथेलियों में भगवान के उभयचरणारविंद रखकर सब को बता देते हैं कि, "यह देखो! यही परतत्व है।" कहने का यह तात्पर्य हुआ कि गरुडवाहन भगवान के परत्व का बोधक वाहन है।

आळ्वार, अपनी वीथी से गरुडवाहन भगवान की सवारी निकालने की इच्छा प्रकट करते हैं। आळ्वार की जीवनी में बताया गया है कि उन्होंने कुरुकापुरी में श्रीमदादिनाथ भगवान के मंदिर में एक इमली के पेड़ के नीचे ही विराजकर अपने सभी दिव्यप्रबंध गाये। उधर तो कोई वीथी है ही नहीं। फिर आळ्वार की इस विलक्षण इच्छा का अर्थ क्या होगा? अपनी असाधारण दिव्यदृष्टि से आळ्वार ने देखा कि बाद में दिव्यदेशों में अपने (आळ्वार के) मंदिरों की भी प्रतिष्ठा होगी, और वहां आळ्वार तिरुवीथी नामक वीथियां भी होंगी। तब उनकी ऐसी इच्छा हुई कि उक्त वीथियों में गरुडवाहन की सवारी निकलें। गरुडवाहन बारंबार होनेवाला उत्सव नहीं है; परंतु सालभर में एकाध बार ही होगा। अतः एक बार सवारी निकालने की बात भी ठीक लगती है। आळ्वार की यह इच्छा श्रीकांची क्षेत्र में श्रीवरदराज भगवान के मंदिर में प्राचीन काल से ही सफल हो रही है। अर्थात् ब्रह्मोत्सव में (एवं और भी दो बार) जब भगवान का गरुडवाहनोत्सव होता है, तब वह सवारी आळ्वार तिरुवीथी से ही निकलती है। मालूम पडता है कि देवाधिदेव श्री वरदराज भगवान के प्रति आळ्वार का कोई विशेष भक्तिभाव था। अत एव उनके प्रथम प्रबंध 'तिरुविरुत्तम्' की पहली गाथा के तीसरे पाद में, एवं प्रकृत सहस्रगीति की पहिली गाथा के तीसरे पाद में उन्हीं भगवान का नाम कीर्तित हुआ। श्रीवेदांतदेशिक स्वामीजी ने भी अपने विरचित 'द्रमिडोपनिषत्सार' में "प्रथम शतके वीक्ष्य वरदम्" (सहस्रगीति का सारा पहला शतक वरदराज भगवान की स्तुति हैं) कहते हुए संप्रदायमें परंपराप्राप्त इसी अर्थ का वर्णन किया।

प्रकृत दशक की पहली गाथा में गरुडजी को तीक्ष्णपक्षवाले कहनेवाले आळ्वार, हाल में उनको [परमकारुणिक] कह रहे हैं। अपनी इच्छा की निर्विघ्न पूर्ति के लिए यह कहा गया है। [एक ही बार] निकालने की प्रार्थना इस लिए की जाती है कि बारंबार एक महिला की (परांकुशनायिका की) वीथी में से निकलने पर भगवान को कलंक लगने का भय हो सकता है। [उनके शरीर छूटने से पहले] इत्यादि अश्लील वार्ता कहने का भी कारण आळ्वार का अत्यधिक दुःख ही है। कहना था कि "गरुडवाहन हमारी वीथी से होकर निकलें;" इसकी जगह "भगवान गरुडजी को हमारी वीथी से चलावें" कहने का यह तात्पर्य है—भगवान को अपने कंधों पर विराजमान कर निकलने वाले गरुडजी आळ्वार के मकान के सामने आनेपर, उनके ज्ञानभक्त्यादि विभूषित दिव्यमंगलविग्रह के दर्शन कर, परवशचित्त होकर वहीं खड़े हो जायंगे; तब भगवान को "आगे चलो चलो" कहते हुए उनको चलाना पड़ेगा॥ .... (६)

(गाथा.) एन्निलै कोप्पदु पोल पनिवाडै यीर्हिन *
एऩ्ऩुपिलैये निनैन्दरुळि अरुळाद तिरुमालार्कु *
एऩ्ऩुपिलैत्ताळ् तिरुवडियिन् तहवितुके मोरुवाय् शोल *
एन्निलैकु मिळक्किलिये यान् वळर्त्त नीयलैये ॥ ७ ॥

अयि भोः शुकशाव! अस्थिग्रन्थौ तन्तुप्रवेशनवत् शिशिरः पवनो मां हिनस्ति हन्त। अस्यां दशायां ममापराधमेव विचिन्त्य कृपामकुर्वतो लक्ष्मीपतेस्सविधे "तत्रभवतः स्वाभा-

• विकङ्कपागुणस्य विघातकतया किमपराद्धमनेन जनेन" इत्येकस्यास्संदेशवाचः कथने हन्त! का ते क्षतिर्मवित्री? किं त्वं मयाऽभिवर्धितः शुको न भवसि?॥

अथस्तनगाथायां गरुडारूढस्य भगवतः स्वरथ्यायामागमनं संदिष्टमभूत्; तत्रैवं भगवतः प्रत्युक्तिस्स्यात्-स्वकीयापराधभूयस्त्वामविचिन्त्य एवमभ्यर्थने किं नाम फलं स्यादिति; इति मन्यमाना पराङ्कुशनायिका शुकशाव-मुद्दिश्य संदिशति गाथायामस्याम्—स्वकीय मपराधसहत्वरूपं क्षमागुणमविचिन्त्य मदपराधमात्रविचिन्तनमुचितं वेति कथयेति।

शुकशावत्वेनात्र विवक्षितः शिष्यलक्षणसम्पन्नश्छात्र इति ग्राह्यम्। यद्यप्याचार्येष्वपि शुकसाधर्म्यं सूपपादम्, तथाऽप्यत्र शावत्वेन संबोधनात् 'मदभिवर्धितः किं त्वं न भवसी'ति कथनाच्च शिष्यविवक्षणमेव संप्रतिपन्नम्। शुकसाधर्म्योपपादनं तु शिष्याणामाचार्याणामप्यविशेषं वेदितव्यम्। एकस्या एव व्यक्तेः कदाचि-च्छिष्यताम् अन्यदा आचार्यतां च ननु पश्यामः। श्रीवत्साङ्कमिश्रगुरुचरं स्तुवन् कोऽपि महानाह—* कूराधीशं गुरुतरदयादुग्धसिन्धुं तमीडे श्रीवत्साङ्कं श्रुतिमतगुरुच्छात्रशीलैकधाम * इति। गुरुशीलं छात्रशीलं च कतिपयेषु गुरुवरेषु सामानाधिकरण्येन नृत्यत इव। अथ शुकसाधर्म्यप्रकारा अमी। (१) यथाशिक्षणमनूच्चारणं शुकेषु प्रसिद्धम्; रङ्गरङ्ग! रामरामेति कथनमनुवदन्ति शुका इति प्रेक्षामहे। दक्षिणचित्रकूटक्षेत्रवर्णने श्रोत्रियद्विजन्म-वरसंनिहिताः शुका वेदानूच्चारणमपि कलयन्तीति कलिजित्सूरिराह बृहत्सूक्ते। एवं महद्भिरुपदिष्टानर्थविशेषान् शब्दविशेषांश्च अविपर्ययेण अनुवदन्तस्सच्छात्रा विवक्षिताः। "भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्संचिक्षिपुः; तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते" इति श्रीभाष्यमुपक्रममाणे भगवद्रामानुजैस्सं-दर्शितं पन्थानमभिमरक्षन्तः प्रमाणपरतन्त्रा विवक्षिताः। व्यासजैमिनिमुन्यो र्गुरुशिष्यभाव ·स्थुरयोरपि सेश्वर-वादनिरीश्वरवादनिबन्धनमतभेदशालित्वापत्त्यांतिर्यथा प्रसृता तथा येषां न भवति ते खलु शुकसाधर्म्यं प्राधान्ये-नानुविन्दन्ति। (२) स्वैरसंचरणशीलान् शुकान् पञ्जरेषु बध्नन्तीति प्रेक्षामहे। किमत्र कारणम्? * शुक! पञ्जरबन्धस्ते मधुराणां गिरां फलम् * इति चन्द्रालोके पठामः। मधुरवाणीश्रवण कुतूहलेनैव हि शुकम् पञ्जरे बध्नन्ति। एवं मधुरतरवाग्व्याहरणेन श्रोतृजनहृदयमुपच्छन्दयितुं प्रभवन्तोऽन्तर्वाणयः स्वच्छन्दसंचरणप्रतिरोध-पूर्वकं कचिन्नियन्त्रिता भवन्तीति पश्यामः। * श्रीरङ्गं करिशैलमञ्जनगिरिमित्यादिश्लोकोक्तरीत्या नानादिव्यदेश-पर्यटनप्रावण्यजुषो भगवद्रामानुजमुनेः * द्वयमर्थानुसन्धानेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्व इति श्रीरङ्गनाथ भगवत्कृतमाज्ञापनं चात्रानुसन्धेयम्। (३) पक्षिजातौ शुकतुल्यसौन्दर्यशालिनः पक्षिणो नान्ये; स्पृहणीयतनवो हि शुकाः। एवम आत्मसौन्दर्यमिव शारीरसौन्दर्यमपि येषु वर्तते ते विवक्षिताः। * काषायशोभि कमनीयशिखानिवेशं दण्डत्रयोज्ज्वलकरं विमलोपवीतम्। उद्यद्दिनेशनिभमुल्लस-दूर्ध्वपुण्ड्रं रूपं तवास्तु यतिराज! दृशोर्ममाग्रे॥ * इत्युपश्लोकनाईविलक्षण दिव्यमङ्गलविग्रहसुषमासुभगा इत्युक्तं भवति। (४) शुकाः स्वामिवर्धननिरतानां करतलमश्नन्तः तत्प्रदत्तं बिम्बफलादिकमश्नन्तीति पश्यामः। एवम् * उपत्वा नेष्ये * इत्युक्त्वा स्वान्तिक एव स्थापयित्वा विवर्धयता माचार्याणां सर्वथा परतन्त्रा भूत्वा तत्प्रदत्तान् सदर्थानुपभुञ्जानास्सच्छिष्या विवक्षिताः। एवमन्येऽपि साधर्म्यप्रकारा उन्नेयाः।

प्रथमपादे शिशिरवातेन स्वस्य भृशं बाध्यमानतामाचष्टे पराङ्कुशनायिका। लोके दाम्पत्येन वर्तमानाः शिशिरसमीरणमन्विष्य गच्छन्तीति, विरहिणो जना स्तादृशपवनस्पर्शमात्रेणाप्युद्विजन्त इति च पश्यामः। पम्पासरस्तीरमनुप्राप्तस्सीताविरहितो रामचन्द्रः "पद्मसौगन्धिकवहं शिवं शोकविनाशनम्। धन्या लक्ष्मण! सेवन्ते पम्पोपवनमारुतम्॥ * इति सौमित्रिं प्रति कथयन् खिद्यते। अत्र द्वितीयपादे शोकविनाशनमिति मारुतविशेषणं विमर्शास्पदम्। विरहिणो रामचन्द्रस्यायं मारुतः शोकविवर्धन एव न तु शोकविनाशनः; तत्कथमुच्यते शोकविनाशनमितीति विमर्श आवश्यकः। उत्तरार्धे * धन्या लक्ष्मण! सेवन्ते * इत्युक्तत्वात् सेवमानानां धन्यानां दृष्ट्या तयोक्तिरिति केचन व्याचक्षते। रसिकाग्रेसराणां श्रीकलिवैरिगुरुवराणां व्याख्यानं तु विलक्षणं परमशोभनं च। नात्र शोकनाशनमित्युक्तम्, अपि तु शोकविनाशनमिति। शोकस्यात्यन्तिकनाशकत्वमुक्तं भवति। शोकस्यात्यन्तिकनाशः कदा भवेत्? शरीरं यावदवतिष्ठते तावन्नैव भवेत्। संयोगानां विप्रयोगान्तत्वात् नष्टः शोकः पुनरुद्भवेदेव। पुनरिति किम्? पुनःपुनरुद्भवेदेव। यदा तु निधनं संघटते ततःपरं शोकस्य प्रसङ्ग एव न स्यात्; आत्यन्तिकविनाश एव तस्य। तथाच प्राणापायकरोऽयं शीतवातपोत इति सिध्यति। एतादृशीं बाधामनुभवामि बतेति कथयति पराङ्कुशनायिका। हिंसायां दृष्टान्त उच्यते अस्थिग्रन्थौ तन्तुप्रवेशनवदिति। अस्थिपुञ्जे रन्ध्राणि कृत्वा तत्र तन्तुप्रवेशने कृते यादृशी बाधा भवेत्तादृशीति कथितं भवति।

अथ संदेशगोचरीभूतो भगवान् विशेष्यते ममापराधमेव विचिन्त्य कृपामकुर्वतो लक्ष्मीपतेरिति। अपराधकर्तृत्वं मम सहजस्वभावो यथा तथा तस्य अपराधसहत्वं प्रकृतिः खलु। तत्र विस्मरणम् मदपराधेष्वेव स्मरणं च नोचितमिति कथय। एतेन भगवतः क्षमागुणोद्घोषणं क्रियते। सहस्रनामस्तुतौ अविज्ञातेति भगवत एकं नाम। * अविज्ञाता हि भक्तानामागस्सु कमलेक्षणः * इति तन्निरुक्तिः। भक्तापराधेष्वविज्ञातेति प्रसिद्धस्स इदानीं तेषु प्राज्ञो बभूवेव। स्वगुणेष्वविज्ञाना, परदोषेषु प्राज्ञश्च बभूविथ किम्? इति पृच्छेत्युच्यत इव। [कृपामकुर्वतो लक्ष्मीपतेः] कृपाराहित्यस्य लक्ष्मीपतित्वस्य च सामानाधिकरण्यं कथं संघटेत हन्त। लक्ष्मीस्तावत् * न कश्चिन्नापराध्यतीति कथनशीला। * पितेव त्वत्प्रेयान्....भवति च कदाचित्कलुषधीः। किमेतन्निर्दोषः क इह जगतीति त्वमुचितैरुपायैर्विस्मार्य स्वजनयसि माता तदसि नः॥ * इत्युक्तरीत्या भक्तनिग्रहाभिमुख्यनिवारणपूर्वकं तदनुग्रहौन्मुख्यसंधुक्षणशीला च। तादृश्याः पतिर्भूत्वा कथमिव मम दोषाननुचिन्तयतीति पृच्छ-इति वेदान्तियतीन्द्र (नञ्जीयर) निर्वाहः। श्री कुरुकेशार्यनिर्वाहस्तु —लक्ष्मीः स्वकीयविभ्रमभ्रमिषु तं विनिमज्जयन्ती सती तस्य आन्यपर्यं निरुणद्धीव; अत एव तस्यामेवास्तमितान्यभावस्सन् हन्त मामुपेक्षत इव इति। [किमपराद्धमनेन जनेनेति कथय] स्वस्मिन्नपराधो नास्तीति कथनं नात्र विवक्षितम्। तदीयक्षमागुणभूम्नो निरीक्षणे इतोऽपि भृशमपराद्धव्यम्; तावत्तु नैवापराद्धमित्येव विवक्षितम्। सुग्रीवसख्यसमनन्तरं वालिवधादिनिर्वर्तनादूर्ध्वम वर्षाकाले बहिःप्रयाणमनुचितमिति मन्यमानेन दाशरथिना मासद्वयावधिरदायि वानरपतेः। अवधिस्तावदतीतः। सुग्रीवो भोगप्रवणस्सन्नत्यन्तमेव विसस्मार रामचन्द्रम्। तदात्वे कोपकषायितहृदयः काकुत्स्थः * समये तिष्ठ सुग्रीव! मा वालिपथमन्वगाः॥ न च संकुचितः पन्था येन वाली हतो गतः। .... हनिष्यामि सबान्धवम् * इत्यादिकमतिपरुषमभिधाय किष्किन्धाद्वारं प्रजिघाय

लक्ष्मणम् । स च तत्र गत्वा दारुणं ज्याघोषमुपबृंहयति स्म । तदा विदितोदन्ता तारा बहिरागत्य * किं कोपमूलं मनुजेन्द्रपुत्र! कस्ते न संतिष्ठते वाङ्निदेशे? * इत्यप्राक्षीद्रामानुजमिति विलिखति वाल्मीकिः । अत्रेदं विचार्यम् । किं न जानाति कोपमूलं तारा? कथं न जानाति? सम्यगेव जानाति । ज्ञात्वाऽपि कथमेवमनुयुङ्क्ते । स्वस्मिन्नपराधो नास्तीति न; कोपप्रतिबन्धके क्षमागुणे त्वयि वर्तमाने सति हन्त कथमिव कोप उदियाय? इति तावत्प्रश्नाभिप्रायः । कार्यसामान्यं प्रति कारणकलापसमवधानमावश्यकमिति स्थितम् । तत्समवधानेऽपि प्रतिबन्धकसद्भावे कार्यं नैवोदेति । ततश्च प्रतिबन्धकाभाव समवहित कारणकलापसद्भावः कार्यसामान्यं प्रति कारणमिति परिष्कुर्वन्ति पण्डिताः । एवं निग्रहं प्रति अपराधरूप कारणसद्भावमात्रमप्रयोजकम्; प्रतिबन्धकाभाववैशिष्ट्यं चावश्यकम् । प्रकृते तद्दुर्लभम् । क्षमाया निग्रहप्रतिबन्धकत्वात्, तत्स्मारणे कृते निग्रहौन्मुख्यं विहाय अनुग्रहाभिमुखस्स्याद्भगवानिति पराङ्कुशनायिकायास्सुशोभनं हृदयम् ।

[किं त्वं मयाऽभिवर्धितः शुको न भवसि?] यद्यपि भर्ता हिंसां कर्तुं प्रभवति; मयाऽभिवर्धितस्य तवापि हिंसाकृत्यं किमुचितम्? इत्येको भावः । दूत्याय झटिति प्रस्थानादर्शनेनैवमुच्यते । स्वयं परमकारुणिको भगवान् मत्संबन्धवशादेव हि विपर्यस्तप्रकृति स्सन्नुपेक्षते; तस्मिन्निव त्वय्यपि मत्संबन्धसद्भावात् तवाप्युपेक्षणमुचितमेवेत्यपरो भावः ॥ [किमपराद्धमनेन जनेन] इत्यत्र व्याख्यातृमहाभागा एवमनुगृह्णन्ति—'तत्रभवतः कृपायाः प्रतिबन्धकत्वेन किं मया प्रदक्षिणनमस्कारादिकं किञ्चिदनुष्ठितमिति प्रष्टव्यम्' इति श्रीमत्-कलिवैरिगुरुवरा अनुजगृहुः—इति । अत्रेदं विचार्यम्—प्रदक्षिणनमस्कारादिकं किं भगवत्कृपायाः प्रतिबन्धकम्? प्रत्युत अभिवर्धकमेव खलु । एवमनुगृहीतवन्त आचार्यचरणाः किं नान्वतिष्ठन् प्रदक्षिण नमस्कारादिकम्? इति । अत्रेदमभिसंहितम् । प्रदक्षिणनमस्कारादिषु कृत्यकलापेषु आकारद्वयमस्ति तावत्, कैङ्कर्यरूपता साधनानुष्ठानरूपता चेति । कैङ्कर्यधिया तदनुष्ठातारः अतीव विरलाः; * निजकर्मादि भक्त्यन्तं कुर्यात्प्रीत्यैव कारितः । उपायतां परित्यज्य न्यस्येद्देवे तु तामभीः ॥ * इति गीतार्थसंग्रहे भगवद्यामुनमुनीन्द्रानुगृहीतरीत्याऽनुष्ठातारो नात्र विवक्षिताः । प्राकृतजनानिव किमस्मानपि साधनानुष्ठानवैयग्र्येण भवत्कृपाप्रतिरोधजनकान् मन्यसे? इति पृच्छेत्युक्तं भवति ॥ .... (७)

(हिंदी) हे बालशुक! हड्डी में गुंथे जाने वाले सूत की तरह अतिशीतल दक्षिणमारुत, हाय! मुझे बहुत त्रास दे रहा है। ऐसी दशा में मेरे अपराधों पर ही नजर डालकर कृपा न करने वाले लक्ष्मीपति, भगवान से यह एक संदेशवचन कहने में तुम्हें कौन—सी हानि होगी कि "इससे ऐसा कौनसा अपराध किया गया, जो कि आपकी स्वाभाविक कृपा की प्रतिबंधक होगी?" क्या तुम मेरे पालित शुक नहीं?

पूर्वगाथा में भगवान को गरुडारूढ होकर अपनी वीथी से पधारने का संदेश भेजने पर परांकुश नायिका ने सोचा कि, शायद भगवान इसका यह प्रत्युत्तर देंगे कि, 'अपने सीमातीत अपराधों का ख्याल न करके ऐसी प्रार्थना करने में क्या लाभ हैं?' अतः वह प्रकृतगाथा में एक बालशुक के द्वारा यह संदेश भेजती है कि, क्या भगवान को, अपने अपराधसहनशीलता नामक गुण का ख्याल न करते हुए मेरे अपराधों की ही चिंता करना उचित होगा।

यहां पर बालशुक शब्द से शिष्यलक्षण संपन्न चेले सूचित किये जाते हैं। यद्यपि शुक के वक्ष्यमाण लक्षण, शिष्य की तरह आचार्य में भी घटित होते हैं; अतः उनकी भी सूचना हो सकती है; तथापि प्रकृत गाथा में 'बाल' शुक कहने से, तथा 'मेरे पालित' कहने से शिष्य का ही ग्रहण करना उचिततर है। हाल में जो किसी का शिष्य रहता है, वही, बाद में दूसरों का आचार्य बन जाता है। अतः शिष्यत्व व आचार्यत्व, ये परस्परविरुद्ध धर्म नहीं हैं। अत एव किसी एक महात्मा ने श्रीकूरेशस्वामीजी की यह विलक्षण स्तुति की—"कूराधीशं गुरुतरदयादुग्धसिन्धुं तमीडे श्रीवत्साङ्कं श्रुतिमतगुरुच्छात्रशीलैक-धाम।" (श्रीकूरनामक नगर के स्वामी, अत्यधिक दयागुण के सागर, वेदोक्त समस्त गुरु व शिष्यों के लक्षणों से परिपूर्ण, श्रीवत्सांक नामक महात्मा की स्तुति करता हूं।) इससे स्पष्ट होता है कि कतिपय महात्माओं में शास्त्रोक्त सभी शिष्यलक्षण व आचार्यलक्षण परिपूर्ण रूप में विराजते हैं। अस्तु। अब शुक का व्यंग्यार्थ बताएंगे। (१) किसी प्रकार का परिवर्तन किये बिना, सिखाये हुवे शब्द का ज्यों का त्यों उच्चारण करना शुक का गुण है; श्रीपरकालसूरी अपने बृहत्सूक्त में दक्षिणचित्रकूट क्षेत्र के वर्णन प्रसंग में कहते हैं कि उधर के ब्राह्मणों के यहां बसनेवाले तोते वेद का भी पाठ करते हैं। इसी प्रकार श्रेष्ठ शिष्य भी गुरुके उपदिष्ट शब्दों व अर्थों का ठीक उसी प्रकार अनुकरण करते हैं; अर्थात् वे उनमें कोई अन-पेक्षित परिवर्तन नहीं करते। यथा श्रीरामानुजस्वामीजी ने अपने श्रीभाष्य के प्रारंभ में लिखा—"हमारे पूर्वाचार्यों ने भगवान बोधायन मुनिके विरचित, विस्तृत ब्रह्मसूत्र व्याख्यान का संग्रह किया। उनके मतानुसार अब मैं उन्हीं ब्रह्मसूत्रों के अक्षरलभ्य अर्थों का विवरण करूंगा।" अर्थात् श्री रामानुज स्वामीजी यह प्रतिज्ञा करते हैं कि पूर्वाचार्यों के वचनानुसार और सूत्रकार के हृदयानुसार ही आप श्रीभाष्य की रचना कर रहे हैं; न तु स्वकपोलकल्पित किसी मतके अनुसार। पूर्वमीमांसा सूत्र के रचयिता महर्षि जैमिनि भगवान वेदव्यासजी के शिष्य थे। परंतु उनका अपने गुरु के विरुद्ध निरीश्वरवादी होने का अपयश हो गया। इस प्रकार जिसको अपने गुरु के विरुद्ध होने का अयश न लगे, ऐसे, सर्वथा तन्मार्गानुसारी शिष्य शुक शब्द के अर्थ होते हैं। (२) तोते की मधुरवाणी सुनने के लिए लोग उसे स्वेच्छाविहार करने से रोक कर पंजर में बंधित रखते हैं। इसी प्रकार श्रोतृजनमनोहारि प्रवचन करने में समर्थ विद्वानों को, इनकी वाणी सुननेके लिए रसिकजन यथेच्छसंचार से रोक कर एक स्थल पर उन्हें स्थापित कर देते हैं। श्रीरंगनाथ भगवान ने, "श्रीरङ्गं करिशैलमञ्जनगिरिम्" इत्याद्युक्त प्रकार दिव्यदेशयात्रा करने में निरत श्रीरामानुजस्वामीजी को "अत्रैव श्रीरङ्गे सुखमास्स्व" (इसी श्रीरंगक्षेत्र में नित्यनिवास करो) कहते हुए एक स्थल पर रोक दिया। (३) पक्षिजाति में तोते सबसे सुंदर होते हैं; इससे मनोहरदिव्यमंगलविग्रहवाले महात्मा लोग सूचित किये जाते हैं। यथा श्री रामानुजस्वामीजी की यह स्तुति है—"काषायशोभि कमनीय-शिखानिवेशं दण्डत्रयोज्ज्वलकरं विमलोपवीतम्। उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं रूपं तवास्तु यतिराज दृशोर्ममाग्रे।" (हे यतिराज! मेरी आँखों के सामने आप अपने दिव्यमंगलविग्रह के दर्शन देते रहें, जो कि, काषाय से (गेरुआ वस्त्र) सुशोभित, सुंदर शिखावाला, त्रिदंड से शोभायमान हस्तवाला, शुभ्रयज्ञोपवीतवाला, उगनेवाले सूर्य की भांति प्रकाशमान और चमकनेवाले ऊर्ध्वपुंड्र से विभूषित है।) (४) शुक, अपने पालक की हथेली पर बैठकर उसके प्रदत्त फलादि खाता है; एवं "उप त्वा नेष्ये" (तुझे अपने पास लूंगा) इत्याद्युपनयन

मंत्रोक्तप्रकार, आचार्य, शिष्य को अपने पास ही रखकर सदर्थरूप आहार देकर, उसका पालन करते हैं; ऐसा शिष्य शुक कहला सकता है। ऐसे और भी सादृश्य के अनेक प्रकार होते हैं।

गाथा के पहले पाद में नायिका शीतलपवनबाधा का वर्णन करती है। यह तो लोकानुभव की बात है कि संश्लिष्ट कामी लोग शीतलपवन की खोज में जाते हैं, परंतु विश्लेष काल में उन्हें यही पवन दुःखद होता है। सीताविरहित श्रीरामचंद्र जी पंपासरोवर के पास पधारकर प्रलाप करते हैं—"पद्म-सौगन्धिकवहं शिवं शोकविनाशनम्। धन्या लक्ष्मण! सेवन्ते पम्पोपवनमारुतम्॥" (हे लक्ष्मण! कमलपुष्प की सुगंध का वाहक, मंगलमय, एवं दुःखविनाशक, पंपासर के उपवनों से होकर बहनेवाले इस पवन का सेवन करनेवाले धन्य हैं।) यहां एक शंका होती है कि हाल में विरही श्रीरामचंद्रजी अपना संताप बढानेवाले इस पवन को कैसे 'शोकविनाशन' कह रहे हैं। कुछ लोग इसका यह समाधान करेंगे कि उत्तरार्ध में 'धन्य' शब्द आता है; अतः ऐसे धन्यों के अभिप्राय से शोकविनाशन कहा गया है। यह तो ठीक है; परंतु रसिकाग्रेसर चक्रवर्ती श्री कलिवैरिस्वामीजी इसका दूसरा ही एक परमभोग्य विवरण करते हैं—मूलशब्द है शोकविनाशनम्, न तु शोकनाशनम्; अर्थात् 'नाशन का एक उपसर्ग दिया गया है—वि। वि माने विशेषतः। तथाच शोक का सर्वथा विनाश कहा गया। यह सर्वथा दुःखनाश तो इस शरीर के रहते हुए न मिलेगा; क्यों कि कदाचित् संश्लेषानंद पानेवाले भी बाद में विश्लेषदुःख भोगते ही हैं। अर्थात् संसार का यह स्वभाव है कि यहां किसीको नित्यसुख नहीं मिलता, अपितु सुख व दुःख दोनों मिले ही रहते हैं। शरीर के छूट जाने पर तो फिर विश्लेष-प्रस्ताव के अभाव से शोक का पूर्ण नाश होगा। तथाच हाल में श्रीरामचंद्रजी का यह अभिप्राय है कि यह पंपोपवन-पवन इतना क्रूर है कि यह मेरा शरीरनाश ही करा देगा। अब परांकुशनायिका यह कहती है कि अब मैं भी दक्षिण मारुत के कारण ऐसे असह्य दुःख भोग रही हूं। दुःख का दृष्टांत दिया जाता है—[अस्थि में सूत्र गुंथे जाने की तरह]। यह भाव है—अपनी हड्डी में छेद बनाकर उसमें सूत्र घुसेड़ने से मानव को जितना और जैसा दुःख लगेगा, ठीक वैसा ही दुःख यह दक्षिण-मारुत मुझे भी दे रहा है।

संदेश के लक्ष्य भगवान का विशेषण दिया जाता है—[**मेरे अपराधों पर ही नजर डालकर कृपा न करनेवाले लक्ष्मीपति**] जैसे अपराध करना मेरा स्वभाव है, वैसे उनकी क्षमा करना आपका स्वभाव है। यह स्वभाव भूलकर मेरे दोषों का ख्याल करना आपके लिए अनुचित है। इस विनती से भगवान की क्षमा उद्बोधित की जाती है। श्रीविष्णुसहस्रनाम स्तोत्र में भगवान का यह एक नाम गाया गया है—अविज्ञाता। अविज्ञाता माने जो कुछ भी न जानता है; अर्थात्—अज्ञानी। भक्तों के अपराध नहीं जानने से भगवान अज्ञानी कहे गये! एवं अविज्ञातृत्वेन संस्तुत भगवान अब भक्तापराधों के ज्ञाता बन गये होंगे। भगवान से यह पूछो कि क्या अब आप स्वगुणों के अविज्ञाता और भक्तदोषों के ज्ञाता बन गये। [**कृपा न करनेवाले लक्ष्मीपति**] यह तो शब्दों का विचित्र मिलाप है। लक्ष्मीपति और कृपाशून्य का कौनसा संबंध होगा? कुछ भी नहीं। लक्ष्मीजी का सिद्धांत है—न कश्चिन्नापराध्यति (माने संसार में अपराध न करनेवाला कोई भी नहीं)। और अपराधी को दंड देने में उद्यत भगवान को भी उस काम से

रोककर, उल्टा कृपा करने की प्रेरणा देना लक्ष्मीजी का स्वभाव है। अतः, श्री वेदांतिस्वामी नामक नञ्जीयर ने इसका यह तात्पर्य बताया, कि ऐसी महालक्ष्मीजी के पति होते हुए भी, हे भगवन्! आप अब मुझ पर कैसे निर्दय बन गये? षट्सहस्री व्याख्याकार श्री कुरुकेशस्वामीजी का विवरण यह हुआ—इस समय भगवान लक्ष्मीजी के भोग में आसक्त होकर, उसीमें लीन होनेके कारण ही शायद मेरी उपेक्षा कर रहे हैं। [इससे एसा कौनसा अपराध किया गया] इत्यादि से आळ्वार अपने निरपराध होने का दावा नहीं कर रहे हैं; किंतु उनका यही तात्पर्य है कि भगवान के असीम क्षमागुण पर ध्यान देने पर कहना पड़ता है कि अभी तक हमने इतने पाप नहीं किये, जो उनकी क्षमाके पर्याप्त हों; अतः हमें और भी बहुत पाप करना चाहिए; अबके हमारे पाप अत्यल्प हैं। अर्थात् यह भगवान की क्षमा की प्रशंसा है, नतु अपने में अपराधाभाव का दावा। श्रीरामायण में किष्किन्धाकांड की कथा है। वालिवध के बाद श्रीरामचंद्रजी ने उपस्थित वर्षाकाल में रावण पर विजययात्रा करना अशक्य मानकर, उतने समय सुग्रीव को आराम करने की अनुमति दी। साथ ही उन्होंने यह भी आज्ञा दी कि चौमासे के समाप्त होते ही रावणवध के लिए अवश्य प्रयत्न करना चाहिए। परंतु अपने कामभोगों में मस्त सुग्रीव श्रीरामचंद्र जी को सर्वथा भूल गया। इससे कुपित श्रीराचंद्रजी ने लक्ष्मणजी के द्वारा उसे यह संदेश भेजा कि, "अरे! वानर, सुग्रीव! अपनी प्रतिज्ञा पर ध्यान रखो। मारे हुए वाली का गया मार्ग अभी संकुचित नहीं हुआ। अपनी प्रतिज्ञा का ख्याल न रखनेवाले तुमको मैं वाली के पीछे उसी राह भेज दूंगा। (अर्थात् वाली की भांति तुमको भी मार डालूंगा; इतना ही नहीं; वाली एक ही गया; सत्यमार्ग से भ्रष्ट तुम्हें तो तुम्हारे बंधुमित्रों के साथ मार डालूंगा।) इत्यादि। तब लक्ष्मणजी ने भी वेगसे किष्किंधा पधारकर, सुग्रीव के महल पर पहुंचकर उसे अपने आनेकी सूचना देने के लिए धनुष का टंकार किया। महर्षि वाल्मीकी लिखते हैं कि यह समाचार पाकर ताराने अंतःपुर से बाहर आकर लक्ष्मणजी से यह विनती की कि "किं कोपमूलं मनुजेन्द्रपुत्र! कस्ते न संतिष्ठति वाङ्निदेशे" इत्यादि (हे राजपुत्र! आपके कोप का कारण क्या है? आपके आज्ञानुसार कौन न चलेगा?) अहो! यह कैसी बात है? क्या तारा लक्ष्णजी का कोपकारण नहीं जानती? ठीक जानती ही है। जानकर भी वह यह कौनसा प्रश्न कर रही है? आचार्य इसका भाव यों बताते हैं—तारा यह नहीं कह रही है कि अपने में दोष नहीं; परंतु भगवान में (एवं लक्ष्मणजी में भी) इतनी क्षमा है कि वे इससे सौगुने अपराध का भी सहन कर सकते हैं। तथाच तारा का यह प्रश्न है कि, "प्रभो! ऐसा असीम क्षमागुण के भंडार होते हुए आप कैसे रुष्ट हो रहे हैं!" इस न्याय से परांकुशनायिका का यह अभिप्राय है कि भगवान को अपनी (भगवान की) क्षमा की याद दिलाने पर, आप भक्त के निग्रह की चिंता छोडकर अनुग्रह करने के तैयार हो जायंगे।

नायिका की यह बात सुनकर भी जब वह शुक भगवत्संनिधि जाने के लिए झट न उठा, तब नायिका उससे पूछती है—[क्या तुम मेरे पालित शुक नहीं?] भर्ता होने से भगवान कदाचित् मेरी हिंसा भी कर सकते हैं; मेरे पालित तुम भी कैसे हिंसा कर सकते हो? (अर्थात् मेरे कथनानुसार भगवान के पास न जाते हुए मेरी उपेक्षा कर, क्यों कर तुम मुझे दुःख दे रहे हो?) अथवा, स्वयं

*कारुणिक स्वभाव भगवान ही जब मेरे संबंध से निर्दय बन गये; तब उसी मेरे संबंध से तुम भी मुझ पर निर्दय बन गये हो; यह तो उचित ही है।

[इससे ऐसा कौनसा अपराध किया गया?] यहां पर सहस्रगीतिटीकाकार आचार्य, श्रीकलिवैरिगुरु नामक नम्पिळ्ळै स्वामीजी एक विलक्षण वचन लिखते हैं—"भगवान से यह पूछो कि आपकी कृपा का प्रतिबंध करते हुए क्या मैं ने प्रदक्षिण नमस्कारादि कुछ भी अनुष्ठान किया?" यह तो एक विचित्र-सी बात है। प्रदक्षिण नमस्कार इत्यादि भगवत्कृपा के प्रतिबंधक नहीं हो सकते हैं; वरन् उत्तेजक ही होंगे। अन्यथा पूछना पड़ेगा कि क्या श्री कलिवैरिगुरु ने कभी भगवान का प्रदक्षिण अथवा प्रणाम नहीं किया। इसका यह भाव हैं—प्रदक्षिण प्रणाम इत्यादि कार्य के दो आकार होते हैं—भगवत्कैंकर्य होना, और किसी फलका उपाय होना। अर्थात्, श्रीमद्यामुनाचार्य स्वामीजी के अपने गीतार्थसंग्रह में प्रदर्शित प्रकार, फलकामना छोडकर, साक्षात् भगवान को ही उपाय मानते हुए, केवल कैंकर्यभावना से प्रदक्षिण इत्यादि कार्य करने में कोई आपत्ति नहीं हो सकती। परंतु इन्हीं कार्यों को उपायबुद्धि से करने पर वे अवश्य ही भगवत्कृपा के प्रतिबंधक बन जाते हैं। अर्थात् यों करनेवालों के प्रति भगवान का यह विचार होता है कि, "ठीक है; ये लोग अपने प्रयत्न से पुरुषार्थ कमाने की चेष्टा करते हैं; अतः हाल में मुझे इन पर कृपा करने की आवश्यकता नहीं होती। अतः हाल में श्री परांकुश नायिका भगवान से यह पूछना चाहती है कि क्या मैंने आपको ही उपाय न मानती हुई, आत्मकल्याण के लिए प्रदक्षिण प्रणामादि साधनों का अनुष्ठान कर आपके कृपाप्रवाह को रोक दिया॥ .... (७)

(गाथा.) नीयलैये शिरुपूवाय् नेडुमालार् केन्तूदाय् *
नोयेनदु ज़ुवलेच्च ज़ुवलादे यिरुन्दोळिन्दाय् *
शायलोडु मणिमामै तळर्न्देन् नान् * इनियुनदु
वायलहि लिन्नडिशिल् वैप्पारै नाडाये ॥ ८ ॥

अयि भो बालशारिके! भूरिव्यामोहशालिनो भगवतस्सकाशे मम दूती सती गत्वा मदीयां व्यथां निवेदयेत्युक्ताऽपि त्वं अनिवेद्य जोषमवतिष्ठसे हन्त! किं त्वं विपर्यस्तप्रकृतिरसि? अहं तावत् प्रनष्टसौन्दर्यलावण्या समभूवम्। इतः परं त्वच्चञ्चूपुटे भोग्यं भोज्यं ये विन्यस्येयुः तान् त्वमेवान्विष्य संपादयतात्॥

सैषा गाथा मुनीन्द्रस्य चरमसंदेश इवावतरति हन्त। जगति प्रायस्सर्वेऽपि स्वस्य चरमकाले कमपि कमपि संदेशं दिशन्ति पुनर्जीवितनैराश्येन; स एव चरमसंदेशः प्रथितः। तादृगेव संदेशोऽयमिति चरमचरणेन व्यज्यते। "इतः परं त्वत्पोषकान् त्वमेव मृगयस्व" इति तावदन्त्यपादेनाभिधीयते। ततश्च तादृशी दशा सांप्रतं समजनीति प्रतिपत्तव्यं भवति। शारिका नाम शुकजातौ जातः पक्षिविशेषः। अधस्तनगाथायां शुकसाधर्म्यप्रकारा येये निरूपितास्तेऽत्रापि विभाव्याः। * नीयलैये शिरुपूवाय्! * इति तावद् गाथोपक्रमः। शारिकायास्संबोधनात्प्रागेव किं त्वं विपर्यस्तप्रकृतिरसि? इत्युच्यते। अत्रायमभिसन्धिः; लोके बन्धुजना रुग्णास्सन्ति चेत् आप्तेषु जनेषु

केचिदितस्ततः पर्यटन्तस्सन्तो रोगपरिहारोपायचिन्ताविवशाः प्रवर्तन्ते; केचित्तु रुग्णानां यावती व्यथा तावतीं ततोऽधिकामपि स्वयं बिभ्रतस्ताम्यन्ति, उत्थातुमप्यक्षमाः परिक्लिश्यन्ते च। अत्र शारिकात्वेन विवक्षिता अन्तेवासिनः स्वाचार्यनिर्विशेषव्यथाभिभूतास्सन्तः 'मृतसंजीवनो भगवत्संश्लेषः कथमिव घटिष्यते दशायामस्याम्' इति विचारविह्वला वर्तन्ते; सा परिस्थितिः स्फोर्यते [किं त्वं विपर्यस्तप्रकृति रसीत्यनेन। भगवत्सकाशे मदीयां दशामावेदयेति चिरादहं प्रार्थितवती; तथाऽपि त्वया नैव मदुक्तिरादृता; अत एव स भगवान् नोपस्थितः; यदि त्वया काले निवेदितं स्यात्तर्हि तेन सत्यमुपस्थितेनैव भूयेत; अनिवेदनं त्वदीयो ह्यपराधः—इति तावदमिचीयते। स्वयं परमकारुणिकोऽपि भगवान् व्याजरूपतया संदेशं प्रतीक्षत इति हि शास्त्रमर्यादा। अत एव हि विभीषणोऽप्याह * निवेदयत मां क्षिप्रं विभीषणमुपस्थितम्। सर्वलोकशरण्याय राघवाय महात्मने॥ * इति। एवं प्रार्थनाविरहे विभीषणस्य रामपरिग्रहः किं न घटेत? कथमपि घटेतैव; तथाऽपि शास्त्रीयः पन्था नातिवर्तितव्य इति धियैव * निवेदयत मां क्षिप्रमिति प्रार्थनायां प्रवृत्तस्स इति वस्तुस्थितिः। एवमेव मुनीन्द्रोऽपि शारिकासविधे पुरस्तादेव स्वप्रार्थनामुदजीवटदिति, अथापि सा अतिशयितस्वकीयार्तिबलादेव जोषमास्तेति च गम्यते।

[भूरिव्यामोहशालिनो भगवतस्सकाशे] अनस्वात् निर्घृणस्स भगवानिति कथितं केवलं स्वकीयनिर्वेदातिशयनिबन्धनम्; इह भूरितरव्यामोहशालीति कथनं भगवतो यथावस्थिताकारकीर्तनं मन्तव्यम्। आश्रितजनव्यामोहेनैव हि निरूपणीयस्स भवति। * विदितस्स हि धर्मज्ञः शरणागतवत्सल इति रावणमुपदिशन्ती मैथिली वात्सल्यैकनिरूपणीयं हि तमभिदधाति। वत्सलः-व्यामुग्ध इति पर्यायः खलु। * प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः * इति स्वयमेव च गायति। हे शारिके! स्वयमेव व्यामुग्धस्य तस्य व्यामोहोत्पादनं न ते कृत्यम्; मदीयस्थितिनिवेदनमात्रं ते कृत्यमिति मया मुहुः कथितमुपेक्षितं हन्त! त्वया।

[मदीयां व्यथां निवेदयेत्युक्ताऽपि] त्वदीया व्यथा का नामेति यथा न पृच्छेच्छारिका तथा पराङ्कुशनायिका * एहि पश्य शरीराणीतिवत् स्वशरीरं स्वयमेव प्रादर्शयदिव। * एहि पश्य शरीराणीत्युक्तवन्तो दण्डकारण्यवासिनो महर्षयो राक्षसैः कृतान् परिभवानवोचन् रामचन्द्रसविधे। इह तु भगवतैव समुत्पादितां व्यथां भागवतसकाशे विज्ञापयतीति व्यावृत्तिरवधेया। महर्षीणां तु शारीरी व्यथा, अत्र मुनिवरस्य तु मानसी व्यथा। अत्र तावदाचार्याणामनर्घा दिव्यसूक्तिः "भरतस्य महात्मनो व्याधिरित्युक्ते न खलु चातुर्थिकं तत्" इति। विवरणमावश्यकमत्रेति मनागिव विक्रियते। अरण्याद्राघवं प्रत्यावर्तयितुं सपरिवारं प्रस्थितो भरतः शृङ्गिवेरपुरं प्राप्य तत्र निषादराजेन गुहेन प्रदर्शितानि रामसीताशयनस्थलान्युदीक्ष्य अतिवेलखेदाभिभूतः पपात भूमौ; तदात्वे कौसल्या * परिपप्रच्छ भरतं रुदन्ती शोकलालसा। पुत्र! व्याधिर्न ते कच्चिच्छरीरं परिबाधते॥ अद्य राजकुलस्यास्य त्वदधीनं हि जीवितम् * इत्याद्युक्तप्रकारेण भरतं परिष्वज्य विलपन्ती * पुत्र! व्याधिर्न ते कच्चित्? * इति पर्यपृच्छत्; एतेन तदा भरतो व्याधिग्रस्तवदालक्ष्यते स्मेति गम्यते। कोऽयं व्याधिरिति विमर्शः कर्तव्यो भवति। चातुर्थिकं नाम व्याधिर्दारुणतरः प्रथते। चतुर्थे चतुर्थेऽह्नि जायमानो ज्वरविशेषश्चातुर्थिकपदाभिलप्यः। नित्यज्वरं प्रति न भीतिः, अद्य ज्वरः, पुनस्तृतीयेऽह्नि ज्वरः, पुनश्च ततस्तृतीयेऽह्नि ज्वरः—इत्येवंरीत्याऽनुवर्तमानं ज्वरं प्रत्यपि न भीतिः। यस्तु ज्वरश्चतुर्थे चतुर्थेऽह्न्यनुवर्तते स सत्यं प्राणा-

पापमीतिजनक इति भेषजशास्त्रसरणिः। तथा च चातुर्थिकनाम्ना व्यपदिश्यमानस्य तस्य रोगविशेषस्यात्यन्तदारुणता सिध्यति। भरतस्य व्याधिरित्युक्ते न तादृशः; भगवद्विषयकोऽयं व्याधिः परमविलक्षणः स्पृहणीयश्चेत्या-चार्यगोष्ठीषु प्रथा। श्रीशठकोपमुनीन्द्रेणात्र स्वयं कथ्यमानो व्याधिरपि तथाविध एव, न तु लौकिकानामिवेत्युक्तं भवति। उपरि चतुर्थशतके षष्ठं दशकं कृत्स्नं मुनीन्द्रस्य व्याधिविशेषप्रतिपादकमागमिष्यति, तत्र विशेषतो द्रष्टव्यम्।

[अहं तावत्प्रनष्टसौन्दर्यलावण्या समभूवम्] इत्यनेन सर्वथा स्वस्य मुमूर्षुदशापत्तिर्व्यञ्जिता भवति। अथ शारिका प्राह—'तर्हि संप्रति सत्वरं गत्वा भगवत्सविधे निवेदयेयम्' इति। तत्रोच्यते इतःपर मित्यादि। माभून्नाम गते जले सेतुबन्धोद्यमः; अहमद्यैव निर्याणोन्मुखी भवामि; एतावता कालेन मद्रक्षणे स्थिता त्वमितः परं रक्षकान्तरान्वेषणे प्रवर्तस्व—इति कथनेन स्वस्य जीवितप्रत्याशादारिद्र्यमवगमितं भवति। अत्रेदमैतिह्यमनुगृह्णन्त्याचार्याः;—भगवद्रामानुजार्यमातुलपादाः श्री रामायणोपदेशकाश्च श्रीशैलपूर्णगुरुवराः स्वचरमसमये स्वाराध्यदेवतायाः पुरतो यवनिकामुद्घाट्य 'इतः परं त्वच्चञ्चूपुटे भोग्यं भोज्यं ये विन्यस्येयुस्तान् त्वमेवान्विष्य संपादयतात्' इत्यर्थकमस्या गाथायाश्चरमचरणमनुसंदधिरे—इति। अत्रेदमवगन्तव्यम्; अस्मदीयाः पूर्वाचार्याः कण्ठस्थदिव्यप्रबन्धास्तदातदा स्वस्वविवक्षितार्थान् दिव्यप्रबन्धगाथानुसन्धानमुखत एव प्रकाशयन्त आसन्निति। एवंविधान्यैतिह्यानि दिव्यप्रबन्धव्याख्यास्विव गुरुपरम्पराप्रभावादिग्रन्थेष्वपि भूरिश उपलभ्यन्ते॥

(हिंदी) हे बालसारिके! मेरे यों कहने पर भी कि, "अत्यधिक व्यामोहवाले भगवान के पास, मेरी दूती के रूप में जाकर, उनसे मेरे दुःख की विनती करो", तुम यह बात न मान कर चुप रह गयी। क्या तुम्हारा स्वभाव ही बदल गया? मैं तो अपना सौंदर्य व लावण्य खो बैठी हूं। अतः अब से तुम अपनी चोंच में अच्छा आहार देनेवालों को ढूंढ निकाल लो।

यह गाथा आळ्वार का अंतिमसंदेश जैसा है। लोक में सभी लोग अपने अपने मरने के समय अपने बंधु आदियों को कोई कोई संदेश देते हैं; जिसे अंतिमसंदेश (अथवा चरमसंदेश) कहते हैं। प्रकृत गाथा का चौथा पाद बताता है कि यह ऐसा ही संदेश है। इसमें यह संदेश दिया जाता है कि "तुम अबसे अपने पोषण करनेवालों का खोज कर लो।" इसका यह तात्पर्य है कि अब नायिका छेली घड़ी पर पहुंच गयी है। तोते की जाति की ही एक पक्षी शारिका कहलाती है। मालूम पडता है कि श्री परांकुश नायिका एक शारिका का पोषण करती थीं। शारिका का व्यंग्यार्थ पिछली गाथा में जो बताया गया, वही है। गाथा के प्रारंभ में ही नायिका उससे पूछती है कि, [क्या तुम्हारा स्वभाव ही बदल गया?] इसका यह भाव है—लोक में किसी के बहुत रोगग्रस्त हो जाने पर, उनके बांधवों में कोई कोई इधर उधर फिरते हुए रोगपरिहार के उपाय ढूंढते रहते हैं। दूसरे कितने तो रोगी से भी अधिक दुःख पाते हुए उठने में भी अशक्त होकर खिन्न रहते हैं। यहां पर शारिका शब्द उन शिष्यों का संकेत हैं, जो कि नायिका की प्रकृत दुरवस्था देखने से स्वयं बहुत दुःखी होकर, इस चिंता में मग्न रहते

हैं कि, अब इन्हें मृतसंजीविनी भगवान का मिलाप कैसे होगा। अर्थात् इस चिंता से उनका रंग ही बदल गया है। अब नायिका शारिका से कह रही है कि, "मैं तबसे तुमसे कह रही हूं कि शीघ्र जाकर भगवान से मेरी दशा की विनती करो। परंतु तुमने मेरी बात का ख्याल नहीं किया। अत एव भगवान इधर नहीं पधारे। यदि तुम उनसे तभी विनती कर देती, तो वे इतने में इधर अवश्य ही पधारते। विनती न करना तुम्हारा अपराध है।" शास्त्र की मर्यादा है कि भगवान स्वयं परमकारुणिक होते हुए भी, किसी चेतन की रक्षा करने के लिए उसकी ओर से संदेश इत्यादि अल्प वस्तु मांगते हैं। अत एव विभीषण ने भी, "निवेदयत मां क्षिप्रम्" (अर्थात्, हे वानरवीर! सर्वलोकशरण्य महात्मा श्री रामचंद्रजी की संनिधि में विनती कीजिए कि विभीषण आया है) इत्यादि कहते हुए भगवान को संदेश भेजा। यह प्रश्न मत पूछिए कि क्या यह संदेश भेजे बिना विभीषण की इच्छा सफल न होती। कुछ भी हो, उनकी इच्छा तो सफल होती ही। परंतु प्रत्येक मानव को अपना कर्तव्य करना आवश्यक है। अतः शास्त्रमर्यादा का पालन करने के उद्देश्य से ही विभीषण ने संदेश भेजा। इसी प्रकार आळ्वार ने भी पहले से ही शारिका से संदेश ले जाने की प्रार्थना कर रखी थी; परंतु वह शारिका स्वयं भी दुःखी होने के कारण भगवत्संनिधि जाने में अशक्त होकर चुप रह गयी।

[अत्यधिक व्यामोहवाले भगवान के पास] इत्यादि। आळ्वार ने पहले अपने सीमातीत दुःखके कारण ही भगवान को निर्दय कहा; हालमें तो वे उनको अधिकव्यामोहवाले कहते हुए उनके वास्तविक स्वरूप का वर्णन कर रहे हैं। अर्थात् भगवान का स्वरूप ही व्यामोह (अथवा भक्तों पर असीम प्रेम) है। अत एव रावण को मधुर उपदेश देती हुई सीताजी ने बीच में, "विदितस्स हि धर्मज्ञश्शरणागतवत्सलः" कहती हुई वात्सल्य को ही भगवान का असाधारणस्वरूप बतलाया। वात्सल्य और व्यामोह समानार्थक शब्द हैं। खुद श्रीमुख का भी यह गीत है—"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।" (ज्ञानी के लिए मैं अत्यंत प्रिय हूं, और मेरे लिए वह अत्यंत प्रिय होता है।) तथा च, हे शारिके! स्वयं व्यामोहशील भगवान में व्यामोह पैदा करने की तुम्हें कोई आवश्यकता नहीं है; मेरी दयनीय दशा की विनती करनामात्र तुम्हारा कर्तव्य होगा। परंतु हाय! मुझसे बारंबार प्रेरित होने पर भी तुमने उपेक्षा कर दी।

[उनसे मेरे दुःख की विनती करो।] माळूम पड़ता है कि आळ्वार ने अपने शरीर की ओर इशारा करते हुए शारिका को अपना दुःख बता दिया, जिससे उसको यह प्रश्न करने की आवश्यकता न हुई कि "तुम्हारा कौनसा दुःख है?—" यथा दंडकारण्यनिवासी ऋषियों ने अपने शरीर दिखाते हुए श्रीरामचंद्रजी से कहा "एहि पश्य शरीराणि" इत्यादि (हम ऋषियों के राक्षसभक्षित शरीर देखिए)। परंतु दोनों में इतना अंतर अवश्य है कि ऋषियों ने भगवान से राक्षसों द्वारा समुत्पादित दुःखों की विनती की; श्री परांकुश नायिका तो (शारिका शब्दवाच्य) भगवद्भक्त से साक्षात् भगवान के द्वारा ही समुत्पादित अपने दुःख की विनती कर रही है। एवं ऋषियों का दुःख शारीरिक था; आळ्वार का दुःख तो मानसिक है। इस प्रकरण में आचार्यों का यह एक अनमोल दिव्य वचन है, कि, "भरत का व्याधि कहेंगे तो वह चातुर्यिक न होगा।" इसका यह तात्पर्य है—अरण्य से श्रीरामचंद्रजी को अयोध्या लौटाने के उद्देश्य से

भरतजी बड़े परिवार के साथ निकल कर रास्ते में शृंगिवेरपुर पहुंच गये। उधर गुहदेव ने उन्हें श्रीरामसीता-शयन इत्यादि कतिपय स्थल बताये। वह देखते ही भरतजी का दुःख बहुत बढ गया और वे मूर्छित होकर भूमि पर गिर गये। यह देखकर कौसल्याजी उधर आ गयीं और भरतजी को अपनी गोद में बिठाकर आश्वासन करती हुई उन्होंने पूछा कि "पुत्र व्याधिर्न ते कच्चित् शरीरं परिबाधते?" (अर्थात् हे पुत्र! क्या कोई भी व्याधि तुम्हें दुःख दे रही है?) इससे यह स्पष्ट होता है कि उस समय भरतजी व्याधिग्रस्त जैसे दीखते थे। अब विचार यह है कि उस समय भरतजी की व्याधि कौनसी थी? इसके प्रत्युत्तर में पूर्वोक्त आचार्य-श्रीसूक्ति है कि "भरतजी की व्याधि चातुर्थिक न होगी।" चातुर्थिक माने प्रत्येक चौथे दिन आनेवाला एक प्रकार का ज्वर है। ज्वर के अनेक प्रकार होते हैं—प्रतिदिन आनेवाला, प्रत्येक तीसरे दिन पर आनेवाला, चौथे दिन आनेवाला इत्यादि। वैद्य कहते हैं कि यह चातुर्थिक सबसे आपत्कारक है। अब आचार्यों का यह कहना है कि भरतजी की व्याधि उक्त चातुर्थिक नहीं थी, जिसको मिटाने के लिए दवा लेनी पडती हो; अपितु श्रीरामविरह नामक मानस रोग था, जो भक्तों के लिए प्रार्थनीय भी होता है। एवं समझना चाहिए कि परांकुशनायिका का वर्तमान दुःख भी संसारी मानवों के रोगादिजनित किसी दुःख के सदृश कोई वस्तु नहीं; परंतु भगवद्विरहप्रयुक्त दुःख ही है। आगे चौथे शतक में समग्र छठे दशक में आळ्वार की इसी व्याधि का वर्णन किया जानेवाला है। वहां पर इसकी विशेषताएं बतायी जायंगी।

["मैं तो अपना सौंदर्य व लावण्य खो बैठी हूं"] कहने का यह भाव है कि अब मैं मरने को तैयार हूं। यह सुनकर शारिका ने कहा, "तो मैं शीघ्र भगवान के पास जाकर उनको तुम्हारा संदेश पहुंचा दूंगी।" इसका प्रत्युत्तर है—[अतः तुम अबसे] इत्यादि। "समय निकल जाने पर अब तुम्हारा संदेश व्यर्थ होगा। अतः वह चिंता छोड दो। मैं तो अभी शरीर छोडनेवाली हूं। अभी तक तुम मेरी रक्षा में रहे। अबसे तुम अपनी रक्षा करने में समर्थ दूसरी किसी व्यक्ति को ढूंढ लो।" इससे नायिका सर्वथा अपने जीवित रहने की आशा का अभाव बताती है। इस प्रकरण में हमारे पूर्वाचार्य एक ऐतिह्य बतलाते हैं—भगवान श्री रामानुजस्वामीजी के मामाजी, एवं उन्हें श्री रामायणार्थों का उपदेश देनेवाले श्रीशैलपूर्णस्वामीजी की जब परमपद पधारने की दशा आ गयी, तब उन्होंने अपने आराध्य देव के मंदिर के कपाट खोलकर (अथवा फरदा हटवाकर) उन भगवान से प्रकृत गाथा के उत्तरार्ध की विनती की, जिसका मुख्य भाग यह चौथा पाद है—[अबसे तुम अपनी चोंच में अच्छा आहार देनेवालों को ढूंढ निकाल लो।] उनका यह भाव था—"अभी तक मैंने आपकी ठीक सेवा की; भोग धराया; और दूसरे सब कुछ किये। परंतु अब मैं दुर्बल होकर परमपद जाने को तैयार हूं। अतः आप अपनी सेवा करनेवाले दूसरे किसी को स्वयं खोज लीजिए।" हमारे पूर्वाचार्यों ने अर्थ के साथ दिव्यप्रबंधों के मूलपाठ को भी कंठस्थ कर रखे थे। अतः तदातदा वार्तालाप के समय वे अपने अभिप्रायों को उचित दिव्यप्रबंध गाथाखंडों से ही प्रकाशित करते थे। ऐसे अनेक ऐतिह्य दिव्यप्रबंध व्याख्यानों में एवं गुरुपरंपराप्रभाव इत्यादि दूसरे अनेक ग्रंथों में भी उपवर्णित मिलते हैं॥ .... (८)

(गाथा.) नाडाद् मलर्नाडि नाडोरुम् नारणन्तन् *
वाडाद मलरडिकीव्ह् वैकवे वहुकिनु *
वीडाडि वीचिरुवल्ह् विनैयत्त देन्शेय्वदो *
ऊडाडु पनिवाडाय् उरैत्तीरा येनदुडले ॥ ९ ॥

इतस्ततः पवमान हे शिशिरपवन! दुर्लभानि प्रसूनानि आर्जयित्वा भगवतो नारायणस्य नित्यविकस्वरपुष्पसदृक्षचरणान्तिके अनुदिनं तानि समर्पयितुमेव हि सृष्टोऽयं जनः। एवं सत्यपि विश्लेषमूर्धाभिषिक्ततारूपं मदीयं दौर्भाग्यं सर्वथा शोचनीयं हि हन्त!। (हे मारुत!) त्वं भगवत्सकाशे दूतकृत्यमाकलय्य अथ तत्कृपाया अलाभे सति कामं बाधस्व मम गात्रम्॥

शिशिरः पवनो विरहिजनानामत्यन्तबाधक इति पुनरुक्तमेतत्। तथा नाम कश्चन वातपोतो मुनीन्द्रं भृशं बाधितुमुपाक्रंस्त। '* भीषाऽस्माद्वातः पवते * इत्युपनिषदाम्नातरीत्या सर्वथा भगवदधीनप्रवृत्तिनिवृत्तिकोऽयं वातस्तत्यं तन्नियोगादेव मां बाधते' इति मेने; मत्वा कथयति तमेव वातमुद्दिश्य—भोभोः! मदीयं किमपीदं विज्ञापनं त्वन्नियोजकभगवत्सविधे निवेदय; ततोऽपि स उपेक्षेत चेत् अथ सरभसमभ्यागत्य मां प्राणैर्वियोजय—इति। भोग्य भोगोपकरण भोगस्थानसमृद्धायामस्यां लीलाविभूत्यां प्राकृतानां धिया यानि यानि वस्तूनि भोग्यानि भवन्ति, तान्येव मुनिवरस्यास्य धिया घातुकत्वेन गृह्यन्ते; तदवलोकनमात्रेण दुर्वचां बाधामनुभवति हन्त! गीतं च भगवता—* या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥ * इति। * वासुदेवस्सर्वमिति तिष्ठतां भगवदेकभोगानां महात्मनां प्राकृतजनभोग्यवस्तुजातदर्शनमात्रमप्यरुन्तुदमिति तदर्थः। भगवान् रामचन्द्रोऽपि पम्पासरस्तीरे भृशं परितप्यमानः * एष पुष्पवहो वायुस्सुखस्पर्शो हिमावहः। तांविचिन्तयतः कान्तां पावकप्रतिमो मम॥ इत्यादिकं बहुलमाचचक्षे। तत्र वायुसंक्षुभितविरहसंतापकथनमात्र मुद्दिष्टं स्यात्। अत्र तु वायूपलक्षितसकल प्राकृतपदार्थगतं बाधकत्वममिप्रेतम्।

शास्त्रेषु सामान्यतः कथितमस्ति * विचित्रा देहसम्पत्ति रीश्वराय निवेदितुम्। पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता॥ * इति। एतादृशानि सन्ति नाम भूरितराणि वचनानि। तानि सर्वाण्यपि सूरिवरोऽयं हृदि कलयन् वचनानां तेषां स्वाभ्यमात्रोद्देश्यकतां चाभिप्रयन् प्रथमद्वितीयपादौ निबध्नाति। [दुर्लभानि प्रसूनान्यार्जयित्वा] इत्यादिकं भगवत्सविधे विजिज्ञापयिषितं संदेशवाक्यम्। स्वेनैव प्रवर्तितेषु शास्त्रेषु करणकलेवरादीनां विनियोगप्रकारं स्वयमेव संदर्श्य, तथा नाम विनियोक्तुमुत्सुकस्य जनस्य साक्षात्कारगोचरो नभवन् दवीयान् यदि भवति सः, तर्हि शास्त्रप्रवर्तनस्य किं प्रयोजनमिति प्रष्टुमिच्छति मुनिवरः। बाधकं मारुतमेवोद्दिश्य एवंविधसंदेशप्रापणं प्रार्थ्यते। वायुर्हि रूपरहितः प्रथितः; स कथं प्रार्थनमर्हतीति शङ्का जायेत; अत्रैवं प्रतिपत्तव्यम्। वायुस्तावद्धनूमतो जनकः; स हनुमांस्तावत् * नानृग्वेदविनीतस्यस्य नायजुर्वेदधारिणः। नासामवेदविदुषः शक्यमेवं प्रभाषितुम्॥ नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्। बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्॥ * इत्यादिकमूचुषा भगवता रामचन्द्रेण भृशमभिनन्दितवैदुष्यविभवः; तस्य विद्यानिधेर्जनको वायुस्तदपेक्षया समुत्तुङ्गवैदुष्यो भवितुमर्हति। एवं च तथाविधः कोऽपि विद्वदग्रणीरिह दूतत्वेन विवक्षित इति। एष कथं हिंसको

भन्त्रितुमर्हतीति पृच्छा मा भूत्। वायुत्वेनाकारेण केवलेन हिंसकत्वोक्तिरुपपद्यते। सूक्ष्मेक्षिकया गृह्यमाणम् उपपादितं चार्थमनुरुध्य दूतभाव उपपद्यत इति। [दुर्लभानि प्रसूनान्यार्जयित्वा] इत्यत्र * अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः। सर्वभूतदया पुष्पं क्षमा पुष्पं विशेषतः। ध्यानं पुष्पं तपः पुष्पं ज्ञानं पुष्पं तथैव च। सत्यमष्टविधं पुष्पं विष्णोः प्रीतिकरं भवेत् * इत्यादिप्रमाणप्रपञ्चितानि पुष्पाण्यपि ग्रहीतुं योग्यानि। प्राधान्येन भगवदाराधनौपयिकानि पुष्पाण्येतान्येव। दुर्लभत्वोक्तिश्चैतेषु सुसंगता। आराधनं नाम भगवदन्तरङ्गसंतोषजनको व्यापारविशेषः। * वर्णाश्रमाचारवता पुरुषेण परः पुमान्। विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः॥ * इत्युक्तनीत्या आत्मगुणसम्पादनेनैव भगवतः प्रीतिरुत्पादयितुं शक्या। अतश्च अहिंसाद्यष्टविधपुष्पार्जनं चात्र विवक्षितुमुचितम्। एतेषां पुष्पाणां भगवच्चरणान्तिके समर्पणं नाम एतैर्भगवदन्तःकरणविकासनमेव।

"नाकिञ्चित्कुर्वतः शेषत्वम्" "अकिञ्चित्करस्य शेषत्वानुपपत्तिः" इत्याद्युक्तरीत्या किञ्चित्करणेन यथा मम शेषत्वस्वरूपसिद्धिः, तथा किञ्चित्कारस्वीकरणे सत्येव हि तस्य शेषित्वस्वरूपं सिध्येत्; तदर्थं मत्सविधे तस्योपसर्पणमवर्जनीयम्; यदस्ति मम विश्लेषव्यसने मूर्धाभिषिक्तत्वं तदिदं सर्वथा नोचितम् इति तत्सविधे कथय। तदिदं मर्मस्पर्शि वचनं निशम्य सत्वरमुपेयात्स इह। यदि तनोऽप्युपेक्षेत, अथ तर्हि त्वदीयं कृत्यं हिंसनात्मकमवश्यमेव कुरु। हिंसनमिति किम्? मां प्राणैरेव वियोजय—इति कथयति। मम प्राणास्तदनु स्वत एव निष्क्रामेयुः; तदभिप्रायवेदनपर्यन्तमेव प्राणाना मवस्थितिः; अथ मम निर्याणमप्रतिहतसिद्धिकमित्युक्तं भवति॥ (९)

—* नवीं गाथा—नाडाद मलर् नाडि *—

(हिंदी) इधर उधर चलनेवाले हे शीतल पवन! 'दुर्लभ पुष्प चुनकर उनको भगवान श्रीमन्नारायण के नित्य खिले हुए पुष्प के सदृश श्रीपादों की संनिधि में समर्पण करने के लिए ही इस जन का जन्म हुआ है। ऐसा होने पर भी, हाय! विश्लेप में ही डूबी रहने वाली मेरा यह दौर्भाग्य सर्वथा शोचनीय है। (हे पवन!) तुम भगवान से मेरा संदेश कह कर, फिर भी यदि उनकी कृपा न मिले, तो मेरे इस शरीर को खूब दुःख दो॥

यह अर्थ कहा गया कि शीतल पवन विरहियों को बहुत दुःख देता है। हाल में ऐसा एक पवन श्री परांकुशनायिका को बहुत दुःख देने लगा। उसने सोचा कि "भीषाऽस्माद्वातः पवते" (भगवान से डरके पवन चलता है।) इत्याद्युपनिषद् के अनुसार, भगवदधीन प्रवृत्तिवाला यह पवन, सत्य ही उनकी आज्ञा से मुझे त्रास दे रहा है। अतः उसी पवन को देखकर अब वह कहती है—"हे पवन! तुम अपने प्रभु भगवान से मेरी यह एक विनती सुना दो; और यदि उसके बाद भी वे मेरी उपेक्षा ही कर डालें, तो तुम शीघ्र लौट कर मेरा शरीर छुड़ा दो।" भोग्य, भोगोपकरण व भोगस्थान रूप त्रिविध वस्तुओं से भरे हुए इस संसार मंडल में संसारी लोग जिनको परमभोग्य मान बैठे हैं, उन्हीं वस्तुओं को आळ्वार क्रूर और हिंसापूर्ण मानते हैं; और उनके दर्शनमात्र से दुस्सह बाधा पाते हैं। यथा गीता में भगवान ने गाया "या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥ इसका यह तात्पर्य है कि "वासुदेवस्सर्वम्" इत्याद्युक्त प्रकार भगवान को ही अपने सर्वस्व माननेवाले महात्माओं को सांसारिकजनों के भोग्य विषयांतर के दर्शन भी बहुत दुःखद हैं। भगवान श्रीरामचंद्र ने भी पंपासर के तट

पर विराज कर विरहदुःख से, "एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः। तां विचिन्तयतः कान्तां पावकप्रतिमो मम ॥" इत्यादि प्रलाप किया। (पुष्पों की सुगंध से भरित, हिमशीतल यह पवन भी सीताविरहित मुझे आग जैसा गरम लगता है।) अब परांकुशनायिका कहती है कि पवन मात्र नहीं, वरन् सभी प्राकृत पदार्थ मुझे संताप दे रहे हैं।

शास्त्रों में मानव शरीर का उपयोग बतानेवाले ऐसे अनेक वचन मिलते हैं कि, "विचित्रा देहसंपत्तिः ईश्वराय निवेदितुम्। पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता ॥" (हाथ पग इत्यादि उपयोगी अनेक अवयववाला यह विचित्र मानवशरीररूप ऐश्वर्य, भगवान को अर्पण करने के लिए मिला है।) अब आळ्वार ऐसे समस्त वचनों को अपने लिए ही अवतीर्ण मानते हुए प्रकृत गाथा का पूर्वार्ध गा रहे हैं—[दुर्लभ पुष्प चुनकर] इत्यादि। यह भी भगवान के पास भेजे जानेवाले संदेश का एक अंश है। अर्थात् आळ्वार भगवान से यों पूछना चाहते हैं कि, "प्रभो! आपने ही शास्त्रों में, भगवत्सेवा में ही इस मानवशरीर का उपयोग करने की आज्ञा दी है; अब आप ही ऐसा करने के इच्छुक जन को अपने दर्शन न देते हुए, उससे दूर रहकर, उसे सेवा करने का अवकाश ही न दे रहे हैं। फिर आपके शास्त्रप्रदान का प्रयोजन ही क्या हुआ?" बाधा करनेवाली वायु से ही यह संदेश ले जाने की प्रार्थना की जा रही है। 'रूपरहित वायु से यह प्रार्थना कैसे की जा रही है?' इस आशंका का यह प्रत्युत्तर है—पवन तो कोई अचेतन वस्तु नहीं, किंतु एक प्रतापवान देव है; साक्षात् हनुमान जी का पिता है। हनुमान जी का पांडित्य विश्वविदित है, जिसकी प्रशंसा स्वयं श्रीरामचंद्रजी ने भी की है—यह हनुमान सत्य ही चारों वेदों तथा व्याकरणादि समस्त शास्त्रों का वेत्ता हैं, इत्यादि से। फिर ऐसे श्रेष्ठ विद्वान हनुमान जी के पिता वायुदेव क्योंकर विद्वान न होंगे। कहने का यह भाव है कि वायु शब्द से ऐसा कोई विलक्षण विद्वान सूचित किया जाता है, और वही इस गाथा में संदेशवाहक है। इस पर यह प्रश्न नहीं पूछना चाहिए कि ऐसा विद्वान कैसे नायिका को दुःख दे सकेगा। क्योंकि एक ही व्यक्ति ऊपर से दीखनेवाले वायु के रूप में हिंसक बताया जाता है, और व्यंग्य मर्यादा से विद्वान के रूप से संदेशवाहक बताया जाता है।

[दुर्लभ पुष्प चुनकर] इत्यादि। दुर्लभ शब्द से "अहिंसा प्रथमं पुष्पम्" इत्यादि शास्त्रोक्त, अहिंसा, इंद्रियजय, सर्वभूतदया, क्षमा, ध्यान, तपस्या ज्ञान और सत्यनामक भगवान के अत्यंतप्रिय आठ पुष्प सूचित किये जाते हैं। भगवत्पूजा के उपयोग करने योग्य पुष्प ये ही हैं। क्योंकि पूजा शब्द का अर्थ, भगवान को प्रसन्न करनेवाला काम है; "वर्णाश्रमाचारवता पुरुषेण परः पुमान्। विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥" (अपने वर्णाश्रमों के उचित आचारवाला मानव ही परमपुरुष भगवान की ठीक सेवा करता है; उनको प्रसन्न करने का दूसरा कोई साधन नहीं है।) इत्यादि शास्त्र बताता है कि आत्मगुणों का उपार्जन ही भगवान की वास्तविक सेवा है। अतः आळ्वार इन्हीं पुष्पों का उपार्जन कर, उनसे भगवान का मन प्रसन्न कराने की बात कर रहे हैं। हमें अपने भगवच्छेषत्व को सिद्ध करने के लिए कुछ न कुछ भगवान की सेवा करनी ही चाहिए; क्यों कि शास्त्र का यह नियम है कि सेवा किये विना शेषत्व सिद्ध न होगा। सेवा करने के लिए मुझे उनके पास जाना अनिवार्य है। अतः मुझे, इस प्रकार अथाह

विरह दुःख सागर में मग्न रहना सर्वथा अनुचित है। अतः, हे पवन! भगवत्संनिधि में इस अर्थ की विनती करो। यह मर्मस्पर्शी वचन सुनने पर वे भगवान अवश्य ही इधर पधारेंगे। परंतु यदि वे यह सुनकर भी नहीं पधारेंगे, किंतु मेरी उपेक्षा ही करेंगे, तो तुम अवश्य ही अपना काम कर सकते हो; अर्थात् मुझे हिंसा पहुंचा सकते हो। अथवा हिंसा ही क्यों? मेरे प्राण ही निकाल दो। अथवा तुम्हें हिंसा करने की आवश्यकता ही न रहेगी; क्योंकि उनका अभिप्राय जानने तक ही मैं जीवित रह सकूंगी हूं; बाद में तो मेरे प्राण अपने आप ही उड़ जायंगे॥ .... (९)

(गाथा.) उडलाळि प्पिरप्पु वीडु उयिर्मुदला मुत्तुमाय् *
कडलाळि नीर्तोचि अदनुळ्ळे कण्वळरुम् *
अडलाळि यम्मानै कण्डका लिदुशोल्लि *
विडलाळि मडनेञ्जे विनैयो मोन्रामळवे॥ १०॥

अयि गभीरहृदय! चक्रवत्परिवर्तमानां संसृतिं तद्विमोक्षं च स्वाधीनतया निर्वहन्तम् आर्तजनाभिरक्षणार्थं क्षीरार्णवे सन्निहितं तत्र शयानम् आश्रितविरोधिनिरसनशीलहेतिराजधरं च प्रभुं वीक्ष्य तदिदं कथय। मा स्म परित्यजः; कियदवधीति चेत्; पापिनोऽस्य जनस्य समीहितसिद्ध्यवधि॥

गाथाया अस्या द्वेधा निर्वाहमभिप्रयन्त्याचार्याः। दूत्यप्रकरणानुगुणतया मनसो दूतत्वेनापेक्षणमिह क्रियत इत्येको निर्वाहः। अधस्तनगाथायां कैङ्कर्यप्रस्तावसंभवेन कैङ्कर्यकरणार्थं ससंभ्रमं निष्क्रमितुमुद्युक्तं हृदयं प्रति 'समीहितसिद्धौ पाक्षिकनिष्कर्षलाभावधि मां मा स्म परित्यजः' इत्युक्त्वा तन्निरोधः क्रियत इति अपरो निर्वाहः। षट्सहस्रिकाव्याख्यातारस्तु निर्वाहद्वयमप्येकस्मिन्नेव निर्वाहेऽन्तर्भावयन्ति—संदेशश्च तत्र प्रापणीयः, अहमपि तवावर्जनीय इति। नात्र विशेषतो भेदः। मनसो दूत्यं नाम किमिति विचारो भवेन्नाम; कविसमयसिद्धमेवं व्याहरणमित्येव वक्तव्यं भवति। * नपुंसकमिति ज्ञात्वा तां प्रति प्रेषितं मनः। तत्तु तत्रैव रमते हताः पाणिनिना वयम्॥ * इति संस्कृतकवीनां चाटूक्तिः। असावेव च शठकोपसूरिः प्रथमप्रबन्धे [तिरुविरुत्ते] भगवन्तं प्रति मनसो दूत्यम्, तथा प्रहितं मनः प्रति पक्षिणां दूत्यं च निबध्नाति। अनुभवेऽप्ययमन्यतमः विलक्षणः प्रकार इति ग्राह्यम्॥

दशकेऽस्मिन् गाथाद्वयं जीवनाडीभूतम्; भगवतः क्षमागुणप्रकाशनस्येह प्रधानप्रमेयत्वात् तत्प्रकाशनक्षमा सप्तमी गाथा एका। दूतप्रेषणार्थं मुद्दिष्टस्य स्थलस्य प्रकाशनमप्युद्देश्यमित्यतः तत्प्रकाशिका सैषा गाथाऽपि जीवनाडी। [रक्षणार्थं क्षीरार्णवे सन्निहितं तत्र शयानम् आश्रितविरोधिनिरसनशीलहेतिराजधरं प्रभुं वीक्ष्य तदिदं कथय] आर्तानामार्तध्वनिनिशमनार्थमेव प्रकृतिमण्डलान्तर्गते क्षीरार्णवे संनिहितो भगवान् आर्तनादेष्वेव दत्तावधानो विराजते। * क्षीरसागरतरङ्गशीकरासारतारकितचारुमूर्तये। भोगिभोगशयनीयशायिने माधवाय * इत्युक्तरीत्या तत्र तस्य परमभोग्यं शयनं च प्रेक्षणार्हम्। अस्मासु विरोधिवाहुल्ये सत्यपि

सचस्तन्निर्वहणौपयिकसाधनविशेषसम्पन्नश्च। तस्य सविधे तदिदं कथय। तदिदमित्यनेन विवक्षितम् दशकेऽस्मिन् प्रकटितं संदेशसर्वस्वमपि भवितुमर्हति। यद्वा अधस्तनगाथागतसंदेशमात्रं वा। मदीयामार्तिं कथयेति सामान्योक्तिरपि घटते। चतुर्थचरणोपक्रमे 'मा स्म परित्यजः' इति क्रियापदमस्ति; अपरित्यागः स्वस्य वा तस्य वा भवतु। मां मा त्यज, तं मा त्यजेति द्वेधाऽप्यर्थः शोभनः। "विनैयोम् ओवामळवे" इति तावद्गाथाया अन्तिमं वाक्यम्। पापिनोऽस्य जनस्य तेन भगवता सह संश्लेषप्राप्तिपर्यन्तम्; प्रकृतोद्देशस्य सिद्ध्यसिद्ध्योरन्यतर निष्कर्षपर्यन्तम् इति द्वेधाऽर्थः।

[चक्रवत्परिवर्तमानां संसृतिमित्यादि।] एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः। जीवे दुःखाकुले विष्णोः कृपा काऽप्युपजायते॥" इत्याद्युक्तप्रकारेण संसृतिचक्रे परिभ्रामणम्, तत उद्धृत्य मोक्षप्रापणं च भगवदायत्तमिति प्रथमपादेऽभिधीयते। एतदुक्तं भट्टपादैः श्रीरङ्गराजस्तवोत्तरशतके—* पटुनैकवराटिकेव रत्नता स्थल्योः काकणिकासुवर्णकोटयोः। भवमोक्षणयोस्त्वयैव जन्तुः क्रियते रङ्गनिधे * इति॥ (१०)

—* दसवीं गाथा—उडलाळि प्पिरप्पु *—

(हिंदी) हे मेरे गंभीर मन! चक्रवत् परिवर्तमान संसार और उससे मुक्ति, इन दोनों को अपनी इच्छा के अनुसार चलानेवाले, दुःखियों का दुःख दूर करने के लिए सन्निहित क्षीरसागर में पधारकर वहीं शयन करनेवाले, और आश्रितजन विरोधिनिरसनसमर्थ चक्रराज का धारण करनेवाले प्रभु के दर्शन कर उनसे यह संदेश कहो; मुझ पापी की इष्टसिद्धि होने तक परित्याग मत करो॥

पूर्वाचार्य, दो प्रकारों से इस पद्यका तात्पर्य कहते हैं। एक भाव यह है कि दूतप्रेषण प्रकरण के अनुसार यहां नायिका अपने मन को ही दूत बनाकर भेजती है। दूसरा भाव यह है कि पूर्वगाथा में कैंकर्य का प्रस्ताव सुनते ही नायिका के मनने कैंकर्य करने के उद्देश्य से आपको छोड कर भगवान के पास जाना चाहा; यह देखकर आळ्वार यों कहते हुए उसे रोक देते हैं कि, "अपनी इष्ट सिद्धि के बारे में जब तक मैं भगवान की ओर से कोई निश्चित उत्तर नहीं पाऊंगी, तबतक तुम मुझे छोडकर मत जाओ।" षट्सहस्री व्याख्याकार तो दोनों योजनाओं को मिलाकर एक ही वाक्यार्थ बना देते हैं कि, "उधर संदेश पहुंचा दो; परंतु मुझे भी मत छोडो।" मन को दूत बनाने के विषय में शंका होगी कि यह काम कैसे बन सकेगा। इसका सारभूत समाधान इतना ही है कि यह कवियों का एक विलक्षण अनुभव प्रकार है। संस्कृतसाहित्य में भी यह प्रक्रिया पायी जाती है। आळ्वार ने भी तिरुविरुत्त नामक अपने पहले प्रबंध में, भगवान के पास दूतके रूप में अपना मन भेजने की, उस मनके उधर ही रह जाने की, और फिर उस अपने मन के पास दूतके रूप में पक्षियों को भेजने की बात करते हैं। समझना चाहिए कि नानाविध भगवदनुभवों के बीच में यह भी एक विलक्षण प्रकार का अनुभव है।

प्रकृत दशक की, जीवनाडी की तरह, दो गाथाएं मुख्य होती हैं। यह अर्थ बतलाया गया कि इस दशक का मुख्य उद्देश्य भगवान के क्षमा नामक गुण का प्रकाशन है। अतः उस गुण का प्रकाशन

करनेवाली सातवीं गाथा एक मुख्य गाथा है। दूत भेजने के स्थल को प्रकाशित करनेवाली प्रकृत (दसवीं) गाथा, दूसरी मुख्य गाथा है। [दुःखियों का दुःख दूर करने के लिए सन्निहित क्षीरसागर में शयन करनेवाले] इत्यादि। भगवान दिव्य धाम से इस लिए क्षीरसागर पधार कर वहां शयन कर रहे हैं कि यहां पर आर्त भक्तलोग उनके पास आकर उनसे अपने दु.ख की विनती कर सकते हैं। शयन करने का यह प्रयोजन है कि "क्षीरसागरतरङ्गशीकरासारतारकितचारुमूर्तये। भोगिभोगशयनीयशायिने" इत्याद्युक्त प्रकार उस मनोहर शयन के दर्शन कर भक्तलोग धन्य बनते हैं। [चक्रराज का धारण करनेवाले] कहने का यह तात्पर्य है कि यद्यपि हमारे विरोधी बहुत प्रबल हैं, तथापि भगवान के पास उन सब का विनाश करने के लिए पर्याप्त सामग्रियां भी प्रस्तुत हैं। [उनसे यह संदेश कहो।] संदेश शब्द का अर्थ, प्रकृत दशक में आदि से उपवर्णित सभी संदेश हो सकते हैं; अथवा पिछली गाथा में प्रकाशित संदेश मात्र होगा; अथवा साधारण रूप से नायिका के दुःख की विनती होगी। चौथे पाद के आदि में [परित्याग मत करो] कहने का अर्थ है; मेरा त्याग मत करो; उनका भी त्याग मत करो। मूल गाथा के अंतिम शब्द हैं [विनैयोम् ओन्नामळवे।] इनका यह तात्पर्य है, कि "मुझ पापी के उनसे संश्लेष होने तक," अथवा "प्रकृत मेरी इच्छा पूर्ण होगी कि नहीं, इस विषय में किसी एक प्रकार का निश्चय होने तक।"

[चक्रवत् परिवर्तमान संसार] इत्यादि से "एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः। जीवे दुःखाकुले विष्णोः कृपा काऽप्युपजायते ॥" (इस प्रकार संसार चक्र में भ्रमण करता हुआ जब जीव दुःखी होगा, तब भगवान की एक विलक्षण कृपा उत्पन्न होगी।) इत्यादि प्रमाण के अनुसार जीव को इस संसार चक्र में भ्रमण करना और उधर से उठाकर मोक्ष पहुंचाना, ये दोनों भगवान के काम बताये जाते हैं॥

(गाथा.) अळवियन्न एळुलहत्तवर् पेरुमान् कण्णनै *
वळवयलशूळ् वण्कुरुहूर् शठकोपन् वायुन्दुरैत्त *
अळवियन्न अन्दादि आयिरत्तु ळिप्पत्तिन् *
वळत्तुरैयाल् पेरलाहुम् वानोङ्गु पेरुवळमे ॥ ११ ॥

अपरिच्छेद्यमहिमशालिनं सप्तलोकीनिर्वहणधुरन्धरम् आश्रितसुलभत्वैकस्वभावं च भगवन्तमधिकृत्य, सुसमृद्धसस्यभूमिपरिवृतकुरुकापुरावतीर्णेन शठजिन्मुनिना सप्रेमभरं विज्ञापितायामस्यामन्तादिरूपायां सहस्रगीत्यामेतस्य दशकस्य सम्यगनुसन्धाने सति श्रीमति वैकुण्ठे नित्यकैङ्कर्यरूपा सुसमृद्धा सम्पन्नियतं सुलभा स्यात् ॥

एतद्दशकाध्ययननिरतानां सतां फलकीर्तनगाथा सैषा। अधस्ताद्दशभिर्गाथाभिरतिमात्रं स्वात्मनः खेदं प्रकाशितवता मुनिवरेण खेदस्य तस्य परिहृतिः प्राप्ता वा न वेत्ययमंशो न तावदाविष्कृतोऽन्ते। एतदवश्यमाविष्करणीयं खलु; अनाविष्करणं न्यूनतैव खलु इति केचिन्मन्येरन्। गाथायामस्याम् * सप्तलोकीनिर्वहणधुरन्धरम् * आश्रितसुलभतैकस्वभावम् * इति भगवतो विशेषणद्वयं यदस्ति विन्यस्तम्, तदिदं

व्यञ्जनावृत्याऽवगमयति भगवत उपस्थितिम्। अधस्तात्पञ्चम्यां गाथायाम् "स्वकीया नारायणसमाख्या यथा न भज्येत तथा तन्नामरक्षणमावश्यकमिति कथ्यताम्" इति हि संदिष्टम्। तादृशसंदेशस्य फलप्रद्दित्वाभावे निरुक्त-विशेषणद्वयं नैव हि प्रयुञ्जीत मुनिवरः। स्वरक्षणेन सप्तलोकीरक्षकोऽभूत्। स्वस्मिन् सौलभ्याविष्करणेनैव आश्रितसुलभत्वैकस्वभावत्वविशेषणार्होऽभूत् इति प्रतिपत्तव्यम्॥ .... (११)

इति सहस्रगीत्यां प्रथमशतके चतुर्थं दशकमवसितम्॥

—*— एतद्दशकतात्पर्यसारसंग्राहकः द्रमिडोपनिषत्संगतिश्लोकः —*—

तत्काङ्क्षितानधिगमेन मुनिर्विषण्णः प्राप्तो दशां च हरिभुक्तवियुक्तनार्याः।
सर्वापराधसहतामनवोध्य दूतैः शौरेः स्वदोषपरतामलुनाच्चतुर्थे॥

—*— ग्यारहवीं गाथा—अळवियन्ग एळुलहत्तर् —*—

(हिंदी) नापने अशक्य महा महिमवाले, सातों लोकों को सम्हालनेवाले, और आश्रित-सुलभता ही जिनका स्वभाव हो ऐसे, भगवान को लक्ष्यकर, अतिसमृद्ध सस्यभूमियों से परिवृत कुरुकापुरी में अवतीर्ण श्री शठकोपमुनि की सप्रेम विज्ञापित अन्तादिरूप सहस्र-गीति के अंतर्गत प्रकृत दशक का ठीक अनुसंधान करने पर, श्री वैकुंठदिव्यधाम में नित्य-कैंकर्यरूप श्रेष्ठ संपत्ति अवश्य मिलेगी॥

यह गाथा प्रकृत दशक के अध्ययन करनेवाले महात्माओं को मिलनेवाला फल बताता है। यह तो ठीक है। परंतु यह प्रश्न उठेगा कि दसों गाथाओं में अतिमात्र दुःख प्रकाशित करनेवाले आळ्वार को अपने दुःख की निवृत्ति हुई कि नहीं; इस अर्थका वर्णन क्यों कर नहीं किया गया? इसका उत्तर यह है कि आळ्वार ने व्यंग्यमर्यादा से भगवान की उपस्थिति की सूचना दे रहे हैं। प्रकृत गाथास्थ [सातों लोकों को सम्हालनेवाले], और [आश्रितसुलभ] शब्दों से पिछली पांचवीं गाथा में आळ्वार ने भगवान को यह संदेश भेजा कि "अपने नारायणत्व की सम्हाल कर दीजिए।" आळ्वार का रक्षण करने से ही भगवान का नारायणत्व एवं सप्तलोकीरक्षण सिद्ध होते हैं। एवं आळ्वार के सुलभ होने से ही भगवान 'आश्रितसुलभ' का विरुद पाने योग्य हुए। अतः प्रकृत दो विशेषण बता दे रहे हैं कि आळ्वार के संदेश पाकर, भगवान तुरंत ही आपके वहां पधार गये॥ .... (११)

सहस्रगीति के पहले शतक का चौथा दशक समाप्त हुआ॥
आळ्वार तिरुवडिगळे शरणम्॥
श्री पराङ्कुशयतिवरवरवरमुनीन्द्रचरणा एव शरणम्॥

॥ प्रथमशतके-पञ्चमं दशकम् -वळ्वेळुलहु ॥

[भगवतः सौशील्यगुणाविष्कारः] भगवान के सौशील्य गुण का प्रकाशन

अवतारिका—श्रीपरकालमुनीन्द्रानुगृहीतस्य बृहत्सूक्ताभिधानदिव्यप्रबन्धस्य दिव्यदेशानुभवे प्रधान-दृष्टिः; श्रीपराङ्कुशमुनीन्द्रानुगृहीतस्यास्य सहस्रगीतिदिव्यप्रबन्धस्य दिव्यगुणानुभवे प्रधानदृष्टिरिति पूर्वाचार्यगोष्ठीषु प्रथा। बृहत्सूक्ते नवसु शतकेषु प्रतिदशकं बदरिकाश्रम-सालग्राम-नैमिशारण्य-वेङ्कटाद्रिप्रभृति नानादिव्यदेशा-नामुपवर्णन मनुभवश्चैव हि सम्पद्यते। एवं सहस्रगीशास्त्यां कदाचिदेव दिव्यदेशानुभवः; प्रतिदशकं चैकैकगुणानु-भवस्य हि प्राधान्यमनुभूयते। अधस्तात् द्वितीयदशक चरमगाथायाम् "गुणगणसंदृब्धा सेयं सहस्रगीतिः" इत्यनुगृहीतं च स्मर्तव्यम्। प्रथमे दशके परत्वम्, द्वितीय भजनीयता, तृतीये सौलभ्यम्, चतुर्थे अपराध-सहत्वापरपर्यायभूता क्षमा—इत्येतेषां गुणानामनुभवसम्पन्नः। अधुना पञ्चमे दशके शीलनामा दिव्यो गुणः स्वानुभवमुखतः प्रकाश्यते मुनिवरेण। शीलमेव सौशील्यमिति व्यपदेशमपि विन्दति। "महतो मन्दैस्सह नीरन्ध्रेण संश्लेषः-सौशील्यम्" इति लक्षणपरिष्कारश्चाचार्यैरकारि। जगति क्षुद्रा एव पुरुषाः स्वस्मिन्नप्रतिमं महत्त्वमस्तीति वृथाऽभिमन्यमानाः, वस्तुतस्तावत्किं स्वल्पं महत्त्वमननुतान्मश्च सन्तः स्वसजातीयान् तृणाय मन्यन्ते, तैस्सहयोगं स्वस्यावद्यावहं च मन्वते इति सर्वतः प्रत्यक्षमीक्षामहे। वस्तुतः सर्वविधेष्वप्यैश्वर्येषु निरवधिकोत्कर्षशाली परमः पुमानिति सर्वनिर्विवादम्। स तावत् स्वापेक्षया सर्वथा जघन्यान् संसारिचेतनान् चक्षुषाऽपि वीक्षितुं नार्हतीति चाविवादम्। ईदृशोऽयं भगवानसदृशेषु क्षुल्लकेषु कथं वर्तते? कथं वा संयुज्यते इति वेदोपबृंहणप्रवृत्तैरितिहासपुराणैरेव वेदितुं प्रभवामः। श्रीमता वेङ्कटनाथार्येण विरचिते दयाशतके * निषादानां नेता कपिकुलपतिः काऽपि शबरी कुचेलः कुब्जा सा व्रजयुवतयो माल्यकृदिति। अमीषां निम्नत्वं वृषगिरिपतेरुन्नतिमपि प्रभूतैस्स्रोतोभिः प्रसभमनुकम्पे! समयसीत्येष श्लोकः सौशील्यप्रकारम् तल्लक्ष्यभूतकतिपय-व्यक्तिविशेषांश्च प्रदर्शयति। रामावतारे गुहशबरीसुग्रीवादयः, कृष्णावतारे कुब्जाकुचेलगोपिकामालाकारप्रभृत-यश्च परस्य पुंसः शीलगुणमतिमात्र मन्वविन्दन्तेति वास्तविकम्। परंतु निर्दिष्टेष्वेतेषु नैकोऽपि स्ववाचा शील-गुणमनुभूय द्रुतहृदयतां प्रकाशयत्। मालाकारस्त्वेकः * प्रसादपरमौ नाथौ मम गेहमुपागतौ। धन्योऽहम् * इत्याहेति शृणुमः। मुनिवरस्यास्य दशकेऽस्मिन् संपद्यमानः शीलगुणानुभवः अन्यत्र कुत्राप्यदृष्टप्रक्रियः परम-विलक्षण इति गाथासन्निवेशैर्व्यक्तीभवति।

गुण इति योऽयं शब्दो विद्यते, स गुणसामान्यवाचीति बहूनां प्रतिपत्तिः; नात्र किञ्चिदनौ-चित्यम्। अथापि मृगसामान्यवाची मृगशब्दो यथा मृगविशेषहरिणवाचकोऽपि भवति तथैव गुणशब्दोऽपि न केवलं गुणसामान्यवाची अपितु शीलाख्यं गुणविशेषमप्यभिधत्ते। अत एव * को न्वस्मिन् सांप्रतं लोके गुणवान् * इति नारदं प्रति वाल्मीकिप्रश्ने प्रयुक्तो गुणशब्दः शीलगुणपर एवेति व्याख्यातारः। स्तोत्ररत्ने * वशी वदान्यो गुणवानृजुः शुचिः....त्वमसि स्वभावतस्समस्तकल्याणगुणामृतोदधिः * इत्यत्र गुणवानित्येतत् सर्वथा गुणसामान्यवद्बोधकं न भवितुमर्हतीति सुस्पष्टम्। गुण्यत इति गुणः। गुण्यते—पुनः पुनरावर्त्यत इत्यर्थः।

भगवता क्रियमाणं नीरन्ध्रसंश्लेषमनुभवन्तः 'आः किमेतत्! हा हा किमिदं नाम!' इत्याम्रेडयन्ति यथा तथा नाम संश्लिष्यतीति सिध्यति।

अधस्तनदशके दूतप्रेषणं हि कृतं भगवतस्सकाशे। अथ किं वृत्तमिति सुस्पष्टतया मूलतो नावगम्यते। दशकेऽस्मिन् किं भवतीति विमर्शे मुनिवरः स्वकीयं निरूपमतिमात्र मनुसंदधानः * क्व सूर्यप्रभवो वंशः क्व चाल्प-विषया मतिः * इत्यायुक्तप्रक्रियया भगवत्सन्निकर्षेऽवस्थातुमपि स्वस्य सर्वात्मना अयोग्यतां कथयन् अनुशय-माविष्कुर्वन्नुदास्ते। भगवांस्तु स्वस्य आश्रितजनसंश्लेषैकरसभावनां चर्याविशेषस्मारणतः प्रकाशयति। अन्ततश्चो-भयोस्संश्लेषस्संघटते—इत्येषा प्रक्रिया दशकेऽस्मिन् स्थिता। एतेन चावगम्यते लब्धसंदेशो लक्ष्मीपतिः गजेन्द्र-रक्षायामिव सरभसमुपयातः; तदात्वे तदीयमप्रमेयं परत्वं प्रेक्षमाणो मुनीश्वरः तदीयसौकुम्यरासिक्यदिगुणविशेषा-नत्यन्तमेव विस्मृत्य निस्सीमपरत्वमात्रदत्तदृष्टिस्सन् आः कथमयमाहूतो मया वराकेण? अहह कथमिव सुदारुण-मपचरितमाचरितं मया! इत्यनुशयितुमारेभे—इति। भोभो रसिकाग्रगण्या महाशयाः! भगवदनुभवप्रकारेष्वय-मप्यन्यतमः परमविलक्षणः प्रकार इत्युपधार्यम्। अत्र तु भगवतस्सकाशात् स्वयमपसर्तुमीहते मुनिवरः; उपरि षष्ठशतके द्वितीयदशके स्वसकाशाद्भगवन्तमपसारयितुं प्रयतते इतोऽप्यत्यन्तविलक्षणो हि सोऽनुभवप्रकारः। तत्र तावत् "भगवन्! अपसरसि नचेन्मुद्रामि वातोऽपि भविता ते नूनम्" इत्यपि भीषयति बत! गोपीजनच्छद्मना। दिव्यसूरे रेतादृशी रनुभवप्रणालीरनुभवितुं हन्त! के वयं वराकाः!

भगवद्यामुनार्य-कूरेशमिश्र-भट्टपादादयोऽप्यतिहृद्योऽयमनुभवप्रकार इति स्वस्वदिव्यसूक्तिषु स्वानुभवमुखेन संदर्शयन्ति। तदपि मात्रया विवृणुमः। स्तोत्ररत्ने * विराजमानोज्ज्वलपीतवाससम् मित्युपक्रम्य * अचिन्त्य दिव्याद्भुतेत्यन्तमच्युतमतिमात्रमुपवर्ण्य * भवन्तमेवानुचरन्निरन्तरं प्रशान्तनिश्शेषमनोरथान्तरः। कदाऽहमैकान्ति-कनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितः॥ * इति स्वकीयामार्तिमतिमात्रं प्रकाश्य सद्य एव * धिगशुचि-मविनीतं निर्दयं मामलज्जं परमपुरुष! योऽहं योगिवर्याग्रगण्यैः। विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं तव परिजन भावं कामये कामवृत्तः॥ * इत्यनेन श्लोकेन स्वस्यायोग्यतामनुसंदधे। श्रीवत्साङ्कमिश्रोऽपि श्रीवैकुण्ठस्तवे बहुभिः श्लोकैः स्वकीयामनुबुभूषा मप्रमेयामाविष्कृत्य, अथ च * अंहः प्रसह्य विनिगृह्य विशोध्य बुद्धिं व्यापूय विश्वम-शुभं जनुषाऽनुबद्धम्। आधाय सद्गुणगणानपि नाहमर्हस्त्वत्पादयोः, यदह मत्र चिरं निमग्नः॥ * इत्यनेन श्लोकेन स्वकीयामनर्हतामभिदधे। श्रीपराशरभट्टार्योऽपि श्रीरङ्गराजस्तवोत्तरशतके * गर्भजन्मजराम्रुतिक्लेशकर्म-षडूर्मिगः। श्वेव देवषट्कृतं त्वां श्रियोऽर्हमकामये॥ * इत्यनेन श्लोकेन तथैव। हन्त! एतेन किमवगम्यते? भगवदनुभवे स्पृहातिशयप्रकाशनमपि कर्तव्यम्, स्वकीय वास्तविकायोग्यताविष्करणमपि कर्तव्यमिति शास्त्रार्थ-शिक्षण मवगम्यते। आत्मसमर्पण-तदनुशयप्रकाशनवदेतदिति विभाव्यम्। "तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः" इति पुरस्तादात्मसमर्पणम, अथ सद्य एव "प्रबुद्धधीरथ वा किं नु समर्पयामि ते" इत्यनुशय-प्रकाशनं च यथा, तथा ह्येतत्। अस्मदीयदोषैरेव यथा क्षमावात्सल्यादिकं प्रकाशमृच्छति, तथैवास्मदीयनैच्यानु-सन्धानत एव भगवतः शीलगुणप्रकाशः पुष्कलो भवति इति सारं वचः।

नन्दनन्दनं भगवन्तं मथुरां नेतुं यदा व्रजमाययावक्रूरः, तदा तत्र वृत्तमुपवर्णयन् पराशरो महर्षिः * सोऽप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना। संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे ॥ * इति प्राह। अत्र 'संस्पृश्य-आकृष्य' इति पदद्वयेन स्फोरितोऽर्थोऽयमेवः; स्वात्मानमवलोक्य अवनमितमनुत्थितं चाक्रूरमुत्थापयितुकामः कृष्णो यदा तमस्प्राक्षीद्, तदा सोऽतिमात्रनैच्यानुसन्धानेन दूरतोऽपसर्पितुमारेभे, तदा सौशील्यनिधिः कृष्णस्तमाकृष्य स्वकीयं शीलं प्राचीकशदिति ॥ एवमेव दशकेऽत्र स्वकीयं नैच्यमनुसंदधतो मुनीन्द्रस्य दूरतोऽपसर्पणेच्छा, भगवतस्स्वकीयशीलगुणप्रदर्शनेन तदङ्गीकारश्च अनुभवप्रणाल्या प्रकाश्येते॥ इत्यवतारिका ॥

(हिंदी) पांचवें दशक की अवतारिका—पूर्वाचार्यों का कहना है कि श्रीपरकालसूरी से अनुगृहीत बृहत्सूक्त नामक दिव्यप्रबंध का मुख्य लक्ष्य दिव्यदेशों का अनुभव है; श्रीशठकोपसूरी से अनुगृहीत प्रकृत सहस्रगीति का लक्ष्य तो भगवान के दिव्यगुणों का अनुभव है। तथाहि—बृहत्सूक्त में आदि से नौ शतकों तक सुधी, बदरीनारायण-सालग्राम-नैमिशारण्य-श्री वेंकटाद्रि इत्यादि अनेक दिव्यदेशों का ही अविच्छिन्न अनुभवपूर्वक वर्णन चलता है। सहस्रगीति में तो क्वचित् क्वचित् ही दिव्यदेशानुभव है; परंतु एकैक दशक में भी भगवान के एकैक शुभगुण का ही प्रधानरूप से अनुभव किया जाता है। यह अर्थ स्वयं आळ्वार से ही दूसरे दशक के अंत में ("गुणगण-ग्रथित सहस्रगीति") बनाया गया। इस प्रकार, पहले दशक में परत्व, दूसरे में भजनीयता, तीसरे में सौलभ्य और चौथे में क्षमा, माने अपराधसहत्व, इतने गुणों का अनुभव होने के बाद, अब प्रकृत पांचवें दशक में शीलनामक गुण का अनुभव पूर्वक विवरण किया जा रहा है। शील का दूसरा नाम है सौशील्य। इसका आचार्यों का अनुगृहीत लक्षण यह है कि, "स्वयं महान होते हुए भी अतिनीच जन से, बिना संकोच जो मिलें, उस गुण का नाम सौशील्य है।" लोक में हम देखते हैं कि नीच लोग अपने को बहुत श्रेष्ठ, और दूसरों को तुच्छ मानते हुए, उनसे मिलने में सकुचाते हैं। वस्तुतस्तु इनकी महत्ता अत्यल्प है। परंतु भगवान निर्विवाद ही समस्त प्रकारों से सबसे सर्वथा श्रेष्ठ विराजते हैं। उनके साथ तुलना करने पर सभी संसारी लोग अति क्षुद्र कीटप्राय दीखेंगे। अतः सर्वश्रेष्ठ भगवान अतिनीच संसारी जनों की ओर अपनी दृष्टि भी न फिरा सकते हैं। परंतु क्या वे ऐसे ही रहते हैं? इस विषय में आपके बर्ताव का अति मनोहर वर्णन श्रीरामायण महाभारतादि दिव्यग्रंथों में मिलता है। श्री वेदांतदेशिक स्वामीजी अपने विरचित 'दयाशतक' के एक सुंदर पद्य में इस सौशील्य के प्रकार का तथा इस महागुण के लक्ष्य भूत कतिपय व्यक्तियों का वर्णन करते हैं—निषादानां नेता कपिकुलपतिः कापि शबरी कुचेलः कुब्जा सा व्रजयुवतयो माल्यकृदिति। अमीषां निम्नत्वं वृषगिरिपतेरुन्नतिमपि प्रभूतैः स्रोतोभिः प्रसभमनुकम्पे समयसि॥ (हे श्रीवृषगिरिनाथ श्रीनिवास भगवान की दये! भीलों के नेता गुह, कपियों के राजा सुग्रीव, अतिक्षुद्र शबरी, कुचेल, कुब्जा, गोपियाँ और मालाकार, इनकी नीचता, तथा भगवान की श्रेष्ठता को तुम अपने अत्यधिक प्रवाहों से एक समान बना देती हो। अर्थात् भगवान अपनी दया के रूपांतर सौशील्य के प्रभाव से अपनी महत्ता का ख्याल न करते हुए पूर्वोक्त गुह आदियों के समान हो जाते हैं।) यह अर्थ सर्वथा सत्य है कि भगवान ने इस श्लोक के अनुसार, रामावतार में गुह, शबरी सुग्रीव इत्यादियों, एवं श्रीकृष्णावतार में कुब्जा, कुचेल, गोपियां, मालाकार, इत्यादियों पर इस गुण को

प्रकाशित किया। परंतु खेद की बात है कि उक्त अनेक व्यक्तियों में से एकने भी परवशचित्त होकर इस गुण का अनुभव नहीं किया। हाँ! सुना जाता है कि माळाकार ने, "प्रसादपरमौ नाथौ" (श्रीविष्णु पु. ५-१९-२१) इत्यादि से इस गुण का कुछ वर्णन किया। प्रकृत दशक में श्रीशठकोपसूरी को मिलनेवाला शीलगुणानुभव तो अत्यंत विलक्षण और अन्यत्र कहीं भी सर्वथा अदृश्य होता है। संस्कृतभाषा में 'गुण' शब्द, न केवल गुण सामान्य का, अपितु सौशील्यनामक एक महागुणविशेष का भी वाचक है; जैसे समस्त जानवरों का साधारण नाम होता हुआ भी 'मृग' शब्द हरिन का असाधारण नाम भी होता है। अत एव श्रीरामायण के व्याख्याकार, संक्षेप रामयण में वाल्मीकि के प्रश्न के अंतर्गत (कोन्वस्मिन् सांप्रतं लोके गुणवान्) गुण शब्द को सौशील्यार्थक बताते हैं। एवं "वशी वदान्यो गुणवान्" इत्यादि स्तोत्ररत्न-पद्य के बीच में रहनेवाला गुणशब्द किसी प्रकार से गुणसामान्य का वाचक नहीं बन सकता; क्योंकि, (१) विशेषगुणवाचक शब्दों के बीच में वह प्रयुक्त है, और, (२) पद्यके अंत में अलग (समस्तकल्याणगुणामृतोदधिः) गुणसामान्यवाचक शब्द प्रयुक्त भी है। अतः अवश्य ही यह शब्द किसी विशेष गुण का वाचक है। वही सौशील्यगुण है। गुण्यते—पुनः पुनरावर्त्यते-इति गुणः। अर्थात् इसका अनुसंधान करनेवाले, पुनः पुनः इसीका रटन करते हैं—अहो! यह क्या है? कौनसा गुण है? इत्यादि।

पूर्वदशक में आळ्वार ने भगवान को दूत भेजा तो सही; परंतु स्पष्ट शब्दों में यह नहीं बताया कि उसका परिणाम क्या हुआ। अस्तु। प्रकृत दशक की तो यह कथा है कि आळ्वार अपनी अतिमात्र नीचता का चिंतन करते हुए, अपने को भगवान के सामने रहने को भी सर्वथा अयोग्य मानकर, बहुत पश्चात्ताप व संकोच करते हैं; तब भगवान अनेक समुचित उदाहरणप्रदर्शन-पूर्वक, अपने भक्तजन-संश्लेषस्वभाव का प्रकाशन करते हैं; और अंततः दोनों का मिलाप होता है। इससे हम यह अर्थ समझ सकते हैं—आळ्वार का संदेश पानेवाले भगवान, उसे गजेंद्र के आर्तनाद के सदृश मानकर अतिशीघ्र ही उनके सामने प्रकट हुए; तब आळ्वार उनके अप्रमेय परत्व के दर्शन करते हुए, सौलभ्य सौशील्य इत्यादि गुणों को सर्वथा भूलकर, केवल परत्व का ही ख्याल करते हुए, यों कहते पछताने लगे कि, "अहो! अतिनीच मैंने परात्पर इन महात्मा को क्योंकर बुलाया? हाय! मैंने कैसा घोर अपराध किया?" इत्यादि। रसिक भक्तों को समझना चाहिए कि यह भी एक प्रकार का परमविलक्षण, अत्यद्भुत भगवदनुभव है। प्रकृत दशक में आळ्वार भगवान को छोडकर स्वयं दूर भागने का विचार करते हैं; आगे छठे शतक के दूसरे दशक में आप भगवान को ही दूर निकाल देने की चेष्टा करेंगे; अर्थात् आप गोपी वेष का धारण कर, वहां इतनी कठिन बात करनेवाले हैं कि, "अरे भगवन्! झट इधर से निकल जा; अन्यथा मैं तुझे डंडा ले कर पीट दूंगा" इत्यादि। सर्वथा भावना से दरिद्र, भक्ति शून्य हमारे जैसे पामर जन आळ्वार के इन परमविलक्षण अनुभवों की कल्पना तक कैसे कर सकते?

भगवद्यामुनाचार्य, श्रीकूरेश, श्रीपराशर भट्ट इत्यादि हमारे पूर्वाचार्य आळ्वार के इस अनुभव की रस्यता के परवशचित्त होकर अपने प्रबंधों में स्वयं ऐसा ही अनुभव करते हैं। तथाहि—श्रीयामुनाचार्य स्वामी जी स्तोत्ररत्न में, "विराजमानोज्ज्वल" (३२) इत्यादि से शुरूकर, "अचिन्त्यदिव्याद्भुत" (४६) तक के पंद्रह श्लोकों से भगवान के अत्यद्भुत दिव्य सौंदर्य का वर्णन कर, "भवन्तमेवानुचरन्निरन्त-

रम्" (४६) इत्यादि पद्य में, ऐसे भगवान की नित्यसेवा करने की विलक्षण व तीव्र आशा प्रकट करने के बाद, "धिगशुचिमविनीतं निर्दयं मामलज्जम्" इत्यादि (४७) पद्य से, "योगिश्रेष्ठ ब्रह्मा शिव सनकादियों की चिंता से भी दूर रहनेवाले भगवान का कैंकर्य करना चाहनेवाले मुझ स्वेच्छाचारी, अशुद्ध, दयारहित, निर्लज्ज को धिक्कार हो" कहते हुए, भगवदनुभव करने में अपनी अयोग्यताका अनुसंधान करते हैं। श्रीकूरेशस्वामी अपने श्रीवैकुंठस्तव में, अनेक पद्यों से भगवान के दर्शन व कैंकर्य करने की अपनी तीव्र इच्छा बताकर, बाद में "हा हन्त! हन्त" (८४) एवं "अंहः प्रसह्य" (८५) इत्यादि पद्यों से, "हाय! हाय! मोह-परवश होकर मैं ने यह क्या कहा? हे प्रभो! समस्त दोषों का आधार मेरा जैसा मानव, सकलकल्याणगुणगणपरिपूर्ण आपका स्मरण तक कैसे कर सकेगा? अथवा, अबकी क्या बात है? अपने समस्त पापों तथा दूसरे समस्त दोषों को दूरकर, समस्त श्रेष्ठगुण पानेके बाद भी मैं आपके पास आने योग्य नहीं बन सकूंगा;" इत्यादि कहने लगे। एवं श्रीपराशरभट्टार्यस्वामीजी भी श्रीरंगराजस्तव के उत्तरशतक में "गर्भ जन्मजरामृतिक्लेश कर्मपड्डूर्मिगः। श्वेव देववषट्कृतं त्वां श्रियोऽहमकामये ॥" (९९), यों कहते हैं कि "गर्भवास, जनन, वार्धक, मरण, दुःख व पुण्यपाप रूप छे दोषों से समाक्रांत मैने, देव योग्य पुरोडाश पाने के इच्छुक कुत्ते की भांति, महालक्ष्मीजी के योग्य आपको पाना चाहा।" यह तो बडी विचित्र-सी बात प्रतीत होगी कि पहले भगवान से मिलना चाहना, और बाद में पछताना, और उस अनुभव से पीछे हट जाना। परंतु क्या किया जाय? यह तत्व ही ऐसा है। अर्थात् हमें भगवान के दर्शन, कैंकर्य इत्यादि करने की अपनी तीव्र इच्छा प्रकट करना ही चाहिए; एवं अपनी अयोग्यता का अनुसंधान भी करना चाहिए। इनमें से हम एकको भी छोड नहीं सकते। जैसे हमारे पापों की वजह से भगवान के दया, क्षमा इत्यादि गुण प्रकाशित होते हैं, और अत एव हम अपने उक्त पापों का अनुसंधान करते हैं; ठीक इसी प्रकार हमें अपनी अयोग्यताका भी अनुसंधान अवश्य करना चाहिए; क्योंकि इससे भगवान के शीलगुण का प्रकाशन होता है। अतः इसमें किसी प्रकार का विरोध नहीं हैं। इस विचित्र प्रसंग का यह एक सुंदर दृष्टांत है कि आळ्वार जैसे ज्ञानी लोग पहले भगवत्संनिधि में आत्म-समर्पण करके, बाद में उसके लिए पछताते हैं। यथा श्रीमद्यामुनाचार्य स्वामीजी ने स्तोत्ररत्न में, "तदयं तव पादपद्मयोः अहमद्यैव मया समर्पितः" (५२) कहते हुए आत्मसमर्पण किया; और तुरंत ही "प्रबुद्धधीरद्य किं नु समर्पयामि ते" (५३) कहते हुए उसके लिए अपना पश्चात्ताप बताया। अस्तु।

श्रीकृष्णचंद्र को मथुरा ले जानेके लिए व्रज आनेवाले अक्रूर के वृत्तांत का वर्णन करते हुए श्री पराशर महर्षि श्रीविष्णुपुराण में कहते हैं कि, "सोऽप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना। संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे ॥" (श्रीकृष्ण ने अपने ध्वज, वज्र, कमल इत्यादि चिह्नों से सुशोभित श्रीहस्त से अक्रूर का स्पर्श कर, उसे अपनी तरफ खींचकर, अतिप्रेम से उसका गाढ आलिंगन किया।) इस श्लोक में 'स्पर्शकर' व 'खींचकर' बडे मार्मिक शब्द हैं। इनका यह भाव है—श्रीकृष्ण के दर्शन करते ही अक्रूर उनको प्रणाम करने के लिए पैरों में गिर पडा, और उठा ही नहीं। तब उसको उठाने के लिए श्रीकृष्ण ने उसका स्पर्श किया। फिर हुआ क्या? अक्रूर ने भूतल से उठकर, अपनी नीचता का अनुसंधान

करते हुए दूर भाग जाना चाहा। यह देखकर श्री कृष्ण ने उसे अपने पास खींच कर ऐसा गाढ आलिंगन किया, कि वह उससे अपने को छुडा नहीं सका। ऐसा है भगवान का अतिविलक्षण शील गुण! इसी प्रकार हाल में आळ्वार भी अपनी नीचता के अनुसंधान से भगवान से दूर भाग जाना चाहते हैं, और बाद में भगवान अपने शीलगुण का प्रकाशन करते हुए उनका अंगीकार करते हैं; ऐसे एक विलक्षण अनुभव का वर्णन प्रकृत दशक में चलता है॥ [अवतारिका समाप्त हुई।] .... *

(गाथा.) वळवेळुलहिन् मुदलाय वानोरिरैयै अरुविनैयेन् *
कळवेळ् वेण्णेय् तोडुवुण्ड कळ्वा वेन्वन् पिन्नैयुम् *
तळवेळ् मुरुवळ् पिन्नैकाय् वल्लानायर् तलैवनाय् *
इळवेरेळुम् तळुविय एन्दायेन्बान् निनैन्दु नैन्दे॥ १॥

समृद्धसप्तलोकीनिदानभूतं नित्यसूरिनाथमुद्दिश्य दुष्परिहरपापपूरितोऽहम् मनसा ध्यातवानस्मि हन्त! ध्यानकाले गात्रशैथिल्यं चाभिनीतवानस्मि हन्त!, चौर्येण नवनीतमार्जयित्वा तदुपभुक्तवन् दस्यो! इति चावोचं बत! किंच, कुसुमविकासोपमेयमन्दहासाञ्चितवदनाया नीलादेव्याः कृते गोपालवल्लभो भूत्वा अवलिप्तवृषभसप्तकमर्दनकारिन् स्वामिन्निति आमन्त्रितवानस्मि च है हन्त॥

दशकेऽस्मिन् दिव्यसूरिवरोऽसौ स्वनिकर्षानुसन्धानपूर्वकं भगवद्विषये स्वस्य प्रवृत्तिमनुशेते—इत्यवतारिकायां प्रपञ्चितमिह स्मर्तव्यम्। मनोवाक्कायरूपत्रिकरणतोऽप्यहं भगवतोऽत्रयमुत्पादितवानस्मि हन्तेति परितप्यते सूरिः। दुष्परिहरपापपूरितोऽहमित्यनेन स्वनिकर्षोऽनुसंहितः। पापानां चतुर्भिः प्रकारैः परिहरणं शास्त्रेषु चोदितम्; * अनुतापादुपरमात् प्रायश्चित्तोन्मुखत्वतः। तत्पूरणाच्चापराधास्सर्वे नश्यन्ति पादशः॥ * इति। उक्तेष्वनुतापादिष्वेकतरेणापि विहीनोऽहं प्रवर्तमानपाप एवास्मि; एवंविधस्य मम भगवन्! भवतस्स्मरणादियोग्यता लेशतोऽपि नैव खलु। * योगिनामपि सुदूरगं वियः * इत्युक्तस्य भवतो ध्यानं यदहमकार्षम्, तत् मनसा सम्पादितमवद्यम्। ध्यानकाले 'पारमार्थिकभक्तियुक्तोऽयम्' इति यथा केचन भ्राम्येयुस्तथा नाम कपटभक्तिमभिनीय गात्रशैथिल्यमपि यत्प्रादर्शयम् तत् कायेन सम्पादितमवद्यम्। 'नवनीतचोर! नीलावल्लभ!' इति परमप्रेमभरितैर्भक्तैरभिवक्तव्यं यदहमवोचम्, तत् वाचा सम्पादितमवद्यम्। एवं नाम त्रिभिरपि करणैस्त्वामदूदुषमहं हन्तेति दूये सूरिः। अत्रैषा शङ्का भवितुमर्हति; स्वस्मिन् निकर्षो वास्तविकोऽस्तु नाम; स्वकीयैर्ध्यानादिकृत्यैरखिलहेयप्रत्यनीकस्य भगवतः किं नामावद्यं भवितुमर्हतीति। उच्यते; सत्यं भगवानखिलहेयप्रतिभट एव; तस्मिन् न किमप्यवद्यमारोढुमलं वस्तुगत्या। शातकुम्भमयकुम्भगते तीर्थसलिले मदिराबिन्दुप्रक्षेपणे कृते सात्त्विकैरस्पृश्यत्वापेयत्वादिरूपमवद्यं यथा भवति, तथाऽत्रापि भवेत्किमु! इति भिया कथयत्येवम्। 'अत्यन्तनिकृष्टेन शठकोपसूरिणा त्रिकरणतोऽपि स्पृष्टम् अत एव दुष्टं च भगवन्तं न वयं स्पृशेम' इति सात्त्विका महान्तो भगवदनुभवादुदासीरन्निति भीतिरिव मुनिवरस्य।

समृद्धसप्तलोकीनिदानभूतत्वनित्यसूरिनाथत्वयोः कथनम् भगवत उभयविभूतिनिर्वाहकत्वरूपपारम्याति-शयप्रतिपादनरूपं मन्तव्यम्। स्वनिकर्षानुसन्धानस्य सर्वथाऽपि सावकाशत्वं द्योतितं भवत्यनेन। 'भगवतो नव-नीतचोरेति संबोधनं वस्तुतो दूषणमेव खलु; तदर्थमनुतापप्रकाशनं च स्थाने खलु' इति तावन्न मन्तव्यम्। नवनीतचोरेत्यामन्त्रणं वस्तुतो नैव दूषणमच्युतस्य; यतो हि तस्य हर्षप्रकर्षाय निरवग्रहानुग्रहोन्मुख्याय च कल्पते तदिदम्; अथापि तु प्रेमपरवशैर्गोपीजनसधर्मभिरेव वक्तव्यमिदं वचः प्रेमदवीयसा स्वात्मना कथितमित्य-नुतप्यते।

अवलिप्तवृषभसप्तकमर्दनकथा चेयम्;—दिव्यमहिषीष्वन्यतमा नीलादेवी व्रजे यशोदासोदरकुम्भ-नामकगोपालदुहिता सती समुत्पन्ना वर्धते। 'नप्पिन्नैप्पिराट्टि' इति तस्या भाषानाम। जनकचक्रवर्ती यथा सीताविवाहार्थं धनुर्भङ्गं पणपदे पर्यकल्पयत्तथैव कुम्भनामा गोपाग्रणीरपि स्वदुहितुर्विवाहार्थे अत्युद्धतसप्तवृषभाव-लेपविलोपनं पणपदे निदधे। इतरेषां मनसाऽपि चिन्तयितुमशक्यमिदं कृत्यं नन्दनन्दनो भगवान् स्वयमवलीलया कृत्वा तामुपयेमे - इतितावदितिहासः। श्रीमद्वेङ्कटनाथार्यप्रणीते यादवाभ्युदयमहाकाव्ये चतुर्थे सर्गे (९८, ९९.) * दिशागजानामिव शाक्वराणां शृङ्गाग्रनिर्भिन्नशिलोच्चयानाम्। स तादृशा बाहुबलेन कण्ठान्निपीड्य लेभे पणितेन नीलाम्॥ करेण दम्भोलिकठोरतुङ्गान् देहान् पृथून् दानवदुर्वृषाणाम्। विमृश्य नूनं विदधे मुकुन्दः प्रियास्तनस्पर्शविहारयोग्याम्॥ * इत्येतत्पद्यद्वितयमिहानुसन्धेयम। अत्र व्याख्यायामप्पयदीक्षितैरलेखि हरिवंश-प्रस्तुतोऽयमितिहास इति।

[नीलादेव्याः कृते गोपालतल्लजो भूत्वा] इत्यत्र, * हे सुन्दरैकतरजन्मनि कृष्णभावे द्वे मातरौ च पितरौ च कुले अपि द्वे। एकक्षणादनुगृहीतवतः फलं ते नीला कुलेन सदृशी किल रुक्मिणी च॥ * इत्येषा श्रीकूरनाथगुरुवरसूक्तिरनुसन्धेया। यदुकुले समुत्पन्नः कृष्णो नीलादेवीपरिणयार्थमेव गोपकुलमाश्रित इति हि श्लोकेनानेन कथ्यते। श्री भक्तिसारमुनीन्द्रेण स्वकीये निरुचन्दविरुत्ताभिधाने दिव्यप्रबन्धे एकचत्वारिंश-गाथायां प्रथमचरणे संदर्शितस्स एष पन्थाः। (तत्र द्रष्टव्यमेतत्।) .... (१)

(हिन्दी) अपरिहार्य पापों से परिपूर्ण मैंने अपने मन से, हाय! समृद्धिवाले सातों लोकों के कारणभूत और नित्यसूरियों के नाथ भगवान का ध्यान कर लिया; और उस समय शरीर-शैथिल्य का भी अभिनय किया। फिर भी मैंने यों कहा कि "हे चोरी से मक्खन उठाकर खानेवाले चोर!" हाय! हाय! उसके बाद मैंने उनको यों पुकारा कि, "हे पुष्पहास सदृश मनोहर मंदस्मितवाली नीलादेवी के लिए गोपश्रेष्ठ बनकर बलवान सात वृषभों का मर्दन करनेवाले स्वामिन्!"

अवतारिका में बताया गया कि इस दशक में आळ्वार अपना नैच्यानुसंधान करते हुए, भगवद्विषय में अपना प्रवेश करने के लिए पछताते हैं। यों कहते हुए आप दुःख पा रहे हैं कि, "मैं ने अपने मन तन वाणी नामक तीनों करणों से भगवान को दूषित किया।" [अपरिहार्य पापों से परिपूर्ण मैंने] कहना अपनी नीचता का वर्णन है। अपरिहार्य शब्द का अर्थ है मिटाने के अशक्य। तथाहि—

शास्त्र में पाप मिटाने के प्रकार चार बताये गये हैं—पश्चात्ताप, पाप से निवृत्ति, प्रायश्चित्त करने का प्रयत्न, और उसका अनुष्ठान। अब आळ्वार का कहना है कि उक्त चारों में एक भी मुझमें नहीं है; अतः मेरा पाप तो क्षणेक्षणे बढ़ता ही रहता है, न कि कभी घटता। ऐसे मैंने योगिश्रेष्ठों की चिंता से भी दूर रहनेवाले महामहिम आपका (भगवान का) जो ध्यान किया, यह मानसिक दोष हुआ। उस समय, नकली भक्ति का अभिनय करता हुआ, मैं ऐसा शिथिलगात्र हुआ कि यह देखनेवाले वंचित होकर मेरी प्रशंसा करने लगे कि "अहो यह कैसा परमभक्त है!" यह शरीर का अपराध हुआ। एवं परमप्रेम परवशचित्त महात्माओं का अनुकरण करते हुए मैंने जो "हे नवनीतचोर! नीलावल्लभ!" इत्यादि पुकारा, यह वाचिक अपराध हुआ। इस प्रकार मैंने अपने तीनों करणों से आपको जो दूषित किया; अब इस बात का दुःख हो रहा है। इस पर यह शंका होगी कि यद्यपि हम दोषी हैं; तथापि हमारे ध्यान संकीर्तनादि व्यापारों से 'अखिलहेयप्रत्यनीक' विरुदभाजन भगवान को कौनसा दोष लग सकता है? यह तो सत्य है कि भगवान दोषगंध से भी दूर हैं, तथापि आळ्वार के मन में यह भय है कि, जैसे सोने के कुंभ में रखे हुए पुण्यतीर्थ के पानी में एक बिंदु मात्र के मद्य का मिश्रण होने पर भी, वह पानी अशुद्ध माना जाता और सात्विकों के काम में नहीं आ सकता है; ठीक इसी प्रकार मेरे संबंध से भगवान को भी दोष लगना होगा। अर्थात्, सात्विक महात्मा लोग यों विचार करते भगवान से दूर होते होंगे कि "अतिहेय शठकोपसूरी के त्रिकरणों से संस्पृष्ट भगवान का हमें स्पर्श नहीं करना चाहिए।

भगवान को [समृद्धिवाले सातों लोकों के कारण भूत और नित्यसूरियों के नाथ] कहने का तात्पर्य यह है कि आप उभयविभूतिनायकत्वरूप महावैभव से युक्त हैं। अपनी नीचता की भांति भगवान की महत्ता का भी वर्णन करने से ही दोनों का अंतर स्पष्ट दीखेगा। यह मानना गलत है कि भगवान को 'नवनीतचोर' कहना अपराध है, अतः उसके लिए पछताना चाहिए ही। क्योंकि नवनीत-चोर कहना भगवान का भूषण है, नतु दूषण। यह आमंत्रण सुनकर भगवान प्रसन्न होंगे और अनुग्रह करेंगे; न तु कभी रुष्ट होंगे। परंतु इसमें एक मुख्य बात यह है कि गोपियों के जैसे भक्तलोग ही यह नाम ले सकते हैं; नतु शिशुपाल जैसे प्रेमशून्य अथवा द्वेषी जन।

सात वृषभों का मर्दन करने का इतिहास यह है—भगवान की पटरानियों में एक, नीलादेवी व्रज में यशोदाजी के भाई कुंभनामक गोपकी पुत्री होकर अवतीर्ण हुई थीं। जैसे सीताविवाह के लिए जनक चक्रवर्ति ने शिवधनुर्भंग रूप पण रखा था, इसी प्रकार कुंभ ने भी अपनी पुत्री के विवाह के लिए अतिबलिष्ठ सात बैलों को जीतना पण रखा। कोई भी वीर यह काम नहीं कर सका; तब श्रीकृष्ण ने लीला से ही उन बैलों को मार कर नीलादेवी से (जिन्हें द्राविडी में "नप्पिन्नैप्पिराट्टि" कहते हैं) परिणय किया। श्रीमद्वेदान्तदेशिक स्वामीजी अपने विरचित यादवाभ्युदय काव्य के चौथे सर्ग में (९८-९९) दो पद्यों से इस वृत्तांत का वर्णन करते हैं; और इसके टीकाकार अप्पय्य दीक्षित लिखते हैं कि यह कथा हरिवंश की है।

[नीलादेवी के लिए गोपश्रेष्ठ बनकर] इत्यादि। आळ्वार का यह अभिप्राय है कि यदुवंश में अवतीर्ण श्रीकृष्ण ने उसे छोड़कर इस लिए व्रज पधार कर गोपवंश को अपनाया, कि उस कुल में नीलादेवी का अवतार हुआ था और उसके साथ परिणय करने की आवश्यकता थी। श्रीभक्तिसारसूरी भी अपने तिरुच्चंदविरुत्त नामक दिव्यप्रबंध की ("आयनाहि" इत्यादि) एकतालीसवीं गाथा में ऐसा ही करते हैं। प्रथमसहस्र के अंतर्गत उक्तगाथा की तथा तिरुप्पावै की अठारहवीं गाथा की टीका में पूरा विवरण दिया गया है; वहां देख लें॥.... .... (१)

(गाथा.) निनैन्दुनैन्दुळ् करैन्दुरुहि इमैयोर् पलरुम् मुनिवरुम् *
पुनैन्द कण्णि नीर् शान्दम् पुहैयोडेन्दि वणङ्गिनाल् *
निनैन्द एल्ला प्पोरुळ्हट्कुम् वित्ताय् मुदलिल् शिदैयामे *
मनम्शेय् ञानत्तुन् पेरुमै माशूणादो मायोने॥ २॥

आश्चर्यचेष्टित भो भगवन्! चतुर्मुखादयो देवाः सनकादयो महर्षयश्चान्ये च भवतो गुणाननुचिन्त्य गात्रशैथिल्यमप्यवाप्य द्रवीभूतहृदयाश्च सन्तो ग्रथितपुष्पमालिकास्थानीयगन्धधूपादिकं हस्ते बिभ्रतो भवन्तं प्रणमन्ति चेत् सकलपदार्थबीजभूतस्य, स्वरूपविकारलेशमन्तरेण संकल्पमात्रसाधितसकलकार्यसर्गस्य च भवतो महिमा किमहो नापह्रीयेत?॥

त्रिकरणतोऽपि भवन्तमदूदुषमित्यवादीदधस्तनगाथायां सानुतापम्; अनुतापप्रकाशनस्याप्यहमनर्ह इत्याह गाथायामस्यामिति व्याचक्षते महाचार्याः। यद्यपि गाथायां नायमर्थो मुक्तकण्ठः; तथाऽपि तात्पर्यपर्यवसितो ह्यसावेवार्थः। 'वेदराशिषु मम सामर्थ्यं नास्ती'ति चण्डालः किं कथयेत्? प्रसक्तेरेव विरहान्नैव कथयेत्स तथा। एवम् अहमयोग्य इदि कथयितुमपि नाहमर्हः; प्रेमार्द्रचित्ता ब्रह्मादयो हि तथा कथयितुमर्हाः। अथ च गाढविमर्शे कृते महान्तस्ते ब्रह्मादयोऽपि त्वत्सपर्यायामनर्हा इति वक्तव्यं भवति-इत्युच्यते गाथयाऽनया। आश्चर्यचेष्टितेति संबोधनमिह साकूतम्। सर्वथाऽप्ययोग्यस्य मम योग्यपुरुषनिर्विशेषमङ्गीकरणम्, अथ चानुतापप्रजननमित्यादि सर्वमप्याश्चर्यचेष्टितेषु भवदीयेष्वन्तर्गतमित्युक्तं भवति। अधस्तात्तृतीयदशके दशमगाथायामुक्तो देवानामप्यवलेपभरः, तेषां रजस्तमसोरुन्मेषसमये तादृशी स्थितिः; सत्वोन्मेषसमयविशेषोऽप्यस्ति खलु सर्वेषामपि। तथाविधेषु समयेषु ते पुष्पगन्धधूप दीपादिपरिचर्योपकरणसनाथास्सन्तो भगवन्तं प्रणन्तुमुपसर्पन्त्येव हि; तिरुप्पळ्ळियेळुच्चिनाम्नि सुप्रभातदिव्यप्रबन्धे त्रिचतुरगाथासु तदिदमुपवर्ण्यते खलु। सैषा सपर्याऽपि भवतो महिम्नो मालिन्यं सम्पादयेन्न किमु? इति कथ्यते। का कथा ममेति कथितं भवति।

महिम्नो मालिन्यमित्यत्र विवक्षितो महिमा को नामेति चेत्, स उच्यते सकलपदार्थबीजभूतस्येत्यादिना। * अचिद्विशेषितान् प्रलयसीमनि संसरतः करणकलेबरैर्घटयितुं दयमानमनाः। वरद! निजेच्छयैव परवानकरोः प्रकृतिं महदभिमानभूतकरणावलिकोरकिणीम्॥ इति भट्टपादानुगृहीत प्रक्रियया भगवति सकल पदार्थबीजभूतत्वमवगन्तव्यम्। [स्वरूपविकारलेशमान्तरेण] * प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् * इति ब्रह्मसूत्रेण उपादानकारणत्वमपि भगवत एवाभिहितम्। घटाद्युपादानकारणभूतमृदादीनामिव भगवतोऽपि स्वरूपविकारस्संभवितुमर्हतीति शङ्काव्युदसनाय * स्वरूपविकारलेशमन्तरेणेत्युक्तम्। विकारमन्तरा कथ मुपादानत्वनिर्वाह इति चेत् विशेषणांशे परं विकारो नतु विशेष्यांशे इति सम्प्रति संक्षेपः॥ .... (२)

—* दूसरी गाथा—निनैन्दु नैन्दुळ् करैन्दुरुहि *—

(हिंदी) हे अत्याश्चर्यचेष्टित भगवन्! ब्रह्मादि देव, सनकादि महर्षि और दूसरे भी ऐसे महात्मा लोग आपके गुणों का चिंतन करते हुए शिथिलगात्र और पिघले हुए चित्तवाले बनकर, बनाई हुई पुष्पमाला, स्नान के लिए तीर्थ, सुगंध, और धूप लेकर यदि आप को प्रणाम करें, तो उससे क्या चिंतित समस्त पदार्थों के कारणभूत और स्वरूप का विकार पाये विना ही, अपने संकल्पमात्र से समस्त जगत की सृष्टि करनेवाले आपकी महिमा न घटेगी?

पूर्वाचार्य इस गाथा की टीका में लिखते हैं कि, पहली गाथा में आळ्वार यों कहते हुए पछताया कि मैंने अपने तीनों करणों से भगवान को कलंकित किया; इस गाथा में आप कह रहे हैं कि मैं यह बात करने का भी अधिकारी नहीं। यद्यपि इस गाथा में उक्त अर्थका स्पष्ट वाचक शब्द नहीं मिलता; तथापि तात्पर्यतः यह अर्थ सिद्ध होता है। शास्त्र का यह एक नियम है कि जिसकी प्रसक्ति हो उसीका निषेध हो सकता है। क्या चंडाल कभी यह कह सकेगा कि मुझे वेदाध्ययन करने का सामर्थ्य नहीं? नहीं कहेगा; क्यों कि उसे वेदाध्ययन करने का प्रसंग ही नहीं है। इसी प्रकार अब आळ्वार कहते हैं कि "मैं तो अपनी अयोग्यता बताने का भी अनधिकारी हूं; प्रेमार्द्रचित्त ब्रह्मादि महात्मा ही वह कर सकते हैं। अथवा ठीक विचार करने पर कहना पडता है कि वे भी आपकी सेवा करने योग्य नहीं।" भगवान को [अत्याश्चर्यचेष्टित] पुकारना साभिप्राय है। योग्यपुरुष की भांति मुझ अयोग्य का भी स्वीकार करना, पीछे पश्चात्ताप पैदा करना इत्यादि सभी आपकी आश्चर्यमय लीलाएं हैं। तीसरे दशक के दसवीं गाथा में देवों को गर्वी कहने में आया था। परंतु वे सदा ऐसे न रहते हैं। रजस्तमोगुणों के बढ जानेपर वे भगवान से भी विरोध करते हैं। परंतु दूसरे प्राणियों की भांति उनको भी कदाचित् सत्वगुण उद्बुद्ध होगा। तब वे बहुत भक्तिवाले होकर तीर्थ पुष्प गंध धूप दीप इत्यादि पूजासामग्री के साथ भगवान के पास आकर उनका प्रणाम करते हैं। श्रीभक्तांघ्रिरेणुसूरी ने "तिरुप्पळ्ळियेळुच्चि" नामक अपने दिव्यप्रबंध की तीन चार गाथाओं में इस अर्थ का सुंदर वर्णन किया है। अब आळ्वार कहते हैं कि ऐसे महामहिम देवों से अनुष्ठित भगवान की पूजा भी उनकी महिमा को मलिन बनाएगी। फिर मेरे बारे में कहने की कौनसी आवश्यकता रहेगी।

भगवान की कौनसी महिमा मलिन होगी? इसका प्रत्युत्तर है—[सकलपदार्थों के कारणभूत] इत्यादि। वेदांतशास्त्र बताता है कि भगवान जगत के त्रिविध कारण भी होते हैं। त्रिविध कारण ये हैं—उपादान कारण (या मूलवस्तु), निमित्त कारण (या कर्ता) और सहकारिकारण (उपकरण इत्यादि)। उपादान कारण स्वयं विकार पाकर ही कार्य पैदा करेगा। परंतु भगवान एक ही ऐसे विलक्षण पदार्थ हैं, जो स्वयं विकार पाये विना ही कार्य उत्पन्न करा देते हैं। यह अर्थ बताया गया—[स्वरूप का विकार पाये विना] इत्यादि से। इस पर प्रश्न यह उठेगा कि यदि भगवान में विकार ही न हो, तो वे कैसे उपादान कारण बन सकेंगे। इसका प्रत्युत्तर इतना ही है कि भगवान के विशेषणभूत चेतन व अचेतन

विकार पाते हैं और विशेष्यभूत भगवान तो स्वयं निर्विकार रहते हैं। तथाच उक्त विशेषणों के द्वारा वे उपादा.ः कारण होते हैं; और स्वयं विशेष्यव्यक्ति निमित्त कारण बनते हैं॥ .... (२)

(गाथा.) मायोनिहळाय् नडैकच वानोर् पलरुम् मुनिवरुम् *
नीयोनिहळै प्पडैयेन्दु निरैनान्मुहनै प्पडैचवन् *
शेयोनेल्ला वरिवुक्.म् तिशैहळेल्लाम् तिरुवडियाल्
तायोन् * एल्ला ेव्वुयिर्क्कुम् तायोन् तानोरुरुवने ॥ ३ ॥

विलक्षणजन्मोत्कर्षविशिष्टान् सर्ग.सृतिकार्यवर्गकौशलयुक्तान् जगद्योनिभूतान् देवमुनिभूतान् दक्षप्रजापतिमुखान् देवताविशेषान् त्वं सृजेति ज्ञानादिपरिपूर्णं चतुर्मुखब्रह्माणमुत्पादितवान् सकलविधानामपि ज्ञानानां दवीयान् सर्वा अपि दिशस्त्रिविक्रमावतारे स्वकीयपादेनाक्रान्तवान् सर्वेष्वपि प्राणिषु मातृवद्वत्सलो भगवान् एतादृशाद्वितीयस्वभावसमन्वितो बत! ॥

अधस्तनगाथाद्वितयेन नैच्यानुसन्धानातिशयप्रकाशनमुखेन स्वस्य भगवद्विषयानुभवे औदासीन्यं प्रकाशितवतो मुनिवरस्य यथाकथञ्चिदाभिमुख्यमुत्पिपादयिषुर्भगवान् स्वकीयसौशील्यगुणप्रभावस्मारणेन सुसम्पादमस्याभिमुख्यमिति प्रतिपद्यमानः तस्य गुणस्य प्रथमसाक्षिभूतं त्रैविक्रमापदानं स्मारयामास। पुनरपि स्मरणपथमानयामः 'महतो मन्दैस्सह नीरन्ध्रेण संश्लेष एव सौशील्यकार्यम्' इति प्रोक्तचरम्। तादृशशीलगुणविभूषितस्य भगवत उपसर्पणे वैराग्यमनुचितमेव खलु; तथाच शीलगुण कार्यविशेष स्मारणमेवाधुना सदुपायो भवितेति भगवता विचिन्तितं सर्वथा स्थाने। मुनिवरश्च भगवता स्मारितमिदं त्रैविक्रमापदानं स्वयमनुसंदधानस्सन् विमुखो भवितुम् अभिमुखो भवितुं चाक्षम इतिकर्तव्यतामुग्धस्ताम्यति गाथायामस्याम्। विमुखो भवितुमक्षम इति यदुक्तम् तद्युज्यते कामम्; अभिमुखो भवितुं चाक्षम इति कथमुच्यते? भगवदनुसारित शीलगुणकार्यध्याने सति आभिमुख्यमेव खलु सद्यो भवितुमर्हति इति चेत्, सत्यम्; स्वकीयाया अयोग्यताया ध्यानस्य दृढिमा अविलम्बेनाभिमुख्यजननं रुणद्धीति वस्तुस्थितिः।

गाथायामस्यां पूर्वार्धेन स्वायोग्यतानुसन्धानपूर्वकवैमुख्यस्य प्रधानकारणभूतो भगवत उत्कर्षातिशयः प्रतिपाद्यते। यद्यपि भगवतः परत्वपिशुनास्सन्ति भूयांसो गुणाः व्यापकत्व नियन्तृत्व शरण्यत्व शक्तत्व सत्यकामत्वापन्सखत्वादिरूपाः, तथाऽपि सर्वेष्वपि तेषु कारणत्वं प्रकृष्यते। कुतः? अथर्वशिरस्सु 'कश्च ध्येयः?' इति प्रश्ने 'कारणं तु ध्येयः' इति प्रतिवचन मवतीर्णम्। तुकारोऽत्र एवकारार्थकः। जगत्कारणभूतं वस्त्वेव ध्येयमित्युक्तं भवति। शारीरकमीमांसायां चतुरध्याय्याम् उभावध्यायौ कारणवस्तुनिरूपणे हि प्रवृत्तौ। यदाहुः * कारणत्वमवाध्यत्वं पूर्वद्विकप्रमेयमिति। [अबाध्यत्वम्] प्रथमाध्यायनिरूपिते कारणत्वे संभवतां बाधानां [चोद्यानाम्] परिहारमुखेन तस्य सम्यक् प्रतिष्ठापनमिति यावत्। एवं च द्वावध्यायौ परमपुरुषस्य कारणत्वस्थेम्ने प्रवृत्ताविति स्थितम्। एवंविधस्य कारणत्वस्य भगवदुत्कर्षसीमाभूमित्वावधारणात् तथाविध उत्कर्षोऽत्राभिधीयते।

भगवतः कारणत्वं सद्वारकमद्वारकं चेति द्विविधम्। एतदुभयमप्यत्रोपवर्ण्यते।° * यो ब्रह्माणं विदधाति पूर्वम् * इत्याम्नातरीत्या चतुर्मुखब्रह्मणस्सर्गः अद्वारकः। [ज्ञानादिपरिपूर्णं चतुर्मुखब्रह्माणमुत्पा-

दितवान्] इत्यनेन अद्वारकसृष्टिस्सा कथिता भवति। [विलक्षण जन्मोत्कर्षविशिष्टान्] इत्यादिना वाक्येन सद्वारकसृष्टिश्च प्रोक्ता भवति। भगवान् चतुर्मुखब्रह्माणं सृष्ट्वा अथ तस्मा एव मादेशमकार्षीत्—'भो! त्वं दशप्रजापतिमुख्यान् देवताविशेषानुत्पादयेथा' इति। विलक्षणेत्यादीनि विशेषणानि चतुर्मुखसृज्यभूतेषु देवताविशेषेष्वन्वयमृच्छन्ति। एवमद्वारकसद्वारकसृष्टिमुखतः परत्वैकान्तिकजगत्कारणत्वविशिष्टः खलु स परमः पुमानिति तस्योत्कर्षमनुसन्धाय तमुपसर्पितुं बिभेमीति कथितवान् भवति मुनिवरः। [सकलविधज्ञानानामपि दवीयान्] इत्येनदपि विशेषणं परत्वप्रतिपादनपरं वेदितव्यम्।

अथ [सर्वा अपि दिशस्त्रिविक्रमावतारे स्वकीयपादेनाक्रान्तवान्] इत्येतद्विशेषणं मुनिवरेण न खलुवृथा निवेश्यते; स्वस्याभिमुख्यसम्पिपादयिषया भगवता स्मारितं यत्तदनुसन्धीयते। 'अयि भोः शठकोप मुने! मत्प्रकृतिं किं न जानाति भवान्? गुणागुणनिरूपणे दृष्टिमनिधाय वसिष्ठचण्डालविभागमन्तरेण च युगपत्सर्वेषां शिरस्सु पादं निहितवान् खल्वहम्; एतादृशस्य मम 'अमी योग्याः, अमी अयोग्या' इति विभागो नैवास्ति खलु। अतश्च अयोग्यतानुसन्धानेन अपसरणेच्छा नैवोचिता भवत' इत्युक्तवानिव भगवान्। अथ मुनेरपसर्पणरुचिर्मनागिव स्थगिता भवतीति मूलशब्दसंदर्भेवषमेतत्॥ .... (३)

—* तीसरी गाथा—मायोनिकळाय् नडैकत्त *—

यों कहकर कि, "तुम श्रेष्ठजन्मवाले, और सृष्ट्यादि कार्य करने में समर्थ, देव मुनि प्रजापति इत्यादि जगत्कारण देवों की सृष्टि करो," (तदुचित ज्ञान शक्ति इत्यादि गुण) विशिष्ट चतुर्मुख ब्रह्मा की सृष्टि करनेवाले, सकलविधज्ञानों से भी परे, (त्रिविक्रमावतार के समय) समस्त दिशाओं को अपने श्रीपादों से नापनेवाले और समस्त प्राणियों के प्रति माता के समान वत्सल भगवान, अहो! ऐसे एक विलक्षण स्वभाववाले हैं॥

पूर्वोक्त दो गाथाओं में नैच्यानुसंधान करते हुए भगवदनुभव करने में विमुख होना चाहनेवाले आळ्वार को अपने सौशील्य गुण की याद दिलाकर लौटाने की इच्छा से भगवान ने उस गुण के पहले साक्षी त्रिविक्रमावतार चरित्र की याद करायी। भगवान ने यह बहुत अच्छा काम किया। इस दशक की अवतारिका में बताया गया है कि स्वयं महान होकर नीचों से मिलने-जुलने का गुण सौशील्य है। भगवान का यह गुण जाननेवाला भक्त उनसे मिलने में क्यों कर संकोच कर सकेगा? अतः भगवान ने निश्चय किया कि अपने सौशील्यगुण के प्रकाशक चरित्र का स्मरण कराना ही आळ्वार को लौटाने का श्रेष्ठ उपाय होगा। इस अभिप्राय से भगवान के स्मारित इस त्रिविक्रमावतारवृत्तांत का अनुसंधान करते हुए आळ्वार, प्रकृत गाथा में भगवान से दूर हट जाने में अशक्त होकर, तथापि उनके समीप पहुंचने में भी अशक्त होकर, एक विलक्षण मंझली अवस्था पा रहे हैं। अर्थात् शीलगुण का अनुसंधान करने पर उन्हें भगवान के पास जाने का विचार होता है; इतने में अपनी अयोग्यता का सुदृढ स्मरण आकर, उन्हें पीछे हटाता है। अतः आप बीच में खडे हो जाते हैं।

प्रकृत गाथा के पूर्वार्ध में भगवान की विलक्षण महिमा का (माने परत्व का) वर्णन किया जाता है, जिसके स्मरण से आळ्वार को अपनी नीचता पर ध्यान देना पडा। यद्यपि भगवान के परत्व के सूचक

उनके अनेक गुण होते हैं, व्यापकत्व, नियन्तृत्व, शरण्यत्व, शक्तत्व, सत्यकामत्व, सत्यसंकल्पत्व आपत्-सखत्वेत्यादि, जिनमें से किसीका भी वर्णन किया जा सकता है। तथापि इन सब गुणों की अपेक्षा जगत्कारणत्व ही श्रेष्ठ माना जाता है। अथर्वशिर उपनिषद् में यह प्रश्न—"कश्च ध्येयः" (किसका ध्यान किया जायँ?) और यह उत्तर "कारणं तु ध्येयः" (जगत्कारण वस्तु का ही ध्यान करना चाहिए) देखे जाते हैं। अन्यत्र भी ब्रह्म का लक्षण बताने के प्रसंगों में जगत्कारणत्व ही मुख्यतया बताया गया है। चार अध्यायवाले ब्रह्मसूत्र में पहले दो अध्यायों में इस कारणत्व की ही चर्चा चलती है। तथाहि—पहले अध्याय का नाम कारणाध्याय है। इसमें वेदांतों में अधीयमान नानाप्रकार के वचनों के विवेचनपूर्वक यह अर्थ स्थापित किया गया है कि परब्रह्म ही जगत्कारण है। दूसरे अध्याय का नाम है अबाधाध्याय। इसमें ब्रह्म के जगत्कारणत्व के विषय में दूसरों के किये जानेवाले नानाविध आक्षेपों का समाधान किया गया है; (एवं एतदुपयुक्त, परपक्षखंडन इत्यादि दूसरे भी कतिपय विषय उपवर्णित हैं।) इस प्रकार ब्रह्मसूत्र का आधा भाग परब्रह्म के कारणत्व का ही वर्णन कर रहा है। अतः समझना चाहिए कि भगवान की महिमा का सूचक मुख्य गुण आपका जगत्कारणत्व ही है। अतः आळ्वार भी हाल में उस कारणत्व का ही वर्णन करते हैं।

भगवान का यह जगत्कारणत्व (एवं तदनुगुण सृष्टि) दो प्रकार का है—अद्वारक व सद्वारक। ये दोनों यहां पर वर्णित हैं। स्वयं भगवान ही चतुर्मुख ब्रह्मा की जो सृष्टि करते हैं, यह अद्वारक सृष्टि, और बाद में ब्रह्मा के द्वारा जो सृष्टि कराते हैं वह सद्वारक सृष्टि कहलाती है। प्रकृत गाथा में, [चतुर्मुख ब्रह्मा की सृष्टि करनेवाले] कहने से अद्वारक सृष्टिका, और [श्रेष्ठजन्मवाले] इत्यादि लंबे वाक्य से सद्वारक सृष्टि का वर्णन किया जाता है। भगवान ने ब्रह्मा की सृष्टि कर उसे यह आज्ञा दी कि "तुम दस प्रजापति इत्यादि अनेक देवों की सृष्टि करो।" इन देवों के अनेक विशेषण दिये जाते हैं—श्रेष्ठजन्मवाले इत्यादि। इन सबका परमतात्पर्य इतना हीं है कि ये देव, देव मनुष्यादि सकलप्राणियों की सृष्टि करने में समर्थ होते हैं। तथाच इस प्रकार अद्वारक व सद्वारक जगत् सृष्टि करनेवाले परात्पर परमपुरुष की श्रेष्ठता का अनुसंधान करते हुए उनके पास जानेमें आळ्वार अपना भय प्रकाशित करते हैं। एतदनुगुणतया ही भगवान का यह भी एक विशेषण दिया गया—[सकलविधज्ञानों से भी परे]। जो ज्ञान का भी विषय न हो, वे कैसे महान होंगे!

आगे, [समस्त दिशाओं को अपने श्रीपादों से नापनेवाले] इत्यादि वाक्य आळ्वार की अपनी बुद्धि के द्वारा विलिखित नहीं; बल्कि उनको ठिकाने पहुंचाने के लिए भगवान से स्मारित अर्थ का अनुसंधानमात्र है। अर्थात् भगवान का यह अभिप्राय हुआ—"अहो शठकोपमुने! तुम यह क्या कर रहे हो? क्या तुम मेरा स्वभाव नहीं जानते? मैंने त्रिविक्रमावतार में मानवों के गुणदोषों का ख्याल न करते हुए, सबके सिरपर एक समान अपना चरण रख दिया न? क्या मैंने उस समय किसीको नीच मान कर छोड दिया? नहीं। ऐसे मुझे, "यह योग्य है; यह अयोग्य है" इत्यादि विवेचन अपनी दृष्टि में कभी होता ही नहीं। अतः तुम अपने को नीच मानते हुए पीछे हटने का विचार मत करो।" यह जानने पर आळ्वार का चित्त जरा प्रसन्न हुआ और भगवान को छोड कर दूर भाग जाने की उनकी इच्छा दूर हुई। यह अर्थ मूलगाथा के शब्द संदर्भ से सूचित किया जाता है॥ .... (३)

(गाथा.) तानोरुरुवे तनिविचाय् तन्निल् मूवर् मुदलाय *
वानोर् पलरुम् मुनिवरुम् मचुम्मचुम् मुचुमाय् *
तानोर् पेरुनीर् तन्नुळ्ळे तोचि अदनुळ् कण्वळरुम् *
वानोर् पेरुमान् मामायन् वैकुन्द नेम्बेरुमाने ॥ ४ ॥

स्वयमद्वितीय एव सन् सहायान्तरनिरपेक्षहेतुभावमापद्यमानः स्वयमेव त्रिमूर्तिरूपस्सन् देव-मनुष्यतिर्यगादिसर्वचिदचिच्छरीरको भूत्वा, स्वयमेव एकार्णवमध्ये प्रादुर्भूय तत्र शयानो नित्यसूरिनाथो विचित्राश्चर्यगुणचेष्टितादिविशिष्टो वैकुण्ठाधिपतिरस्मच्छेषी सः ॥

गाथाया अस्या अवसाने अस्मच्छेषी स इति यदुक्तम् एतदेवात्र जीवनाडीभूतम् । "कैङ्कर्यकर्ता शेषः, कैङ्कर्यप्रतिसंबन्धी शेषी" इति तावत्सम्प्रदायः । भगवतः शेषित्वेन प्रतिपादनमिह स्वस्य शेषत्वप्रतिपादने विश्राम्यति । भगवत्किङ्करभावे नाहमर्ह इति यदासीदयोग्यतानुसन्धानं मुनिवरस्य तदिदानीं मनागिव गलतीति गम्यते । तस्य शेषित्वसिद्धये मया शेषवृत्तिकरण मूरीकार्यमेवेति प्रतिपादने तात्पर्यमस्या गाथाया इति प्रतिपत्तव्यम् । कैङ्कर्यकरणमप्राप्तविषये अनुचितम्; प्राप्तविषय एव हि शोभनं तत्; भगवानेव प्राप्तविषय एतस्येति प्रपञ्चयति गाथाया अवशिष्टो भागः । [स्वयमद्वितीय एव सन् सहायान्तरनिरपेक्षहेतुभावमापद्यमानः] उपनिषदि * सदेव सोम्य ! इदमग्र आसीदेकमेवाद्वितीयम् * इति श्रूयते; अत्र [एव, एकम्, अद्वितीयम्] इति पदत्रयं मिलित्वा उपादानकारणम् सहकारिकारणम् निमित्तकारणं चेति त्रिविधमपि कारणं परं ब्रह्मैवेति प्रतिष्ठापयतीति वेदान्तिनः । तद्वदत्रापि [अद्वितीय-एव-सहायान्तरनिरपेक्ष] पदैस्त्रिभिरपि स एव त्रिविधकारणमपीति बोध्यते । चिदचिच्छरीरकस्सन् उपादानकारणम्; संकल्पसनाथस्सन् सहकारिकारणम्; निमित्तकारणत्वं तु उपपादननिरपेक्षम् । घटपटादिनिर्माणे कुलालतन्तुवायादीनामिव जगत्सृष्टौ ज्ञानशक्तिभरितस्य भगवतो निमित्त-कारणत्वमविवादमिति ।

[स्वयमेव त्रिमूर्तिरूपस्सन्] इक्ष्वाकुवंशेऽवतीर्य तद्वंश्येष्वन्यतम इव, यदुवंशेऽवतीर्य याद-वेष्वन्यतम इव च यथा बभूव, तथैव ब्रह्मरुद्रयोर्मध्येऽवतीर्य ताभ्यां सह परिगणनीयोऽभूद्भगवान् । अत्र * ब्रह्मेशमध्यगणना गणनाऽर्कपङ्क्तौ इन्द्रानुजत्वमदितेस्तनयत्वयोगात् । इक्ष्वाकुवंशयदुवंशजनिश्च हन्त ! श्लाघ्यान्यमून्यनुपमस्य परस्य धाम्नः ॥ * [अतिमानुषस्तवे] इति श्रीकूरेशमिश्रसूक्तिः, * मध्येविरिञ्चगिरिशं प्रथमावतारः तत्साम्यतः स्वगयितुं तव चेत्स्वरूपम् * [श्रीरङ्गराजस्तवोत्तरशतके] इति श्रीभट्टपादश्रीसूक्तिश्चानु-सन्धेये । [देवमनुष्यतिर्यगादिसर्वचिदचिच्छरीरको भूत्वा] अत्र मूलस्थपदानि "देवमनुष्यादिसर्वपदार्थं सृष्टयर्थम्" इत्येवंविधमनुवादमपि सहेरन् । घटते ह्युभयविधोऽप्यर्थः । [एकार्णवमध्ये प्रादुर्भूय तत्र शयानः] अत्र * आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायण स्मृतः ॥ * इत्येतन्मनु-स्मृतिवचनमनुसन्धातु मलम् । [विचित्राश्चर्यगुणचेष्टितादिविशिष्टः] इति कथनमिह साकूतम्; 'सर्वथा-ऽप्यनर्होऽहं भगवन्तं नैवोपसर्पेयं परात्परम्' इति कृतसङ्कल्पमपि मां शिथिलसङ्कल्पं हि कलयत्यसाविति विवक्षु-र्मुनिवरो विशेषणमिदं विन्यस्यति । तत्तत्समयानुगुणगुणाविष्कारेण स्वयमेवासौ जयशीलो भवति यत्, तदेतदेव

महदाश्चर्यमिति मुनिवरस्य भावः। अन्ततो [वैकुण्ठाधिपतिः] इत्येतदपि साकूतम्। वैकुण्ठनाथोऽसौ भगवान्; यदि वैकुण्ठमेवाधितिष्ठेत्तर्हि शीलगुणप्रकाशनं कथमस्य घटेत? परमसाम्यापन्ना एव खलु तत्र विराजन्ते, मन्देष्वेव प्रकाशप्राचुर्यं लब्धुं प्रभविष्णुः शीलगुणस्तत्रासत्कल्प एव हि स्यादिति मन्यमानो वैकुण्ठं विहायात्रागत इति सूचितं भवति॥.... .... (४)

—✽ चौथी गाथा—तानोरुरुवे तनिवित्ताय् ✽—

स्वयं अद्वितीय ही रहकर दूसरे सहायक की अपेक्षा न करते हुए कारण बननेवाले, स्वयं त्रिमूर्तिरूप होनेवाले, देव मनुष्य तिर्यक् इत्यादि समस्त चेतनाचेतनरूपी (माने उनके अंतर्यामी) होकर, महार्णव के मध्य प्रकट होकर वहां शयन करनेवाले, नित्यसूरियों के नाथ, और अत्यद्भुत गुण चेष्टा इत्यादि विशिष्ट श्री वैकुंठनाथ हमारे शेषी हैं॥

इस गाथा के अंत में प्रयुक्त [हमारे शेषी] शब्द ही इसका प्रधान भाग है। आचार्य बताते हैं कि, कैंकर्य (यानी सेवा) करनेवाला शेष, और कैंकर्य पानेवाला शेषी है। भगवान को शेषी बताने का अर्थ, चेतन को शेष बताना है। तथा च, मालूम पडता है कि आळ्वार अपने को भगवान की सेवा करने के अयोग्य जो मानते थे, यह उनकी भावना जरा ढीली पड गयी। अर्थात् उनके मन में अब यह भावना उत्पन्न हुई कि यदि भगवान शेषी हो, तो हमें शेष होना चाहिए; और इस लिए उनकी सेवा भी करनी चाहिए; उनको छोडकर दूर भाग जाना अनुचित है। योग्य व्यक्ति के विषय में की जानेवाली सेवा ही मंगल-कारक होगी और अयोग्य व्यक्ति की सेवा दुःखप्रद एवं स्वरूपविनाशक होगी। अतः गाथा के अवशिष्ट भाग में भगवान की योग्यता (माने स्वामित्व) का वर्णन किया जाता है।

[स्वयं अद्वितीय ही रहकर दूसरे सहायक की अपेक्षा न करते हुए कारण बननेवाले।] छांदोग्य उपनिषद का यह एक वाक्य है—"सदेव सोम्य! इदमग्र आसीत् एकमेवाद्वितीयम्।" इस वाक्य में जगत्कारणवस्तु 'सत्' कहलाती है; और ये तीनों शब्द—एव, एकम् व अद्वितीयम्, मिलकर यह अर्थ बताते हैं कि वह 'सत्' स्वयं जगत के उपादानकारण, सहकारिकारण, व निमित्तकारण रूप तीनों कारण बनता है। इसी प्रकार प्रकृत गाथा के भी ये तीन शब्द—'अद्वितीय, ही, व दूसरे सहायक की अपेक्षा न करते हुए,' भगवान को उक्त त्रिविध कारण बताते हैं। चिदचिच्छरीरक ब्रह्म उपादान कारण, संकल्पविशिष्ट सहकारि कारण और ज्ञानशक्त्यादिविशिष्ट निमित्तकारण होता है।

[स्वयं त्रिमूर्तिरूप होनेवाले] भगवान जैसे श्री रामचंद्र के रूप में इक्ष्वाकुवंश में अवतीर्ण होकर उस वंशके राजाओं में एक बने, और श्री कृष्णचंद्र के रूप में यदुवंश में अवतार लेकर यादवों में से एक हुए, ठीक इसी प्रकार ब्रह्मरुद्रों के साथ विष्णु नाम से अवतीर्ण होकर उनके साथ गिनती पाते हैं। अत एव श्री कूरेश स्वामीजी ने अतिमानुषस्तव में (१५) कहा—"ब्रह्मेशमध्यगणना"—इत्यादि। यह तात्पर्य है—ब्रह्मरुद्रों के बीच में गिना जाना, बारह सूर्यों की श्रेणी में गिनती पाना, अदिति के पुत्र

(उपेंद्र) होने से इंद्र का छोटा भाई होना, इक्ष्वाकुवंश व यदुवंश में जन्म पाना, ये सभी परम धाम कहलानेवाले अद्वितीय आपके शुभ अवतार हैं। श्री भट्टर स्वामीजी ने श्रीरङ्गराजस्तव-उत्तरशतक (५७) में कहा कि "मध्ये विरिञ्चिगिरिशं प्रथमावतारः" (ब्रह्मा व रुद्र इनके बीच में आपका पहला अवतार हुआ।) [देव मनुष्य तिर्यङ् इत्यादि समस्त चेतनाचेतनरूपी होकर] वेदांतियों का सिद्धांत है कि भगवान समस्त चेतन व अचेतन पदार्थों के अंतर्यामी होने से तत्तत् चेतनाचेतन वस्तु ही कहलाते हैं। मूल गाथास्थ "वानोर् पलरुम्" इत्यादि प्रकृत दूसरे पाद का यह भी अर्थ हो सकता है कि, 'देव मनुष्यादि समस्त पदार्थों की सृष्टि करने के लिए।' यह भी अर्थ ठीक लगता है। [महार्णव के मध्य प्रकट होकर वहां शयन करनेवाले] यह तो नारायण का लक्षण है; जो मनुस्मृति में भी बतलाया गया। "आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥" यह भाव है—नार शब्द का अर्थ जल, पहले एक समय (प्रलयकाल में) भगवान के रहनेका स्थान था; अतः उनका नाम हुआ—नारायण। [अत्यद्भुत गुण चेष्टा इत्यादि विशिष्ट] कहने का यह भाव है—यह दृढ संकल्पकर कि "सर्वथा नीच मैं भगवान के पास नहीं जाऊंगा," बैठे रहनेवाले मेरे संकल्प को भी ढीला बनानेवाले भगवान के गुण आदि अत्याश्चर्यमय हैं; तत्तत्समय के अनुगुण विशेष गुणों का प्रकाशन करते हुए भगवान मेरे संकल्प को भी दूरकर सर्वदा स्वयं विजयी होते हैं। यह बात सर्वथा सत्य है। इस दिव्यप्रबंध के प्रत्येक दशक के प्रारंभ में भी आळ्वार के मन में एक-एक भावना रहती है जो उस दशक में भगवान के किसी विशेष गुण के अनुभव से बदल जाता है। यह तो अवश्य ही भगवान का आश्चर्यमय चेष्टित है। अंत में [श्री वैकुंठनाथ] कहने का यह भाव है—वैकुंठनाथ ये भगवान यदि वैकुंठ में ही विराजते, तो इनका शीलगुण सर्वथा अप्रकाशित ही रह जाता; क्यों कि उधर रहनेवाले नित्य व मुक्त लोग सभी सर्वथा दोषों से दूर और भगवान के समान होते हैं। उनके विषय में शील गुण का प्रकाशन नहीं किया जा सकता; वह गुण तो नीचों के विषय में ही प्रकाशित होनेवाला है। अतः भगवान अपने शील गुण का प्रकाशन करते हुए वैकुंठ छोड़कर इस भूमंडल पर पधारे। अतः हमें भी इस गुण का अनुभव करने के लिए उनसे मिलना चाहिए॥ .... (४)

(गाथा.) मानेय् नोक्कि मडवाळै मार्विल् कोण्डाय् माधवा *
कूनेशिदैय वुण्डैविल् निरच्चिल् तेरित्ताय् गोविन्दा *
वानार् शोदि मणिवण्णा मधुसूदा नीयरुळाय् * उन्
तेने मलरुम् तिरुप्पादम् शेरुमारु विनैयेने ॥ ५ ॥

हरिणीनयनसदृशनयनां मुग्धां महालक्ष्मीं वक्षस्स्थले विनिवेशितवन् हे माधव! (कंस-कैङ्कर्यनिरतायाः) कुब्जायाः स्वगुप्रं अनायासेन विनिवर्त्य तस्या आर्जवमुत्पादितवन् गोविन्द! नित्यविभूतिव्याप्ततेजःपुञ्ज! मणिसवर्ण! मधुसूदन भगवन्! महापापी सोऽहं यथा त्वदीयं मधुस्यन्दिचरणारविन्दं प्राप्नुयां तथा नाम त्वमनुगृहाण॥

प्रथमद्वितीयगाथाद्वितयेन अयोग्यतानुसन्धानतो दूरतोऽपसर्पणोन्मुख इवासीन्मुनिवरः; अथ भगवति सदुपायेन स्वशीलगुणं संस्मारितवति सति मुनिवरस्य संजातमपसर्पणरुचिशैथिल्यम् तृतीयचतुर्थगाथाद्वितये समसूच्यत। ततो भगवान् स्वयमेव तेन सह संश्लेष्टुकामोऽपि सन् 'स्वकीयमार्त्यतिशयं स्वयमेव स उद्घाटयन्नाक्रन्दतु; परस्ताद् द्रक्ष्यामः' इति हृदि कलयन् जोषमवतस्थे। अस्यामवस्थायाम् मुनिवरः स्वकीयमार्तिभरमाविष्करोति गाथयाऽनया। [यथाऽहं त्वदीयं मधुस्यन्दिचरणारविन्दं प्राप्नुयाम् तथा त्वमनुगृहाण] इत्येषा प्रार्थनाऽवधेया। महालक्ष्मीसनाथवक्षस्केति प्राथमिकं संबोधनम्। तस्याः पुरुषकारबलेन स्वसमीहितसिद्धि मव्यभिचरिष्णुं मन्यते मुनिवरः। * लक्ष्मीः पुरुषकारत्वे निर्दिष्टा परमर्षिभिः। ममापि च मतं ह्येतन्नान्यथा लक्षणं भवेत्॥ * इति भगवच्छास्त्रोक्तरीत्या संसिद्धपुरुषकारभावायाः श्रियः पुरस्कारे सति समीहितसिद्धिरमोघेति हि वस्तुस्थितिः। लक्ष्म्या नयनसौभाग्यवर्णनं यत्कृतमिह तत् तत्कटाक्षपातलिप्सास्फोरकं मन्तव्यम्। हरिणीत्यादिना महता विशेषणवाक्येन कथितोऽर्थः माधव! इत्यनेन लघुना पदेनोपसंह्रियते।

अथ द्वितीयपादस्थितेन विशेषणेन कंसकिङ्कर्यां कुब्जायामनुग्रहकर्तृत्वख्यापनमुखेन 'नीचोऽहमपि तथाऽनुग्राह्य' इति सूचयति मुनिवरः। कुब्जायाः कथा कृष्णावतारे सुप्रसिद्धा। कंसचोदितेनाक्रूरेण मथुरापुरीमानीतो मुकुन्दस्तत्रत्यमहावीथ्यामागच्छति कंसभवनजिगमिषया; तत्र पथि यदृच्छया दृष्टा नैकवक्रानाम्नी काचन कुब्जा कंसस्य चन्दनादिसुगन्धद्रव्यसज्जीकरणकर्मणि नियुक्ता नानाविधचन्दनसंभृतपात्रहस्ता। तामेनामवलोक्य कृष्णः * सुगन्धमेतद्राजार्हं रुचिरं रुचिरानने!। आवयोर्गात्रसदृशं दीयतामनुलेपनम्॥ * [आवयोः—अग्रजन्मनो बलरामस्य, मम चेत्यर्थः।] इत्यपेक्ष्य, अथ प्रेमविवशया तयाऽनुलिप्तगात्रो भूत्वा तत्प्रत्युपकाररूपेण आजन्मनस्तस्या वपुषि स्थितं स्वगुमपाकृत्य आर्जवमुदपादयदिति श्रीविष्णुपुराणादिषु प्रथिता कथैषा। पुराणरत्ने पञ्चमांशे विंशेऽध्याये कथामिमामुपवर्णयन् पराशरो मुनिवरः कृष्णस्य सौशील्यातिशयमत्यद्भुतमुपपादयति। तथा हि तत्रत्या अमी श्लोकाः—* ततस्तां चुबुके शौरिरुल्लाघनविधानवित्। उत्पाट्य तोलयामास द्व्यङ्गुलेनाग्रपाणिना॥ चकर्ष पद्भ्यां च तदा ऋजुत्वं केशवोऽनयत्॥ ततस्सा ऋजुतां प्राप्ता योषितामभवद्वरा। विलासललितं प्राह प्रेमगर्भभरालसम्। वस्त्रे प्रगृह्य गोविन्दं मम गेहं व्रजेति वै॥ एवमुक्तस्तया शौरिः रामस्यालोक्य चाननम्। प्रहस्य कुब्जां तामाह नैकवक्रामनिन्दिताम्। आयास्ये भवतीगेहमिति तां प्रहसन् हरिः। विससर्ज जहासोच्चैः रामस्यालोक्य चाननम्॥ * इति। अत्र बहुषु पदेषु कृष्णस्य शीलगुणप्रकाशः प्रेक्ष्यः।

श्रीरामचरितेऽपि कुब्जाकथा काचिदायाति; तामप्यत्र व्याख्यातार आचार्यवर्या अनुस्मारयन्ति। कुब्जा नाम मन्थरा। तस्यां दाशरथिना नानुग्रहः कृतः; अपितु बाल्ये रामचन्द्रो लघुतरधनुष्पाणिर्भूत्वा क्षत्रियकुलानुरूपं विहरन् चापतो मृन्मयीं गुलिकामुदमोचयत्; सा च कुब्जाया मन्थरायास्तनौ कुटिलप्रदेशविशेषे न्यपतत्। नैतत्कर्म रामेण मात्सर्यतः कृतम्; केवलं क्रीडावशात् कृतम्। सा तु कुब्जा राजकुमार इत्यवलेपभरेणैवं कृतवान् राम इति मन्यमाना तदात्वे प्रतिक्रियां कर्तुमशक्ता प्राप्तसमये करवाणीति हृदि निगूहितामर्षा स्थिता समयं प्रतीक्ष्यामिषेकविघ्नमुदपादयदिति कथा। वाल्मीकिरामायणे असदपि चरित्रमिदं रामायणान्तरे स्थितमनुसन्धीयते। श्रीविष्णुपुराणोपात्तकुब्जाकथाया इव एतत्कथाया अपि बोधकस्सन्नेव मूलगाथावाक्यसंनिवेशोऽवतिष्ठते। अत एवैतामपि कथामिह व्याचचक्षिर आचार्याः। द्वितीयपादान्ते गोविन्देति

संबोधनमस्ति । गोविन्दनामवत्त्वं कृष्ण एव हि प्रसिद्धम्; रामावतारीयकथाविवक्षणे सति गोविन्देति संबोधनं कथमुपपद्येत इत्याशङ्क्य द्वेधा समादधिरे; * भूर्भूमिरचलाऽनन्ता....गौरिला कुम्भिनी क्षमा * इत्यमरकोश-रीत्या गोशब्दो भुवमपि वक्तीति कृत्वा भूपालकेत्यर्थवर्णनम् एकः प्रकारः । (२) * गोविन्देति कृष्ण एव संबोधितो भवतु कामम्; कुत्सितचेष्टितकरणापराधस्य कृष्ण एव सुघटत्वात् रामकृतमपि चेष्टितमेतत् कृष्णे अन्वारोप्यत इति समाहितेर्द्वितीयः प्रकारः । अत्र तावदाचार्याणां सूक्तिरेषा "यथा सर्वेऽप्यपराधा अवधूतमौनि-शिरसि" इति । एतत्तु द्राविडवाचि प्रसिद्धस्य "பொம்பழியெல்லாம் அமணன் தலையோடே" इत्याभाणकस्य प्रतिच्छन्दः । अन्यायभन्यनाम्ना राज्ञा परिपालितायां कचन नगर्यां कोऽपि तस्करः कस्यचन गृहे चोरयितुं गतः कुड्ये अपवरकं कृत्वा प्रविशन् कुड्यपातेन म्रियतेस्म; प्रभाते विदितैतद्वृत्तान्ताश्चोरस्य कलत्र-पुत्रादयस्समागत्य समीक्ष्य राज्ञस्सकाशे अभियोगं चक्रुः वधापराधनिमित्तेन गृहस्वामी दण्डयितव्य इति । अथ राज्ञाऽऽहूतो गृहस्वामी पृष्टः प्रत्युवाच—नैष ममापराधः, कुड्यनिर्माता घनतरं कुड्यं यतो न निरमिमीत, तत एव कुड्यपातस्समजनि, मृतिश्चास्य समभूत्; स एवापराधी स एव दण्डनार्ह इति । निशम्यैतद्राजा गृहस्वामिनं विसृज्य कुड्यनिर्मातारमाकार्य त्वमेव दण्ड्योऽसीत्याह । स च प्राह 'कुड्यार्थं मृत्पिण्डदाता कर्मचरः सलिल-मधिकमुपयोज्य मृत्पिण्डं चक्रे ददौ च मह्यम्; अत एव कुड्ये घनत्वं नासीत्; अतश्च मृत्पिण्डनिर्माता प्रष्टव्य इति । अथ भूपति स्तमिममुत्सृज्य मृत्पिण्डकारकमाजुहाव । स पृष्टः प्रत्यब्रूत—'अहं किं कुर्याम्? कुलालो बृहत्तरं घटमदात्; अत एव तोयमधिकं पतितं मृत्पिण्डे; तत एव चायमनर्थस्समजनि; स एव कुलालो दण्ड्य इति । अथ राजा तं विहाय कुलालमानाय्य पप्रच्छ; स चोदैरिरत्; अहं तु लघुतरमेव घटं निर्मातुमैच्छम्; काचन गणिका मम वीथ्यां गतागतं कुर्वती मम भ्रान्त्यपर्यमुदपादयत्; तत एव घटो बृहत्तरोऽभूत्; सैव दण्ड्येति । तदनु भूपो विसृज्य कुलालं गणिकामाकार्य 'कुतस्त्वं कुलालरथ्यायामसकृद्यासीः? त्वमेव दण्ड-नीयाऽसि' इत्याह । सा प्रत्यब्रवीत्—'मदीयमम्बरं निर्णेक्तुं रजकसकाशे दत्तवती साऽहम्; स च रजकः प्रत्यर्पणे व्यलम्बत; अत एव तत्पथेन शश्वत्प्रयातव्यमापतितं मम; स एव रजको दण्डनीय' इति । अथ पार्थिवस्तां विमुच्य रजकमानाय्य पप्रच्छ 'कुतस्त्वं वस्त्रप्रत्यर्पणे व्यलम्बथा' इति । स चाह—महाप्रभो! नाहमागस्वी; यस्मिन् सरसि मया वस्त्रनिर्णेजनं क्रियते, तत्र शिलायाम् अवधूतः कोऽप्युपविष्टस्सुचिरं बोधितोऽपि नोदतिष्ठत्; नाद्याप्युदतिष्ठत्; किं करवाण्यहम्; भवानेव वदतु, मयि कोऽपराध' इति । अथ राजा रजकं विहाय भटानादिशतिस्म तमवधूतमानेतुम् । स तु मौनी; महता प्रयासेन स राजसभामानेतव्योऽभूत् । आनीतं तं पार्थिवः पप्रच्छ 'कुतस्त्वं शिलायामुपविश्य नोत्तिष्ठसि?' इति । सुदृढावलम्बितमौनव्रतस्स तूष्णीक एव सन् वाचं नैवोदघाटयत् । अथ राजा 'अन्ये सर्वेऽपि पृष्टाः किमपि किमपि प्रत्युत्तरमदुः; अतस्ते ते सत्यं निरागसः; यतोऽयं न किमपि प्रतिब्रूते, ततोऽयमेव महानागस्वी; अयमेव दण्डनीय' इत्यवधार्य तमवधूतं शूलमारोपयामासेति कथा समाप्ता । ततः प्रभृति "सर्वेऽप्यपराधा अवधूतमौनिशिरसि" इत्याभाणकः प्रसृमरो-ऽभूत् । तदिदं प्रकृते समुचितमुदाहरणं खलु । अवशिष्टं सुस्पष्टम् ॥ .... (५)

—* पांचवीं गाथा—मानेय् नोक्कि मडवाळै *—

अपने वक्ष पर हरिन के नेत्र के समान नेत्रवाली श्रीलक्ष्मीजी का धारण करनेवाले हे माधव! विना क्लेश, (कंस की नौकरानी) कुबड़ी का कूबड मिटाकर उसे ठीक बनानेवाले

हे गोविन्द! हे परमपद में सर्वत्र व्याप्त तेजोमय! हे मणिवर्ण! हे मधुसूदन! मुझ पापी पर ऐसी कृपा कीजिए, जिससे मैं आपके मधु बहनेवाले श्री पाद प्राप्त करूं ॥

पहली दो गाथाओं में आळ्वार ने अपनी नीचता का अनुसंधान करते हुए भगवान से दूर भागना चाहा। बाद की दो गाथाओं में, भगवान ने उनको अपने शील गुण की याद करायी, जिससे आळ्वार का पूर्वोक्त संकल्प कुछ ढीला हो गया। यह देखने से प्रसन्न होकर भगवान ने तुरंत उनसे मिलना चाहा। परंतु उतने में उनके मन में यह विचार हुआ—"अब हमें उतावली करना अनुचित है; किंतु इस बात की परीक्षा करनी चाहिए कि क्या आळ्वार सत्य ही हमसे मिलना चाहते हैं या नहीं। अतः हम उन्हें अपनी आर्ति का प्रकाशन करने देंगे।" यह सोचकर भगवान चुप रह गये। इससे आळ्वार की आर्ति बहुत बढ गयी, और यही प्रकृत गाथा के द्वारा प्रकाशित की जा रही है। इसमें यह स्पष्ट प्रार्थना दीख पड़ती है कि [मुझ पापी पर ऐसी कृपा कीजिए, जिससे मैं आपके मधु बहनेवाले श्रीपाद प्राप्त करूं।] पहला संबोधन है—महालक्ष्मी से विभूषित वक्षवाले माधव! श्री पांचरात्र शास्त्र कहता है कि पुरुषकार (माने सिफारिश) करना लक्ष्मीजी का काम है; अतः उनके द्वारा भगवत्संनिधि जानेवालों की इच्छा अवश्य ही सफल होगी। अब उनके नेत्रसौंदर्य का वर्णन करनेवाले आळ्वार उनका कटाक्ष पाना चाहते हैं। "हरिननेत्र" इत्यादि लंबे शब्दसंदर्भ से कथित अर्थ का संग्रह माधव शब्द से किया गया है।

दूसरे पाद में कुबडी पर भगवान से कृत अनुग्रह का वर्णन करते हुए आळ्वार इस अपनी प्रार्थना की सूचना करते हैं कि, "हे प्रभो! आप कृपया मुझ नीच पर भी ऐसी कृपा कीजिए।" कुबडी की कथा कृष्णावतार में प्रसिद्ध है—अक्रूर के द्वारा कंस से बुलाए जाने पर श्री कृष्ण व बलदेव, व्रज से निकल कर मथुरा पधारकर राजवीथी से होकर कंस के महल की ओर बढते थे। तब नैकवक्रा नामक एक कुबडी, कंस के लिए तैयार सुखंड इत्यादि सुगंध द्रव्य लेती हुई सामने आयी। श्री कृष्ण ने उससे अपने दोनों के अनुरूप चंदन मांगा। श्री कृष्ण के रूप में मोहित कुब्जा ने तो दोनों भाइयों के दिव्यमंगल विग्रह पर मनोहर चंदन लीप दिया। इससे प्रसन्न श्री कृष्ण ने, उसके जन्म के साथी कूबड को ठीक कर दिया। यह कथा श्री भागवत, श्री विष्णुपुराण इत्यादि अनेक ग्रंथों में उपवर्णित है। श्री विष्णुपुराण पांचवें अंश के बीसवें अध्याय के प्रारंभ में इस प्रसंग के कतिपय श्लोक श्री कृष्ण के शीलगुण का मनोहर वर्णन करते हैं। संस्कृत टीका में "ततस्तां चुबुके शौरिः" इत्यादि कितने पद्य लिखित हैं। उनका यह अर्थ है—फिर, सीधा करने की विद्या में निपुण श्री कृष्ण ने दो अंगुलियों से उस कुबडी को चिबुक के सहारे उठाकर और पैर दबाकर उसको सीधी और सुंदरी बना दिया। तब प्रेमपरवश उस सुंदरी ने श्री कृष्ण का वस्त्र पकडकर उनसे कहा कि, "चलो मेरे घर।" यह सुनकर श्री कृष्ण ने मंदहास पूर्वक यह आश्वासन दिया कि, "मैं अवश्य तुम्हारे घर आऊंगा," और उसे विदा किया। फिर वे श्री बलदेव का मुख देखकर खूब हँस पडे।

श्री रामचंद्रजी के दिव्यचरित्र में कुब्जा की एक कथा आती है, जिसका भी वर्णन प्रकृतगाथा-व्याख्यान में आचार्यों से किया गया है। श्रीरामायण में प्रसिद्ध कुब्जा मंथरा है न? उसकी यह कथा है। उसपर भगवान ने कृपा नहीं की। परंतु श्री रामचंद्रजी ने बचपन में हाथ में लीलाधनुष रख कर खेलते हुए,

उससे एक दिन अचानक मंथरा के कूबडपर मिट्टी की गोली चलायी। इससे वह कुबडी श्रीरामचंद्रजी के साथ बहुत कुपित हो गयी। उसने सोचा, "राजकुमार होने के गर्व से यह राम मेरी हँसी उडाता हुआ यह काम कर रहा है। अब इसकी चलती है। अस्तु। योग्य समय पाकर मैं इसका बदला लूंगी।" वर्षों के बाद उसने ठीक अवसर पाया, और कैकेयी की आड़ में उसके द्वारा श्रीरामचंद्रजी के राज्याभिषेक उत्सव में विघ्न डाल दिया। यद्यपि यह कथा वाल्मीकि रामायण में उपवर्णित नहीं; तथापि दूसरे ग्रंथों में इसका उल्लेख है। प्रकृत गाथास्थ द्राविड शब्दों का यह भी अर्थ हो सकता है कि, "हे लीलाधनुष से कुब्जा के कूबड पर मारनेवाले गोविंद!" अतः इस प्रकरण में आचार्य इस कथा का भी वर्णन करते हैं। परंतु इस प्रकरण में गोविंद शब्द सुनने से शंका होगी कि यह श्रीकृष्ण का ही चरित्र हो सकता है; न तु श्रीरामचंद्र का; क्यों कि उनका गोविंद नाम नहीं होता। परंतु यह कोई बडी बात नहीं। क्यों कि यह गोविंद शब्द भगवान का अनादि नाम है; श्रीकृष्णावतार में इसकी विशेष प्रसिद्धि हुई, इतनी ही बात है। गोविंद शब्द का अर्थ होता है भूपाल, जो श्रीरामचंद्र पर भी ठीक लगता है। गोविंद शब्द का अर्थ कृष्ण ही मान कर भी आचार्य एक अद्भुत समाधान बतलाते हैं—चूंकि कुचेष्टा करने की प्रसिद्धि श्रीकृष्ण की है, नतु श्रीराम की, अतः आळ्वार श्रीरामकृत चेष्टा को श्रीकृष्ण पर लाद देते हैं। इस विषय के दृष्टांत के रूपमें एक द्राविडी कहावत है—"पोम्बळियेल्लाम् अमणन् तलैयोडे।" माने सभी अपराध अवधूत साधु पर लगाये जाते हैं। अन्यायधन्य नामक राजाके नगर में एक चोर ने किसीके मकान में चोरी करने के उद्देश्य से दीवार में सेंध लगायी थी। दीवार गीली थी, अतः वह गिर गयी और चोर उसके नीचे दब कर मर गया। प्रातःकाल होने पर चोर के पत्नी पुत्रादि को इस बात की खबर मिली और उन्होंने उस मकान के स्वामी को राजा के पास लेकर उस पर (चोर की) हत्या करने का अभियोग किया। राजा ने उससे कहा. "तुम्हारी दीवार गीली थी, अतः बेचारा यह चोर मर गया; अतः यह तुम्हारा अपराध हुआ जिसके लिए अब तुम्हें दंड भोगना पडेगा।" गृहस्थ ने उत्तर दिया कि, "सरकार! यह तो दीवार बनानेवाले राज का दोष है, मेरा नहीं।" राजा ने राज को बुलाकर सुदृढ दीवार न बनाने के कारण उसे दंड देने की धमकी दी। उसने कहा, "मिट्टी से पानी मिलानेवाले नौकर ने अधिक पानी लगाया; फलतः मिट्टी पतली हो गयी और दीवार गिर गयी। अतः यह अपराध उस नौकर का है।" फिर नौकर बुलाया गया। उसने कहा कि "कुम्हार ने मुझे बडा घड़ा दिया, जिससे पानी मापसे अधिक हुआ।" कुम्हार ने कहा, "मैं तो प्रमाण के अनुसार ही घडा बनानेवाला था; परंतु ठीक उसी समय मेरे घरके सामने से एक वेश्या निकली; मेरा ध्यान उस पर गया और फलतः घडा बड़ा हो गया।" तब वेश्याको बुलाने मे आया। उसने अरज की, "मैंने धोबी को अपना कपडा दिया था। उसने ठीक समय पर उसे नहीं लौटाया। अतः मुझे उसके घर जाना पडा। मैं वहां जाती थी। मुझे इस कुम्हार की चिंता थोडी थी!" फिर धोबी की बारी आयी। उसने विनती की, "प्रभो! मैं कभी कपडा लौटाने में विलंब नहीं करता। परंतु उस दिन के बारे में मैं क्या कहूं? मैं तो बडे सवेरे ही उठकर कपडा लेकर घाट पर गया। परंतु कपडा धोने के पत्थर पर एक अवधूत साधु बैठा था, जो बहुत प्रयत्न करने पर भी उठा नहीं। फलतः मुझे कपडा धोये बिना ही घर लौटना पडा।" फिर राजा की आज्ञा से सेवकों ने बहुत प्रयत्न से उस साधुको ढूंढ कर राजा के पास लाया। राजा ने उससे पूछा, "तुमने क्यों कर पत्थर पर बैठकर इस धोबी को अपना काम करने नहीं

दिया ?" साधु तो एक दम मौनी था और शायद विदेशी भी। जो भी हो। वह चुप रह गया। तब राजाने सोचा, "दूसरे सभीने सकारण अपने को निर्दोष बताया; परंतु यह साधु अपना मुख खोलता नहीं। इसका कारण यही होगा कि यह अपने को दोषी ही मान रहा है।" यह सोचकर उसने साधु को सूली पर चढाने की आज्ञा दी। तबसे यह कहावत बनी कि सभी अपराध अवधूत साधु पर लगाये जाते हैं। इसी न्याय से हाल में श्रीरामचंद्र का अपराध श्रीकृष्ण पर लगाया जा रहा है। तथा च यह तात्पर्य हुआ, "हे अपने पिछले अवतार में (श्रीरामावतार में) कूबडी मंथरा के कूबड पर गोली चलानेवाले श्रीकृष्ण!" बाकी सब स्पष्ट है ॥ .... (५)

(गाथा.) विनैयेन् विनैतीर् मरुन्दानाय् विण्णोर् तलैवा केशवा *
मनैशेरायर् कुलमुदले मामायने माधवा *
शिनैयेय् तलैय मरामरङ्गळ् एळुमेय्दाय् शिरीदरा *
इनैयाय् इनैयपेयरिनाय् एन्नु नैवन् अडियेने ॥ ६ ॥

पापिनो मम पापनिर्वर्हणदिव्यौषधभूत! नित्यसूरिनाथ! केशव! कुब्जकुटीरवास्तव्यगोपाल-कुलप्रधानभूत! अद्भुतगुणचेष्टितशालिन्! माधव! (राघवत्वे) शाखाविटपसंभृतां सप्तसालीं निष्पत्रीकृतवन्! भगवन् श्रीधर! विलक्षणस्वरूपविशिष्ट! विलक्षणदिव्यनामाढ्य! इत्याक्रन्दन् द्रवीभूतहृदयोऽस्मि हन्त! ॥

इयं गाथा पूर्वगाथाशेषभूता। पूर्वस्यां गाथायामिव अस्यामपि भगवत्कृपा प्रार्थ्यत इति यावत्। भगवत्कृपाप्रार्थनायां गाथायामस्यां मुक्तकण्ठमनुक्तत्वेऽपि पूर्वगाथातोऽनुपज्ञनीयता माशेरते श्रीकुरुकेशाचार्याः। मुनिवरो वैमुख्यविदूरग आभिमुख्यसन्निकृष्टो भूत्वाऽपि स्वस्मिन् भगवदाभिमुख्यमनवलोकयन् भगवन्तं बहुधा संबोध्य क्रन्दति। [पापिनो मम पापनिर्वर्हणदिव्यौषधभूत!] इत्येतत्संबोधनं प्रकृतपरिस्थित्यनुगुणमजनि। यं खलु भगवत्संश्लेषं महान्तस्सुकृतिनः कामयन्ते, सुमहत्तरतपःफलं च मन्यन्ते, तत्र वैमुख्यं यदजनि मम, तदेतत् पापफलं खलु; एतादृशपापभूयिष्ठस्य मम स्वकीयसौशील्यगुणप्रदर्शनेन यदाभिमुख्यमुत्पादितम्, तदेतत् सहस्र-नाममध्ये * निर्वाणं भेषजं भिषक् * इति भेषजत्वेन भिषक्त्वेन च व्यपदेशानुगुणमेवेत्युच्यत इव। परमकृपया मम स्वाभिमुख्यसमुत्पादक भगवन्! इत्युक्तं भवति। [नित्यसूरिनाथ!] दिव्ये धाम्नि नित्यानुभवनिरतानां मुक्तानां नित्यानां च एतादृशपापसंभवप्रसक्तिर्नास्ति खलु इति सानन्दमुच्यत इव। एतादृशमेवाभिप्रायं व्यनक्ति संबोधनमिदम्। [केशव!] भगवते केशवनामधेयं पार्वतीपतिना वितीर्णमिति हरिवंशतोऽवगम्यते। * क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्। आवां तवाङ्गे संभूतौ तस्मात्केशवनामवान् ॥ * इतीदं हरवचनमिहानु-सन्धेयम्। प्रशस्तकेश इत्यप्यर्थः। कृष्णावतारे कंसप्रेरितकेशिनामक [वाजिवेषधर] दैत्यहन्ता—इत्यप्यर्थः। * नरके पच्यमानस्तु यमेन परिभाषितः। किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ? ॥ * इतीदं यमवचनं केशवनाम्नः सर्वोत्तुङ्गतां हि संप्रकाशयति।

[कुब्जकुटीरवास्तव्य गोपालकुलप्रधानभूत!] कुब्जकुटीरवास्तव्यत्वविशेषणम् गोपालानामिव गोपालकुलप्रधानभूतस्य भगवतोऽपि सुघटम्। वस्तुतो गोपालाश्च गोपालचूडामणिश्च कुब्जकुटीरवासेनैव खलु

क्षपितकालाः। द्वारकाप्राप्तिसमनन्तरमेव खलु वासुदेवस्य प्रासादप्राकारादिपरिवृतरम्यहर्म्यनिवासलाभः। [अद्भुतगुणचेष्टितशालिन्!] व्रजान्निस्सृत्य मथुरादिस्थलविशेषेष्वपि यद्यपि कृष्णः प्राकाशयदद्भुतगुणचेष्टित-विशेषान्, तथाऽपि व्रजे प्रकाशितानां तेषां कोटितमीमपि कलां नार्हन्ति ते, इति यशोदास्तनन्धयकिशोरगुण-विद्धानां रसिकमणीनां व्याहारः। [माधव!] व्रजे एवं विहर्ता परात्परो लक्ष्मीपतिरेव ननु इत्युक्तं भवति। [शाखाविटपसंभृतां सप्तसालीं निष्पत्रीकृतवन्!] इति संबोधनं भक्तानां विश्वसनीयत्व प्रतिपादने पर्यवस्यति। यदा सुग्रीवो महाराजो वालिनो विश्वातिशायि विक्रमातिशयं मुहुर्मुहु रनुसंदधे, तदा भस्मच्छन्नानलनिभस्य राघवस्य विक्रमभूम्नि संदेहग्रस्तचित्तो बभूव, तदा राघवस्तद्विश्वासदार्ढ्यसम्पादनार्थं सप्तसालीविभेदनमकार्षीदिति श्रीरामायण कथा प्रथिता। यदाहुः श्रीवत्साङ्कमिश्रा अतिमानुषस्तवे—* सालान् हि सप्त सगिरीन् सरसातलान् यान् एकेषुमन्दजवतो निरपत्रयस्त्वम् * इत्यादि। कथाया अस्या अत्रानुसन्धानमत्यन्तमुचितम्। तथाहि। सुग्रीवो यदा स्वविक्रमे संदेग्धिस्म, तदा तदीय संदेहापनोदनं राघवस्य किमावश्यकम्? नैवावश्यकम्। संदेग्धु कामं सः। तावता स्वस्य का क्षतिर्नाम? न काऽपि क्षतिः। तथाऽपि आश्रितस्य तस्य कथञ्चिदपि परित्यागो न कर्तव्य इति धियैव खलु तत्संदेहनिरसने प्रववृते। एवं प्रकृतेऽपि शठकोपमुनिः स्वकीयायोग्यतानुसन्धानेन यदि विमुखो भवति, एतेन भगवतः का हानिः? नैव काऽपि हानिः। पारेपरार्धं हि जना भगवन्तं नमन्ति नुवन्ति च। क्वचन तिंत्रिणीकोटरे निविष्टस्यास्य मुनेः स्वाभिमुख्य समुत्पादनार्थं प्रयासलेशोऽपि न स्वङ्गरीकार्यो भगवता। तथाऽपि भक्ताग्रेसरस्यास्य कथञ्चिदपि प्रहाणं मा स्म भूदिति मनीषयैव खलु भगवानेतस्य स्वस्मिन्ना-भिमुख्यसंपादनार्थं सुबहु प्रयस्यति। तदेतत्सम्यगवगच्छन् मुनिवरः 'भगवत इयं चिरंतनी प्रकृतिः' इति कथ-यन्निव सप्तसालीभेदनकथामिह प्रास्तौषीदिति। निष्पत्रीकरणं नाम पर्यायतो विभेदनमेव। [श्रीधर!] सप्तसालभेदनकालिकवीरश्रीरिह विवक्षितेत्याचार्याः। माधवशब्देन पौनरुक्त्यं माभूदिति। अवशिष्टं स्पष्टम्॥

—* छठी गाथा—विनैयेन् विनैतीर्मरुन्दानाय् *—

"हे मुझ पापी के पाप मिटानेवाले दिव्य औषध स्वरूपिन्! हे नित्यसूरियों के नाथ! हे केशव! हे निकुंजकुटीर निवासी गोपकुल के प्रधान! हे अत्यद्भुत गुणचेष्टित विभूषित! हे माधव! हे (श्री रामावतार में शाखाओं व पल्लवों से भरित सात सालवृक्षों का भेदन करनेवाले! हे श्रीधर! हे ऐसे विलक्षण स्वरूपवाले! हे विलक्षण शुभनामविभूषित!" यों पुकारता हुआ मैं द्रुतहृदय हो रहा हूं॥

यह गाथा पिछली गाथा का शेषभूत (माने उसीसे संबद्ध) है। अर्थात् उसकी भांति इसमें भी भगवान की कृपा माँगी जा रही है। यद्यपि इसमें इस बात का प्रकाशक स्पष्ट शब्द नहीं है; तथापि श्री कुरुकेशस्वामीजी कहते हैं कि पूर्वगाथास्थ प्रार्थना-वचन की ही इसमें भी अनुवृत्ति करनी चाहिए। आळ्वार भगवान से वैमुख्य छोड कर अभिमुख-जैसे होकर, अपने विषय में भगवान का आभिमुख्य न देखते हुए, खिन्न होकर नानाविध संबोधनों से उनकी स्तुति करते हुए उनको पुकारते हैं, प्रकृत गाथा से। आळ्वार की वर्तमान दशा के अनुगुणतया यह पहला संबोधन किया गया है—[हे मुझ पापी के पाप मिटानेवाले दिव्य औषधस्वरूपिन्!] ज्ञानी महात्मा लोग जिस भगवत्संश्लेष को सदा माँगते हैं और

महान पुण्य का फल मानते हैं, उसीसे मैं (आळ्वार) विमुख हुआ न? अवश्य ही यह प्रवल पाप का फल है। अब भगवान ने अपने सौशील्यगुण का प्रकाशन करते हुए मेरा यह पाप मिटाकर मुझको अपना अभिमुख बना दिया। अतः उनको औषध पुकारना उचित है। श्रीविष्णुसहस्रनाम में भी आपके शुभ नाम गाये हुए हैं—"निर्वाणं भेषजं भिषक्" (अर्थात् रोगनिवृत्ति का आनंद, औषध और वैद्यराज सभी भगवान हैं)। तथा च प्रकृत संबोधन का यह तात्पर्य हुआ कि 'असीम कृपा से मेरा वैमुख्य दूर कर मुझे अपना अभिमुख बनानेवाले हे भगवन्!' [हे नित्यसूरियों के नाथ!] इससे परमपद निवासी नित्यमुक्तों के भाग्य की स्तुति सानंद की जाती है, जिन्हें एसे पाप की प्रसक्ति नहीं; अर्थात् जो कभी भगवान से विश्लिष्ट हुए विना नित्यसंश्लेष पा रहे हैं। इसी भाव का सूचक हैं आगे का यह भी संवोधन—[केशव।] हरिवंश में भगवान के इस शुभ नाम का अर्थ शिवजी से यों उपवर्णित है—"क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्। आवां तवाङ्गे संभूतौ तस्मात्केशवनामवान्॥" इसका यह तात्पर्य है—चतुर्मुखब्रह्मा का नाम है—'क'; शिवजी का नाम है 'ईश'। ये दोनों देव भगवान के श्रीविग्रह से उत्पन्न हैं; अतः उनका नाम हुआ—केशव। इस नाम का दूसरा यह भी अर्थ होगा कि प्रशस्त माने अति श्रेष्ठ व मनोहर केशवाले। अथवा यह भी अर्थ होगा कि श्रीकृष्णावतार में कंसप्रेरित केशिनामक असुर का (जो कि घोडे के रूप में व्रज आया था) संहार करनेवाले। भगवान का यह अत्यंत श्रेष्ठ नाम माना जाता है। क्यों कि यमराज का यह प्रसिद्ध वचन है—"किं त्वया नार्चितो देवः केशवः क्लेशनाशनः।" इसका यह तात्पर्य है—नरक में दुःख भोगनेवाले चेतन से यमराज ने पूछा कि "क्या तुमने दुःखनाशक केशव का कीर्तन नहीं किया?"

[हे निकुंजकुटीरनिवासी गोप कुल के प्रधान!] यह विशेषण कि 'निकुंजकुटीनिवासी' गोपों तथा उनके प्रधान श्रीकृष्ण को भी लगता है। क्यों कि दोनों ही निकुंज व कुटीर में वास करते थे। श्रीद्वारका पहुंचने के बाद ही श्रीकृष्ण प्रासाद में रहने लगे। [हे अत्यद्भुत गुण चेष्टित विभूषित!] यद्यपि व्रज छोडने के बाद मथुरादि अनेक स्थलों में भी भगवान ने अपने अनेक अद्भुत गुण चेष्टितों का प्रकाशन किया; तथापि रसिकों का यह सिद्धांत है कि ये सभी यशोदास्तनंधय बालकृष्ण के गुणचेष्टितों के एक कोटितम भाग के भी समान नहीं। [हे श्रीधर!] इस संबोधन का यह भाव है कि व्रज में ऐसी विलक्षण लीला करनेवाले, ये व्यक्ति साक्षात् लक्ष्मीपति भगवान हैं। [शाखाओं व पल्लवों से भरित सात साल वृक्षों का भेदन करनेवाले!] इस संबोधन का यह भाव है कि भगवान भक्तों के मन में अपने विषयक विश्वास समुत्पन्न करते हैं। जब कि सुग्रीव महाराजा वालि के असदृश पराक्रम का बारंबार चिंतन करता हुआ और भस्मच्छन्नानल के सदृश श्रीरामचंद्र भगवान के पराक्रम से अपरिचित होने के कारण उसमें शंका करता हुआ अत्यंत दुःखी हुआ किया, तब श्रीरामचंद्रजी ने एक तीर छोडकर उससे सात सालवृक्षों का भेदन कर डाला; जिससे सुग्रीव के मन में यह विश्वास उत्पन्न हुआ कि अवश्य ही ये महापुरुष वाली का संहार कर सकेंगे। हाल में इस कथा का अनुसंधान करना अत्यंत उचित हैं। तथाहि—जब सुग्रीव ने श्रीरामचंद्रजी के सामर्थ्य में शंका की, तब उन्हें वह शंका दूर करने की खास आवश्यकता नहीं थी। क्यों कि सुग्रीव के शंका करने से श्रीरामचंद्रजी की कोई भी हानि नहीं पहुंचती

थी। तथापि अपने आश्रित की उपेक्षा करना अनुचित मान कर ही उन्होंने उसे विश्वास दिलाने का प्रयत्न किया। हाल में आळ्वार के विषय में भी यही न्याय लगता है। तथाहि—अयोग्यता का अनुसंधान करते हुए श्री शठकोपस्वामीजी के निकल जाने से भगवान की कोई हानि नहीं होगी; उनके सिवा भी अनंत भक्त जन भगवान से मिलकर उनकी स्तुति व सेवा करते ही हैं। अतः इस विशाल पृथ्वीतल के किसी एक कोने में इमली के पेड के नीचे एक कोटर में बैठ कर प्रलाप करनेवाले आळ्वार को अपने वश करने की चेष्टा करना भगवान के लिए आवश्यक नहीं है। तथापि भक्ताग्रेसर इनको छोड देने के अनिच्छुक होकर ही भगवान इनको अपने अभिमुख बनाने के लिए विशेष प्रयत्न कर रहे हैं। अतः शायद यह अर्थ बताने के उद्देश्य से ही, "अपने भक्तों को अपने विषय में विश्वास दिलाना भगवान का अनादि स्वभाव है" अब आळ्वार दृष्टांत रूप से इस सप्तसालभंजनवृत्तांत का वर्णन कर रहे हैं। [श्रीधर] शब्द से उक्त सप्तसालभंजन के समय की भगवान की वीरश्री सूचित की जाती है। अतः माधवशब्द से इसकी पुनरुक्ति नहीं होगी। बाकी सब स्पष्ट है॥ .... (६)

(गाथा.) अडियेन् शिरिय नानच्चन् अरिद लार्क्कु मरियानै *
कडिशेर् तण्णन्तुळाय् कण्णिपुनैन्दान्तनै कण्णनै *
शेडिया राक्कै यडियारै शेर्दल् तीर्क्कुम् तिरुमालै *
अडियेन् काण्वा नलत्तुवन् इदनिल् मिक्को रयर्वुण्डे ॥ ७ ॥

अल्पीयसा ज्ञानेन युक्तोऽहं महाज्ञाननिधीनामपि दुरवबोधम् सुरभिशिशिररमणीयतुलसी-स्रग्विभूषितम् कृष्णसमाख्यासनाथम् दासभूतानां जनानां संसारमहारण्यानुबन्धिशरीरसङ्ग-विच्छेत्तारं च श्रियःपतिं सेवितुकामः खलु हन्त! क्रन्दामि! हे! इतोऽधिकः कश्चिदस्ति कोऽप्यविवेको नाम॥

पुनरपि मुनिसार्वभौमस्य अयोग्यतानुसन्धानतोऽपसरणेच्छा समुन्मिषति गाथायामस्याम्। भवभूति-महाकविप्रणीतोत्तररामचरितश्लोकविशेषोऽत्र स्मृतिपथमुपयाति। * हाहा धिक् परगृहवासदूषणं यत् वैदेह्याः प्रशमितमद्भुतैरुपायैः। एतत्तत्पुनरपि दैवदुर्विपाकादालर्कं विषमिव सर्वतः प्रसृतम्॥ * इति। [आलर्कं विषम्—उन्मत्तशुनकदंशजनितं विषमित्यर्थः। तत् उपायविशेषतः कदाचित्प्रशमितमपि कालान्तरे पुनः प्रसर्पतीति प्रसिद्धमेतत्।] एवमेव मुनिवरस्यास्य अनर्हतानुसन्धानपूर्वक मपसर्पणरुचिरुत्पन्ना भगवता कथञ्चित्प्रशमिताऽपि सती भगवत एव भाग्येन पुनरुन्मिषति। किं नामात्र भगवतो भाग्यमिति चेत्, पुनरस्य स्वामिमुख्य-सम्पादनार्थं समनन्तरगाथाया मद्भुतोपायप्रदर्शने या प्रवृत्तिरवलोक्यते सैव सत्यं सुमहत्तरं भाग्यं भगवतः। स्वस्य अल्पिष्ठज्ञानयुक्तत्वं भगवतो महाज्ञाननिधीनामपि दुरवबोधत्वं च यदत्रानुसन्धीयते तदेव अपसरणकामना-बीजं मन्तव्यम्। लोकेऽपि महाज्ञाननिधिं विपश्चिदपश्चिमं कञ्चन महापुरुषं यदि कोऽप्यज्ञो वराकः स्तोतुं प्रवर्तेत, तर्हि स गर्हणीयो भवतीति पश्यामः। भगवान् यामुनार्योऽपि * तत्वेन यस्य महिमार्णवशीकराणुः शक्यो न मातुमपि शर्वपितामहाद्यैः। कर्तुं तदीयमहिमस्तुतिमुद्यताय मह्यं नमोऽस्तु कवये निरपत्रपाय॥ * इति ह्यनुसमधत्त। तदप्येतद्गाथामूलकमेव। गाथया अस्या उपक्रमे "अडियेन्" इति पदं विराजते। दासोऽहमिति तदर्थः।

भगवतो विषये दास्यकरणं ममानर्हमिति कथयतोऽपसिसीर्षतश्चास्य मुनिवरस्य मुखात् अधुना दासोऽहमिति वाणी कथं नुस्रवति ? प्रथमपादोपक्रम इव चरमपादोपक्रमेऽपि हि "अडियेन्" इति पदं विराजते ; सर्वथाऽप्यस्थाने निविष्टं ह्येतदित्याशङ्कामुद्भाव्य द्वेधा समादधते पूर्वाचार्याः ;—अडियेनिति दास्यरुच्या नोच्यते, अपि तु वासना-बलादुच्यत इत्येकस्समाहितिप्रकारः। अथापरः—ज्ञानानन्दवत् शेषत्वस्यापि निरूपकधर्मत्वेन प्रतिपत्त्या कथित-मिति। अहमित्युक्तिपर्याय एवेति फलितम्। अथ [सुरभिशिशिर रमणीयतुलसीस्रग्विभूषितम्] इत्येतद्वि-शेषणम् महाज्ञाननिधीनामपि दुरवबोधत्वस्य (अधस्तादुक्तस्य) विवरणात्मकं मन्तव्यम्। परात्परस्यैव हि लक्षणं तुलसीस्रग्विभूषितत्वम्। उपरितनान्यपि विशेषणानि परत्वैकान्तिकत्वप्रतिपत्त्यैव प्रयुक्तानीत्यवगन्तव्यम्।

तृतीयपादे तु कश्चिदस्ति विशेषः। "दासभूतानां जनानां शरीरसङ्गविच्छेत्तारम्" इत्येतद्वि-शेषणम् कैवल्यार्थिनामपि विषये अनुग्रहशीलत्वं यदस्ति भगवतः, तत् प्रतिपादयतीत्याचार्या व्याचक्षते। गीता-याम् * जरामरणमोक्षाय मामाश्रित्य यतन्ति ये * इतिश्लोकतो निर्दिष्टा अधिकारिणः स्वात्मानुभवमात्रेप्सवः कैवल्यार्थिनः कथ्यन्ते। एते हि केवलं पुनर्जन्म माभूदिति कामयमाना भगवदनुभवनिस्पृहाश्च। एतादृशा अधिकारिणो यद्यपि मुनिवरस्यास्य दूष्यकोटिप्रविष्टाः, तथाऽपि तानिदानीं प्रशंसति मुनिः। कुतः ? ते भगवन्त-मुपसृत्य न दूषयन्ति खलु तम् इति धिया। ते तावदिह "दासभूतानां जनानाम्" इति दासजनत्वेन कथं निर्दिश्यन्ते ? इति पूर्वाचार्या आशङ्कामुद्भाव्य समादधत एवम् ;—"सत्यं त एव दासभूता इति शठकोप-मुनेर्मतिः ; शेष्यतिशयाधाननिरता ये त एव हि दासाः ; केवलास्तावत् भगवन्तमुपसृत्य तस्यावद्यमनुत्पादयन्तो दूरतोऽवतिष्ठन्त इति हेतुना तान् मुनिवरो मन्यते भगवदतिशयाधायकान्। प्रकरणानुगुणमिदं भाषणं रस्यं रसिकानाम्। अन्ततः [हे ! इतोऽधिकः कश्चिदस्ति कोऽप्यविवेकः !] इत्यत्र आचार्या अनुगृह्णन्ति—यदाऽहं संसृतिचक्रस्थो जन्मपरम्परासु भ्राम्यन्नवर्तिषि, तदा मम बहव आसन्नविवेकाः ; ते हि श्लाघ्यतमा इति मन्ये ; यतस्तदा भगवन्तमुपसृप्य तस्यावद्यसम्पादने न प्रावर्तिषि इति मुनिवरस्य हृदयमिति। एतदपि प्रकरणानु-गुणं सुशोभनम्॥ .... (७)

—* सातवीं गाथा—अडियेन् शिरिय ज्ञानत्तन् *—

अत्यल्प ज्ञानवान् यह दास (मैं) बडे बडे ज्ञानियों से जानने के अशक्य, सुगंधयुत सुशीतल व मनोहर तुलसीमालाधारी, 'श्रीकृष्ण' शुभ नामवाले, और अपने भक्तों के संसाररूपी महारण्य से संबद्ध शरीर संबंध छुडानेवाले लक्ष्मीपति का सेवन करना चाहता हुआ पुकार रहा है (रहा हूं)। हाय ! क्या इससे भी अधिक कोई अविवेक हो सकता है ?

इस गाथा में आळ्वार, फिर भी नैच्यानुसंधान करते हुए भगवान से पीछे हटना चाहते हैं। इस विषय में भवभूति महाकवि विरचित "उत्तररामचरित" नाटक का यह पद्य दृष्टांत होता है—हा हा धिक् परगृहवासदूषणं यत् वैदेह्याः प्रशमित मद्भुतैरुपायैः। एतत्तत्पुनरपि दैवदुर्विपाकात् आलर्कं विषमिव सर्वतः प्रसृप्तम्॥ यह श्रीरामचंद्रजी का वचन है। इसका यह तात्पर्य है—रावण से अपहृत जानकी जी को परगृहवासप्रयुक्त अपवाद जो लगा था, वह, अग्निप्रवेशादि अत्यद्भुतोपायों से उस समय दूर किया गया था ; परंतु कई वर्षों के बाद वही अपवाद पागल कुत्ते के विषकी भांति धोवी के वचनरूप से फिर

सिर उठा रहा है। यह तो अनुभवसिद्ध विषय है कि पागल कुत्ते के डसने का विष, उपचार करने पर तत्काल शांत दीखता हुआ भी कुछ समय के बाद फिर अपना सिर उठाकर दुःख देने लगता है। इसी प्रकार, आळ्वार के समुत्पन्न विमुखता, जो भगवान से प्रयत्नपूर्वक मिटायी गयी थी, वह हाल में मानों भगवान के भाग्य से फिर भी उत्पन्न हुई। तथाहि—आळ्वार के समुत्पन्न यह रोग मिटाने के लिए भगवान आगे की गाथा में एक अत्यद्भुत उपाय करनेवाले हैं, जिससे उनके गुण बहुत प्रकाशित होंगे। यही भगवान का भाग्य है कि उनके सुंदर गुणों का प्रकाशन होना। अस्तु। हाल में फिर भी आळ्वार के लौटने का कारण यही है कि उन्होंने ऐसा विचार किया कि, मैं तो अत्यल्प ज्ञानवान हूं और भगवान महा ज्ञानियों के भी ठीक समझने में अशक्य हैं। लोकव्यवहार में भी हम देख रहे हैं कि यदि कोई मूर्ख, महाज्ञाननिधि पंडितश्रेष्ठ की स्तुति करेगा, तो इससे उस पंडित का अपयश ही होगा। अत एव श्री यामुनाचार्य स्वामीजी ने स्तोत्ररत्न में, महामहिम भगवान की स्तुति करने में उतरना चाहनेवाले अपना धिक्कार किया, "तत्वेन यस्य महिमार्णवशीकराणुः" इत्यादि (७-वीं) पद्य से। पद्य का यह तात्पर्य है—जिन भगवान की महिमारूपी सागर के एक बिंदु के भी ठीक नापने में ब्रह्मा, शिव इत्यादि बडे बडे ज्ञानी लोग भी अशक्त होते हैं; ऐसे महामहिम की स्तुति करने में उद्युक्त मुझ लज्जाहीन को नमस्कार (माने धिक्कार) हो। समझना चाहिए कि इस पद्य का मूल, आळ्वार की प्रकृत गाथा है। अस्तु। इस गाथा में पहले तथा चौथे पाद के प्रारंभ में "अडियेन्" शब्द प्रयुक्त है; इसका अर्थ है—दास मैं। भगवद्दास्य को अनुचित मान कर उससे दूर भाग जाना चाहनेवाले आळ्वार के श्रीमुख से दो बार इस अडियेन् शब्द का प्रयुक्त होना कुछ विचित्र-सा प्रतीत होगा। पूर्वाचार्य इसके दो समाधान देते हैं—(१) हाल में आळ्वार इस शब्द के अर्थ पर ध्यान दिये बिना ही अभ्यासबल से यह कह रहे हैं; अर्थात् आळ्वार को 'मैं' कहने की जगह 'अडियेन्' कहने की आदत पड गयी है, जिसे रोकना अशक्य है। (२) आळ्वार का यह अभिप्राय है कि ज्ञान व आनंद की भांति भगवद्दास्य भी आत्मा का असाधारण निरूपक धर्म है; अतः चित्, चेतन इत्यादि शब्दों की भांति अडियेन् शब्द भी आत्मा का पर्याय है। तथा च अडियेन् शब्द का अर्थ आत्मा अथवा 'मैं' है। [सुगंधयुत, सुशीतल व मनोहर तुलसीमाला-धारी] कहने से पूर्वोक्त इस अर्थ का विवरण किया जा रहा है कि भगवान विशेषज्ञानियों से भी ठीक नहीं समझे जा सकते। क्योंकि तुलसीमाला परात्पर वस्तु का असाधारण लक्षण है। इसी प्रकार आगे के विशेषण भी परत्व के सूचक होने की भावना से ही प्रयुक्त हैं।

तीसरे पाद में एक विशेषता है। आचार्यों का अभिप्राय है कि वहां के इस विशेषण से, कि [अपने भक्तों के संसाररूपी महारण्य से संबद्ध शरीरसंबंध छुडानेवाले,] भगवान के उस स्वभाव का वर्णन किया जा रहा है जिससे वे कैवल्य मांगनेवालों पर भी अनुग्रह करते हैं। कैवल्य शब्द का अर्थ है भगवदनुभव से विरहित, जीवात्मा का स्वात्मानुभवमात्र। अर्थात् शास्त्र बताता है कि यह जीव भी असीम आनंदरूपी है, जो स्वरूप संसार दशा में कर्म के निमित्त तिरोहित है, और उसके सर्वथा नष्ट हो जाने पर प्रकाशित होता है। अतः कितने लोग संसार को पार कर इस आत्मानुभवमात्र पाना चाहते हैं। इन्हीका नाम केवल है। भगवद्गीता में "जरामरणमोक्षाय मामाश्रित्य यतन्ति ये" इत्यादि पद्य से इनका वर्णन किया गया है। भगवदनुभव करने की इच्छा से विरहित केवल पुनर्जन्मनिवृत्ति के इच्छुक इन जनों की यद्यपि

आल्वार निंदा ही करते हैं। तथापि हाल में आप इनकी स्तुति कर रहे हैं। आल्वार इन पर अब इस लिए प्रसन्न हैं कि ये लोग भगवान से मिलकर उन्हें दूषित नहीं करते। उन्हें भक्त पुकारने का भी एक रसमय कारण आचार्यों से बताया जाता है। तथाहि—आल्वार के प्रकृत अभिप्राय से ये केवल ही वास्तव में भगवान के सच्चे भक्त हैं। क्यों कि वही भक्त कहलाता है जो अपने स्वामी का मान बढाता है। केवल तो भगवान से मिलकर उन्हें अवद्य पहुंचाने के काम से सुदूर रहते हैं। अतः आल्वार हाल में इन्हींको वास्तव में भगवान के अच्छे भक्त मान रहे हैं। यह विवरण प्रकरणानुगुण व बहुत रसमय होने से भक्तों का भोग्य है। गाथा के अंत में [क्या इससे भी अधिक कोई अविवेक हो सकता है?] कहने का आल्वार के अभिमत यह रसमय तात्पर्य आचार्यों से बताया गया है—जब मैं संसारचक्र में फँस कर जन्म परंपरा में घूमता रहा, तब अवश्य ही मेरे अनेक अविवेक हुए। परंतु अब मुझे लगता है कि वास्तव में वे सभी अविवेक बहुत श्लाघ्य ही रहे। क्यों कि तब मैंने भगवान से मिलकर उन्हें अवद्य उत्पन्न करने की चेष्टा नहीं की। यह भी प्रकरण का उचित रसमय तात्पर्य है॥ .... (८)

(गाथा.) उण्डाय् उलहेऴ् मुन्मे उमिऴ्न्दु मायैयाल् पुक्कु *
उण्डाय् वेण्णेय् शिंरुमनिशर् उवलैयाक्कै निलैयेय्दि *
मण्णाल् शोन्द दुण्डेलुम् मनिशर्क्कागुम् पीर् * शिरिदुम्
अण्डावण्णम् मण्करैय नेय्यूण् मरुन्दो मायोने॥ ८॥

(अव.) अधस्तनगाथातः परं सर्वेश्वरस्य शठरिपुमुनेश्च कश्चन संवादः प्रवृत्तः। तं प्रथमतो विशदीकृत्य परस्ताद्गाथाया अर्थं विवृणुमः; सुखप्रतिपत्तये। अयोग्यतानुसन्धानेन पुनरपि विमुखोऽभून्मुनिवर इति ज्ञातं खल्वधस्तनगाथया। अथ सर्वेश्वरः पुनःपुनरेवमस्य यथा न भवेदनर्हतानुसन्धानमूलकमपसरणं तथा नाम कश्चन बलवानभ्युपायः प्रयोक्तव्य इति पश्यन् मुनिवरं प्रति जगाद; भो मुनिसार्वभौम! व्रजेऽहं नवनीत-मास्वादयमिति कथा भवता विदिता स्यान्नु; तदास्वादनं मया किमर्थं कृतमिति किं भवान् जानीते? इति। मुनिः प्राह नाहं जानामीति, स एव स्वयं कथयतु—इति धिया। अथ भगवानाह "यदि भवान् न जानीते तर्हि मया कथ्यमानमाकर्णयताद्। पुरा कदाचित्संवर्तसमये सकलमपि भुवनं जठरे निवेश्य परस्ताद् बहिष्कृतवानभूवम्; तथा बहिष्करणावसरे कियांश्चन मृद्भागः अन्तरेव निलीनस्सन् मानुषाणामिव रोगकारी स्यात्किमु! इति भिया विरेचनस्वीकरणपर्यायतया व्रजे नवनीतमास्वादयम्" इति। तदेतन्निशम्य मुनिवरः प्राह—"भगवन्! आः किमेतत्? सर्वात्मनाऽप्यसंबद्धं खलु भाषसे। प्रलयकाले सकलस्यापि भुवनस्य स्वजठरेऽवस्थापनं वास्तविकमेव; तत् कदा प्रवृत्तम्? व्रजे नवनीतास्वादनं कदा प्रवृत्तम्? मध्ये भूयिष्ठं हि कालव्यवधानमस्ति। तत्सर्वथाऽप्यसंगतं भाति त्वदुक्तम्" इति। अथ भगवानाह—"मुनिमहात्मन् भोः! मत्कृतनवनीतास्वादने कारणं पृष्टो भवानपि न ब्रवीति; मदुक्तमपि नाङ्गीक्रियते भवता। तर्हि भवानेव पुनर्विमृश्य तत्कारणं कथयताद्" इति। अथ मुनिराह—"आश्रितकरस्पर्शतः पवित्रं वस्तु मम परमभोग्य मिति मन्वानेन त्वया नवनीतमुपभुक्तमिति मम मनीषा" इति। तदनु भगवानुवाच—'मुनीन्द्र! तत्त्वं जानासीति संतुष्यामि; तन्नवनीतं यथा मम भोग्यं तथैव भवता सह संश्लेषोऽपि मम परमभोग्यः; यदि भवान् स्वसंश्लेपरसं मह्यमदत्वा विमुखो भवेत्तर्हि नवनीतभुक्तिप्रतिरोधकानां योग्यं लोकमेव भवानपि प्राप्नुयात्"

इति । तमिमं संवादं सर्वसुगमत्वाय गाथयाऽनया निबध्नाति । व्रजे नवनीतमुक्तावित्र मदुपभोगेऽपि भगवान् हन्त! भृशमुत्कण्ठितो वर्तते; मदीयमनर्हतानुसन्धानं कस्मै फलाय कल्पेत? इति मुनिवरः प्रोक्तवान् भवतीति परमतात्पर्यमत्र प्रतिपत्तव्यम् । [अथ मूलगाथार्थः ।] अयि मायानिधे भगवन्! बहोः कालात्पूर्वं हि त्वं सप्तलोकीं जठरे निवेशयामासिथ । पश्चात्सर्गकाले तत्सर्वमुद्गीर्य, ततश्च भूयसः कालात्पश्चात् मायाशब्दितेन संकल्पेन क्षुद्रमनुष्यहेयशरीरसंस्थानं प्राप्य गोपगृहं प्रविश्य नवनीतमास्वादितवानसि । सप्तभुवनोद्गारसमये उदरे अनुद्गीर्णमृदंशसद्भावशङ्कया मनुष्यजातिसंभावितव्याधिविशेषानुदयाय औषधस्वीकाररूपेण नवनीतमास्वादितमिति कथनं कथमिव युज्यते? (आश्रितकरस्पर्शसुभगं वस्तु भोग्यमिति धियैव भुक्तवानसि इत्यादिशेषपूरणमावश्यकम् ॥ .... (८)

—※ आठवीं गाथा—उण्डांयुलहेळ् मुन्नमें ※—

अवतारिका—पूर्वगाथा के बाद भगवान और आळ्वार के बीच में एक संवाद चला, जिसका विवरण करने के बाद प्रकृत गाथा का अर्थविवरण किया जायगा, जिससे यथार्थ अर्थ समझने में वाचकों की सुविधा होगी। पिछली गाथा का यह तात्पर्य निकला था कि आळ्वार, फिर भी अपनी नीचता का अनुसंधान करते हुए भगवान से विमुख होने लगे। तब भगवान ने विचार किया कि "इस प्रकार बारंबार नैच्यानुसंधान करते हुए मुझसे दूर हट जाना चाहनेवाले आळ्वार का यह रोग मिटाने में समर्थ किसी प्रबल उपाय का प्रयोग करना चाहिए । अस्तु; ऐसा करूंगा;" और आळ्वार से कहा, "हे मुनिसार्वभौम! आप जानते होंगे कि मैंने श्रीकृष्णावतार में व्रज में मक्खन खाया; क्या आप बता सकते हैं कि मैंने क्यों ऐसे किया?" भगवान के श्रीमुख से ही यह रहस्य जानने की इच्छा से आळ्वार ने प्रत्युत्तर दिया, "मैं नहीं जानता ।" यह सुनकर भगवान ने कहा, "यदि आप नहीं जानते, तो मैं बतावूंगा, सुन लीजिए। पहले एक समय मैंने सारे भूमंडल को निगलकर फिर बाहर निकाल दिया। तब मुझे यह भय हुआ कि पेट में थोडी मिट्टी रह गयी होगी और मानवों की भांति मुझे भी अजीर्ण का रोग उत्पन्न होता होगा। यह रोग रोकने के लिए विरेचन का औषध लेने की भावना से मैंने व्रज में मक्खन खाया।" आळ्वार ने इसका यह प्रत्युत्तर दिया—"प्रभो! आप यह क्या कह रहे हैं? यह तो बडी विचित्र वार्ता हुई। यद्यपि यह सत्य है कि आपने प्रलयकाल में जगत को निगलदिया और सृष्टिकाल में उसे बाहर निकाल दिया। परंतु यह कब की बात है? और व्रज में मक्खन खाने की बात कब की है? दोनों के बीच में बहुत समय का अंतर है। अतः आपकी बात सर्वथा असंगत मालूम पडती है।" तब भगवान ने कहा कि, "हे मुनिवर! मेरे मक्खन खाने का कारण पूछे जाने पर आप स्वयं कुछ प्रत्युत्तर देते नहीं; मेरी बात मानते भी नहीं। यह क्या उचित है? अतः अब आप ही फिर ठीक सोच कर मेरे प्रश्न का योग्य उत्तर दीजिए।" आळ्वार ने इसका यह उत्तर दिया, "प्रभो! मेरा तो यह अभिप्राय है कि आपने अपने भक्तों के करस्पर्श से पवित्र बने हुए पदार्थ को परम भोग्य मानते हुए ही मक्खन खाया।" फिर भगवान ने कहा, "हे मुनिवर! यह तो बहुत प्रसन्नता की बात है कि आप ठीक तत्व जानते हैं। ठीक है। अब जान लीजिए कि वह मक्खन मुझे जितना मधुर लगा, आपका संश्लेष भी मुझे ठीक इतना ही मधुर लगता है; अतः अब यदि आप मुझे अपना संश्लेष रस न देते हुए मुझसे दूर भाग जायंगे, तो आपको वही लोक मिलेगा, जो मेरे मक्खन खाने में विघ्न डालनेवाले को मिलेगा।" यह संवाद प्रकृत गाथा में

सर्वसुलभरीति से उपवर्णित है। तथा च इस गाथा का परमतात्पर्य यह हुआ कि "व्रज में नवनीतभोजन की भांति मेरा उपभोग करने के लिए भी भगवान बहुत समुत्सुक हैं; फिर मेरा नैच्यानुसंधान किस काम का होगा?" अब गाथा का अनुवाद लिखेंगे—

हे अत्याश्चर्यमय गुणचेष्टितवाले भगवन्! आपने बहुत पहले ही सातों लोकों को निगल दिया (अपने पेट में रख दिया); फिर (सृष्टिकाल में) उन सबको बाहर निकाल कर, (फिर बहुत समय के बाद) अपनी माया से (माने संकल्प से) क्षुद्रमानवों के हेय शरीर के सदृश विग्रह लेकर, इस लोक में प्रकट होकर मक्खन खाया। यह कैसे कहा जा सकता है कि सात लोकों को बाहर निकालने के समय पेट में कुछ मिट्टी के रह जाने की, और उससे साधारण मानवों की भांति अजीर्ण होने की शंका से औषध सेवन करने की भावना से आपने वह मक्खन खाया? (तत्व तो यही है कि आश्रितों के करस्पर्श से सुगंधित वस्तु पर प्यार करते हुए ही आपने मक्खन खाया।।) .... (८)

(गाथा.) मायोम् तीयवलवलै. पेरुमा वञ्जप्पेय् वीय *
तूय कुळवियाय् विडप्पा लमुदा अमुदु शेय्दिट्ट
मायन् * वानोर् तनित्तलैवन् मलराळ् मैन्द नेव्वुयिर्क्कुम्
तायोन् * तम्मा नेनम्मान् अम्मा मूर्त्तियै चान्दें ॥ ९ ॥

क्रूरहृदयां बहुजल्पितकरीम् अत्यन्तवञ्चनविदग्धां पूतनां नाम पिशाचीं मारयितुकामम् अत्यन्तशिशुभावे सत्यपि तस्याः विषदिग्धस्तन्यममृतनिर्विशेषमास्वादितवन्तम् आश्चर्यस्वभावम् नित्यसूरीणामद्वितीयमधिपतिं लक्ष्मीवल्लभम् सर्वस्य जगतो मातृवद्वत्सलं सर्वस्वामिनं विलक्षणदिव्यमङ्गलविग्रहविशिष्टं च भगवन्तमुपसृप्य साहित्येन संजीवेम। वैमुख्यतो विनाशं न कदाऽपि विन्देम ॥

अधस्तनगाथायां भगवत उक्तिविशेषः कयाचन वैखर्या प्रसञ्जितोऽभूत्। का सा भगवदुक्तिः? 'व्रजे नवनीतास्वादनवत् परमभोग्यो हि मम मुने! भवता सह संश्लेषः' इत्येषा। इमामाकर्णितवान् मुनिवरः प्राह—'भगवन्! कीदृशोऽयं ते भ्रमः! वस्तुतो विषम् अमृतं हि मन्यसे; प्रेमवन्हृदयैर्महात्मभिस्सह संश्लेषो हि सत्यं ते परमभोग्यः; सर्वथा वराकेण मया सह संयोगस्तु विषमेव ननु' इति। अथ भगवानाह—मुनीन्द्र! विषमेवेति ननु सत्यं कथ्यते? अहमपि विषमेवेति काममङ्गीकरोमि; नवनीतास्वादनवृत्तान्तमिव पूतनास्तन्यास्वादन वृत्तान्तमपि ननु जानाति भवान्? * स्तन्यं तद्विषसंमिश्रं रस्यमासीज्जगद्गुरोः * इति हरिवंशे व्यासमहर्षिकथितमवबत्तामत्रभवान्। विषमपि मम नवनीतादप्यतिभोग्यमेव खलु भोः!' इति। तदिदमाकर्ण्य मुनिवरः 'आः! कीदृशीय मदसीया चातुरी! सर्वथाऽपि जयत्ययमेवे'ति प्रहृष्यन् तमेव भगवत्स्मारितं पूतनावृत्तान्तमनुसंदधानो विधूतवैमुख्यकथः परिपूर्णमाभिमुख्यमुपदर्शयति गाथयाऽनया। "साहित्येन संजीवेम; वैमुख्यतो विनाशं न कदाऽपि विन्देम" इति गाथायामस्यामन्तिमं वाक्यमवधेयम्।

जगज्जीवातोः कृष्णस्य मारणं संकल्प्य यतस्समागता पूतना, तत एव सा क्रूरहृदयेति विशेष्यते। * कदाचिदन्तर्हितं पूतनात्मा कंसप्रयुक्ता किल काऽपि माया। निद्रापराधीनजने निशीथे व्रजं यशोदाकृतिराविवेश ॥ * (यादवाभ्युदये) इत्युक्तरीत्या यतस्सा मातृवेषधारणेन समागता, ततो मातृवद्वात्सल्यातिशयममिनयन्ती प्रेमविजल्पितानि बहूनि कथयामासेति सूच्यते [बहुजल्पितकरीम्] इत्यनेन। अन्यत् स्पष्टम् ॥ (९)

—* नवमीं गाथा–मांयोम् तीयवलवलै *—

अतिक्रूरहृदया, बहुत बकनेवाली और अत्यंत कपटी पूतना नामक पिशाची को मारने के लिए, अति शैशव में रहते हुए ही विष लगाये हुए उसके स्तन्य को अमृत की भांति पीनेवाले, अत्याश्चर्यस्वभाव; नित्यसूरियों के अद्वितीय नाथ, लक्ष्मीजी के नाथ, माता के समान समस्त जगत के विषय में वत्सल, सर्वस्वामी, आत्मेश्वर और विलक्षणदिव्यमंगलविग्रहवाले भगवान के समीप जाकर उनसे मिलकर उज्जीवित हो जायंगे; न तु कभी उनसे दूर भागकर विनष्ट होंगे।

पूर्वगाथा में भगवान का यह चमत्कारपूर्ण वचन बताया गया कि, "व्रज में मक्खन खाने की भांति मैं आपके संश्लेष को भी परमभोग्य मानता हूं।" यह सुनकर आळ्वार ने कहा, "प्रभो! आपका यह कौनसा भ्रम है कि आप विष को ही अमृत मान बैठे हैं? प्रेमवनहृदयवाले महात्माओं से मिलना आपको अति भोग्य होगा; परंतु सर्वथा हेय मुझसे मिलना आपको भी विष-सदृश ही होगा।" तब भगवान बोले, "आप अपने संश्लेष को विषसदृश बता रहे हैं। अस्तु। मैं भी इस बात का स्वीकार करता हूं। परंतु आप जानते होंगे कि नवनीत भोजन की भांति मेरे पूतनास्तन्यपान का भी एक चरित्र है; जिसका वर्णन करते हुए श्री व्यास महर्षि ने हरिवंश में कहा—"स्तन्यं तद्विषसंमिश्रं रस्यमासीज्जगद्गुरोः।" (विषमिश्रित वह स्तन्य भी भगवान को परमभोग्य लगा।) अतः सुदृढ समझ लीजिए कि मुझे विष, मक्खन से भी अधिक प्रिय लगता है। यह सुनकर आळ्वार ने विस्मित होकर सोचा कि, "अहो! भगवान बडे चतुर हैं। इन्होंने मुझे कैसे उपाय से जीत लिया!" फिर वे अत्यानंद से भगवान से स्मारित उसी पूतनास्तन्यपान-वृत्तांत का अनुसंधान करते हुए सर्वथा वैमुख्य छोडकर, इस गाथा में परिपूर्ण आभिमुख्य बता जा रहे हैं। गाथा के अंत में ये शब्द ध्यान देने योग्य है—"उनसे मिलकर उज्जीवित हो जायंगे, नतु कभी उनसे दूर भाग कर विनष्ट होंगे।"

जगत के जीवनभूत श्रीकृष्णशिशु का संहार करने की इच्छा से आनेवाली पूतना को क्रूरहृदया कहना उचित ही है। श्री वेदांतदेशिकस्वामीजी यादवाभ्युदय में कहते हैं कि पूतना यशोदा का वेष लेकर व्रज आयी थी; अतः उसने माता की भांति वात्सल्य बताती हुई प्रेमालाप भी किया। इस अर्थ का सूचक है यह शब्द—[बहुत बकनेवाली।] बाकी सब स्पष्ट है ॥ .... (९)

(गाथा.) शार्न्द विरुवल्ळ् विनैहळुम् शरित्तु माय प्पचरुत्तु *
तीर्न्दु तन्पाल् मनम्वैक्क त्तिरुत्ति वीडु तिरुत्तुवान् *
आर्न्द ञान च्चुडराहि अहलम् कीळ्मेलळविरन्दु *
नेर्न्द वुरुवा यरुवाहुम् इवर्क्कि लुयिराम् नेडुमाले ॥ १० ॥

अविनाभूतं पुण्यपापकर्मसञ्चयमपाकृत्य, अज्ञानहेतुकं विषयसङ्गं च विनिवर्त्य, मामकं मनः स्वस्मिन्नेव केवलं व्यासक्तं विरचय्य, मदर्थं संकल्पितं मोक्षं च परिष्कर्तुं प्रवृत्तोऽभूत्सः, यो हि पुष्कलज्ञानप्रभापरिवृतो दशदिग्व्यापकः अतिसूक्ष्मचिदचिद्वस्तुष्वप्यन्तर्यामी व्यामोहैकनिरूपणीयो भगवान् ॥

मुनीन्द्रस्य परमानन्दसंदोहमयी गाथा सेयम्। भगवता रामानुजार्येण श्रीरङ्गगद्ये "तिलतैलवद्दारुवह्निवत् दुर्विवेचत्रिगुणक्षणक्षरणस्वभावाचेतनप्रकृतिव्याप्तिरूप दुरत्ययभगवन्मायातिरोहित स्वप्रकाशः" इत्यनुगृहीत रीत्या दुर्विवेचतया घनसंश्लिष्टं पुण्यपापरूप कर्मसमुच्चयं स्वकीयं भगवान् अपाकृतवानिति सानन्दमभिधीयते। प्रकृते अनर्हतानुसन्धानप्रयुक्त वैमुख्यव्यपोहनं यदकारि भगवता, तदेव सकलकर्मसमुच्चयनिरसनात्मक मभिप्रेयते मुनिवरेण। अथ विषयसङ्गविनिवर्तनं नाम रुचिवासनादीनामप्यवधूननम्। [**मामकं मनः स्वस्मिन्नेव केवलं व्यासक्तं विरचय्य**] तुलसी यथा स्वाभाविकेन सौरभेणोत्पद्यते तथा मुनिवरोऽयमपि भगवति स्वाभाविकमेव व्यासङ्गमुद्वहन्नवतीर्णः; ततश्च नैतदपूर्वतया वक्तव्यम्। तथाऽपि मध्ये अनर्हतानुसन्धानप्रयुक्ततया भगवति व्यासङ्गस्य शैथिल्याङ्कुरजननात् इदमिदानीमतिशयेन वक्तव्यमभूत्। [**मदर्थं संकल्पितं मोक्षं च परिष्कर्तुं प्रवृत्तोऽभूत्।**] तदिदं वाक्य मत्यन्तविस्मयनीयं भायात्। सर्वदा सर्वथा परिष्कृतस्य मोक्षस्य अधुना परिष्करणं नाम किम्? इति प्रष्टव्यता भवेन्नाम। इदानीं मुनीन्द्रेण संश्लिष्टो भगवान् स्वकीयानन्दपारवश्येन मुनीन्द्रं प्रति कथयामास—'स्वामिन्! मदीयशीलगुणादिकमनुसंदधानः अनुभवंश्च वर्तेथाः; प्रथमप्रबन्धप्रथमगाथायां भवता प्रार्थितं यत् तत्परिपूरयितुं भवन्तं वैकुण्ठधाम नेतुं संकल्पितवानस्मि; तत्र गत्वा कांश्चन परिष्कारविशेषान् विरचय्य सरभसमेव समागमिष्यामि' इति। तत् अनुवदति मुनिवर इत्यास्थेयम्। उत्तरार्धेन भगवतः स्वरूपस्वभावादिक मुपवर्णयति सानन्दम् ॥ .... (१०)

—* दसवीं गाथा—शान्दैविरुवल्विनैहळुम् *—

मेरे साथ ही रहनेवाले पुण्यपापरूप कर्म मिटाकर, अज्ञानजनित विषयसंग भी छुडाकर, मेरे मनको अपने में (भगवान में) ही सुदृढ आसक्त बनाकर, फिर मेरे लिए संकल्पित मोक्ष का भी, भगवान परिष्कार करने लगे; जो समग्र ज्ञान प्रभा से परिपूर्ण, समस्त-दिशाओं में भी व्याप्त, अतिसूक्ष्म चेतनाचेतनों के अंतर्यामी और (भक्तविषयक) व्यामोहशील हैं ॥

यह गाथा आळ्वार के सीमातीत आनंद का प्रकाशक है। इसमें आप मुख्यतया इस अंश का सानंद वर्णन कर रहे हैं कि भगवान ने आत्मा से सुदृढ मिले हुए अपने (आळ्वार के) पुण्यपापरूप कर्म को सजड उखाड दिया। इसका यह तात्पर्य है कि उन्होंने आळ्वार का स्वकीय नैच्यानुसंधानपूर्वक वैमुख्य दूर कर दिया। यही प्रकरणोचित कर्मविनाशन है। इसके बाद विषयसंगनिवारण का यह अर्थ है कि रुचि, वासना इत्यादियों का भी निवारण। [**मेरे मन को अपने में ही सुदृढ आसक्त बनाकर**] यद्यपि यह कोई अपूर्व अर्थ नहीं है; क्यों कि जैसे तुलसी अंकुरित होती हुई सुगंध से विशिष्ट ही रहती है, ठीक इसी प्रकार आळ्वार भी अवतार समय से ही भगवान में संसक्तचित्त विराजमान थे। तथापि हाल में नैच्यानु-

संधान के कारण उसमें जो विघ्न उत्पन्न हुआ था, उसके निवारणरूप उपकार का अनुसंधान करना आवश्यक हुआ। [मेरे लिए संकल्पित मोक्ष का भी, भगवान परिष्कार करने लगे;] यह तो अत्यंत आश्चर्य कारक वचन है। मोक्ष में कौन-सा परिष्कार करने का है? वह तो सर्वदा सभी प्रकारों से सुपरिष्कृत ही रहता है। तथापि इस वाक्य का यह तात्पर्य है—हाल में आळ्वार से मिलकर आनंदपरवश हुए भगवान ने उनसे कहा कि, "हे मुनींद्र! आप थोडी देर मेरे इस सौशील्यगुण का ही कीर्तन व अनुभव करते करते यहीं विराजें। अब मैं तो आपसे अपने पहले प्रबंध की पहिली गाथा में संप्रार्थित फल (मोक्ष) का प्रदान करने के लिए आपको वैकुंठधाम ले जाना चाहता हूं; अतः मैं पहले स्वयं उधर जाकर, वहां आवश्यक कतिपय परिष्कार रचकर शीघ्र ही लौटूंगा।" समझना चाहिए कि आळ्वार हालमें इस वचन का अनुवाद कर रहे हैं। गाथा के अवशिष्ट भाग में आळ्वार भगवान के स्वरूपस्वभावादियों का सानंद वर्णन करते हैं॥ .... (१०)

(गाथा.) माले मायप्पेरुमाने मामायने येन्नेन्नु * मालेयेरि मालरुळाल् मन्नु कुरुहूर् शठकोपन् *
पालेय् तमिळ रिशैकारर् पत्तर् परवु मायिरत्तिन् पालेपट्ट * इवैपत्तुम् वल्लाकिल्लै परिवदे॥

स्वरूपतो विभुत्वशालिन्! आश्चर्यगुणतश्च विभुत्वशालिन्! अत्यद्भुतचेष्टितैश्च विभुत्वशालिन् भगवन्! इत्युच्चावचनामानि संकीर्त्य चित्तोन्मादमवाप्य भगवतः कृपया संश्लिष्टेन श्री कुरुका-पुरीशशठकोपसूरिणाऽनुगृहीतम् परमभोग्यद्राविडशास्त्रविशारदानां संगीतकलाविचक्षणानां भक्तिभाजां च हृदयहारिण्यां सहस्रगीत्यामन्तर्गतमिदं दशकमधीयाना दुःखदवीयांसो भवितारः॥

अयोग्यतानुसन्धानतोऽपसर्पणेच्छया स्वस्य यदजनि दुःखम्, तच्च तादृशानि च दुःखानि एतद्दशका-नुसन्धाननिरतानां सतां नैव जायेरन्निति फलकीर्तनेन समाप्यत इदं दशकम्॥ संजातवैमुख्यमपि स्वात्मानं परमकारुणिको भगवान् केवलं स्वकीययैव अव्याजकृपया स्वेन सह संश्लिष्टमकार्षीदिति पूर्वार्धेन कथयति मुनिवरः। अनर्हतानुसन्धानेनापसर्पणरुचिर्या जाता स्वस्य, सा चित्तोन्मादकृतेत्यपि स्वयं सूचयति। प्रथमपादे भगवतो महत्त्वं पदत्रयेण प्रतिपाद्यते। श्री भाष्योपक्रमे ब्रह्मशब्दार्थविवरणावसरे—"सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः; बृहत्त्वं च स्वरूपेण गुणैश्च यत्र अनवधिकातिशयम् सोऽस्य मुख्योऽर्थः; स च सर्वेश्वर एव" इत्यनुगृहीतमिहानुसन्धेयम्। स्वरूपेण गुणैः चेष्टितैश्च महत्त्वशालिन् भगवन्! इति सन्ततमाक्रन्दनमेव स्वस्य कृत्यमिति प्रथमपादेन प्रोक्तवान् भवति।

दशकस्यास्य अवयविभूतायास्सहस्रगीत्याः प्रभावस्तृतीयपादे प्रख्याप्यते। द्रमिडभाषारसिका लक्ष्यग्रन्थो लक्षणग्रन्थश्चायमिति भृशमभिनन्दन्ति। संगीतशास्त्रज्ञाश्च दिव्यगानोपयोगी सोऽयं दिव्यप्रबन्ध इति रमन्ते। परमभक्तास्तु भक्त्युत्पादको भक्त्यभिवर्धकश्चायं दिव्यप्रबन्ध इत्याद्रियन्ते। तत्र तत्र भगवत्कृतित्वेनैव स्वात्मनाऽभिधीयमानस्यास्य दिव्यप्रबन्धस्यैतादृशं प्रशंसनं न स्वात्मप्रशंसायामन्वेतीत्यवगन्तव्यम्॥ .... (११)

—* एतद्दशकसारार्थसंग्राहको द्रमिडोपनिषत्सङ्गतिश्लोक एषः *—

श्लो॥ स्वालिङ्गनादिचपले पुरुषोत्तमेऽपि स्वायोग्यतामभिदधद्विमुखः शठारिः।
त्रैविक्रमादिचरितं प्रतिबोध्य तेन नीतः स्वशीलवशतामथ पञ्चमेन॥

—❋ ग्यारहवीं गाथा—माले मायप्पेरुमाने ❋—

"हे विभु (माने वडे) स्वरूपवाले! हे आश्चर्यगुणनिधे! हे अत्यद्भुत चेष्टितवाले!" इत्यादि इत्यादि अनेक शुभनाम रटता हुआ, उन्मत्त सा बनकर, भगवान की कृपा से उनसे संश्लिष्ट होनेवाले, श्री कुरुकापुरी के स्वामी श्री शठकोपसूरी से अनुगृहीत, क्षीरसदृश मधुर द्राविडी भाषा के विद्वानों, गानकला-प्रवीणों तथा भक्तों के हृदयहारी सहस्रगीति के अंतर्गत इस दशक का अध्ययन करनेवालों को किसी प्रकार का दुःख न लगेगा॥

इस गाथा में आल्वार से यह फलकीर्तन किया जा रहा है कि इस दशक का अध्ययन करनेवाले महात्माओं को यह दुःख नहीं लगेगा, जो कि अपने को लगा था; अर्थात् नैच्यानुसंधान पूर्वक दूर भाग जाने की इच्छा से जो दुःख उत्पन्न हुआ किया, यह दुःख और ऐसा दूसरे किसी प्रकार का दुःख उन्हें नहीं लगेंगे। गाथा के पूर्वार्ध में आल्वार इस अर्थ का वर्णन करते हैं कि, "परमकारुणिक भगवान ने केवल अपनी निर्हेतुक कृपा से मेरा वैमुख्य दूरकर मुझे अपने साथ मिला दिया।" [उन्मत्त-सा बनकर] कहने का यह भाव है कि उक्तप्रकार नैच्यानुसंधान करता हुआ भगवान को छोडकर दूर भागना चाहना केवल पागलपन है। गाथा के प्रारंभ के तीन संबोधन भगवान की महत्ता का वर्णन करते हैं। श्रीभाष्य के उपक्रम में ब्रह्मशब्दार्थ का विवरण करते हुए श्री रामानुजस्वामी लिखते हैं—"सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः; बृहत्त्वं च स्वरूपेण गुणैश्च यत्र अनवधिकातिशयं सोऽस्य मुख्योऽर्थः। सच सर्वेश्वर एव।" इसका यह तात्पर्य है—"महत्त्ववाली वस्तु ही ब्रह्म कहलाती है। अतः इस शब्द का मुख्य वाच्य वही होगा जिसमें स्वरूप का और गुणों का महत्व परिपूर्ण हो; ऐसी व्यक्ति तो साक्षात् सर्वेश्वर ही हैं।" यह भाव है—भगवान का स्वरूप विभु, माने सब से बडा है; एवं उनके कल्याणगुण भी सबसे अधिक हैं; अतः इस प्रकार, स्वरूप व गुणों से बडे होने से भगवान ब्रह्म कहलाते हैं। अब आल्वार यह बताना चाहते हैं कि सर्वदा "स्वरूप, गुणों व चेष्टितों से महत्ववाले हे भगवन्!" रटते रहना ही अपना स्वभाव है। अर्थात् भगवान जैसे अपने स्वरूपगुणों से सबसे बडे हैं, ठीक वैसे ही अपने विलक्षण चेष्टितों से भी बडे हैं। तीसरे पाद में सहस्रगीति का विलक्षण प्रभाव बताया जाता है। तथाहि—द्राविड भाषा के वेत्ता इसे महान लक्ष्यग्रंथ व लक्षणग्रंथ मानकर इसकी प्रशंसा करते हैं; संगीत-शास्त्रज्ञ इसे मधुरगानोपयोगी दिव्यग्रंथ मानते हैं; और भक्त जन तो इसे भक्ति का उत्पादक व अभिवर्धक मानकर इसका आदर करते हैं। यह अपने प्रबंध की प्रशंसा आल्वार की आत्मप्रशंसा नहीं होगी; क्योंकि तत्र तत्र आप स्पष्ट बता देते हैं कि सहस्रगीति के कर्ता साक्षात् भगवान ही हैं, स्वयं तु निमित्तमात्र। अतः वास्तव में यह भगवान की ही प्रशंसा है॥ ... . (११)

सटीक सहस्रगीति के पहले शतक का पांचवां दशक समाप्त हुआ॥

आल्वार तिरुवडिगळे शरणम्॥

॥ सहस्रगीत्याम् - प्रथमशतके - षष्ठं दशकम् - परिवदिलीशने ॥

(संस्कृतम्. अवतारिका) एकैकस्मिन्नपि दशके भगवत एकैको गुणः प्राधान्येनानुभूयते मुनिवरेणेति पुनः स्मार्यते । अतीतेषु पञ्चसु दशकेषु क्रमेण परत्वम् भजनीयत्वम् भक्तिसुलभत्वम् अपराधसहत्वम् सुशीलत्वमित्येते गुणा अन्वभूयन्त । अथेदानीं षष्ठे दशके स्वाराधत्वमित्यसावनर्घो गुणोऽनुभूयते । सुखेन आराधयितुं योग्यत्वं हि स्वाराधत्वं नाम । हर्षप्रकर्षजनको व्यापारविशेष एव आराधनम ; तदिदं देवतान्तरेष्वत्यन्तमायासत स्साध्यम्; भगवति तु आयासलेशमन्तरेण सुसाधमिति तत्तदाराधनप्रकार प्रतिपादकैः प्रमाणै स्सम्यगवम्यते । देवतान्तराणि तावत् छागबलिः कुक्कुटबलिरित्येवंरूपाणि जीवहिंसात्मकान्येवाराधनानि कामयन्त इति प्रत्यक्षतोऽपि प्रेक्षामहे । भगवांस्तु स्वयं गायति—* पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः * इति । श्लोकेऽस्मिन् पूर्वार्धे * यो मे भक्त्या प्रयच्छति * इति कथनानन्तरं पुनरुत्तरार्धे * तदहं भक्त्युपहृतमिति कथनमनपेक्षितम् । पूर्वोक्तपरामर्शिनः केवलतच्छब्दस्य प्रयोगमात्रं पर्याप्तम् । अथापि * भक्त्युपहृतमिति पुनः प्रयोगो व्यर्थस्सन् किञ्चित् ज्ञापयति—भगवान् समर्प्यमाणे वस्तुनि दृष्टिं न निधत्ते ; समर्पकस्य पुंसो हृदयशुद्धिमात्रे दृशं दिशतीति । * याः क्रियाः संप्रयुक्तास्स्यु रेकान्तगतबुद्धिभिः । तास्सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम् ॥ * इत्येतद्वचनरत्नमप्यत्रानुसन्धातुमर्हम् । भगवद्भक्ताग्रेसरस्य सञ्जयस्यानर्घं वचनम् * अन्यत्पूर्णादपां कुम्भादन्यत्पादावनेजनात् । अन्यत्कुशलसंप्रश्नान्न चेच्छति जनार्दनः ॥ * इत्येतत् श्रियःपत्युर्भगवतस्स्वाराधत्वे सर्वोत्तुङ्गं स्वानुभवसाक्षिकं च प्रमाणमिति प्रतिपत्तव्यम् । स एष स्वाराधत्वरूपो गुणविशेष एतस्मिन्दशकेऽनुभूयते प्रकाश्यते च ॥ .... *

—* पहले शतक के छठे दशक की अवतारिका *—

(हिंदी) यह अर्थ बताया जा चुका है कि श्री शठकोपसूरी इस सहस्रगीति के एकैक दशक में भी मुख्यतया भगवान के एकैक गुण का अनुभव करते हैं । इस प्रकार आप पिछले पांच दशकों में क्रमशः भगवान का परत्व, भजनीयता, भक्तिसुलभता, अपराधसहत्व और सौशील्य नामक गुणों का अनुभव करने के बाद, इस प्रकृत छठे दशक में स्वाराधत्व नामक विशिष्ट गुण का अनुभव करने लगते हैं । स्वाराधत्व माने अति सुलभतया आराधन करने योग्य रहना । किसीको प्रसन्न करने का काम ही उसका आराधन कहलाता हैं । अब शास्त्र बताते हैं कि दूसरे देवोंको प्रसन्न करनेके लिए हमें बहुत प्रयास लेना पडता है, और भगवान का आराधन बडा ही सरल है । कभी कभी अन्य देवों को प्रसन्न करने के लिए उन्हें, बकरा, मुर्गा इत्यादियों की बलि चढानी पडती है । परंतु भगवान स्वयं गीता में गाते हैं कि, "पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृत मश्नामि प्रयतात्मनः ॥" (अर्थात् जो कोई भक्ति के साथ मुझे कोई भी पत्र, पुष्प, फल अथवा केवल पानी का अर्पण करेगा, तो मैं भक्ति-पूर्वक दिये हुए उन सबका स्वीकार करता हूं ।) इस पद्य के उत्तरार्ध मे 'भक्त्युपहृत' शब्द पुनरुक्त अथवा बेकार प्रतीत होगा । परंतु इसका अर्थपूर्ण उपयोग हुआ है । यह शब्द बताता है कि भगवान अपने लिए दी जानेवाली

वस्तु का नहीं, किंतु देनेवाले की भक्ति का ही ख्याल करते हैं। अत एव उनका यह वैभव बताया गया है कि, "याः क्रियास्संप्रयुक्तास्स्युरेकान्तगतबुद्धिभिः। तास्सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम् ॥" अर्थात्, भगवान के अनन्य भक्त, उनकी जो सेवा करते हैं, उन सबका वे अपने सिरसे (माने अत्यंत प्रेम व आदर के साथ स्वीकार करते हैं। एवं भक्तप्रेवर संजय का यह वचन भी इसी अर्थ का पोषक है—अन्यत्पूर्णादपां कुम्भात् अन्यत्पादावनेजनात्। अन्यत्कुशलसंप्रश्नान्नचेच्छति जनार्दनः॥ (अर्थात् भगवान पूर्णकुंभ, पाद धोने का पानी, और कुशल प्रश्न के सिवा दूसरी कोई पूजा माँगते नहीं। ऐसे अनेक प्रमाणों से बताये हुए भगवान का स्वाराधत्व नामक गुण ही इस दशक में विस्तार से उपवर्णित किया जा रहा है॥ .... *

(गाथा.) परिवदि लीशनै प्पाडि * विरिवदु मेव लुरुवीर् *
पिरिवहै यिषि नवीर् तूय् * पुरिवदुवुम् पुहैपूवे ॥ १ ॥

अखिलहेयप्रत्यनीकं सर्वेश्वरं स्तुत्वा स्वरूपविकासं लिप्समाना भो जनाः! प्रयोजनविशेषं प्राप्य सद्योऽपसरणे रुचिमपहाय शुद्धं सलिलं समर्प्य धूपपुष्पोपहरणं पर्याप्तम् ॥

भगवदाराधनोपकरणानां लाघवमिह सुस्पष्टं प्रतिपाद्यते। अर्घ्यपाद्याचमनीयोपयोगिसलिलार्पणेन धूपसमर्पणेन च केवलं स भगवान् परमां तृप्तिं विन्दतीति विनिवेद्यते। पूर्वार्धेन प्रकृतार्थोपदेशपात्रभूता भक्त-जनास्संबोध्यन्ते। हेयप्रत्यनीकं भगवन्तं संकीर्त्य * स्वेन रूपेणाभिनिष्पद्यते * इत्याम्नातं स्वरूपविकासं प्रेप्सन्तो भो जनाः! इत्येवं संबोधनस्य किं हृदयमिति चेत्, फलं तु सर्वोत्तमम्; तदवाप्तये भूरितराः क्लेशा अनुभोक्तव्या भवेयुः किमिति विचिकित्सा माभूद्वः; अनायाससाध्येन लघुनाऽऽराधनेन महत्तरं फलं सुसम्पादमि-त्युक्तं भवति। [प्रयोजनविशेषं प्राप्य सद्योऽपसरणे रुचिं विहाय] इत्यनेन क्षुद्रफलकामना निषिध्यते। प्रायः कृत्स्नं जगत् पुत्रपश्वन्नादिफल्गुप्रयोजन कांक्षया भगवन्तमुपसृप्य तल्लाभतः कृतकृत्यं सत् अपक्रामतीति पश्यामः; मा स्म तथाविधा भवत यूयमिति परमकृपामूलकोऽयमुपदेशः। [शुद्धं सलिलं समर्प्य] इत्यनेन गङ्गादिपरमपवित्रतीर्थसम्पादनप्रयासो न विधीयते; शुद्धं घृतमित्युक्ते वस्त्वन्तरसंमिश्रणविरहितं घृतमिति यथा ह्यर्थस्सिध्यति, तथैवात्रापि एलालवङ्गघुसृणादिसंयोजनरहितम् औत्पत्तिकं तोयमप्यलमिति कथितं भवति। धूमस्य पुष्पस्य चाविशेषणात् यः कोऽपि वा भवतु धूमः, यत्किमपि वा भवतु पुष्पम्, नात्र विशेषविवक्षा—इत्युक्तं भवति॥ .... (१)

—* पहली गाथा—परिवदिलीशनैप्पाडि *—

समस्त दोषों से अलिप्त भगवान की स्तुति कर उससे स्वरूपविकास पाना चाहनेवाले हे मनुष्यो! भगवान से कुछ अल्प प्रयोजन पाकर उनके यहां से लौटने की इच्छा छोड़ दो और उन्हें शुद्ध तीर्थ का अर्पण कर उसके बाद चाहे जो भी धूप और पुष्प का अर्पण करो, वही पर्याप्त पूजा है॥

इस गाथा में भगवान की सेवा करने के लिए आवश्यक सामग्री बहुत सुलभ बतायी जाती है। तथाहि—भगवान को अर्घ्य पाद्य आचमनीयों के लिए पानी देने के बाद थोड़ा धूप व पुष्प का अर्पण करने

मात्र से उनकी पूजा पूर्ण हो जायगी और वे बहुत तृप्ति पायंगे। प्रकृत उपदेश के पात्र सज्जनों का यह संबोधन है—[समस्त दोषों से दूर भगवान की स्तुति कर] इत्यादि। इनका अपेक्षित फल है समस्त कर्मबंधनों से मुक्त होकर भगवान के समान होकर अपने आत्मस्वरूप को अत्यंत विकसित बनाना। ऐसे महान फल प्राप्त करने की सामग्री तो इनके पास बस! इतनी ही है कि भगवान की स्तुति व पूजा। अतः यह शंका हो सकती है कि ऐसा महान फल पाने के लिए बडे साधन की आवश्यकता होगी; यह साधन हम कहांसे ला सकेंगे। इस शंका का यह समाधान है कि भगवान की पूजा बडी सरलता से संपन्न होगी। [भगवान से कुछ अल्प प्रयोजन पाकर उनके यहां से लौटने की इच्छा छोडकर] कहने से क्षुद्रपुरुषार्थ-कामना का निषेध किया जाता है। हम देखते हैं कि प्रायः भगवान की सेवा करनेवाले लोग, उनसे पुत्र, पशु, अन्न इत्यादि अल्प प्रयोजन प्राप्त करके लौट जाते हैं और बाद में उनकी चिंता तक नहीं करते। अतः अब आळ्वार परमकृपा से अपने श्रोताओं को यह उपदेश दे रहे हैं कि "तुम ऐसा अल्प फल का विचार मत करो।" [शुद्धतीर्थ का अर्पण कर] कहने का यह अर्थ नहीं है कि गंगा यमुनादि पवित्र तीर्थ से ही भगवान की सेवा करनी चाहिए। किंतु जैसे "शुद्धघृत" कहने से दूसरी वस्तु के असंमिश्रित घृत समझा जाता हैं, ठीक इसी प्रकार इलायची लवंग कँपूर इत्यादि सुगंध द्रव्य की खोज में प्रयास नहीं उठाते केवल पानी मात्र से पूजा करना पर्याप्त है। एवं धूप पुष्पों के बारे में भी अमुक धूप व पुष्प ही लाने की कोई आवश्यकता नहीं है; किंतु जो धूप व पुष्प आसानी से मिलें उसीसे काम चलाया जा सकता है॥ .... (१)

(गाथा.) मदुवार् तण्णन्तुळायान् * मुदुवेदमुदल्वनुकु *
एदुवेदेन् पणियेनाद * अदुवे आट्चेय्यु मीडे ॥ २ ॥

मधुस्यन्दिन्या तुलसीस्रजाऽलङ्कृतस्य चिरन्तनसरस्वतीप्रतिपादितोत्कर्षस्य च भगवतोऽनुरूपा सेवा काखित्? मत्सुकरा सेवा च का नाम? इति विह्वलतां विसृज्य सर्वविधकैङ्कर्येष्वन्वय-स्सुशोभनः ॥

आश्रयणकर्तुः समर्पणीयद्रव्ये तारतम्यपरीक्षा माभूदिति प्रोक्तमधस्तनगाथायाम्। अस्यां तु, भगवद्परिवस्यायां नाहमधिकारीति न केनाप्युदासितव्यमित्यभिधीयते। मधुस्यन्दीत्यादिविशेषणद्वयं यदस्ति भगवत इह, तदिदं भगवत्पारम्यप्रतिपादने परिक्षीयते। तुलसीस्रगलंकृतत्वप्रयुक्तम् अखिलवेदवेद्यत्वनिबन्धनं चोत्कर्षं बिभ्रतो भगवतोऽनुरूपमाराधनं किमस्ति नाम? किं वाऽहं तत्राधिकारी? इति विचिकित्सां विसृज्य, * भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते। अहं सर्वं करिष्यामि जाग्रतस्स्वपतश्च ते॥ * इति सौमित्रिप्रकाशित-मनोरथप्रक्रियया सर्वविधेष्वपि कैङ्कर्येषु सर्वोऽपि जनः काममन्वेतुमर्हतीत्युक्तं भवति ॥ .... (२)

—* दूसरी गाथा—मधुवार् तण्णन्तुळायान् *—

"मधु बहनेवाली सुंदर व सुशीतल तुलसी माला का धारण करनेवाले, पुरातनवाणी (माने अनादि वेदों) से प्रतिपादित, सर्वकारणभूत भगवान की अनुरूप सेवा कौनसी होगी?

एवं मेरे लिए सरल सेवा कौनसी होगी?" यह चिंता छोडकर उनकी सर्वविध सेवा करना ही अपना उचित काम होगा ॥

पिछली गाथा में यह अर्थ बताया गया कि भगवान को अर्पण किये जानेवाले द्रव्य के तारतम्य की परीक्षा करने की आवश्यकता नहीं है; अब यह अर्थ बताया जा रहा है कि उस विषय में किसी भी मानव को, यह चिंता कर कि मैं भगवान की सेवा कर सकूंगा कि नहीं, पीछे हटने की भी आवश्यकता नहीं है। गाथा के उपक्रम में भगवान के जो दो विशेषण दिये गये हैं, ये दोनों उनके परत्व के द्योतक होते हैं। तथाच यह विचार हो सकता है कि तुलसीमालालंकृत और समस्तवेदप्रतिपाद्य महामहिमवाले भगवान की अनुरूप सेवा कौनसी होगी? और अल्पल्प मैं उनकी कौन-सी सेवा कर सकूंगा? ऐसे विचारों में नहीं पड़ते हुए, कोई भी मानव भगवान की सर्वदेश सर्वकाल सर्वावस्थोचित सर्वविध सेवा करने में लग सकता है और ऐसा करना आवश्यक भी होता है। जैसे लक्ष्मण जी ने प्रार्थना की—भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते। अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥" (हे प्रभो! आप सीतादेवी के साथ पर्वतसानुओं में विहार कीजिए; मैं आपके सोने और जागने के सभी अवसरों में सर्वविध सेवा करूंगा।) लक्ष्मणजी की भांति सभी मानव भगवान की ऐसी नित्य सेवा कर सकते हैं ॥ .... (२)

(गाथा.) ईडु मेड्डुप्पुमि लीशन् * माडुविडा देन्मनने *
पाडु मेन्ना ववन्पाडल् * आडु मेनङ्ग मणङ्गे ॥ ३ ॥

केषाञ्चिदुपेक्षणम् केषाञ्चिदपेक्षणमिति पक्षपातविरहिते सर्वेश्वरे मदीयं हृदयं न कदाऽपि विरक्तिं विन्दति; मदीया जिह्वा तु तदीयानि यशांसि गायति। मदीयं वपुस्तु दैवाविष्टवत्परिनृत्यति ॥

भगवतः स्वाराध्यत्वानुसन्धानेन भृशं प्रहृष्टो मुनिवरः स्वकीयस्य करणत्रयस्य च भगवदेकप्रवणतां ब्रूते गाथयाऽनया। पक्षपातविरहितत्वेन विशेष्यतेऽत्र भगवान्। * समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ * इति भगवान् स्वयं गायति। आश्रयणीयत्वे सम इति भगवद्रामानुजभाष्यमिहावधेयम्। * देवानां दानवानां च सामान्यमधिदैवतम् * इति भक्तप्रवराश्च स्तुवन्ति। एतादृशमेव पक्षपातविरहितत्वमत्राभिहितं बोध्यम्। सर्वचेतनसाधारण संबन्धशालिनो भगवत एकस्मिन्नादरणम् अपरस्मिन्ननादरणं च असंभवि खलु। "अनालोचितगुणागुणाशेषलोकशरण्य" इति हि स्तूयते भगवान् ॥ (३)

—* तीसरी गाथा–ईडुमेडुप्पुमिलीशन् *—

किसीकी उपेक्षा करना, और दूसरे किसीकी अपेक्षा करना, ऐसे पक्षपात से विरहित, सर्वेश्वर भगवान के समीप से मेरा मन कभी हटता नहीं; मेरी जीभ उनका यशोगान करती है और मेरा शरीर तो दैवाविष्ट की तरह नाच रहा है ॥

भगवान की स्वाराधता नामक गुण के अनुसंधान से अत्यंत प्रहृष्ट आळ्वार इस गाथा में यह कहते हैं कि "मेरे तीनों करण भगवान में ही सक्त हैं।" इसमें भगवान॰ पक्षपात रहित गाये गये हैं। यह उनका एक महान गुण है, जो शास्त्रों में तत्र तत्र विशेषतः उपवर्णित है। गीताजी में स्वयं भगवान ने भी गाया—"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।" (मैं पक्षपात रहित हूं; मेरे कोई शत्रु नहीं; और न प्रिय ही है।)" यहां पर भाष्य लिखते हुए श्री रामानुजस्वामीजी बताते हैं कि भगवान आश्रयण करने के विषय में सर्वसम हैं; अर्थात् कोई भी मानव उनका आश्रयण कर सकता है। भक्तलोग भी उनकी ऐसी ही प्रशंसा करते हैं—"देवानां दानवानां च सामान्यमधिदैवतम्।" (अर्थात् भगवान देव व दानवों के समान देव हैं।) प्रकृत गाथा में यही पक्षपातरहितता बतायी जा रही है। यह तो सर्वथा उचित ही है कि देवदानव मानवादि समस्त चेतनों के साथ एक प्रकार का संबंध रखनेवाले भगवान उनमें पक्षपात के विना सम रह जायें। "अनालोचित गुणागुणाशेषलोकशरण्य" इत्यादि से भी उनकी स्तुति की जाती है। किसी के गुण दोषों की समालोचना नहीं करते हुए, एक समान सबके शरण्य होते हैं, भगवान॥ .... (३)

(गाथा.) अणङ्गेन वाडु मेनङ्गम् * वणङ्गि वळिपडु मीशन् *
पिणङ्गि अमरर् पिदत्तुम् * गुणम् केळ कोळ्हैयिनाने॥ ४॥

दैवाविष्टवत्परिनृत्यता मम वपुषा परिचर्यमाणस्सर्वेश्वरः कीदृश इति चेत्, श्रीवैकुण्ठनिकेतनैर्नित्यमुक्तैरपि मिथो विवादकोलाहलविजृम्भणेनानुभूयमानगुणगणः॥

भगवतो गुणेषु 'अयमुत्तमः, अयं मध्यमः, अयमधमः' इति तारतम्यपरिकल्पना सर्वथाऽपि दुश्शकेति रस्यं रहस्यम्। परत्ववर्गे सौलभ्यवर्गे च सन्ति भूयांसो गुणाः। एकैकोऽपि गुणो रसिकैर्भक्तप्रवरैरनुभूयमानः 'अयमसमाभ्यधिकः, असावुत्तमोत्तमः' इत्येव वक्तव्यस्सन् उत्तुङ्गकक्ष्यानिविष्ट एव स्यात्। * सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति * इत्युपनिषदाम्नासीत्। अत्र कामशब्दार्थो भगवद्गुणा इति भगवन्तो भाष्यकाराः। तथा नाम भगवद्गुणानुभवनिरता नित्यमुक्ता स्सर्वानपि गुणाननुभुञ्जानास्सन्तो रासिक्यभूम्ना एकैकमपि गुणं निर्दिश्य अयमेवोत्कृष्ट इति वदन्तः, तथा नाम वदत इतरान् सूरीनधिक्षिपन्तश्च विवादकेलिमुपबृंहयन्ति। एवं तत्र सततं स्पर्धैव प्रवर्तत इति कथ्यतेऽत्र गाथायाम्। एवं च सर्वेऽपि गुणा अविशेषेण श्लाघ्या एवेति सिध्यति। एतादृशे अनन्तगुणसागरे भगवति मम वपुर्विकृतं सत् अशेषदास्यैकसमुत्सुकं विराजत इत्युक्तं भवति॥ .... (३)

—* चौथी गाथा—अणङ्गेन वाडुमेनङ्गम् *—

दैवाविष्ट की भांति नाचनेवाले मेरे शरीर से संसेव्यमान भगवान, श्रीवैकुंठनिवासी नित्यसूरियों से परस्पर विवाद-कोलाहल पूर्वक संस्तूयमान कल्याणगुणगणविभूषित होते हैं॥

भगवान के परत्वसूचक तथा सौलम्यसूचक कल्याणगुण अनंत होते हैं; इनमें से एकैक का भी वैभव अपार होता है। अतः इनमें किसी एक गुण को उत्तम कहना, और दूसरे किसीको मध्यम और तीसरे को अधम कहना सर्वथा अशक्य व अनुचित है। परंतु, "सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चिता" (मुक्त पुरुष परब्रह्म के साथ उनके काम—माने कल्याणगुणों—का भी अनुभव करता है) इत्याद्युपनिषद् के अनुसार, जब मुक्त व नित्य लोग उन गुणों का अनुसंधान करने लगते हैं, तब एकैक गुण भी उन्हें सर्वोत्कृष्ट ही मालूम पडता है। अतः जब चार भक्त लोग, एकैक एकैक गुण के क्रम से, चार गुणों का अनुसंधान करने बैठते हैं, तब एकैक के मुख से भी यही शब्द निकलेगा कि, "अमुक गुण ही सबसे श्रेष्ठ है।" फलतः उनके बीच में इस विषय पर बडा वादविवाद ही उठ खड़ा हो जायगा। तथा च आळ्वार का कहना है कि परमपद में सर्वदा इस गुणविषयक वादविवाद का कोलाहल ही मचा रहा है। कहने का तात्पर्य यह कि भगवान के सभी गुण एकदम श्रेष्ठ व परमभोग्य होते हैं। ऐसे अनंत शुभ गुण सागर भगवान के चिंतन से आळ्वार के श्रीविग्रह हालमें विकृत होकर, उनकी सर्वविध सेवा करना चाह रहा है॥.... .... (४)

(गाथा.) कोळ्है कोळामै यिलादान् * एळ्ह लिराग मिलादान् *
विळ्है विळ्ळामै विरुम्बि * उळ्कलन्दा कोरमुदे ॥ ५ ॥

'अमी अल्पप्रयोजनलाभेन अपसरन्ति वा? मया सह नित्यवासमेव परमप्रयोजनं मन्वते वा?' इति परीक्ष्य नित्ययोगसमुत्सुकानां परमभक्तानाम् अमृतवत्परमभोग्यभूतो भगवान्, कतिपुचिद्गुणदर्शनेन स्वीकरणम्, कतिपयेषु दोषदर्शनेन दूरीकरणं चाप्यजानन् रागद्वेषविदूरगश्च विराजते ॥

अनन्यार्हशेषत्वम् अनन्यशरणत्वम् अनन्यभोग्यत्वं चेत्याकारत्रयेण संभृतसौरभाः परमैकान्तिनो विरलास्सन्ति; एतत्प्रतिभटाकारविशिष्टा अपशदास्तु भूयांसस्सन्ति; सर्वेऽप्यमी संमिलितास्सन्तो भगवत्सविधमुपसर्पेयुः, भगवांस्तु तेषांतेषां चित्तवृत्तिपरीक्षणे परमचतुरः। अत एव तांस्तान् सम्यगेव परीक्ष्य सर्वथा स्वात्मन्येव निरतत्वेन गृह्यमाणानां परमभोग्यो भवन् तद्विश्लेषं क्षणमात्रमप्यसहमानस्सततं तत्संश्लिष्ट एव भवति। इतरांस्तु कापुरुषान् तत्तद्रुचिगोचरीभूतक्षुद्रवस्तुप्रदानेन अपसारयति। नैतद् भगवतोऽवद्यम्; स तावत् प्रकृत्या पक्षपातविरहित एव.....इत्युक्तं भवति॥ .... (५)

—* पांचवीं गाथा—कोळ्गै कोळामैयिलांदान् *—

"ये लोग, क्या मेरे पास से कोई अल्प फल लेकर छूट जायंगे? अथवा क्या मेरे पास ही नित्यनिवास करना चाहते हैं?" ऐसी परीक्षा कर, अपने साथ ही रहना चाहनेवाले परमभक्तों को अमृत के समान अति भोग्य रहनेवाले भगवान, गुण देखकर किसीका स्वीकार और दोष देखकर किसीका परित्याग करने के पक्षपात से विरहित एवं राग द्वेप शून्य होकर विराजमान हैं॥

अनन्यार्हशेषत्व, अनन्यशरणत्व और अनन्यभोग्यत्व (माने भगवान का ही शेष रहना, उन्हींको उपाय मानना और उन्हीका अनुभव करना चाहना) रूप आकारत्रय से विशिष्ट परमैकान्ती महात्मा लोग इस संसार में बहुत कम मिलते हैं। इनके विरुद्ध अल्प जन तो बहुत ही मिलते हैं। परंतु कदाचित ये सभी लोग मिलकर भगवान के पास जाकर उनकी स्तुति पूजा इत्यादि करते हैं। भगवान तो अपने पास आनेवालों की सच्ची भावना के परीक्षण करने में बडे चतुर हैं। अतः ठीक परीक्षा करने के बाद उसमें पूर्णरूप से समुत्तीर्ण परमभक्तों को वे अपनाकर स्वयं भी उनके क्षणमात्रवियोग का भी सहन करने में अशक्त होकर, सर्वदा उनसे मिले ही रहते हैं; और दूसरे क्षुद्र मानवों को उन उनकी अपेक्षित अल्पवस्तु देकर हटा देते हैं। यह हुआ भगवान का विलक्षण स्वभाव। परंतु इसीसे उनको पक्षपाती कहना अनुचित है। क्यों कि चेतन के अपेक्षित पुरुषार्थ देना कभीं पक्षपात नहीं होगा॥ .... (५)

(गाथा.) अमुद् ममरर्ह ट्कीन्द * निमिर्शुड राळिनेडुमाल् *
अमुदिलु माच्च विनियन् * निमिर् तिरै नीळ्कडलाने ॥ ६ ॥

उदधिमथनेन देवानाममृतप्रदाता जाज्वल्यमानहेतिराजविलसत्पाणिः निरवधिकवैभवनिधिः उत्तरङ्गविपुलजलधिशायी भगवान् सत्यममृतादप्यत्यन्तभोग्यः॥

गाथायामस्याम् उदधिमथनेन देवानाममृतप्रदातेति विशेषणं जीवनाडीभूतम्। स्वतः परमभोग्यं भगवन्तं प्राप्तवन्तोऽपि दिविषदो हन्त! तदीयायां भोग्यताया मनासक्ताः केवलं क्षोदिष्ठं फलमुपलभ्य कृतकृत्या अभूवन्; दिव्यायुधलसत्पाणिः क्षीरसागरशायी च स भगवान् अमृतादपि परमभोग्यमूर्तिः खलु; तदेकप्रावण्येन क्षुद्रफलनिस्पृहा भवितुमर्हन्तोऽप्यमरास्ते अहह! अल्पप्रयोजनकाङ्क्षिणो ह्यभूवन्निति स्वकीयं निर्वेदभरं प्रकाशितवान् भवति मुनिवरो गाथयाऽनया। यद्यपि देवानां क्षेपो गाथायां व्यक्ततरो न दृश्यते, तथाऽपि गाथा-संनिवेशस्तद्गमक एवेति गाढदर्शिभिराचार्यवर्यैं रवधारितम्। देवानां क्षेप इव देवदेवस्य भगवतः प्रशंसाऽपि विवक्षितैवात्र; "भगवन्! न वयं भवन्तं कामयामहे; लवणरसमेव लिप्सामहे" इत्यभिधाय क्षुद्रफलकामनां प्रकाशयद्भ्यः तत् क्षुद्रफलमपि प्रदायोपकरोति खलु भगवानिति प्रशंसाऽपि हि गम्यते॥ .... (६)

—* छठी गाथा—अमुदममरर्गट्कीन्द *—

समुद्र को मथकर देवों को अमृत देनेवाले, जाज्वल्यमान चक्र धरनेवाले, सीमातीत वैभव-वाले और उछलनेवाली लहरों से परिवृत सागर में शयन करनेवाले भगवान, सत्य ही उस सागरमें से समुत्पन्न अमृत से भी भोग्यतर हैं॥

इस गाथा में प्रयुक्त भगवान के विशेषणों में प्रधानभूत विशेषण यही कि, [समुद्र को मथकर, देवों को अमृत देनेवाले]। देवों ने स्वयं परमभोग्य भगवान को प्राप्त करते हुए भी, उनकी वह भोग्यता समझने में अशक्त होकर, उनकी उपेक्षा करते हुए अत्यल्प फल पाकर निवृत्त हो गये। दिव्यायुधधारी क्षीरसागरशायी भगवान तो अमृत से भी अधिक भोग्य दिव्य मंगलविग्रहवाले हैं; उनके दर्शन करने पर

देवों को उन्हीमें चित्त लगाकर अमृत से विमुख होना चाहिए था। परंतु, हाय! अल्प प्रयोजन माँगते हुए वे लोग भगवान से विमुख हो गये। प्रकृत गाथा में आळ्वार ऐसा अपना निर्वेद बता रहे हैं। यद्यपि मूल गाथा में इस प्रकार देवों की स्पष्ट निंदा नहीं दीखती है; तथापि सूक्ष्म विवेचक हमारे आचार्यों का यह अभिप्राय है कि गाथा के शब्दों पर पूर्ण ध्यान देने से उनका यही तात्पर्य प्रतीत होता है। इतना ही नहीं। वरन् भगवान की यह अद्भुत प्रशंसा भी यहां पर सूचित की जाती है—यों स्पष्ट कहते हुए, कि, "हे भगवन्! हम आपको पाना नहीं चाहते; समुद्र का लवण-रस ही हमारे लिए पर्याप्त है," अतिक्षुद्र फल पाने की अपनी इच्छा प्रकट करनेवाले देवों को भी, भगवान उनके अपेक्षित फल देकर उनपर अनुग्रह करनेवाले परमोदार हैं॥ .... (६)

(गाथा.) नीळ् कडलशू ळिलङ्गैक्कोन् * तोळ्हळ् तलै तुणिशेय्दान् *
ताळ्हळ् तलैयिल वणङ्गि * नाळ्कडलै क्कळिमिने ॥ ७ ॥

विपुलजलधिपरिवृतलङ्कापुरीनाथस्य रावणस्य भुजवनं शिरांसि च विलूनवतो भगवतः पादौ शिरसा प्रणम्य द्राघीयांसं जीवितकालं क्षिपत भो जनाः!॥

पूर्वगाथोक्त परमभोग्यतया सह अप्रमेयशक्तिविशेषं च बिभ्रतो रघुनन्दनस्य भगवतो गुणानुभव एव कालक्षेपविषयो भवितुमर्हतीति गाथयाऽनयोपदिशति मुनिवरः। 'विपुलजलधिपरिवेष्टिताया लङ्कापुर्याः खल्वहमधीश्वरोऽस्मि' इत्यवलेपभरेण स्वात्मना सह प्रस्पर्धितुमुज्जृम्भितं दशानन मेकेन बाणेन एकपदे निहन्तुं प्रभविष्णुरपि दाशरथि भगवान् प्रथमतो भुजवनानां लवनेन अथ शिरसां निपातनेन च लीलारसमुपभुज्य पश्चाद्विनाशितवान्। यदा दशाननं प्रत्युपदेशान दिदेश भगवती जानकी, तदा प्राह—* मित्रमौपयिकं कर्तुं रामस्थानं परीप्सता। वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः॥ * इति। अत्र * घोरं वधमनिच्छता त्वयेति कथनेन मम भर्ता महातेजास्त्वां चित्रवधं हि प्रापयिष्यतीति सूचितं भवति। ततश्च चित्रवधोऽस्य देव्यमिमत इति जानन् जानकीजानिः वालिनमिव तमिमं क्षणमात्रे अनिघ्नन् एकस्मिन्दिने भुजानां लवनम् अपरस्मिन्दिने शिरसां लवनं च कुर्वन् स्वकीयं चित्रवधवैदग्ध्यं दर्शयामासेव। अत एव मुनिवरोऽत्र रावणं निहत्येत्यनुक्त्वा भुजवनलवनं शिरसां लवनं च निर्दिदेशेति बोध्यम्॥ आश्रितपक्षपातिनो विरोधिनिरसनशीलस्य * बहवो नृप! कल्याणगुणाः पुत्रस्य सन्ति ते * धातूनामिव शैलेन्द्रो गुणानामाकरो महान् * इति प्रशस्यमानान् गुणगणाननुभूय कालं क्षिपतेति सत्यं साधीयानयमुपदेशः॥ .... (७)

—* सातवीं गाथा—नीळ् कडळ् शूळिलङ्गैक्कोन् *—

विशाल सागर से परिवृत लंकापुरी के स्वामी रावण के सभी बाहुओं तथा सिरों के काटनेवाले भगवान के श्रीपादों का, अपने सिर से प्रणाम कर, सुदीर्घ अपने जीवित समय का पार कर लीजिए।

इस गाथा में आळ्वार हमें यह उपदेश दे रहे हैं कि पूर्वोक्त अतिमात्र भोग्यता से एवं अप्रमेय शक्तिविशेष से विभूषित श्रीरामचंद्र भगवान के शुभगुणों का अनुभव करना ही जीवन-काल बिताने का श्रेष्ठ मार्ग है। रावण तो विशाल सागर परिवृत लंकापुरी का राजा होने के गर्व से मस्त होकर भगवान से ही स्पर्धा करने लगा। ऐसे दुष्ट का, यद्यपि भगवान एक ही बाण से मार सकते थे; फिर भी उन्होंने ऐसा नहीं किया; किंतु पहले उसके बीसों भुजाओं को काट कर, पीछे एकैक करके दसों सिर काटते हुए कुछ लीलारस का अनुभव कर, बाद में उसका संहार किया। सुंदरकांड में रावण को हितोपदेश करनेवाली सीतादेवी ने कहा था कि "मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता। वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः॥" (यदि तुम घोर वध पाना नहीं चाहते, और श्रेष्ठ स्थान पाना चाहते हो, तो मेरे प्रभु की शरण में जा।) यहां पर, "घोर वध" कहनेवाली सीताजी का यह अभिप्राय था—"मेरे प्रभु तुझे अनायास-मरण पाने नहीं देंगे; अपितु तेरा भयंकर वध कर डालेंगे।" शायद हनुमान जी से यह संवाद सुनकर श्री रामचंद्रजी ने यह निश्चय किया कि सीतादेवी रावण का चित्रवध ही करना चाहती है। अतः उन्होंने वाली की भांति एक बाण से सहसा उसका संहार न करते हुए पहले एक दिन उसके बाहु काट कर, दूसरे दिन सिर काट कर, उसका घोर वध किया। इस अर्थ की सूचना करने के लिए ही आळ्वार इस गाथा में 'रावण-संहर्ता' कहने के बदले में इतने लंबे शब्द का प्रयोग कर रहे हैं कि, "रावण के बाहुओं और सिरों काटनेवाले।" तथा च प्रकृत गाथा का यह तात्पर्य निकला कि, इस प्रकार आश्रित पक्षपाती और उनके विरोधियों का निरसन करने में समर्थ श्री रामचंद्र भगवान के उन कल्याणगुणों का चिंतन करते अपना समय बिताना मानव मात्र का कर्तव्य होगा, जिनकी प्रशंसा, "बहवो नृप! कल्याण-गुणाः पुत्रस्य सन्ति ते" (हे दशरथ चक्रवर्तिन्! आपके सुपुत्र के कल्याणगुण अनंत हैं), "धातूनामिव शैलेन्द्रो गुणानामाकरो महान्" (जैसे पर्वत गैरिकादि धातुओं का उत्पत्तिस्थान है, इस प्रकार श्री रामचंद्रजी सद्गुणों के उत्पत्तिस्थान होते हैं) इत्यादि प्रकार पुष्कल मात्रा में की गयी है॥ .... (७)

(गाथा.) कळिमिन् तोण्डीर्हळ् कळित्तु * तोळुमि नवनै चोळुदाल् *
वळिनिन्न वल्विनै माळ्विचु * अळिविन्नि आक्कम् तरुमे ॥ ८ ॥

भो भक्तजनाः! विषयेषु रुचिं त्यजत। त्यक्त्वा पूर्वोक्तं दाशरथिं भगवन्तं सेवध्वम्। सेवन-मात्रे स भगवान् प्राप्यप्रतिबन्धकानि पापानि दुरुद्धराण्यपि समूलमुन्मूल्य अपुनरावृत्तिलक्षण-मैश्वर्यं मनुगृह्णीयात्॥

भगवत्सङ्गस्तावदितरसङ्गपरित्यागपूर्वक एव सन् कार्यकारी भवितुमर्हति। * परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि * इति ह्याहुः। राघवशरणागतिप्रवणो विभीषणः * त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः। श्रीरङ्गनाथं भगवन्तं प्रपद्यमानो भगवान् रामानुजार्योऽपि * पितरं मातरं दारान् पुत्रान् बन्धून् सखीन् गुरून्। रत्नानि धनधान्यानि क्षेत्राणि च गृहाणि च। सर्वधर्मांश्च संत्यज्य सर्वकामांश्च साक्षरान्। लोकविक्रान्त चरणौ शरणं तेऽव्रजं विभो! * इति भविष्यत्पुराणवचनमनुसंदधान एव प्रपेदे। प्रपत्तिं विदधानो भगवान्

गीताचार्योऽपि * सर्वधर्मान्परित्यज्येति परित्याज्यपरित्यागमेव प्रथमतो विदधे। तमेव इतरसङ्गपरित्यागं मुनिवरोऽत्र प्रथमत आदिशति। गाथायाम् [विषयेषु रुचिं त्यजत; त्यक्त्वा] इति वर्तेते। किमेवं कथनमावश्यकम्? "विषयेषु रुचिं त्यक्त्वा" इति वाक्यमेदमन्तरा कथनं हि वरीयः—इति केचिन्मन्येरन्। भगवति सङ्गादपि इतरसङ्गप्रहाणमेव प्रधानतरमिति द्योतनं वाक्यभेदफलं ध्येयम्। * सर्वधर्मान्परित्यज्येति चरमश्लोकार्थं इह गाथायामुत्तरार्धेऽवसेयः॥ .... (८)

—* आठवीं गाथा—कळिमिन् तोण्डीहंळ् *—

हे भक्तजनो! आप क्षुद्र विषयांतर संग छोड़ दीजिए; वह छोड़कर पूर्वोक्त श्रीरामचंद्र भगवान का सेवन कीजिए। यों सेवन करने मात्र से वे भगवान जन्मपरंपरा में कमाये हुए आपके अतिप्रबल पापों का समूल विनाशकर, शाश्वत मोक्ष संपद का भी प्रदान करेंगे॥

शास्त्रों का यह सिद्धांत है कि विषयसंग छोड़ देने के बाद किया जानेवाला भगवदाश्रयण ही फलप्रद होगा। इस विषय में, "परमात्मनि यो रक्तः विरक्तोऽपरमात्मनि" (क्षुद्रविषयों में आसक्तिहीन होकर जो भगवान पर प्रेम करेगा....) इत्यादि प्रमाण हैं। श्रीरामचंद्रजी के श्रीचरणों में शरणागति करनेवाले विभीषण भी, "त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः" (मैं अपने पुत्र पत्नी इत्यादि छोड़कर श्रीरामचंद्रजी की शरण में आया हूं) कहते हुए आया। श्रीरंगनाथ भगवान की संनिधि में शरणागति करनेवाले श्री रामानुजस्वामीजी ने भी, (शरणागतिगद्य में) "पितरं मातरं दारान् पुत्रान् बन्धून् सखीन् गुरून्। रत्नानि धनधान्यानि क्षेत्राणि च गृहाणि च। सर्वधर्मांश्च संत्यज्य सर्वकामांश्च साक्षरान्। लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो॥" (हे प्रभो! मैं अपने पिता, माता, पत्नी, पुत्र, दूसरे बांधव, मित्र, (सामान्यज्ञान के उपदेशक) गुरु, रत्न, धनधान्य, खेत, घर, समस्त धर्म, स्वर्गादि समस्त भोग, केवलात्मस्वरूपप्राप्ति इत्यादि सभी वस्तु छोड़कर लोक नापनेवाले आपके श्रीचरणों की शरण में आ गया) इस भविष्यपुराण-वचन का अनुसंधान करते हुए शरणागति की। एवं प्रपत्ति की विधि करनेवाले गीताचार्य ने भी प्रारंभ में "सर्वधर्मान् परित्यज्य" कहते हुए इतरसंग का त्याग करने की आज्ञा दी। अतः हाल में आळ्वार भी पहले इतरसंग परित्याग करने का उपदेश दे रहे हैं। मूलगाथा में, [क्षुद्र विषयांतरसंग छोड दीजिए; वह छोडकर....] इत्यादि वचन कुछ अधिकोक्ति लगेगी। अर्थात् एक ही वाक्य में, "क्षुद्रविषयांतर संग छोड कर" कह देना सरल प्रतीत होगा। परंतु यह सरल कथन छोड़कर लंबा वाक्य लिखने का एक कारण है। वह यह कि इस वाक्य से भगवदाश्रयण की अपेक्षा विषयांतरसंग-परित्याग को ही अधिक महत्त्व दिया गया है। गाथा के उत्तरार्ध में चरमश्लोक के उत्तरार्ध का विवरण किया जा रहा है॥ .... (८)

(गाथा.) **तरुम् अव्वरुम् पयनाय * तिरुमहळार् तनिकेळ्वन् *
पेरुमै ·पुडैय पिरानार् * इरुमैविनै कडिवारे॥ ९॥**

परमपुरुषार्थं प्रयच्छन् परमः पुमान् लक्ष्मीसनाथस्सन् वितरेत्। लक्ष्मीसंबन्धेन समिन्धानसमृद्धिकस्स भगवान् पुण्यपापरूपकर्मद्वयानुषङ्गमपि छिन्द्यात्॥

अधस्तनगाथायामुक्तं "सेवनमात्रे स भगवान् प्रातिप्रतिबन्धकानि सकलान्यपि पापानि प्रणाशयेत्" इति। तदुपरि शङ्का जाता—वयं हि चिरादेव घोरदण्डनार्हपापकारिणस्स्मः; एवंविधानामस्माकं विषये सेवामात्रेण कथं स एवमनुगृह्णीयात्? इति। तत्र समाश्वासनं ददाति गाथा सैषा। न खलु स भगवान् ब्रह्मचारी; कमलागृहमेधी हि सः। सा च * लक्ष्मीः पुरुषकारत्वे निर्दिष्टा परमर्षिभिः। ममापि च मतं ह्येतन्नान्यथा लक्षणं भवेत्॥ * इत्युपश्लोकिता। * पापानां वा शुभानां वा वधार्हाणां प्लवंगम। कार्यं करुणमार्येण न कश्चिन्नापराध्यति * इति कपीश्वरस्यापि सान्त्वनेन आश्रितजनरक्षणदाक्षिण्यं प्रकाशितवती च। भर्तृवाल्लभ्येन चेतनविषयक-कारुण्येन च पुष्कलायास्तस्या स्सन्निधानेन नास्माकं फलव्यभिचारः शङ्क्यशङ्क इति सूचितं भवति। [लक्ष्मीसंबन्धेन समिन्धानसमृद्धिकस्स भगवान्] इत्यत्र * श्रद्धयाऽदेवो देवत्वमश्नुते * इति श्रुतिवाक्यम्, * अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा * इति इतिहासरत्नस्थं मारीचवाक्यं चानुसंधेयम्। एतादृशोऽयं भगवान् * तदा विद्वान् पुण्यपापे विधूय * इतिश्रुत्युक्तरीत्या विधूननयोग्यपुण्यपापानुषङ्गविच्छेद-कारी भविता नूनमित्युक्तं भवति॥ .... (९)

—* नवमी गाथा—तरुमव्वरुम् पयनाह *—

पूर्वोक्त अतिश्रेष्ठ पुरुषार्थ देनेवाले भगवान, लक्ष्मीनाथ होते हुए वह फल देंगे। एवं लक्ष्मी संबंध से उज्वल वैभववाले वे भगवान (हमारे) पुण्य पाप रूप उभयविध कर्मसंबंध भी दूर करेंगे॥

पिछली गाथा में बताया गया कि भगवान अपना सेवन करनेवाले भक्तों के समस्त पाप भी दूर करेंगे। इस पर यह शंका हुई कि, "अनादिकाल से अत्यधिक मात्रा में नानाविध पाप करनेवाले हम पर, भगवान अपना सेवन करने मात्र से कैसे अनुग्रह कर सकेंगे?" प्रकृत गाथा इसका समाधान करती है। तथाहि—हम तो एकाकी नारायण का नहीं, किंतु श्रीमन्नारायण का ही सेवन करते हैं। श्री, अथवा लक्ष्मीजी का यह लक्षण शास्त्रोक्त है—"लक्ष्मीः पुरुषकारत्वे निर्दिष्टा परमर्षिभिः। ममापि च मतं ह्येतत्....॥ अर्थात् महर्षि लोग लक्ष्मीजी को पुरुषकार बताते हैं; मैं (भगवान) भी इस विषय में सहमत हूं।" श्री रामायण की यह कथा प्रसिद्ध है कि रावणवध के बाद सीतादेवी से यह शुभ समाचार कहने के लिए अशोकवनिका में पधार कर हनुमानजी ने जब सीताजी से वहां की क्रूर राक्षसियों का संहार करने की अनुमति मांगी, तब सीताजी ने "पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम। कार्यं करुणमार्येण न कश्चिन्नापराध्यति॥" (अर्थात् इस संसार में अपराध न करनेवाला कौन है? कोई भी नहीं। विचार करने पर सभी को दोषी बताना पडता है। अतः गुणदोषों की चिंता छोडकर सबके प्रति दयाभाव करना ही सत्पुरुष का उचित कार्य है।) कहती हुई उन पापिनी राक्षसियों को भी उनसे बचाया। ऐसी लक्ष्मीजी में भर्तृवाल्लभ्य एवं चेतनों पर दयाभाव, ये दोनों गुण अत्यधिक मात्रा में विराजते हैं। अतः इनके द्वारा भगवान का आश्रयण करने पर हमारी इष्टसिद्धि अवश्य होगी। उत्तरार्ध में [लक्ष्मीसंबंध से उज्वलवैभव-वाले वे भगवान्] कहने का यह तात्पर्य है कि भगवान का वैभव लक्ष्मीसंबंध के अधीन है। श्रुति कहती

है कि "श्रद्धयाऽदेवो देवत्वमश्नुते," अर्थात् पहले अदेव होते हुए भगवान लक्ष्मीसंबंध से देव बन गये। (श्रद्धा—लक्ष्मी का वैदिक नाम है।) वाल्मीकि रामायण में मारीच का यह वचन भी जानने योग्य है— "अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा।" अर्थात् सीतादेवी जिसकी पत्नी हैं, वह अप्रमेय तेजोरूपी है। तथा च ऐसे माहात्म्यवाले भगवान अवश्य ही अपने आश्रित को मोक्षप्रतिबंधक सकलविध पुण्यपापरूप कर्मबंधन से मुक्त कर सकते हैं॥ .... (९)

(गाथा.) कडिवार् तीय विनैहळ् * नोडियारु मळवैकण् *
कोडिया अडुपुळ्ळुयर्त्त * वडिवार् माधवनारे॥ १०॥

शत्रुनिरसनपटीयांसं पतगराजं ध्वजपदे निदधानो विलक्षणदिव्यमङ्गलविग्रहशाली श्रियःपतिः क्रूरतमानि पापानि क्षणमात्रे भस्मसात्कर्तुं प्रभवति॥

लक्ष्मीपुरुषकारबलेन भगवता भक्तजनेषु क्रियमाणोऽनुग्रहः कियत्या कालकलया लब्धावकाशस्या-दित्याकाङ्क्षायाम् अवतरति गाथेयम्। त्रुटिकामात्र इत्युच्यत इह। शत्रुविनाशनदक्षिणस्य पक्षिराजस्य वाहनतद्ध्वजस्य * उपस्थितं तेन पुरो गरुत्मता त्वदंघ्रिसंमर्दकिणाङ्कशोभिना * इत्युक्तरीत्या सदा सन्निहितत्वेन * अवाहनपरीक्षियं पतगराजमारोहतः करिप्रवरबृंहिते भगवतस्त्वरायै नमः * इत्युक्तियोग्यतया त्वरितमेव खलु सर्वकार्यनिर्वर्तनम्। [विलक्षणदिव्यमङ्गलविग्रहशाली] इत्येतद्विशेषणम् तदीयदिव्यमङ्गलविग्रहदर्शन-मात्रतोऽपि भक्तजनदुरितराशिविनाशो भवितेति सूचयति। [क्रूरतमानि पापानीत्यादि।] *यद् ब्रह्मकल्प-नियुतानुभवेऽप्यनाश्यं तत्किल्बिषं सृजति जन्तुरिह क्षणार्धे। एवं सदा सकलजन्मसु सापराधं क्षाम्यस्यहो तदभिसन्धिविराममात्रात्॥ * इत्येषा श्रीकूरेशमिश्र श्रीसूक्तिरिहानुसन्धेया॥ .... (१०)

—* दसवीं गाथा—कडिवार् तीय विनैहळ्* —

शत्रुविध्वंसक गरुड जी को अपना ध्वज बनानेवाले, अतिविलक्षण दिव्यमंगलविग्रहवाले लक्ष्मीपति भगवान, एक क्षणमात्र में अतिक्रूरपापों का विनाश कर सकते हैं॥

इस गाथा में यों कहा जाता है कि लक्ष्मीजी के पुरुषकार बल से भक्तों पर कृपा करनेवाले भगवान को उनके पाप मिटाने के लिए एक क्षणमात्र से अधिक समय नहीं लगेगा। यहां पर भगवान को गरुडध्वज कहने का यह भाव है—गरुडजी शत्रुओं का विनाश करने में समर्थ हैं; "उपस्थितं तेन पुरो गरुत्मता" इत्यादि स्तोत्ररत्न के अनुसार, सदा भगवान के सामनें, आज्ञाप्रतीक्षी होकर खड़े रहते हैं और आवश्यकता होने पर (जैसे कि गजेंद्र की रक्षा करने के प्रसंग में) अति शीघ्र कार्य करनेवाले हैं। अतः इनके सांनिध्य से भक्तों के दुःख अवश्य ही दूर होंगे। भगवान के दिव्यमंगलविग्रह का कीर्तन करने का यह भाव है कि उसके दर्शनमात्र से भी भक्तों का ताप दूर हो जायगा। यथा अयोध्यावासी जनता ने कहा—"दृष्ट एव हि नश्शोक मपनेष्यति राघवः। तमस्सर्वस्य लोकस्य समुद्यन्निव भास्करः॥ (रा. अयो. (८३-९) अर्थात् उदय होते ही समस्त लोकों का अंधकार मिटानेवाले सूर्य की भांति श्रीरामचंद्र भी अपने

दर्शन मात्र से हमारा शोक दूर करेंगे। [अतिक्रूर पाप] कहने का यह तात्पर्य है कि यह चेतन एक पलभर में इतने पाप कमाता है, जिनका अनेक ब्रह्मकल्पों तक अनुभव करने पर भी नाश न होगा। इतने प्रबल होते हैं इसके पाप॥ .... (१०)

(गाथा.) माधवन्पाल् शठकोपन् * तीदवमिन्नि युरैत्त *
एदमि लायिर त्तिप्पत्तु * ओदवल्लार् पिरवारे॥ ११॥

लक्ष्मीनाथे भगवति भक्तिमाला श्रीशठकोपमुनिना अखिलहेय प्रत्यनीकस्य तस्य गुणविशेष-मधिकृत्य कीर्तितं निरवद्य सहस्रगीत्यन्तर्गतं दशकमिदमधीयानाः संसृतिचक्रपरिवर्तन-दवीयांसो भवितारः॥ (इति फलकीर्तनेन समापितमिदं दशकम्॥)

—* एतद्दशकतात्पर्यसारसंग्राहको द्रमिडोपनिषत्संगतिश्लोकः *—

दास्येषु देशसमयाङ्गकलापकर्तृद्रव्यादिना न नियमः पुरुषोत्तमस्य।
भक्तिः परं बहुमता तत एव सोऽयं स्वाराध इत्युपदिदेश मुनिस्तु षष्ठे॥

—* ग्यारहवीं गाथा—माधवन्पाल् शठकोपन् *—

लक्ष्मीनाथ भगवान के विषय में भक्ति करनेवाले श्रीशठकोपसूरी के, अखिलहेयप्रत्यनीक उनके गुणविशेष को लक्ष्यकर गाये हुए, दोषरहित सहस्रगीति के अंतर्गत इस दशक का अध्ययन करनेवाले फिर इस संसार में जन्म लेने का कष्ट नहीं पायंगे॥ (इस फलश्रुति के साथ यह दशक समाप्त किया गया॥ .... (११)

पहले शतक का छठा दशक समाप्त हुआ॥
आल्वार् तिरुवडिगळे शरणम्॥

श्रीमते रामानुजाय नमः। श्रीमद्वरवरमुनये नमः॥

॥ सहस्रगीत्याम् प्रथमशतके - सप्तमं दशकम् - पिरवित्तुयरर॥

(सं.) अवतारिका—अधस्तनदशके भगवतः स्वाराधत्वाभिधानो गुणविशेषोऽनुभूतो मुनिवरेण। अनायासत आराधयितुं शक्यो भवतु कामं सः; आराधनस्य सुकरत्वेऽपि आश्रयणस्य भोग्यताविरहे न खलु तृप्तिर्भवेत्। लोके बहवः पुमांसः अल्पसंतुष्टा स्सुकराराधना दृश्यन्ते ननु; तेषामाश्रयणं न खल्वस्माकं भोगाय कल्पते। स्वाराधत्व भोग्याश्रयणकत्वयो स्सामानाधिकरण्यं जगति दुर्घटमेव प्रायः। भगवति तु नैवम्; न केवलं स्वाराधत्वमस्य; परमभोग्यसमाश्रयणत्वं चास्य समधिक मसाधारणं चेति दशकेऽस्मिन् प्रतिपाद्यते। "भगवतस्समाश्रयणं न केवल मस्मादृशामेव स्वादिष्ठम्; भगवतोऽपि स्वादिष्ठम्" इति आचार्या अतिशयोक्ति-मालम्ब्य मधुरतरमाचक्षते। एतेन 'भगवान् स्वयं स्वात्मान माश्रयति किम्' इति केचिदनुयोक्तुमुद्युञ्जीरन्।

मैवम् । 'भगवतो वैलक्षण्यं स्वस्यापि स्पृहणीयमिव भासते' इति तावद्विवक्षितमिह । अस्यार्थस्य संवादरूपतया श्रीपराशर भट्टार्यस्य दिव्यतमं श्लोकद्वयमिह प्रदर्शयामस्सह विवरणेन ।

श्रीरङ्गराजस्तवपूर्वशतके—(७५) * अग्रे तार्क्ष्येण पश्चादहिपतिशयनेनात्मना पार्श्वयोश्च श्रीभूमिभ्यामतृप्त्या नयनचुलुकैस्सेव्यमानामृतौघम्....रङ्गराजं भजामः * इति । अयं भावः । उत्सवमूर्ति भगवान् रङ्गनाथः स्वदिव्यमङ्गलविग्रह वैलक्षण्यं स्वयमनुबुभूषुः स्वयमेव गरुत्मद्वपुस्सन् पुरतोऽवस्थाय मुखभागसुषमामनवरत मवलोक्यापि न तृप्यति । पुरोभागादपि पश्चाद्भागस्यातिसुन्दरत्वात् तदवलोकनहेवाकेन स्वयमेव मूलमूर्तिस्सन् भुजगपतिशयनशायी भूत्वा सततमवलोक्यापि न तृप्यति । अथ पार्श्वभागयोरपि परमशोभामनुभोक्तुकामस्स्वयमेव श्रीदेवीभूदेवीरूपे आस्थाय दर्शंदर्शं न तृप्यति इति । भगवद्दिव्यमङ्गलविग्रहस्य सर्वेऽपि भागा भृशं रमणीया स्पृहणीयाश्चेति कथितं भवति । अथ चोत्तरशतके—(७७) * मनुकुलमहीपालव्यानम्रमौलिपरम्परामणिमकरिकारोचिर्नीराजितांघ्रिसरोरुहः । स्वयमथ विभो ! स्वेन श्रीरङ्गधामनि मैथिलीरमणवपुषा स्वार्हाण्याराधनान्यसि लम्भितः । * इत्यसौ श्लोकोऽतितरां मधुरः । मनागिदं विवरणमवधेयम् । श्रीरामायणे अयोध्याकाण्डे चक्रवर्तिसंकल्पित यौवराज्याभिषेक पूर्वाङ्गतया अनुष्ठानविशेषाणा मुपवर्णनावसरे * सह पत्न्या विशालाक्ष्या नारायणमुपागमत् * इत्युक्तं सर्वे विदन्ति । भगवता रामचन्द्रेणोपासितेयं मूर्तिः का नाम ? इति चेत्, इक्ष्वाकुवंश्यैर्महीपालैः पारम्पर्येणाराधिता मूर्तिरिति पौराणिकी प्रथा । रावणवधानन्तरमयोध्यामासाद्य मकुटाभिषेक महोत्सवानुभवावसरे सर्वेभ्योऽपि तत्तदनुरूप पारितोषिक प्रदानं प्रकरणे विभीषणाय इयमेव मूर्तिः प्रदत्तेति श्रीरङ्गमाहात्म्यतः, * लब्ध्वा कुलधनं राजा लङ्कां प्रायाद्विभीषणः * इति श्रीरामायण श्लोकतश्चावसीयते । मनुकुलमहीपालै राराधिता मिमां दिव्यमूर्तिं तेषु पार्थिवेष्वन्यतमो भगवान् रामचन्द्रोऽपि स्वयमाराधयामासेति स्फुटमवबुध्यामह इतिहासेन । अथात्र आराध्यः कः ? आराधकः कः ? इति विमर्शे वस्तुत उभयोरैक्यमेव ह्यप्रतिहतसिद्धिकम् । उदाहृतश्लोके एतदेवोच्यते * स्वयमथ विभो ! स्वेन श्रीरङ्गधामनि मैथिलीरमणवपुषा स्वार्हाण्याराधनान्यसि लम्भितः * इति । लोके महाराजा भगवदाराधनं स्वयमेव नानुतिष्ठन्ति, परिचारकद्वारैव प्रणयन्तीति सर्वतः पश्यामः; एवं चक्रवर्तितनूजो रामचन्द्रोऽपि देवताराधने कमपि परिचारक मनियुञ्जानः स्वयमेवाराधयामासेत्यतः स्ववैलक्षण्यं स्वात्मानमपि हन्त ! विवशयतीति वेदितव्यं हि भवति । आराधने इतरे केचन नियुक्ताश्चेत् ते अश्रद्धया आलस्येन वा स्ववैलक्षण्यार्हमाराधनं नैवानुतिष्ठेयुरिति सीतापति भगवानमन्यतेति हि "स्वयं स्वेनैव स्वार्हाण्याराधनान्यसि लम्भितः" इति परमोदारया वचनव्यक्त्या विबोधयन्ति भट्टपादाः ।

श्रीमान् वेङ्कटनाथार्योऽपि पादुकासहस्रे अनयैव दिशा किमपि पद्यरत्नमवातीतरत्—* मनुजत्वतिरोहितेन शक्ये वपुषैकेन विरोधिनां निरासे । अभजद्भरतादिभेदमीशः स्वयमाराधयितुं हि पादुके ! त्वाम् ॥ * इति । अयं भावः । दुष्कृतां विनाशाय हि भगवानवातरत् । स्वयमेकाकी सन्नवतीर्य कृत्स्नमपि कार्यजात मवलीलया निर्वर्तयितुं निपुणोऽपि भरतादिवर्ष्माण्यपि स्वयमेव बिभ्राणः किमर्थं मवातरदिति विमृशन्नाचार्य इदं प्रतिपेदे "स्वयमाराधयितुं हि पादुके ! त्वाम्" इति । स्वकीयपादुकाराधने स्वस्यैव कुतूहलमजनि; तदाराधनं यदि स्वयमेव कुर्यात् पण्डितपामरविभागमन्तरेण सर्वेपि परिहसेयुरित्ति मत्वा भरतवर्ष्म विभर्तिस्मेति प्रोक्तमिह रसिकैराखादयम् । तथाच भगवदाश्रयणम् अतदर्हस्य तस्यापि स्वाद्यमिति स्थिते भक्तानां किमुत ? इमामेव परमभोग्यतामनुसृत्य मुनिवरोऽस्मिन्दशके । तृतीया गाथा दशकस्यास्य जीवनाडीति वेदितव्यम् ॥ .... *

—* पहले शतक के सातवे दशक की अवतारिका *—

(हिंदी.) पिछले दशक में आळ्वार से भगवान के स्वाराधत्व नामक गुण का अनुभव किया गया। अब परमभोग्यसमाश्रयणत्व (अथवा भोग्यता) नामक गुण का अनुभव किया जायगा। तथाहि— भगवान के स्वाराध होने मात्र से उनका आश्रयण करने की किसीकी प्रवृत्ति नहीं होगी; परंतु यदि वह आश्रयण भोग्य होगा, तो ही उसमें प्रवृत्ति होगी। यह तो लोकानुभव की बात है कि, यद्यपि हमारी अल्प सेवा स्वकार कर बहुत तृप्ति पानेवाले (अर्थात् स्वाराध) लोग बहुत मिलते हैं; तथापि उनकी सेवा करते हम प्रसन्न नहीं हो सकते (अर्थात् उनकी सेवा करने में हमें आनंद नहीं, वरन् दुःख ही मिलता है)। एवं यदि कदाचित् ऐसी कोई व्यक्ति मिलती हो, जिसकी सेवा करने में हम बडे चाव से उतर सकेंगे, तो ऐसे जन की सेवा बहुत कठिन होती है (अर्थात् वह सरलपूजा से तृप्त न होगा)। अब आळ्वार कहते हैं कि भगवान स्वाराध तो हैं ही; तदुपरांत उनका आश्रयण इतना आनंदप्रद होता है, जो कुछ कहने की बात नहीं। इस प्रकरण में हमारे आचार्य कुछ अतिशयोक्ति से बात करते हुए कहते हैं कि, "यह बात नहीं है कि भगवान का आश्रयण करना हमारे जैसे भक्तों का ही आनंददायक है; किंतु वह स्वयं भगवान को भी मीठा लगता है।" यह सुन कर कोई पूछ उठेगा कि, "क्या भगवान कभी स्वयं अपनी सेवा करने को उतरेंगे?" परंतु यह अनुचित है। पूर्वोक्त आचार्यश्रीसूक्ति का इतना ही भाव है कि भगवान का माधुर्य इतना अधिक है कि वह स्वयं उनको भी अपनी ओर खींच सकता है। कदाचित् आचार्य यह भी रसमय अर्थ बताते हैं कि भगवान स्वयं अपनी सेवा भी करना चाहते हैं। श्रीपराशर भट्टर् स्वामीजी के दो पद्य इस विषय का सुंदर दृष्टांत होते हैं। "अग्रे तार्क्ष्येण पश्चादहिपतिशयनेनात्मना पार्श्वयोश्च श्रीभूमिभ्यामतृप्त्या....रङ्गराजं भजामः" इसका यह भाव है—श्रीरंगक्षेत्र में (सभी क्षेत्रों की भांति) भगवान की दो मूर्तियां विराजती हैं—अचलमूर्ति और चलमूर्ति या भोगमूर्ति। सामने गरुडजी विराजमान हैं और भोगमूर्ति के दोनों पार्श्व श्रीदेवी और भूदेवी विराजमान हैं। अब भट्टर स्वामीजी का कहना है कि भोगमूर्ति का सौंदर्य इतना आकर्षक है कि स्वयं भगवान को भी उसका अनुभव करने का लालच उत्पन्न हुआ। अतः उन्होंने स्वयं चार रूप लेकर (पूर्वोक्त गरुडजी, अचल शेषशायी मूर्ति और दिव्यमहिषियों के रूप लेकर) चारों ओर से उन भोगमूर्ति के दर्शन कर रहे हैं; परंतु उसमें अभीतक तृप्त न हुए। इस विलक्षण वर्णन का यह परम तात्पर्य है कि भगवान का सौंदर्य सभी दिशाओं में बडा आकर्षक होता है। यह दूसरा पद्य है—"मनुकुल महीपाल........स्वाहाण्याराधनान्यसि लंभितः॥" यह भाव है— श्रीरामायण में अयोध्याकांड की कथा है कि जब दशरथ चक्रवर्तीने श्रीरामचंद्रजी का राज्याभिषेक करने की आज्ञा की, तब पहले दिन श्रीरामचंद्रजी को, उपवास, देवताराधन इत्यादि कितने मंगलकार्य करने पडे। उस प्रसंग का वर्णन करते हुए श्रीवाल्मीकि भगवान कहते हैं कि "सह पत्न्या विशालाक्ष्या नारायणमुपागमत्" (अर्थात् श्रीरामचंद्रजी ने अपनी पत्नी के साथ नारायण की पूजा की)। पौराणिक महर्षियों का मत है कि उक्त प्रकार श्रीरामचंद्र जी से संपूजित देव साक्षात् श्रीरंगनाथ भगवान थे। अर्थात् श्रीरंगनाथ भगवान् इक्ष्वाकुवंश के राजाओं की वंशपरंपरा से पूजित उनके कुलदेव थे। अतः श्रीरामचंद्रजी भी उनकी

पूजा करते थे। रावणवध के बाद जब वे अयोध्या पधार कर राज्य में अभिषिक्त हुए, और समस्त अतिथि अभ्यागतों को सन्मान करने लगे, तब उन्होंने भक्ताग्रेसर विभीषणजी को उनकी भक्ति के अनुगुणतया, और उनकी प्रार्थना के अनुसार इन श्रीरंगनाथ भगवान का ही प्रदान किया। वाल्मीकि रामायण में भी इसकी सूचना मिलती है—"लब्ध्वा कुलधनं राजा लङ्कां प्रायाद्विभीषणः" (अर्थात् विभीषणजी कुलधन (श्री रंगनाथ भगवान को) पाकर लङ्का लौट गये)। तथाच यह अर्थ सिद्ध हुआ कि मनुवंशके समस्त राजाओं से पूजित श्रीरंगनाथ भगवान की पूजा श्री रामचंद्रजी से भी की गयी थी। श्रीरामचंद्रजी तो साक्षात् नारायण भगवान के ही अवतार थे। अर्थात् भगवान ने स्वयं अपनी ही पूजा की। उक्त भट्टर स्वामीजी के पद्य में यही अर्थ बतलाया जा रहा है कि, "हे श्रीरंगनाथ भगवन्! आपने सीतापति श्रीरामचंद्रजी के रूप से अपनी ही स्ववैभवोचित सेवा की।" यह भाव है—हम देख रहे हैं कि राजा महाराजा इत्यादि अमीर लोग आलस्य इत्यादि के परवश होकर नौकर से (किसी पंडितजी से) भगवान की पूजा कराते हैं; न तु स्वयं करते हैं। परंतु चक्रवर्तितनूज श्रीरामचंद्र जी यह प्रथा दूर कर स्वयं अपने करकमलों से ही भगवत्पूजा करते थे। इसका कारण यही था कि वह भगवत्सेवा उनको इतनी मीठी लगती थी, कि वे किसी कारण से उसे दूसरों को देना नहीं चाहते थे। एवं उनका यह भी भय था कि कदाचित् सेवक लोग भगवान का वास्तविक वैभव जानने में अशक्त होकर आलस्य व अश्रद्धा से ठीक ठीक उनकी सेवा नहीं करते होंगे। अतः उन्होंने यह निश्चय किया कि, "यदि इन (श्रीरंगनाथ) भगवन्मूर्ति की अनुरूप सेवा करनी हो, तो सेवारसज्ञ मुझे ही उसमें उतरना चाहिए; पैसे लेकर काम करनेवाले पूजारी के हाथों उसे छोड देना बहुत अनुचित होगा।" तथाच उक्त दो श्लोकों का यह तात्पर्य हुआ कि भगवान के दर्शन, पूजन इत्यादि, स्वयं उनको भी अच्छे लगते हैं।

श्री वेदांतदेशिक स्वामीजी भी पादुकासहस्र में ऐसा ही एक सुंदर अर्थ बताते हैं इस पद्यमें— "मनुजत्वतिरोहितेन शक्ये वपुषैकेन विरोधिनां निरासे। अभजद्भरतादिभेदमीशः स्वयमाराधयितुं हि पादुके त्वाम्॥" श्रीरामायण की कथा है कि रावणादि दुष्टों का विनाश करने के लिए भगवान ने इस धरातल पर अवतार किया। ठीक है। परंतु इस लिए रामलक्ष्मणभरतशत्रुघ्नों के रूपमें चार अवतार लेने की आवश्यकता कौनसी थी? क्या एक ही रूपसे वह काम नहीं बन सकता था? अवश्य ही बन सकता था। फिर भगवान ने क्यों कर चार रूपों का धारण किया? इस प्रश्न का यह अत्यद्भुत प्रत्युत्तर दिया जा रहा है कि श्रीरामपादुका की पूजा करने के लिए ही भरतादि रूपों का अवतार हुआ। अर्थात् श्रीदेशिकस्वामीजी उक्त श्लोक में बताते हैं कि भगवान को अपनी पादुका की पूजा करने की इच्छा हुई; परंतु यह कुछ अशक्य-सी प्रतीत हुई; क्योंकि स्वयं अपनी पादुका की पूजा करनेवाला जन सबकी हँसी का पात्र बनेगा। अतः चतुर भगवान ने भक्त भरतजी के रूप में अवतार लेकर श्रीरामचंद्ररूपी अपना पादुका की पूजा की। तथा च इस प्रकरण का यह तात्पर्यार्थ निकला कि भगवान का सेवन जब उसके अनधिकारी स्वयं भगवान को भी मीठा लगता, तब वह अवश्य ही भक्तलोगों को बहुत बहुत अच्छा लगेगा। अतः यह शंका करना अनवसर है कि क्या भगवदाश्रयण सुखद होगा अथवा दुःखद होगा। क्योंकि

भगवान से संबंधित सभी वस्तु—उनके दर्शन, चेष्टित, रूप, सेवन इत्यादि सभी—परमभक्तों के लिए अतिभोग्य ही होते हैं; कभी अन्यथा नहीं होंगे। प्रकृत दशक की तीसरी गाथा में इस अर्थका सुंदर वर्णन किया जायगा। वही इस दशक का मुख्यपथ है॥ .... *

(गाथा.) पिरविचुयररं आनचुव्व निंकु * तुरवि च्चुडर् विलकम् तलैप्पेय्वार् *
अरवनै आळिप्पडै यन्दणनै * मरवियै यिभि मनत्तु वैप्पारे ॥ १ ॥

(प्रथमगाथावतारिका॥ भगवदाश्रयणस्य परमभोग्यतां विवक्षुर्मुनिवरः प्रथमगाथायामस्यां कैवल्यार्थिषु गर्हामाविष्करोति। परमभोग्यवस्तुनोऽनुभवं विहाय क्षुद्रानुभवनिष्णाताः खलु भवन्ति हन्त! कैवल्यार्थिन इति गर्हणं कलयति॥

जननमरणजन्यदुःखमात्रनिरासाय आत्मावलोकनात्मके कैवल्योपासने विगाह्य सकलोपाधिविनिर्मुक्तस्वयंप्रकाशजीवात्मसाक्षात्कारप्रेप्सवः कैवल्यार्थिनः परमधार्मिकं हेतिराजालंकृतपाणिं परमपरिशुद्धं च भगवन्तं स्वाभिलषितक्षुद्रफले विस्मृतिगन्धमन्तरेण उपासते हन्त!॥

गीतायां "जरामरणमोक्षाय मामाश्रित्य यतन्ति ये" इत्यनेन श्लोकेन प्रतिपादिता अधिकारिणः स्वात्मानुभवमात्रप्रेप्सवः कैवल्यार्थिनः। एते हि केवलं पुनर्जन्म मा भूदिति कामयमाना भगवदनुभवनिस्पृहाश्च। अधस्तात्पञ्चमे दशके सप्तम्यां गाथायामेतेऽधिकारिणो मुनिवरेण संश्लाघिता अभूवन्; अत्र तावदमी विदूष्यन्ते; तदेतदुभयं कथमिव घटेत? इत्याशङ्का मा स्म भूत्। मुनीन्द्रः स्वनिकर्षानुसन्धानेन स्वस्य भगवदुपसर्पणं भगवतस्तस्यावद्यावहं स्यादिति मन्यमानः खलु पञ्चमं दशकं तत् व्यजिज्ञपत्। तदात्वे 'केवला अनुभवावसरे भगवन्तमुपसृप्य तं न दूषयन्ति खलु; ते भृशं श्लाघ्याः' इति धिया तथा नाम तान् श्लाघते स्म। तथा च तत्प्रकरणोचितं तत्प्रशंसनमिति मन्तव्यम्। प्रकृतं तावत् भगवद्भोग्यतानुभवप्रकरणम्। ईदृशीं भोग्यतामननुभवन्तः स्वात्ममात्रभोगे विश्राम्यन्ति हन्त! केवला इति धिया तेषां गर्हणं च स्थाने।

जननमरणजन्यदुःखनिरासकामना यद्यपि परमैकान्तिनामप्यस्ति, तथाऽपि तेषां तादृशदुःखनिरासमात्रकामना नास्ति; भगवदनुभवकैङ्कर्यादिस्पृहाया एव तेष्वपरिमितत्वात्। अतः प्रकृतगर्हा तान् न स्पृशतीति वेदितव्यम्। सकलोपाधिविनिर्मुक्त स्वयंप्रकाशजीवात्म साक्षात्कारः केवलं कैवल्यैरुद्दिष्टं फलमिति मूल एव सुस्पष्टमभ्यधायि खलु। अत्र पूर्वाचार्याणां पिण्डितार्थकथनमित्थम्—"सांसारिकसंकलदुःखध्वंसकामनया आत्मोपासनेऽवगाह्य प्रकृतिविनिर्मुक्तात्मस्वरूपानुभवप्रेप्सवः पूर्वार्धतो निर्दिष्टा" इति।

एवंविधं क्षुद्रफलमपि ते भगवतस्सकाश एव प्रार्थयन्ते; भगवानपि तेभ्यस्तत् प्रददाति स्वकीयया करुणया इत्यभिधीयत उत्तरार्धेन। परमधार्मिकमिति भगवतो विशेषणम् प्रयोजनान्तरपराणामप्युपकारकतारूप मौदार्यातिशयं व्यनक्ति। हेतिराजालंकृतपाणिमिति विशेषणम्—आभरणकोटिप्रविष्टमायुधपरिबृढं श्रीसुदर्शनमवेक्ष्य "भगवन् हेतिराज! जय विजयी भव" इति मङ्गलाशासने प्रयोक्तव्ये सत्यपि कथममी वराकाः केवलाः

क्षुद्रफललाभेन दूरतोऽपसरन्तीति मुनिवरस्य विस्मयं निर्वेदं वा व्यनक्ति। अथ अन्तिमं विशेषणम्—केवलानां भगवति शुद्धिगुणविशिष्टत्वानुसन्धानमेव केवलमस्ति हन्त! भोग्यताधीस्तु नैव इति मुनिवरस्य हार्दं तापमभिव्यनक्ति। हरेः परमभोग्यताया अस्मरणम् स्वाभिलषिते क्षुद्रफले अविस्मरणं च केवलानामतितरां शोचनीयमिति चरमचरणः स्फुटयति ॥.... .... (१)

—॥ पहली गाथा—पिरवित्तुयरर ॥—

(हिंदी अवतारिका) भगवत्सेवा को परमभोग्य बताना चाहनेवाले आळ्वार, उसकी भूमिकारूप, प्रकृत गाथा में कैवल्यार्थियों की निंदा करते हैं, कि "हाय! केवलनामक ये मूर्ख लोग, परमभोग्य भगवान का अनुभव छोडकर क्षुद्र आत्मानुभव करने में निरत हो रहे हैं॥"

जननमरण प्रयुक्त दुःख मात्र को दूर करने के लिए आत्मावलोकन नामक कैवल्योपासन करते हुए, उससे सकल उपाधियों से विरहित एवं स्वयंप्रकाश जीवात्मा का साक्षात्कार पाना चाहनेवाले कैवल्यार्थी लोग, परमधार्मिक तथा चक्रायुधधारी और परमपरिशुद्ध भगवान की उपासना को, हाय! अपने अपेक्षित क्षुद्रफलकामना को किंचिन्मात्र भी शिथिल बनाये विना ही, किया करते हैं॥

भगवद्गीता में "जरामरणमोक्षाय" इत्यादि पद्य में उपवर्णित 'कितने लोग जननमरणचक्ररूप इस संसार से विरक्त होकर, इससे छूटकर परिशुद्धात्मस्वरूप-दर्शन नामक आत्मानुभवमात्र करना चाहते हैं। अर्थात् पुनर्जन्म का अभावमात्र इनका अपेक्षित पुरुषार्थ है, न तु भगवान का अनुभव। इनकी निंदा प्रकृत गाथा में की जा रही है। पांचवें दशक के सातवीं गाथा में आळ्वार ने ही इनकी प्रशंसा की थी, जो अब निंदा कर रहे हैं। परंतु इसमें कोई विरोध नहीं है। क्योंकि वह प्रकरण ही दूसरा था। तथाहि—उस दशक में आळ्वार भगवान के परत्व के दर्शन कर, और अपनी नीचता का अनुसंधान कर, अपने को भगवत्सेवा करने के अनधिकारी मानते हुए, भगवान से दूर भागना चाहते थे। उस समय उनकी भावना यह थी कि भगवान की सेवा करने के बहाने उनको दूषित करने की प्रवृत्ति की अपेक्षा, उनसे दूर रहना कई गुन श्रेष्ठ है। इस कारण से भगवद्विमुख कैवल्यनिष्ठों की प्रशंसा उधर की गई। परंतु भगवान के सौशील्यादिगुणदर्शन के बाद आळ्वार का वह (नैच्यानुसंधानरूप) रोग मिट गया और आप पूर्णरूप से भगवदनुभव करने में उतर गये। अतः आळ्वार को अब, जब कि उन्हें भगवान की परमविलक्षण भोग्यता का अनुभव हुआ किया, ऐसे विलक्षण भोग्य भगवदनुभव की परवाह नहीं करते हुए केवल आत्मानंद में निरत मानव अत्यंत भाग्यहीन प्रतीत हो रहे हैं। अतः इसमें किसी प्रकार का विरोध नहीं।

गाथा के उपक्रम में सूचित जननमरणप्रयुक्त दुःख दूर करने की इच्छा, 'केवलों' की भांति परमैकांतियों को भी होती ही है। परंतु 'केवल' उतनामात्र पाना चाहते हैं, परमैकांति, मुख्यतया भगवदनुभव ही करना चाहते हैं; जन्म मरण परंपरा से छूटना तो भगवदनुभव का पूर्वांगमात्र है। अतः उन्हें जननमरणप्रयुक्तदुःख मात्र को दूर करने की इच्छा नहीं है। इस लिए वे प्रकृतगाथोक्त निंदा के पात्र

नहीं हो सकते। यद्यपि मूलगाथा में यहां पर मात्र शब्द का प्रयोग नहीं किया गया; तथापि आगे यह स्पष्ट शब्द प्रयुक्त हैं ही कि ये ('केवल') लोग स्वयंप्रकाश जीवात्मा का ही साक्षात्कार पाना चाहते हैं। अतः हाल में मात्र शब्द जोडा गया। तथाच इन सभी अर्थों का विवेचन कर, पूर्वाचार्य इसका यह तात्पर्य बताते हैं कि, "प्रकृत गाथा के पूर्वार्ध से आळ्वार उन लोगों का संकेत कर रहे हैं जो सांसारिक समस्तदुःखों का विनाश पाने की इच्छा से आत्मोपासन करते हुए उससे प्रकृतिवियुक्त परिशुद्ध आत्मा का अनुभव करना चाहते हैं।"

गाथा के उत्तरार्ध में यह अर्थ कहा जाता है कि, ये 'केवल' लोग स्वयं भगवान से ही पूर्वोक्त अपना इष्ट माँगते हैं; और भगवान भी अपनी सीमातीत करुणा से उन्हें अपेक्षित वह पुरुषार्थ दे देते हैं। प्रयोजनांतरपरों की भी उक्त इच्छा का पूरण करना भगवान के सीमातीत औदार्य का फल है; इस अर्थकी सूचना करने के लिए उनको विशेषण दिया गया—[परमधार्मिक]। एवं भगवान को [चक्रायुधधारी] कहनेवाले आळ्वार इस प्रकार अपने निर्वेद तथा आश्चर्य की सूचना करते हैं कि, "शत्रुविध्वंसक आयुध होते ही, भगवान की शोभा बढानेवाले आभूषण भी बननेवाले सुंदर चक्रराज के दर्शन करने पर भक्तलोग तो, "जय जय श्री सुदर्शन" कहते हुए उनका मंगलाशासन करते हैं; परंतु हतभाग्य ये 'केवल' इस बात पर ध्यान न देते हुए, क्षुद्रफल लेकर भगवान को छोड दूर भाग जाते हैं।" एवं भगवान को [परमपरिशुद्ध] विशेषण देते हुए आळ्वार् अपना यह हार्द संताप बताते हैं कि, "अहो! ये मूर्ख लोग भगवान में शुद्धिगुणमात्र का अस्तित्व मानते हैं; नतु भोग्यता का।" चौथे पाद का यह भाव है कि, ये "केवल" लोग न तो अपने अपेक्षित स्वात्मानुभवरूप क्षुद्र पुरुषार्थ को कभी भूलते हैं; न वा भगवान की परमभोग्यता का किंचित् भी स्मरण करते हैं; यह इनका काम सबसे अधिक शोचनीय है॥ .... (१)

(गाथा.) वैप्पाम् मरुन्दाम् अडियरै * वल्विनै त्तुप्पाम् पुलनैन्दुम् तुञ्ज क्कोडानवन् *
एप्पाल् यवर्क्कुम् नलत्ताल् उयर्न्दुयर्न्दु * अप्पालवन् * एङ्ग ळायर् कोळुन्दे ॥ २ ॥

स्वाश्रितान् जनान् प्रबलदुरितनिदानभूतपञ्चेन्द्रियवश्यतारूपादात्मविनाशादपसार्य संरक्षन् तेषामक्षय्यनिधिर्भवन् विरोधिनिरसनमुखेन दिव्यौषधनिर्विशेषश्च भवति। स क इति चेत्; सार्वत्रिकसर्वजनातिशायिमहानन्दविषये * यतो वाचो निवर्तन्ते * इत्युपनिषदाम्नातरीत्या वाङ्मनसयोरभूमिः अस्मत्स्वामी गोपालतल्लजः॥

अधस्तनगाथायां कैवल्यार्थिप्रस्तावशात् तत्प्रत्यनीकाः परमैकान्तिनः स्मृतिविषया बभूवुर्मुनिवरस्य। तादृशानां परमभागवतानां विषये भगवदनुग्रहप्रकारः परमशोभन इति कीर्त्यतेऽनया गाथया। जगति येये जनाः प्रबलदुरितभरिता दृश्यन्ते ते सर्वेऽपि पञ्चेन्द्रियवश्यताबलादेव तथाविधा भवन्तीति नैतत्परोक्षम्। ये तावदनन्य-प्रयोजनास्सन्तः स्वात्मानमुपसर्पन्ति, तान् इन्द्रियकिङ्करत्ववैदेशिकानाकल्प्य परमसुकृतिव्यपदेशं प्रापयति भगवान्। तेषां महानिधिर्भवति, दिव्यौषधात्मकश्च बोभवीति। उपाय उपेयं च स्वयमेव भवतीति भावः।

* अन्तर्हितो निधिरसि त्वमशेषपुंसां लभ्योऽसि पुण्यपुरुषैरितरैर्दुरापः * इति श्रीकूरेशमिश्र श्री सूक्तिरीत्या पुण्यपुरुषैकसुलभमहानिधिर्भवति; चिरमनुभवेऽप्यक्षय्यो भवतीति भावः। भक्तानां दिव्यौषधं भवतीत्यत्र * य आत्मदा बलदाः * इति श्रुतिवाक्यमुपदर्श्य रस्यतममर्थमनुगृह्णन्त्याचार्याः। उपात्तश्रुतिवाक्यस्यायमर्थः;—आत्मानं ददातीत्यात्मदाः; बलं ददातीति बलदाः। * यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् * इत्याम्नातरीत्या नन्दगोपयशोदादिभ्य इव स्वदिव्यमङ्गलविग्रहमनुभाव्यं प्रयच्छति भक्तेभ्यः। क्षुद्रविषयोपभोगेऽप्यशक्तस्संसारी जनो भगवदनुभवे कथं नु धृष्णुयात्? नैव धृष्णुयादिति स एव भगवान् कलयन् स्वानुभवौपयिकं बलमपि ददाति। एतदेव भगवतो दिव्यौषधत्वं नाम। अथ आनन्दवल्लीप्रसिद्धमवाङ्मनसगोचरमानन्दभूमानं मनागुपवर्णयति मुनिवरस्तृतीये पादे। * उपर्युपर्यब्जभुवोऽपि पुरुषानित्यादिस्तोत्ररत्नसूक्तिरिहानुसन्धेया। भगवत आनन्दमयत्वकथनम् प्रकृतविवक्षितपरमभोग्यत्वकथनपर्याय इति प्रतिपत्तव्यम्॥ .... (२)

—* दूसरी गाथा—वैप्पाम् मरुन्दाम् *—

(हिंदी) अपने पादाश्रितों को प्रबल पाप के हेतुभूत इंद्रियवश्यतारूप आत्मविनाश से बचाते हुए उनकी रक्षा करनेवाले, उनके लिए अक्षय निधि के सदृश बननेवाले, और उनके विरोधियों को निरास कर दिव्य औषध के सदृश रहनेवाले भगवान, सर्वदेशस्थ समस्त जनों से बढकर रहनेवाले आनंदगुण के बारे में हमारे मन वो वचन से परे रहते हैं और हमारे स्वामी गोपश्रेष्ठ हैं॥

पूर्वगाथा में कैवल्यार्थियों का प्रस्ताव करने पर आंळ्वार को उनसे विरुद्ध परमैकान्तियों का स्मरण आया। अतः इस गाथा में आप ऐसे विलक्षण भक्तों के विषय में भगवान से किये जानेवाले महान अनुग्रह का वर्णन करते हैं। यह तो निश्चित वार्ता है कि लोगों के दुःख भोगने का कारण उनकी पंचेंद्रियवश्यता ही है। अतः भगवान अनन्यप्रयोजन होकर अपने पादारविंदों का आश्रय लेनेवाले परमैकांति भक्तजनों की इंद्रियपरवशता दूरकर, उन्हें पुण्यवान बनाते हैं; और उनके लिए वे महानिधि एवं दिव्य औषधरूपी भी होते हैं। अर्थात् भगवान उनके लिए स्वयं फल और तत्साधक उपाय होते हैं। निधि तो पुण्यवानों को ही मिलता है, और बहुत उपयोग किये जाने पर भी कम नहीं होता। भगवान में भी ये दो गुण परिपूर्ण रहते हैं; अतः उन्हें निधि कहना बहुत उचित है। एवं भगवान को दिव्यौषध पुकारने का यह रसमय कारण आचार्यों से बताया जाता है—एक वेदवाक्य भगवान को "य आत्मदा बलदाः" कहता है। आत्मानं ददातीति आत्मदाः—अर्थात् अपने का ही प्रदान करनेवाला आत्मदाः कहलाता है; एवं बलदाः शब्द का अर्थ है—बल देनेवाला। तथाच यह अर्थ हुआ कि भगवान अपने भक्तों को स्वयं अपने का प्रदान करते हैं, और साथ में उपना अनुभव करने के आवश्यक बल का भी प्रदान करते हैं। हम जानते हैं कि भगवान ने नंदगोप यशोदा आदियों को स्वात्मदान (माने अपने दिव्यमंगलविग्रह का ही प्रदान) कर दिया। परंतु अल्पशक्तिवाला यह मानव, जब अल्प लौकिक विषयों का भी ठीक अनुभव नहीं कर सकता, फिर वह अलौकिक भगवान का अनुभव कैसे करेगा? नहीं करेगा। अतः स्वयं भगवानं ही उसे अपन अनुभव करने में पर्याप्त बल भी देते हैं। इस लिए वे स्वयं दिव्यौषध कहलाते हैं। औषध का प्रसिद्ध काम

तो शरीर व इंद्रियों को बलवान बनाना है। अतः भगवान को औषध पुकारना सर्वथा उचित है। आनंद-वल्ली नामक उपनिषद बताती है कि भगवान का आनंद न केवल मनुष्य, गंधर्व, देव, इंद्र, बृहस्पति, चतुर्मुख आदि दूसरे सभी श्रेष्ठव्यक्तियों के आनंद से कई गुन अधिक है; किंतु हमारी वाणी अथवा मनसे भी परे हैं। श्रीयामुनाचार्यस्वामीजी ने भी स्तोत्ररत्न में "उपर्युपर्यब्जभुवोऽपि" इत्यादि (उन्नीसवें) पद्य में इस अर्थ का वर्णन किया। भगवान को परमभोग्य बताने के लिए हाल में आळ्वार उनको यह विशेषण दे रहे हैं। ऐसे महामहिम ही अपना वैभव छिपा कर गोपालकृष्ण के रूप में अवतीर्ण हुए॥ .... (२)

(गाथा.) आयर् कोळुन्दाय् अवराल् पुडैयुण्णुम् * मायप्पिरानै एन् माणिक चोदियै *
तूयवमुदै परुहि प्परुहि * एन् मायप्पिरवि मय र्वेरुत्तेने ॥ ३ ॥

गोपालकृष्णतयाऽवतीर्णम्, गव्यस्तेयाद्यपराधनिमित्तेन तैस्तैर्वल्लवैः प्रापितप्रहारबन्धनादिशिक्षा-विशेषम्, मायाचेष्टितविदग्धम्, माणिक्याभज्योतिर्मयदिव्यमङ्गलविग्रहानुभवं मह्यमुपकृत-वन्तम्, परिशुद्धदिव्यामृतवदतिमधुरमच्युतमनुभूयानुभूय सांसारिकमशेषं कल्मषमपाकृत-मकार्षम् ॥

भगवतः परमभोग्यता हि दशकस्यास्य प्रमेयसर्वस्वम्; तादृशीं भोग्यतां मुनिवरोऽसौ स्वस्मिन् फलपर्यवसायिनीमवेक्षमाणस्सानन्दमभिदधाति गाथामिमाम्। भगवतो भोग्यता हि न भवत्येकविधा; उच्चावचा सा। तस्य स्वरूपम् रूपम् गुणजालम् चेष्टितवृन्दम् विभूतिविस्तार इत्यादिष्वेकैकमपि चिन्त्यमानं भावुकानां परमभोग्यं भवति। * चरणौ मधुरौ चरणं मधुरम् मधुराभरणाङ्गुल्योऽपि दश। चरणाभरणावलिका मधुरा मधुराधिपतेरखिलं मधुरम्॥ * मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरं रुदितम्। अटनं मधुरं नटनं मधुरं मधुराधिपते रखिलं मधुरम्॥ * दधि मधुरं मधु मधुरं द्राक्षा मधुरा सिताऽपि मधुरैव। मधुरादपि मधुरतरा मधुरानाथस्य माधवस्य कथा॥ * इत्येवंविधान्यनुभवरसिकसुभाषितानि विराजन्ते खलु परश्शतानि। प्रकृतगाथायां तु श्रीकृष्णचेष्टितविशेषनिष्ठां परमभोग्यतामनुभवति मुनिवरः। गोपालकृष्णतयाऽवतीर्णमित्येतावन्मात्रकथनेऽपि भोग्यता-तिशयोऽनुभूत एव स्यात्; तदुपरि गव्यस्तेयाद्यपराधनिमित्तेनेत्यादिकथनं शब्दानुसन्धानमात्रमपि परम-भोग्यताप्रचुरम्। भगवतः कृष्णकिशोरस्य व्रजे प्रतिगोपगृहं च लगुडप्रहारलाभ उलूखलबन्धप्राप्तिश्च तस्य धिया परमभाग्यसर्वस्वम्, भक्तानां धिया परमभोग्यसर्वस्वम्। सान्दीपनिपुत्रानयन-वैदिकब्राह्मणपुत्रचतुष्टयानयनादीनां कृत्यानामतिमानुषत्वेऽपि तेषु भोग्यतां नानुसंदधते रसिकप्रवरा भक्ताः। * अन्तर्गृहे कृष्णमवेक्ष्य चोरं बध्वा कवाटं जननीं गतैका। उलूखले दामनि बद्धमेनं तत्रापि दृष्ट्वा स्तिमिता बभूव॥ * इत्येवमेवं प्रतिपाद्यमानेषु चेष्टितविशेषेषु भोग्यता अनन्यसाधारणी खलु। तामेव भोग्यतामत्रानुसंदधानो मुनिवर आनन्दस्य परमकाष्ठां प्रपद्यते।

मायाचेष्टितविदग्धमित्यत्र मायाशब्द आश्चर्यार्थकः। भगवतो धिया न कुत्रापि कृत्ये किमप्याश्चर्यं नाम; अनुभोक्तृभक्तजनधिया तु सर्वमप्याश्चर्यमहो। * घुंघुमिति किं भ्रमति अम्ब! दधिमध्ये? डिम्भ! ननु भूतमिह दूरमपयाहि। अम्ब! नवनीतमिति संगदति कृष्णे मन्दहसितं जयति मातुरतिरम्यम्॥ * इत्यादिकमिह

ध्येयम्। स्वयमवाप्तसमस्तकामस्सर्वेश्वरस्सन्नपि अनाप्तमाप्तव्यं बह्वस्तीति मन्यमान इव भुव्यवतीर्य तस्करप्रथां च प्रतिलभ्य बद्धो बभूवेत्येतद्वस्तुतः परमाद्भुतं खलु। अयच माणिक्याभज्योतिर्मयदिव्यमङ्गलविग्रहवत्त्वकथनं न तावद्दिव्यधामस्थितिकथनम्, अपितु व्रजे उलूखलबन्धकालिकस्थितिकथनमिति व्याचक्षाणानामाचार्यवर्याणां मेधाविलसितमनुभवरासिक्यं च हन्त! को वा वर्णयितुं प्रभवति॥ .... (३)

—❋ तीसरी गाथा–आयर्कोळुन्दाय् ❋—

गोपालकृष्ण के रूप में अवतार लेकर, (दूध मक्खन इत्यादि की चोरी करने के अपराध में गोपों से मार खानेवाले, मायाचेष्टित करने में समर्थ, मुझे माणिक्य के सदृश ज्योतिर्मय अपने दिव्यमंगलविग्रह का अनुभव देनेवाले परमोपकारक, और परिशुद्ध अमृत के सदृश अति मधुर भगवान का पुनः पुनः अनुभव करते हुए मैंने सांसारिक समस्त कल्मष का पार किया॥

अवतारिका में बताया गया कि भगवान को परमभोग्य बताना ही प्रकृत दशक का लक्ष्य है। अब आळ्वार प्रकृत गाथा में अपने से अनुभूत उस भोग्यता का वर्णन करते हैं। भगवान की भोग्यता एक प्रकार की नहीं, वरन् नाना प्रकारों की होती है। तथाहि उनके स्वरूप, दिव्यमंगलविग्रह, कल्याणगुण, व्यापार, विभूति इत्यादि में एकैक भी अनुभव करनेवालों को परमभोग्य लगता है। इस भोग्यता के प्रकाशक भावुकों के उद्गार हजारों मिलते हैं। यथा, "चरणौ मधुरौ चरणं मधुरं मधुराश्चरणाङ्गुल्योऽपि दश। चरणाभरणावलिका मधुरा मधुराधिपतेरखिलं मधुरम्॥" (मथुरानाथ श्रीनंदनंदन के चरण, चरणतल, चरण की उंगलियाँ, चरण के आभूषण इत्यादि सभी मधुर होते हैं।) "मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरं रुदितम्। अटनं मधुरं नटनं मधुरं मधुराधिपते रखिलं मधुरम्॥" (मथुरानाथ नंदकिशोर के मुख, नेत्र, हँसी, रोदन, चलन, नर्तन, इत्यादि सभी मधुर ही होते हैं।) "दधि मधुरं मधु मधुरं द्राक्षा मधुरा सिताऽपि मधुरैव। मधुरादपि मधुरतरा मधुरानाथस्य माधवस्य कथा॥" (मथुरानाथ लक्ष्मीपति श्रीकृष्ण की दिव्य कथा, लोक में मधुरतया प्रसिद्ध, मीठा दही, मधु, द्राक्षा, मिश्री इत्यादि वस्तुओं से बढकर मधुर होती है।) इत्यादि। आळ्वार प्रकृत गाथा में श्रीकृष्णचंद्र की किसी एक विलक्षण चेष्टा की भोग्यता का अनुभव करते हैं। भगवान का गोपालकृष्ण के रूप से अवतार करना ही, अथवा इस वृत्तांत का संकीर्तन मात्र ही अतिभोग्य होता है। तदुपरांत मक्खनचोरी इत्यादि वृत्तांतों का कथन और भी भोग्य है। स्वयं भगवान ने ही, व्रज में प्रत्येक घर मक्खन की चोरी करना, उस समय गोपियों से पकडा जाना, मार पीट खाना, ओखली में बधित होना इत्यादि अपने विचित्र चेष्टितों को अपना परमविलक्षण भाग्य माना। "जन्म कर्म च मे दिव्यम्" यह प्रसिद्ध गीतावचन इस विषय में प्रमाण है। (इसका यह अर्थ है—भगवान का कहना है कि मेरे जन्म और चेष्टित, में दिव्यम्—मुझे बहुत अच्छे माने भोग्य लगते हैं।) अतः भक्त लोग भी उन्हींको परम भोग्य मानते हैं। रसिक भक्त लोग, सांदीपनिपुत्रों को लौटाना, वैदिकब्राह्मण के चार पुत्रों को परमपद से लौटाना इत्यादि श्रीकृष्ण के चरित्रों को इतने भोग्य नहीं

मानते, जितने पूर्वोक्त नवनीत चौर्यादियों को भोग्य मानते हैं। अत एव ऐसे वृत्तांतों का वर्णन करनेवाले ही वचन अधिकतर मिलते हैं। जैसा—"अन्तर्गृहे कृष्णमवेक्ष्य चोरं बध्वा कवाटं जननीं गतैका । उलूखले दामनि बद्धमेनं तत्रापि दृष्ट्वा स्तिमिता बभूव ॥ (एक दिन श्रीकृष्ण चोरी से किसी एक गोपी के घर घुसकर कमरे में सुरक्षित मक्खन खाते थे। इतने में घरवाली गोपी ने उन्हें देख लिया। वह रुष्ट तो अवश्य हुई, परंतु श्रीकृष्ण को पकडकर स्वयं पीट न सकती थी; क्यों कि उसको यशोदाजी का डर था। अतः उसने सोचा कि, "मैं अभी यशोदाजी के पास जाकर, उन्हें यह वृत्तांत सुनाकर, यहां पर लेती आवूंगी। परंतु उतने में यह धूर्त कदाचित् बाहर निकल जायगा; अतः किवाड बंदकर जाऊंगी।" यों सोचकर वह गोपी अपने घर को ताला लगाकर बंदकर, शीघ्र यशोदाजी के यहां गयी। परंतु उधर वह देखती क्या! श्रीकृष्ण ओखली में बांधा जाकर रो रहे हैं। यह दृश्य देखते ही बेचारी वह गोपी स्तब्ध हो गयी।) श्रीकृष्ण के ऐसे चेष्टितों की भोग्यता सच ही वाचामगोचर है। अतः प्रकृत गाथा में आळ्वार इसी भोग्यता का अनुसंधान करते हुए सीमातीत ब्रह्मानंद जैसा आनंद भोगते हैं।

[मायाचेष्टित करने में समर्थ] इत्यादि। यहां पर माया शब्द का अर्थ है—अत्याश्चर्यमय। यद्यपि भगवान की दृष्टि में उनका कोई भी चेष्टित आश्चर्यकारक नहीं होता। तथापि उनका अनुभव करनेवाले भक्तजनों के अभिप्राय में उनके सभी चेष्टित आश्चर्यमय ही होते हैं। अत एव वे उनके अत्यल्प चेष्टित की भी भूरि प्रशंसा करते हैं। यथा, "धुंधुमिति किं भ्रमति अम्ब! दधिमध्ये? डिम्भ! ननु भूतमिह दूरमपयाहि। अम्ब नवनीतमिति संगदति कृष्णे मन्दहसितं जयति मातुरतिरम्यम्॥" (एक दिन यशोदाजी दही मथती थीं; पास ही श्रीकृष्णकिशोर खडे थे। मथने का शब्द सुनकर उन्होंने पूछा—"मैया! दहि में यह कोई वस्तु धुंधुं करती हुई भ्रमण कर रही है, यह क्या है?" माताजी ने उत्तर दिया कि, "बेटा! यह तो भूत है, तुमको पकड लेगा। अतः इसके पास मत आओ; दूर जा।" फिर श्रीकृष्ण बोले, "मैया! तुम मुझे धोखा दे रही हो। यह तो मक्खन है!" यह सुनकर यशोदाजी आनंदपरवश होकर हँस पडी।) स्वयं परिपूर्ण, अवाप्तसमस्तकाम और सर्वेश्वरेश्वर होते हुए भी, शायद कुछ पुरुषार्थ कमाना चाहते होंगे, इस प्रकार भूतल पर अवतार करना, दूध मक्खन इत्यादि अल्पवस्तुओं की चोरी करना, इस अपराध के निमित्त गोपियों से पकडा जाना, मार पीट खाना, बंधन पाना, इत्यादि भगवान के सभी चेष्टित परमाद्भुत हैं। [मणिक्य के सदृश ज्योतिर्मय दिव्यमंगलविग्रह] कहना परमपदनिवासी का वर्णन नहीं; परंतु ओखली में बांधे हुए श्रीकृष्ण की तात्कालिक शोभा का वर्णन है—ऐसे सुंदर अर्थ का वर्णन करनेवाले हमारे पूर्वाचार्यों की प्रतिभा सच ही परमाद्भुत है॥ .... (३)

(गाथा.) मयर्वर वेन् मनत्ते मन्निनान्तबै * उयर्विनैये तरुम् ओणूशुड र्कुचैयै *
अयर्वि लमरर्हळ् आदिक्कोळुन्दै * एन् इशैविनै एन्शोल्लि यान् विडुवेनो ॥ ४ ॥

मम मनसि नित्यसन्निधानेन अज्ञाननिरसननिरतम्, मम ज्ञानभक्तिविवृद्धिप्रदायकम्, तेजसां राशिवद्भासमानम्, नित्यविकसितज्ञानानां सूरीणां निर्वाहकम् मम स्वामित्वुल्यसम्पत्तिमपि

स्वयमेवानुगृहीतवन्तम् भगवन्तं केन वा कारणेनाहं विसृजेयम्? [न कदाऽपि कथञ्चिदपि विसृजेयमिति यावत् ॥]

मुनिवरः स्वस्य कृतकृत्यतां सूचयन्निव हि गाथामधस्तनीं व्यजिज्ञपत्। कृतकृत्यतायां सत्यां विश्रान्तिरेव हि वरम् इति शङ्का जायेत खलु; तामपाकुर्वन्निमां गाथामाह। भगवता कृतानां क्रियमाणानां चोपकारपरम्पराणामनुसन्धाने क्रियमाणे मम वाचो विश्रान्तिः कथमहो भवित्री? इत्यावेदयति। [मम मनसि नित्यसन्निधानेन अज्ञाननिरसननिरतम्] यद्यपि भगवान् आदावेव मुनिवरस्य ज्ञानपौष्कल्यमनुगृहीतवान्, मुनिवरश्च तमनुग्रहं प्रथमगाथायामेव प्रकाशितवांश्च; तथाऽपि ज्ञानक्षयकरे प्रकृतिमण्डले निवासात् अज्ञानाङ्कुरो जायेतापीति मन्यमानस्स एतस्य हृदये नित्यसन्निधिमकार्षीत्। एतादृशमहोपकारानुसन्धानेन स्वस्य विश्रान्त्यवकाशो नेति विवक्षति मुनिवरः [मम ज्ञानभक्तिविशुद्धिप्रदायकम्] "मम उत्कर्षप्रदायकम्" इत्येव मूलगाथायामुक्तिः। ज्ञानभक्तिभ्यामेव हि समुत्कर्षो मुनिवरस्य। अन्येऽपि नानाविधास्समुत्कर्षा इह सुवचाः; ते हि संसारसागरशोषकत्वम् विमुखानामपि विषये उपदेशनिरतत्वम् यमकिङ्कर भयानकत्वमित्यादयः। [तेजसां राशिवदवभासमानम्] भगवतस्स्वाभाविकी तेजस्विता नात्र विवक्षिता; मुनिवरविषये निरुक्तमहोपकारकरणेन समुदितस्सर्वाङ्गीणसमुल्लासो विवक्षितः। भगवतो भक्तजनानां हर्षणं स्वस्यैव प्रहर्षाय प्रकल्पते; * अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम्। कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ * इत्यादिकमिह भाव्यम्। [नित्यविकसितज्ञानानां सूरिणां निर्वाहकम्] मुनिवराय महोपकारकरणेनैव भगवान् स्वस्य नित्यसूरिनिर्वाहकत्वं प्रतिष्ठितं मन्यते; तदवगत्यैतदुदीरितमिति ध्येयम्। [मम स्वाभिमुख्यसम्पत्तिमपि स्वयमेवानुगृहीतवन्तम्] एतत्तु महोपकाराणां मूर्धन्यमिति मुनिवरस्तदिदमसकृदनुसन्धत्ते। "प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति गीतोक्तिः स्वस्मिन्नेव सफलेति विश्वसिति मुनिवरः। तथा चैवंविधमहोपकारकरणैकदीक्षितं भगवन्तं विसृज्य कथमिवाहमन्यां कथां कथयेयमित्युक्तं भवति ॥ .... (४)

—* चौथी गाथा—मयर्वर वेन्मनत्ते मन्निनान्तन्नै *—

अज्ञान का निरसन करते हुए मेरे मन में नित्यनिवास करनेवाले, मेरे ज्ञान व भक्ति बढानेवाले, मनोहर तेजोराशि के सदृश, ज्ञानसंकोच विरहित नित्यसूरियों के नाथ, और अपने से (भगवान से) मिलने की मेरी इच्छा उत्पन्न करनेवाले, भगवान को मैं क्योंकर छोड दूं? [किसी कारण से कभी न छोड़ूंगा।]

आळ्वार ने मानों अपने को पूर्णतया कृतकृत्य बताते हुए पिछली गाथा गायी। उनके कृतकृत्य होने पर इस दिव्य प्रबंध को भी समाप्त ही होना था; फिर यह कैसे चालू हो रहा है? यह शंका दूर करने के लिए प्रकृत गाथा गायी जा रही है। इसमें सारतया आळ्वार यह कहते हैं कि, "मेरे विषय में भगवान के किये हुए और किये जानेवाले असंख्य उपकारों का चिंतन करने पर मैं कैसे उनको भूल सकूंगा?" [अज्ञान का निरसन करते हुए] इत्यादि। यद्यपि भगवान ने आरंभ में ही आळ्वार का

अज्ञान मिटाकर उन्हें सच्चे ज्ञान का प्रदान किया था, जो कि स्वयं आळ्वार से ही (सहस्रगीति की) पहली गाथा में कीर्तित हुआ। तथापि यों सोच कर कि, "ज्ञान का संकोच करनेवाले संसार में रहनेवाले आळ्वार को कदाचित् फिर भी अज्ञान उत्पन्न होगा," ऐसे होने का अवकाश न देते हुए उन्होंने आळ्वार के हृदय में नित्य निवास कर दिया। अतः आळ्वार कहते हैं कि "भगवान के किये हुए इस महोपकार का स्मरण करने पर मैं कैसे विश्रांति पाऊं? [मेरे ज्ञान व भक्ति बढानेवाले]। मूल गाथा में इतना ही कहा गया है कि "मुझे श्रेष्ठता देनेवाले।" इसक यही अर्थ हो सकता है कि भगवान ने आळ्वार को ज्ञान व भक्ति देकर उनको श्रेष्ठ बनाया। आळ्वार की दूसरी कौन-सी श्रेष्ठता हो सकती है? अथवा, संसार-सागर को सुखा देना, विमुखों को भी सदुपदेश देना, यमभटों के भयंकर होना इत्यादि नानाप्रकार की श्रेष्ठताएं भी इस शब्द का अर्थ हो सकता है। [मनोहर तेजोराशि के सदृश] कहना भगवान के स्वाभाविक तेज का वर्णन नहीं; किंतु उक्त प्रकार आळ्वार के विषय में महोपकार करने से भगवान के सारे श्रीविग्रह पर जो शोभा छा गयी, उसका वर्णन है। भक्तजनों के उपकार करने से स्वयं भगवान आनंदित और उज्वल होते हैं। अत एव श्री संक्षेप रामायण में नारदजी ने विभीषण को लंका का राजा बनाने पर श्रीरामचंद्रजी को कृतकृत्य, दुःखमुक्त तथा प्रहृष्ट बतांया—अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम्। कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह॥ [नित्यसूरियों के नाथ] कहने का यह तात्पर्य हैं कि आळ्वार के विषय मे पूर्वोक्त उपकार करने के बाद ही भगवान अपने को नित्यसूरिनाथ मानते हैं। [अपने से मिलने की मेरी इच्छा उत्पन्न करनेवाले।] आळ्वार के अभिप्राय से भगवत्कृत उपकारों में सब से बडा उपकार यही है कि, वे अपने से मिलना नहीं चाहने वाले चेतन के मनमें मिलने की इच्छा उत्पन्न करते है। अतः आळ्वार बारं बार इस उपकार का कीर्तन करते हैं। यह इच्छा ही चेतन के श्रेयों का मूल है और इसे भी भगवान की देन के रूप में ही पाना पडता है। गीताचार्य ने भी गाया, "प्रीति-पूर्वकम्, ददामि बुद्धियोगं तं येन मामुपयान्ति ते।" आळ्वार का अभिप्राय है कि, "भगवान की यह उक्ति दूसरे किसी चेतन के विषय में नहीं; बल्कि मेरे विषय में ही सफल हुई।" तथाच, ऐसे महोपकारक भगवान को छोड, मैं कैसे दूसरी बात कर सकूंगा? ॥.... .... (४)

(गाथा.) विडुवेनो एन्विळक्कै एन्नावियै * नडुवे वन्दु उय्यक्कोळ्हिन्र नाथनै *
तोडुवे शेय्दु इळवाय्च्चियर् कण्णिनुळ् * विडवे शेय्दु विळिक्कुम् पिरानैये ॥ ५ ॥

मम सकलार्थप्रकाशकप्रदीपोपमम् मम धारकम् मामुज्जीवयितुमचिन्तितमेव स्वतः प्रवृत्तं नाथम्, कृत्रिमचेष्टितकरणेन बल्लवीजननयनेषु धूर्तकृत्यान्याकलयन्तं च भगवन्तं कथमहं विसृजेयम्॥

व्रजवासिनीनां बल्लववनितानामक्ष्णोः पुरतः प्रादुर्भूय विविधशृङ्गारचेष्टितविभ्रमैः स्वकीयां परम-भोग्यतां प्रदर्श्य तां आनन्दतुन्दिलस्वान्ता व्यररचद्वासुदेवो यथा, तथैव मामपि चेष्टितविशेषैर्वशीकृत्य स्वभोग्यता-लुब्धं कृतवानहो! कथमिममुत्सृजेयमहम्? गोपाङ्गना यदि कृष्णं विहाय वैकुण्ठनाथं कामयेरन् तर्हि अहमपि

तं विसृज्य इतरत्किमपि कामयेय इत्यभिदधाति। मूलगाथायाम् मम प्रदीप मित्येवानुगृहीतम्। प्रदीपो यथा तिमिर मपसार्य सर्वं वस्तुजातं सुष्ठु प्रकाशयति, तथा भगवानपि तत्वहितपुरुषार्थादि समस्तमर्थजातं स्वस्मै प्राचीकशदित्युपकारस्मृतिः। [मम धारकम्] अस्मादृशां संसारिणाम् अन्नपानादि हि धारकं भवति। न तथा मुनिवरस्य। * वासुदेवस्सर्वमिति रीत्या वासुदेवमेकमेव धारकपोषकभोग्यादि सर्वं मन्यते। [मामुज्जीवयितुमचिन्तितमेव स्वतः प्रवृत्तं नाथम्] * आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मन इति गायति भगवान् गीताचार्यः। अहं तावदात्मनो बन्धुर्नाभूवम्। आत्मनः शत्रुरेव सन्नहं स्वानर्थमेव सुचिरात्सम्पादितवानभूवम्; एवं गच्छति काले स एव भगवान् स्वकीयं वस्तु नष्टं माभूदिति धिया मच्चिन्तालेशमन्तरेण स्वयं समुपेत्य स्वीकृत्य समुज्जीवयामासेति तदीयस्सौहार्दगुण आविष्कृतो भवति।

अथ * कृत्रिमचेष्टितकरणेनेत्यादिना श्रीकृष्णकिशोरस्य परममधुरचरितविशेषोऽनुभूयते। कृत्रिमचेष्टितकरणम् धूर्तकृत्यकरणं चेति कृत्यद्वयमिहानुसन्धीयते। नवनीतमोषणादिकं कृत्रिमचेष्टितवर्गे ध्येयम्। गोपीव्यामोहनादिकं धूर्तकृत्यवर्गेऽनुसन्धेयम्। * धूर्तायितं तव हि यत्किल रासगोष्ठ्यां तत्कीर्तनं परमपावनमामनन्तीति श्रीकूरनाथगुरुवरोक्तरीत्या परमपवित्रकीर्तनं हि कृष्णस्य धूर्तायितम्; न केवलं पवित्रम्, परमभोग्यमिति धियाऽत्र तदनुभवः। वल्लवीजन नयनेष्विति कथनम्—तच्चक्षुर्मात्रगोचराणाम् इतरजनचक्षुरगोचराणां च धूर्तकृत्यानां करणे कृष्णस्य वैदग्ध्यकथनमित्यवगन्तव्यम्॥ ....० .... (५)

—* पांचवीं गाथा—विडुवेनो वेन् विळक्कै एन्नावियै *—

मेरे लिए समस्त सदर्थों के प्रकाशक दीप के सदृश, (मेरे धारक), विना कारण स्वयमेव मेरा उद्धार करने में प्रवृत्त मेरे स्वामी, और कपटचेष्टा करते हुए गोपबालिकाओं के नेत्रों में धूर्तकृत्य करनेवाले भगवान को मैं कैसे छोड सकूंगा?

यह भाव है—श्रीकृष्ण ने जैसे व्रजनिवासिनी गोपियों के सामने प्रकट होकर नानाविध श्रृंगार चेष्टा करते हुए अपनी भोग्यता दिखा कर उनको आनंदसागरमग्नमानस बनाया, इसी प्रकार उन्होंने मुझको भी नानाचेष्टितों से अपने वश बनाकर अपनी भोग्यता में अपहृतचित्त बना दिया; ऐसे भगवान को मैं कैसे भूल सकूंगा? यदि गोपीजन श्री कृष्ण को छोडकर श्रीवैकुंठनाथ से प्रेम कर सकेंगी, तो मैं भी उनको छोड कर दूसरी किसी वस्तु का ध्यान कर सकूंगा। [मेरे दीपके सदृश] कहने का यह तात्पर्य है कि जैसे दीप अंधकार हटाकर समस्त पदार्थों को प्रकाशित करता है, ठीक इसी प्रकार भगवान ने आळ्वार को तत्वहित-पुरुषार्थ नामक समस्त अर्थों का प्रकाशन करवाया। यह भी आपका एक महान उपकार है। [मेरे प्राणसदृश] कहने का यह भाव है कि भगवान प्राण के सदृश, आळ्वार के धारक हैं। यह वार्ता अक्षरशः सत्य है। प्राण, एवं अन्नपानादि साधारण मानव के धारक होते हैं; "वासुदेवस्सर्वम्" इत्यादि वचन के लक्ष्य आळ्वार के तो, धारक पोषक भोग्य इत्यादि सभी स्वयं भगवान ही हैं। [स्वयमेव मेरा उद्धार करने में प्रवृत्त मेरे स्वामी।] मैं तो अभी तक अपने आत्मोद्धार का मार्ग नहीं जानता हुआ, अपने को अनर्थ ही पहुंचाता रहा। ऐसे बहुत समय के बीत जानेपर मेरे नाथ भगवान ने विचार किया,

कि "मेरी यह वस्तु (आळ्वार) विनाश पाकर मुझसे छूट जा रही है; इसे ऐसे होना नहीं देना चाहिए," और मेरी चिंता के भी विना उन्होंने स्वयं मेरे पास आकर मुझको स्वीकार कर अनुगृहीत किया। अहो उनका सौहार्दगुण है! इस सौहार्द का मूल है उनका स्वामित्व।

[कपट चेष्टा करते हुए] इत्यादि से श्रीकृष्ण भगवान के एक अतिमधुर चरित का अनुभव किया जाता है। वस्तुतस्तु एक चरित्र नहीं, बल्कि कपट चरित्र और धूर्तचेष्टित नामक दो चरित्रों का वर्णन किया जाता है। मक्खन चोरी इत्यादि कपटचरित्र हैं और गोपियों को व्यामोहित करना धूर्तचेष्टित है। श्रीकूरेश स्वामीजी ने, "धूर्तायितं तव हि यत्किल रासगोष्ठ्यां तत्कीर्तनं परमपावनमामनन्ति" इत्यादि से श्रीकृष्ण के रासक्रीडादि धूर्तचरित्रों के संकीर्तन को परमपवित्र बताया। आळ्वार तो परम मधुर मानकर हाल में उनका कीर्तन कर रहे हैं। [गोपबालिकाओं के नेत्रोंमें] धूर्तकृत्य करने का यह अर्थ है कि श्री कृष्ण कदाचित् गोपियों के नेत्र के ही विषय हो, दूसरों को विदित न हो, ऐसे विलक्षण शृंगार चेष्टित करके उनको व्यामोहित करते थे; इस विलक्षण सामर्थ्य का अनुभव किया जाता है॥ .... (५)

(गाथा.) पिरान् पेरुनिलम् कीण्डवन् * पिन्नुम् विराय् मलर्चुळाय् वेयून्द मुडियन् *
मरामर मेय्द मायवन् * एन्नुळ् इरानेनिल् पिन्नैया नोट्टुवेनो ॥ ६ ॥

उपकारैकशीलः, वराहरूपेणावतीर्य भूम्युद्धरणप्रवीणः, मुकलितसुरभितुलसीस्रगलंकृतमूर्धा, सप्तसालभञ्जनविख्यातयशाश्च भगवान् यदि ममान्तःकरणे न संनिदध्याच्चर्हि किमहमात्मधारणे शक्तस्स्याम्? [जलादुद्धृतमत्स्यनिर्विशेष एव स्यामिति यावत्।]

अधस्तनगाथायाम् "भगवन्तं कथमहं विसृजेयम्" इत्युक्तवन्तं मुनिवरं प्रति प्रश्न एवं समजनि;—त्वं तत्रभवान् न विसृजतीत्यास्तां नाम; स भवन्तं विसृजेद्यदि अथ किं क्रियेतेति। तत्रोत्तरं गाथा सेयम्। सन्ततमाश्रितजनतार्थकृत्यकरणैकदीक्षितस्स भगवान् नैव मां विसृजेत्सत्यम्। विसर्जनं नाम अन्तःकरणसन्निधानप्रहाणमेव खलु; तन्नैव कुर्यात्सः। यदि कदाचित्कुर्यात्, * न च सीता त्वया हीना न चाहमपि राघव। मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ॥ * इति सौमित्रिवचनप्रक्रियया नैव स्वात्मानं धारयेयम् इत्यभिधीयते गाथयाऽन्या। [उपकारैकशीलः] इत्येतत् प्राथमिकं विशेषणम् प्रतिज्ञारूपम्; अथच स्थितं विशेषणत्रितयं तद्विवरणात्मकम्। वराहरूपेणावतीर्य भूम्युद्धरणम्, सुग्रीवविस्रम्भप्रजननार्थं सप्तसालनिष्पत्रीकरणं च उपकृतिरिति सत्यम्; तुलसीस्रगलंकृतशिरस्कत्वमित्येतदपि किमहो उपकारः? इति पृच्छेयुः केचित्; एतदेव सत्यं महानुपकारो भक्तजनानाम्। अविरलतुलसीदामसंजातभूम्नः स्वस्य संदर्शनप्रदानेन भूयसां हि भक्तानामार्तिमपाकुरुते; सुमहान् खल्वसावुपकारः। कस्य प्रार्थनया स तुलसीस्रजा स्वात्मानं विभूषयति; भक्ता अपहृतार्तयो भूयासुरित्यनुकम्पया स्वयमेव हि स्वात्मानं विभूषयति। एवं नाम सन्ततमुच्चावचोपकृतिकरणैकशीलो भगवान् नैव ममान्तरङ्गादपसरेत् क्षणमात्रमपि; यदि स्वातन्त्र्येण कदाचिदपसरेच्चर्हि सत्यमहमपगतप्राण एव भावयितव्य इत्युक्तं भवति॥ .... (६)

—* छठी गाथा–पिरान् पेरुनिलङ्कीण्डवन् *—

उपकारशील, वराहरूप से अवतार लेकर भूदेवी का उद्धार करनेवाले, ठीक बनी हुई सुगंधितुलसीमाला से अलंकृत मुकुटवाले, और सप्तसालवृक्षों का भेदन करने से प्राप्त यशवाले भगवान यदि मेरे हृदय में निवास नहीं करेंगे, तो क्या मैं आत्मधारण कर सकूंगा? [अर्थात् भगवान से विश्लेष पाने पर, पानी से उठाये हुए मीन की भांति मेरा अस्तित्व ही मिट जायगा ॥]

पिछली गाथा में आळ्वार ने कहा कि मैं भगवान को कैसे भी छोड न सकूंगा। इस पर यह प्रश्न हुआ कि "आप भगवान को वेशक न छोडें; परंतु यदि भगवान आपको छोड दें, तो क्या किया जायँ?" इसका यह उत्तर प्रकृत गाथा में दिया जाता है—सर्वदा आश्रितों का मनस्संतोष कराना ही भगवान का स्वभाव है। अतः वे कथंचिदपि मुझे नहीं छोडेंगे। छोडने का अर्थ है मेरे हृदय से हट जाना। भगवान क्योंकर यह काम करेंगे? यदि कदाचित् कर भी देंगे तो तुरंत मेरा शरीर छूट जायगा। [उपकार-शील]—यह पहला विशेषण आळ्वार का प्रतिज्ञावचन है; और आगे के तीन विशेषण इसका विवरण हैं। अर्थात् इन तीनों विशेषणों से भक्तों के बारे में भगवान की उपकारशीलता का विवरण किया जाता है। कोई पूछेगा कि, वराहावतार लेकर भूमिका उद्धरण करना और सुग्रीव के मन में विश्वास उत्पन्न करने के लिए सात सालवृक्षों का भेदन करना, ये दोनों अवश्य उपकार हैं; परंतु तुलसीधारण से कौनसा उपकार होगा? समझना चाहिए कि चूंकि तुलसीमाला से अलंकृत भगवान के दर्शन से भक्तजनों का संताप मिट जाता है, अतः यह तुलसीधारण ही भगवत्कृत महोपकार है। अर्थात् तुलसीधारी अपने दर्शन से भक्तों का ताप मिटाने के सदुद्देश्य से ही भगवान किसीकी प्रार्थना के विना, स्वयमेव अपने को तुलसी माला से सजाते हैं। तथा च यह तात्पर्य हुआ कि इस प्रकार सर्वदा भक्तों के विषय में उपकार ही करने के स्वभाववाले भगवान कभी मेरे हृदय से दूर न होंगे; परंतु सर्वथा स्वतंत्र होने के कारण यदि कदाचित् वे दूर हट भी जायें तो और क्या होगा? मेरी सत्ता ही उड जायगी ॥ .... (६)

(गाथा.) यानोट्टि येन्नुळ् इरुत्तुव मेन्निलन् * तानोट्टि वन्दु एन् तनिनेञ्जै वञ्चित्तु *
ऊनोट्टि निन्नु एन्नुयिरिल् कलन्दु * इयल्वान् ओट्टुमो इनियेन्नै नेहिल्कवे ॥ ७ ॥

न तावदहं स्वकीयोद्यमेनं भगवन्तं स्वात्मनि निवेशयितुं व्यवसितः। अपि तु स्वयमेव कृतप्रतिज्ञस्सन् समेत्य मम मनो वञ्चयित्वा मम वपुषि चात्मनि च संश्लिष्य विराजमानो भगवान् कथमिव मद्विश्लेषं सहेत ॥

मुनिवरोऽयमधस्तात् * वळ्वेळुलहु * शीर्षके पञ्चमे दशके स्वनिकर्षानुसन्धानतस्तं भगवन्तं विहातुमुपाक्रंस्तेत्यवगतवन्तः केचित् 'भगवन् मुनीन्द्र! भवदीया प्रकृतिस्तु न विश्वासार्हा प्रतिभाति; तदुपरि प्राकृतमण्डलस्यास्य चर्याऽप्यतिशङ्काजननी हहो! भगवान् सोऽपि नियोगपर्यनुयोगानर्हस्वतन्त्र इत्यविवादम्।

सोऽपि भवन्तं विस्रष्टुमीष्टे' इति कथयेयुरिति कृत्वा गाथामिमामाह मुनिसार्वभौमः। आवयोः [भगवतो मम च] योऽयं संबन्धस्संजातोऽस्ति, स कीदृग्विध इति युष्माभिर्विमर्शनीयम्। संबन्धस्यास्य समुत्पत्तये न मया कृषिलेशोऽपि कृतः; अप्रतिषेधोऽपि नासीन्मयि। स एव भगवान् मत्संबन्धं परमप्रयोजनं मन्वानः "पराङ्कुशमुनिना सह संबन्धे लब्धे जीवेयम्, न चेद्विलीयेय" इति सुदृढप्रतिज्ञस्सन्नुपेत्य स्वकीयविप्रलम्भवैदग्ध्येन मां व्यामोह्य मयि सर्वाङ्गीणं संश्लेषमाकलय्य अलभ्यलाभसंतुष्ट इव विभाति। तत्तादृशो भगवानसौ स्वयमपि न विजह्यात्, मामपि न हापयेदित्युक्तं भवति॥ .... (७)

—* सातवीं गाथा—यानोट्टि येन्नुळ् इरुत्तुवमेन्निलन् *—

मैंने तो अपने प्रयत्न से भगवान को अपने हृदय में रखना नहीं चाहा; किंतु स्वयं भगवान ही प्रतिज्ञापूर्वक मेरे मन को धोखा देकर, मेरे शरीर व आत्मा से मिलकर विराजमान हैं। फिर ऐसे आप, क्या मेरे विश्लेष का कभी सहन करेंगे?

"वळवेळुलहु" नामक पिछले पांचवें दशक में आळ्वार ने अपनी नीचता का अनुसंधान करते हुए भगवानको छोड कर दूर भाग जाना चाहा न? यह अर्थ जाननेवाले किसीने उनसे पूछा, कि, "हे मुनिवर! आपका स्वभाव सदा एकरूप नहीं, परंतु क्षणे क्षणे बदलता रहता है; अतः उस पर विश्वास रखना कठिन है; (अर्थात् यह नहीं कहा जा सकता कि भगवान से मिलकर ही रहने की आपकी वर्तमान इच्छा कायम रहेगी)। एतदुपरांत आप अब संसारमंडल में विराजमान हैं; इसका भी स्वभाव अनिश्चित है। एवं भगवान भी सर्वथा स्वतंत्र हैं, जिससे वे अपनी इच्छा के अनुसार चाहे जो काम कर सकते हैं, माने आपको छोड भी सकते हैं। तथाच आप कैसे निश्चय कर सकते हैं कि अपने को भगवान से विरह नहीं होगा?" इस प्रश्न का प्रत्युत्तर प्रकृत गाथा में दिया जा रहा है। यह तात्पर्य है—हाल में भगवान के साथ मेरा जो संबंध (माने संश्लेष) बना है, इसका स्वरूप तुम्हें अविदित है। मैंने तो यह संबंध पाने का किंचित् भी प्रयत्न नहीं किया; इतना ही नहीं; यह संबंध पाने की मेरी इच्छा तक न रही। परंतु स्वयं भगवान ही मेरे संबंध को अलभ्यलाभ मानते हुए, यों सुदृढ प्रतिज्ञा कर कि, "आळ्वार का संबंध पाने पर ही मैं जीवित रह सकूंगा, अन्यथा शरीर छोड दूंगा" मेरे पास पधार कर, अपने कपट करने के सामर्थ्य से मेरे मन में व्यामोह पैदा कर मेरे साथ सर्वावयव संश्लेष पाकर अपनेको कृतार्थ मानते हुए विराज रहे हैं। अतः यह सर्वथा अशक्य है कि ऐसे भगवान कभी मुझे छोड दें, अथवा मुझे दूर हट जाने का अवकाश दें॥ .... (७)

(गाथा.) **एनै नेहिळ्किलुम् एन्नुडै नन्नेञ्जन्तन्नै * अहल्विक्क ताऩुम् किल्लानिनि ***
पिनै नेडुम् पणैत्तोळ् महिळ् पीडुडै * मुनै यमरर् मुळुमुदलाने ॥ ८ ॥

नीलादेवीसुभगभुजाश्लेषसमुदित्वरहर्षभूमा नित्यसूरिसर्वस्वभूतश्च भगवान् मद्वियोगं समुत्पादयन्नपि कदाचित्, ममान्तःकरणं वियोजयितुं न कथञ्चिदपि शक्तस्स्यात्॥

'स मां न विजह्यात्' अहं तं न विजह्याम्' इति कथनं विफलम्; दुर्घटमपि घटयितुं शक्तस्स इति हेतुना कामं स मां विजहातु; अहमपि तं विजहामीति चास्तु। मदीयं मनो विश्लेषयितुं तु सोऽपि परिबृढो न प्रभवेन्नाम। एवं सुदृढोक्तौ किं निदानमिति चेत्, अनुग्रहमयी नित्यमज्ञातनिग्रहा च नीलादेवी खलु तन्नित्यसंश्लिष्टा वर्तते; तद्विश्वासबलादेवाहमेवं प्रतिजाने। न केवलमेतावदेव; नित्यसूरिपरिषन्निर्वाहकश्च खल्वसौ; तेषां पुरतो न शक्नुयादसावकृत्यं किमपि कर्तुम्। अत एव सुदृढं प्रतिजाने ॥ .... (८)

—* आठवीं गाथा—एन्नै नेहिल्क्किलुम् *—

नीलादेवी के विशाल भुजों का आलिंगन कर अत्यधिक आनंद पानेवाले और नित्यसूरियों के सर्वस्वभूत नाथ भगवान कदाचित् मुझसे वियुक्त भी होते होंगे; तथापि वे किसी प्रकार मेरे मन को अपने से छुडा नहीं सकेंगे ॥

यद्यपि 'अघटितघटनासमर्थ' विरुदधारी भगवान कदाचित् मुझको छोड भी सकते होंगे; एवं संसारमंडल में निवास करनेवाला मैं भी उनको छोड सकता हूंगा। तथापि सर्वशक्त वे सर्वेश्वर भी किसी अवस्था में मेरे मन को अपने से छुडा नहीं सकेंगे। मैं इस कारण यह दृढ प्रतिज्ञा कर रहा हूं कि वे भगवान साक्षात् अनुग्रहस्वरूपिणी और दंड देने के काम से सर्वथा अपरिचित नीलादेवी से नित्यसंश्लिष्ट विराजते हैं। पुरुषकारभूत उनके सांनिध्य में मुझे विश्लेष मिलना अशक्य है। इतना ही नहीं; भगवान नित्यसूरियों के भी निर्वाहक हैं; ऐसे आप, स्वतंत्र होते हुए भी, उनके सामने कैसे यह अकार्य (मुझे विश्लेष देना) कर सकते हैं! अतः मैं सुदृढ विश्वास कर सकता हूं कि मुझे कभी विश्लेष न होगा ॥ (८)

(गाथा.) अमरर् मुळुमुदल् आहिय आदियै * अमर र्क्कमुदीन्द आयर् कोळुन्दै *
अमर वळुम्ब तुळावि येन्नावि * अमर त्तळुविचु इनि यहलुमो ॥ ९ ॥

नित्यसूरीणां स्वरूपस्थितिप्रवृत्तिनिदानभूतम्, इन्द्रादीनाममराणाममृतप्राशनप्रवणम् गोपाल-कुलकिसलयं च भगवन्तं ममात्मा पृथगुपलम्भव्यवहारयोग्यताविरहितस्सन् समाश्लिक्षत्। अतश्च नैव विश्लेषप्रसक्तिः ॥

गुणगुणिनोः क्रियाक्रियावतोः जातिव्यक्त्योश्च यथा पृथगुपलम्भो न संभवति, तथैव तस्य मम चेति वक्तव्यता हि समुत्पन्ना; तथाच आवयोर्विश्लेषानुदयकथनम् अप्रसक्तप्रसञ्जनमेवेति चारुतरमुच्यते गाथयाऽनया। अत्रेदमवधेयम्। सिद्धान्ते * जगत्सर्वं शरीरं ते * इत्युक्तरीत्या, * यस्य पृथिवी शरीरम्........यस्यात्मा शरीरम् * इत्याम्नातरीत्या च चिदचिदात्मकं सर्वं वस्तुजातं भगवतः शरीरं सत् पृथक्स्थित्युपलम्भानर्हमेवेति परमार्थः। एवं च जीवात्मपरमात्मनो र्विश्लेषकथाया एव नावसरः। कथं तर्हि दिव्यप्रबन्धेष्वन्यप्रबन्धेषु च संश्लेषविश्लेषवार्तोपलम्भ इति शङ्का जायेत। अत्रैतदवगन्तव्यम्। भगवतो दिव्यात्मस्वरूपं दिव्यमङ्गलविग्रह इति द्वितयमस्ति। * इच्छागृहीताभिमतोरुदेहः * इति पुराणरत्नोक्तरीत्या भक्तजनानुभवैकश्रद्धया परेण पुंसा परिगृह्यमाणो दिव्यमङ्गलविग्रहो यदाऽनुभवगोचरो भवति, तदा संश्लेषव्यपदेशः, यदा तु न तथा भवति तदा विश्लेषव्यपदेशः इति ॥

—* नवमी गाथा—अमरर् मुळुमुदलाहियवीशनै *—

नित्यसूरियों के स्वरूपस्थितिप्रवृत्तियों के हेतुभूत, इंद्रादिदेवों को अमृत पिलानेवाले, और गोपकुलतिलक भगवान के साथ मेरी आत्मा इस प्रकार ठीक मिल गयी कि उसका उनसे अलग अस्तित्व ही न देखा जायँ; अतः उनसे अलग होने का प्रसंग ही नहीं बनेगा ॥

इस गाथा में यह अंश बताया जाता है कि भगवान और आळ्वार के बीच में संपन्न यह मिलाप गुण—गुणवान्, क्रिया-क्रियवान् अथवा जाति-व्यक्तियों के मिलाप जैसा अपृथक्सिद्ध संबंध है; अर्थात् यह संबंध ऐसा है कि इसकी वजह से एक दूसरे को छोड नहीं सकता। अतः आळ्वार कहते हैं कि अब मुझे भगवान से छूट जाने का प्रसंग ही नहीं बनेगा। यद्यपि "जगत्सर्वं शरीरं ते" इत्यादि प्रमाण के अनुसार, एवं "यस्य पृथिवी शरीरम्..........यस्यात्मा शरीरम्" इत्याद्युपनिषद के अनुसार वेदांतियों का सिद्धांत है कि चेतनाचेतनरूप समस्त पदार्थ ही भगवान का शरीर होकर उनसे अविनाभूत रहते हैं; अतः किसी वस्तु को भगवान से अलग रहना अशक्य है; अतः आळ्वार भी कभी भगवान से विश्लिष्ट न रहे। तथाच दिव्य-प्रबंधों में आळ्वार, तथा अन्यत्र भक्तलोग जो अपने भगवत्संश्लेष अथवा विश्लेष की बात करते हैं, ये सभी अनुचित-सी प्रतीत होंगी। तथापि भगवान के दिव्यमंगल विग्रह से ही संश्लेषविश्लेष की ये बातें की जाती हैं। अर्थात् भक्तलोग भगवान के दिव्यात्मस्वरूप से मिलकर रहने मात्र से अपने को कृतार्थ अथवा प्रसन्न नहीं मानते; किंतु सदा उनके दिव्यमंगलविग्रह के ही दर्शन इत्यादि अनुभव करना चाहते हैं। परंतु ये दर्शन कभी मिलते हैं और कभी नहीं मिलते। जब यह अनुभव मिलें तब संश्लेष है, और जब यह न मिलें तब विश्लेष है। "इच्छागृहीताभिमतोरुदेहः" इत्यादि पुराणरत्न स्पष्ट कहता हैं कि भगवान भक्तों पर अनुग्रह करने की इच्छा से उनके और अपने इष्ट, सुंदर दिव्यमंगलविग्रह लेते हैं। इस प्रकार संश्लेषविश्लेषों की बातें ठीक संगत होती हैं॥ .... (९)

(गाथा.) अहलि लहलुम् अणुहि लणुहुम् * पुहलु मरियन् पोरुवल्ल नेम्मान् *
निहरिलवन् पुहल् पाडि यिळैप्पिलम् * पहलु मिरवुम् पडिन्दु कुडैन्दे ॥ १० ॥

स्वसकाशे क्षुद्रफलमुपलभ्य दवीयस्सु जनेषु स्वयमपि दवीयान्, अनन्यप्रयोजनतया सन्तत-सन्निहितेषु सत्सु स्वयमपि नेदीयान्, प्रतिकूलानां दुष्प्रापः अनुकूलानामप्रतिहतोपसर्पणश्च यः, असदृशस्य तस्य भगवतो यशांसि दिवारात्रमविश्रान्तमनुभुञ्जीय ॥

स्वसंश्लिष्टभगवद्गुणविशेषमनुभूय, एवं निरन्तरमनुभवे कृतेऽपि स्वस्य पर्याप्त्यनुदयमभिदधाति मुनिवरो गाथयाऽनया। भगवतः परमभोग्यताकथनं हि दशकस्यास्य प्रमेयम्। तादृश्यां भोग्यतायां दत्तदृष्टयो जनां भगवत्सकाशे न किमपि प्रयोजनं लिप्सेरन्; लिप्सेरन् यदि केचित् * करीश! वर्तेय सदा त्वदन्तिके * इति श्रीकूरेशसूक्तरीत्या सदा भगवतस्सविधे वर्तनमेव परमप्रयोजनमध्यवस्यन्तस्तदेव लिप्सेरन्। ये तु क्षुद्रं फलं किमपि कामयमानास्तल्लाभाय भगवन्तमुपसृत्य लब्ध्वाऽथ निवर्तन्ते, तानधिकृत्य भगवानतीव निर्विण्णहृदयो

भूत्वा स्वयमप्युदास्ते। ये तावदाभिमुख्यप्रदर्शनेन क्षुद्रफलनिस्पृहास्सन्त संनिदधते, तेषु स्वयमपि सदा संनिहितो भवति इत्यसौ गुणः प्रथमपादेनान्वभावि। अथ, प्रतिकूलानां दुष्प्राप इत्यादिना कौरवाणां विषये पाण्डवानां विषये च भगवतो वासुदेवस्य वर्तनमनुस्मार्यते ॥ .... (१०)

—* दसवीं गाथा—अहलिलहलुम् अणुहिलणुहुम् *—

अपने से कुछ अल्प फल लेकर दूर निकल जानेवालों से स्वयं भी दूर होनेवाले, अनन्य-प्रयोजन होकर अपने साथ ही रहना चाहनेवालों से स्वयं भी मिलनेवाले, प्रतिकूलों को पाने में अशक्य, अनुकूलों को सुप्राप, एवं उक्त प्रकारों से अद्वितीय भगवान के दिव्ययशों का दिनरात गाकर अनुभव करेंगे ॥

इस गाथा में आळ्वार यों कहते हैं कि मेरे साथ संश्लेष करनेवाले भगवान का गुणगान करता हुआ, कल्पांत तक उनका अनुभव करने पर भी मैं तृप्त नहीं होऊंगा। यह अर्थ बताया गया कि भगवान की भोग्यता का वर्णन करना ही प्रकृत दशक का लक्ष्य है। ऐसी भोग्यता की परवाह नहीं करते हुए कितने लोग भगवान से कुछ अल्प फल पाकर निकल जाते हैं। भक्तजन तो "करीश! वर्तेय सदा त्वदन्तिके" (हे वरदराज भगवन्! मैं सदा के लिए आपके पास ही रहूं) इत्यादि श्री कूरेश स्वामीजी की श्रीसूक्ति के अनुसार भगवान की संनिधि में रहना ही परम पुरुषार्थ मानते हुए वही माँगते हैं। इनमें से, जो अल्प फल पाकर भगवान को छोड निकल जाते हैं, उनके विषय में भगवान बहुत दुःखपूर्वक, उदासीन रहते हैं; इसके बदले में जो लोग क्षुद्र फल की आशा छोड कर भगवान के अभिमुख होते हैं, उनके विषय में भगवान स्वयं बहुत प्रसन्न होकर, स्वयं सदा उनके पास ही विराजते हैं—यह भगवान का विलक्षण गुण गाथा के पहले पाद में बतलाया गया। [प्रतिकूलों के पाने में अशक्य] इत्यादि से कौरवों तथा पांडवों के विषय में श्री कृष्णभगवान के आचरण की याद दिलायी जाती है। (भगवान कौरवों के वश न हुए; परंतु पांडवों के दास तक बन गये) ॥ .... (१०)

(गाथा.) **कुडैन्दु वण्डुण्णुम् तुळाय् मुडियानै * अडैन्द तेन्कुरुहूर् शठकोपन् ***
मिडैन्द शोल्तोडै आयिर त्तिप्पत्तु * उडैन्दु नोयूहळै ओडुविक्कुमे ॥ ११ ॥

अवगाढचञ्चरीकोपभुक्तमाध्वीकदिव्यतुलसीस्रगलंकृतमूर्धानं भगवन्तं प्रपन्नेन श्रीकुरुकापुरावतीर्णशठकोपसूरिणा विज्ञापिते सदुक्तिसान्द्रे सहस्रे दशकमिदं भक्तानां भगवत्प्राप्तिप्रतिबन्धकवर्गं शिथिलीकुर्यात् ॥

दशकेऽस्मिन्ननुबुभुक्षितभोग्यतागुणस्य साक्षिभूतं विशेषणं विन्यस्यते अवगाढचञ्चरीकेत्यादि। भगवान् स्वदिव्यमकुटे तुलसीस्रजं यद्धारयति तत् स्वयमेव सर्वरक्षक इति ख्यापनायेति बहवो मन्येरन्; वस्तुस्थितिश्च तथा स्यान्नाम। मुनिवरस्तु न तथात्राभिसंधत्ते; तद्भोग्यतयैव स्वयमाकृष्टचित्तो भवन् विशेषणमिदं विन्यस्यति। ईदृशभोग्यतानुभवजनितहर्षप्रकर्षपरिवाहरूपतया श्री शठकोपमुनिवरेण * पदानां सौभ्रात्रादनिमिष-

निषेव्यं श्रवणयोः * इत्युक्तरीत्या परमभोग्यशब्दसंदर्भसुभगतया कथिते सहस्रेऽन्तर्गतमिदं दशकं भगवत्प्राप्ति-प्रतिबन्धकसकलकर्मग्रन्थिनिर्वहणे कुशलं भवतीति फलकीर्तनेन समापितमिदं दशकम् ॥ ..•. (११)

— द्रमिडोपनिषत्सङ्गतिः —

पुंसश्श्रियः प्रणयिनः पुरुषार्थसीम्नो निन्दन् फलान्तरपराभिरवद्यगन्धात् ।
तद्रस्यतार्हगुणजातसमर्थनेन तत्सेवनं सरसमाह स सप्तमेन ॥

—* ग्यारहवीं गाथा—कुडैन्दु वण्डुण्णुम् तुळाय् मुडियानै *—

जिसके अंदर घुसकर भँवर मधु पीते हैं, ऐसी दिव्यतुलसी से सजाये हुए मुकुटवाले भगवान को प्रपन्न, श्री कुरुकापुरी में अवतीर्ण श्री शठकोपसूरी से अनुगृहीत सदुक्ति-भरित सहस्रगीति के अंतर्गत यह दशक भक्तों के समस्त भगवत्प्राप्ति प्रतिबंधक दूर करेगा ॥

इस दशक में प्रधानतया उपवर्णित भोग्यता का सूचक विशेषण दिया जा रहा है इस फलश्रुति गाथा के प्रारंभ में। कई लोगों का यह अभिप्राय होगा कि भगवान अपने सर्वरक्षकत्व की सूचना करने के लिए मुकुट पर दिव्य तुलसीमाला का धारण करते हैं। परंतु हाल में आळ्वार का अभिप्राय यह नहीं है। किंतु तुलसीसमलंकृत भगवान की भोग्यता के परवश होकर आप हाल में भगवान को यह विशेषण दे रहे हैं। तथा च इस भोग्यता के अनुभव से आळ्वार ने अत्यंत आनंदित होकर, उस आनंद के परीवाहतया रसघन शब्द ही गूंथकर यह सहस्रगीति गायी; उसके अंतर्गत प्रकृत दशक का अध्ययन करनेवालों के, भगवत्प्राप्ति में विघ्न डालनेवाले सभी कर्म नष्ट हो जायंगे—इस फलश्रुति के साथ यह दशक समाप्त किया गया ॥ .... *

पहले शतक का सातवाँ दशक समाप्त हुआ ॥
आळ्वार तिरुवडिगळे शरणम् ॥

श्रीपराङ्कुशपरकालयतिवरवरवरमुनीन्द्रेभ्यो नमः ॥

॥ सहस्रगीत्याम् प्रथमशतके - अष्टमं दशकम् - ओडुम्पुळ्ळेरि ॥

— (भगवत आर्जव गुण प्रकाशकम्) —

(सं. अवतारिका) अधस्तनदशके भगवतः परमभोग्यत्वं नाम गुणविशेषमुपभुक्तवान् मुनिवरोऽधुना दशकेऽस्मिन् आर्जवं नाम गुणमनुभुङ्क्ते। ऋजोर्भावो ह्यार्जवम्। कौटिल्यप्रतिकोटिभूतोऽयं गुणः। * मनस्य-न्यद्वचस्यन्यत्कर्मण्यन्यद्दुरात्मनामिति दुर्जनप्रकृतितया प्रोक्तं करणत्रयवैरूप्यमेव कौटिल्यम्। * मनस्येकं वचस्येकं कर्मण्येकं महात्मनामिति सज्जनप्रकृतितया प्रोक्तं करणत्रयसारूप्यमार्जवम्। भगवान् यामुनार्यः स्तोत्ररत्ने * वशी वदान्यो गुणवानिति श्लोके समनन्तरमेव 'ऋजुः' इत्यनुगृहीतवान् खलु। भगवत्यनुसन्धेयेषु

गुणेषु आर्जवमभ्यर्हितमित्यवधेयम्। पञ्चवटीमुपागता शूर्पणखा भगवन्तं रामचन्द्रमुपसृप्य * आगतस्त्वमिमं देशं कथं रक्षससेवितम्। किमागमनकृत्यं ते तत्त्वमाख्यातुमर्हसि ॥ * इत्यन्वयुङ्क्त। एवमनुयुक्तो दाशरथिस्तस्याः कुटिलचित्तवृत्तिमवजग्मिवानपि स्वयं कौटिल्यलेशमप्यनवलम्बमानः * आसीद्दशरथो नाम राजा * इत्युपक्रम्य सर्वं यथायथमाचचक्षे। तदिदं कथयन् भगवान् वाल्मीकिः तत्रैवमवतारयति * ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे * इति। भगवान् कौटिल्यमंशतोऽपि न जानातीत्युक्तं भवति। कौटिल्यादन्यदजानद्भिरस्माभिस्सह संश्लिष्यन् भगवान् अस्मान् स्ववर्त्मन्यनाकर्षन् अस्मदीयमेव वर्त्म स्वयमनुव्रजन्ननुभावयतीत्येतदेव भगवत आर्जवं नाम।

दशकेऽस्मिन् अन्तिमगाथायाम् "सलिलसवर्णस्य भगवतो गुणमविकृत्य" इति यदनुगृहीतम् तत् आर्जवगुणदृष्टयैवेति श्रीपराशरभट्टार्याणा मुपन्यासः। सलिलं हि यत्रयत्राकृष्यते तत्रतत्र स्वयमागच्छति; निम्नेतरस्थलेष्वपि सदुपायेनाकृष्टं सदायात्येव। तथा चार्जवगुणानुभवो दशकस्यास्य प्रमेयमिति सुस्थम्। वेदान्ताचार्या अपि तात्पर्यरत्नावल्याम् * निरुपधि मृजुतां नीरवर्णे जगाद * इति, * प्रकृतिऋजुतया * इति च; सारे * सुशीलं स्वाराधं सरसभजनं स्वार्जवगुणम् * इति च श्लोकैरिमामेव पद्धतिमाद्रियन्ते स्म ॥ *

(हि.) पहले शतक में आठवें दशक की अवतारिका—पिछले दशक में भगवान की भोग्यता का अनुभव करने के बाद, अब आळ्वार उनके आर्जवगुण का अनुभव करने को उतरते हैं। आर्जव माने कुटिलता का अभाव, अथवा सीधापन। तन मन वाणियों का एक रूप में रहना सीधापन है, और उनका अलग अलग प्रकार रहना कुटिलता है। अत एव कहा जाता है कि "मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम्। मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥" अर्थात् दुष्ट लोग अपने मन में एक विचार रखते हैं, बोली में दूसरा बोलते हैं और काम में तीसरा कर देते हैं; महात्मा लोग तो, मनमें जो विचार करते, वाचा वही बोलते और शरीर से वहीं करते हैं। अब शास्त्र बताते हैं कि भगवान में यह सीधापन पुष्कल मात्रा में विराजमान है। अत एव श्री यामुनाचार्य स्वामीजी ने भी स्तोत्ररत्न में भगवान के कल्याणगुणों में इस गुण को मिला दिया—"वशी वदान्यो गुणवान् ऋजुः।" श्रीरामायण में भी इसका वर्णन मिलता है। तथाहि—पंचवटी में विराजमान श्रीरामचंद्रजी के पास आकर शूर्पणखा पूछने लगी कि, "तुम लोग कौन हैं, किधरके हैं, क्योंकर इधर आये हैं" इत्यादि। श्रीरामचंद्र जी जानते थे कि वह कपटी राक्षसी है जिसे अपना परिचय बताने की कोई आवश्यकता नहीं है। तथापि उन्होंने "आसीद्दशरथो नाम राजा" इत्यादि से अपनी सारी कथा बतायी। भगवान के इस सीधापन से अपहृतचित्त होकर वाल्मीकीजी उस प्रकरण में लिखते हैं कि "ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे" (सीधी बुद्धि के होने से श्रीरामचंद्रजी अपना सारा चरित्र बताने लगे।) तथा च इस प्रकरण का यह अर्थ हुआ कि भगवान कुटिलता से सर्वथा अपरिचित हैं। सर्वथा कुटिल हमसे मिलने के समय, भगवान हमें अपने रास्ते में न खींचते हुए, स्वयं हमारे मार्ग में आकर, अर्थात् हमारे साथ एकरस होकर जो मिलते हैं, यही उनके आर्जवगुण का प्रयोजन है। भक्तों को भगवान के इस गुण का चिंतन करना बहुत आवश्यक है; क्योंकि इसके चिंतन से वे उन पर विश्वास कर सकते हैं।

इस दशक की अंतिम गाथा का यह वचन है कि, "नीरवर्ण भगवान को लक्ष्य कर।" श्री पराशर भट्टर स्वामीजी कहते थे कि इससे आर्जवगुण सूचित किया जाता है। जल का यह स्वभाव है कि वह बुलाये जाने पर चाहे जैसे स्थल आता है। उचित उपायों से उसे ऊँची जगह पर भी ले जाना शक्य है। पूर्वोक्त प्रकार, यह तो आर्जव का सूचक है। अतः आचार्यों का सिद्धांत हुआ कि यह सारा दशक ही आर्जव का प्रतिपादक है। श्री वेदांतदेशिक स्वामीजी ने भी अपनी द्रमिडोपनिषत्तात्पर्यरत्नावली में, "निरुपधिमृजुतां नीरवर्णे जगाद" (नीरवर्ण भगवान की अवधिशून्य ऋजुता बतायी गयी), और "प्रकृति-ऋजुतया" (स्वाभाविक ऋजुता से), एवं द्रामिडोपनिषत्सार में "सुशीलं स्वाराधं सरसभजनं स्वार्जवगुणम्" (भगवान को सौशील्यवान्, सुलभ-आराधनीय, परमभोग्य व श्रेष्ठ आर्जवगुणवाले बताया) इन शब्दों से प्रकृत दशक का यही तात्पर्य बतलाया ॥.... .... *

(गाथा.) ओडुम् पुळ्ळेरि * शूडुम् तण्डुळाय् *
नीडु निन्नवै * आडु मम्माने ॥ १ ॥

शेषशेषाशनगरुडप्रमुखैर्नित्यसूरिभिस्सह संश्लिष्य रसोपभोगं कुर्वाणस्सर्वस्वामी भगवान् गरुत्मन्तं वाहनतया परिगृह्य व्रजति सरभसम्; शिशिरतुलसीस्रजमवतंसयति ॥

गाथाया उत्तरार्धं विशेष्यवाचि। आर्जवगुणयुक्तो भगवान् ह्यत्र विशेष्यभूतः। स तावन्नित्यसूरि-संश्लेषैकरसिक इति प्रोच्यते पूर्वार्धानुभूयमानगुणानुकूल्याय। पतगराजं वाहनतया स्वीकृत्य तेनोह्यमानस्सन् धावतीति, तुलसीस्रजमवतंसपदे निदधातीति च कथनेन आर्जवगुणानुभवः कथमिव सिध्यतीति पृच्छा स्यात्। गरुत्मान् तुलसी च श्रीवैकुण्ठवास्तव्ये वस्तुनी; तयोः कौटिल्यं सर्वथाऽप्यप्रसक्तम्; कुटिलकरणैरस्मादृशैस्सह आर्जवेन संश्लिष्यतीत्युक्तिर्युज्येत कामम्; स्वतः कौटिल्यगन्धविरहितवस्तुसंश्लेषतः कथमार्जवं प्रकाशेतेति प्रश्नः स्थाने। उच्यते। वैकुण्ठवासिनां कौटिल्यगन्धोऽपि नास्तीति सत्यमेतत्। तेषां खलु सूरीणामनुभाव्यो विषय एक एव यद्यपि, तथाऽप्येकैकोऽपि सूरिरेकैकां कैङ्कर्यवृत्तिं परिगृह्णाति; परिगृहीत वृत्तिभेदेन रुचिभेदो भवेदेव खलु। भगवांस्तावत्तत्र स्वकीयाया रुचेः प्राधान्यमनिच्छन् तत्तत्सूरिगतरुचीनामेव प्राधान्यं दिशन्ताननुभूय तान् प्रमोदयति। भगवन्तं स्वयमूढ्वा तत्रतत्र पर्यटितुमिच्छति सति तार्क्ष्ये तद्रुच्यानुगुण्येन तं स्वात्मानं वाहयति। तुलसी यदि काम्यते 'भगवतोऽहमलङ्कारो भवानी'ति, तर्हि स तयैवालंकृतस्सन् तत्प्रहर्षणमुखेन स्वयं प्रहृष्यति। एतदेव सूरिषु प्रकाश्यमानं भगवत आर्जवम् ॥ .... (१)

(हिंदी) अनंत गरुड विष्वक्सेनादि नित्यसूरियों से मिलकर रसानुभव करनेवाले सर्वस्वामी भगवान्, गरुत्मान के ऊपर सवार होकर तेज चलते हैं, और सुशीतल तुलसीमाला का धारण करते हैं ॥

इस गाथा में [अनंतगरुड] इत्यादि उत्तरार्ध विशेष्य है, और [गरुत्मान के] इत्यादि पूर्वार्ध विशेषण है। यह अर्थ कहा गया कि इस दशक में आर्जवगुणवाले भगवान का वर्णन चलता है।

यही गुण पूर्वार्ध में उपवर्णित है। इसके अनुकूलतया यह कहा जा रहा है कि भगवान नित्यसूरियों के नित्यसंश्लेष का रसानुभव करते हैं। ऐसे भगवान गरुडारूढ तथा तुलसीधारी होकर अपने आर्जवगुण का प्रकाशन कर रहे हैं। यह समझना कुछ कठिन-सा होगा कि भगवान परमपदवासियों से मिलकर आर्जव गुण का प्रकाशन कैसे कर सकते हैं; क्योंकि परमपद में, जहां कुटिलताका अवकाश नहीं, सीधापन का प्रकाशन होना भी अशक्य है। दया क्षमा इत्यादियों की भांति आर्जवगुण भी इस कुटिल संसार में ही प्रकाशित हो सकता है। इसका यह समाधान है—यह बात सोलह आने का सत्य है कि परमपद में सर्वथा कौटिल्य का अभाव है; तथापि उधर भगवान के आर्जव गुण का भी प्रकाशन हो सकता है। तथाहि—यह बात सर्वविदित है कि वहांके नित्यसूरी जन, सभी एक समान होते हुए भी, एकैक एकैक प्रकारकी भगवत्सेवा करते हैं। इन प्रसंगों भगवान अपनी इच्छा की परवाह नहीं करते हुए उन उन सूरी की इच्छा के अनुगुणतया ही उनकी सेवा सकार कर उनको प्रसन्न करते हैं। अर्थात् यदि कभी गरुडजी की यह इच्छा हुई कि भगवान को अपनी पीठ पर विराजमान कर उनकी सेवा करनी चाहिए, तो भगवान निर्विचार ही उन पर सवार होकर उनकी इच्छा के अनुसार यात्रा करते हैं। एवं कदाचित् यदि तुलसी की यह इच्छा हुई कि अब मुझे भगवान को सजाना चाहिए, तो भगवान तुरंत उसका धारण कर उसे आनंदित कर स्वयं भी प्रहर्ष पाते हैं। इस प्रकार भगवान परमपदनिवासी सभी दिव्यसूरियों से अपने आर्जवगुण का प्रकाशन करते हैं॥ .... (१)

(गाथा.) अम्मानाय् प्पिन्नुम् * एम्माण्बु मानान् *
वेम्मावाय् कीण्ड * शेम्मा कण्णने॥ २॥

सर्वस्मात्परः स्वामी सन् क्रूरवाजिवेषधरकेशिनामकदैत्यवक्त्रविदारणः सरसिजायतविलोचनो भूत्वा तत्तादृशनानाचेष्टितरसिको भगवान्॥

अधस्तनगाथायां नित्यविभूतिवर्तिनित्यसूरिविषये प्रकाश्यमानमार्जवमन्वभावि। गाथायामस्याम्—ततोऽवतीर्य विरोधिनिरसनपूर्वकं संसारिषु प्रकाश्यमानमार्जवमनुभूयते। [सर्वस्मात्परः स्वामी सन्] इति पूर्वगाथोक्तार्थानुवादः। कृष्णजिघांसया व्रजं प्रति कंसप्रचोदितेष्वसुरेषु वाजिवेषधरः केशी नाम दैत्योऽन्यतमः। स एष तावत्स्वकीयं वक्त्रं सुमहत्तरमुद्घाट्य व्रजमशेषं भक्षयितुं प्रवृत्तो यदा, तदा कृष्णकिशोरः स्वहस्ताभ्यां तदीयं वक्त्रमुत्पाट्य तं व्यापादयामासेति कथा। तदानीं भगवान् सबस्तन्निरसनमाकलय्य, "अवतारे कृते विरोधिवर्गसंपातात् पुनः पुनः क्लेशो जायते, किमर्थमेवं क्लेशोऽस्माभिरनुभाव्यः? स्वस्थाने दिव्येव वासे कृते क्लेशावकाशो नास्त्येव खलु; अत इतः परं स्वस्थानंगमनमेव वरम्" इत्यविभावयन् संसारिभिस्सह विहरणमेव परमप्रयोजनं मन्यमानश्च सन् स्वकीयहार्दहर्षप्रकर्षसूचनाय सरसीरुहोपमविलोचनतां प्रकाशयन् नानाचेष्टितानि पुनःपुनरुद्भावयदित्येष महागुणोऽनुभूतोऽत्र॥ .... (२)

सर्वस्वामी होते हुए ही, क्रूर घोडे के रूप में आये हुए केशिनामक दैत्यका मुख चीर डालनेवाले विशाल व रक्त नयनवाले श्रीकृष्ण, और भी ऐसे नानाविध चेष्टित करने में रसिक होते हैं॥

पिछली गाथा में नित्यसूरियों के विषय में प्रकाशित किये जानेवाले भगवान के आर्जवगुण का अनुभव किया गया; इस गाथा में परमपद से संसार में अवतार लेकर, विरोधियों का निरासपूर्वक प्रकाशित भगवान के आर्जव का अनुभव किया जा रहा है। [सर्वस्वामी] यह तो पिछली गाथा में उक्त अर्थ का अनुवाद है। कंसप्रेषित नानाविध असुरों में से एक, केशिनामक दैत्य ने, बडे घोडे के रूप में व्रज आकर मुख खोलकर सारा व्रज निगलने की चेष्टा की। तब श्रीकृष्ण ने उसका मुख चीर कर संहार किया। इसके बाद भगवान ने यह विचार नहीं किया कि, "इस संसार में हमारे अवतार करने पर, यहां बारंबार इन दुष्ट विरोधियों से लडते ही रहना पडेगा; हमें ऐसा दुःख भोगने की आवश्यकता कौन-सी है? परमपद में कमी यह दुःख न होगा। अतः अबसे अवतारों को समाप्त कर परमपद में ही रह जाना उत्तम है।" परंतु वे संसारियों के सहवास को ही परमपुरुषार्थ मानकर, उससे बहुत संतुष्ट होकर, अपनी विकसित आँखों से उस हर्ष का प्रकाशन भी करते हुए कमलनयन होकर, पुनः पुनः ऐसे अनेकविध चेष्टा करने में ही उत्साह दिखाते जो विराज रहे हैं, इस महागुण का कीर्तन यहां पर किया गया है॥ .... (२)

(गाथा.) कण्णावा नेन्नुम् * मण्णोर् विण्णोर्कु *
तण्णार् वेङ्गड(म्) * विण्णोर् वेर्प्पने ॥ ३ ॥

भूतलवर्तिनां वैकुण्ठवर्तिनां च सदा नयनभूतः स भगवान् शिशिरवेङ्कटाद्रिनामक-दिव्यगिरिराजनिवासी ॥

यमलपुत्रप्रसवित्री जननी उभयोरपि पुत्रयोर्मध्ये स्थित्वा यथा स्तन्यं पाययति, तथा संसारिणां दिविषदां च रक्षार्थे उभयलोकमध्यस्थं श्रीवेङ्कटाद्रिं मध्यास्ते उभयविभूतिनाथो भगवानिति चारुतरमुच्यते। तैत्तिरीयसंहितायां चतुर्थकाण्डे षष्ठप्रपाठके * चक्षुर्देवानामुत मर्त्यानाम् * इत्याम्नायते। अत्र उतेति समुच्चये। देवानां मर्त्यानां च चक्षुरित्यर्थः। एतदेव श्रुतिवाक्यं गाथायामस्यां पूर्वार्धत्वेन परिणतम्। स्वकार्ये निर्वहणे स्वेषामक्षमत्वं संसारिणां दिविषदां च अविशिष्टमित्युक्तं भवति। शिशिरवेङ्कटाद्रीति शैशिर्यकथनं सांसारिकसकलतापनिवारकत्वनिबन्धनम्। नानातीर्थनिषेवितत्वेन अविश्रान्तनिर्झरपातेन च प्रात्यक्षिकं शैत्यं च विवक्षितम्॥

भूलोकनिवासी तथा स्वर्गादिनिवासी सभी जनों के सदा नेत्रभूत विराजनेवाले भगवान सुशीतल दिव्य वेंकटाद्रि पर नित्यनिवास कर रहे हैं॥

जैसे जुडवें बच्चों का जन्म देनेवाली माता बीच में रहकर दोनों को दूध पिलाती है, ठीक इसी प्रकार उभयविभूतिनाथ भगवान भी भूलोक तथा ऊपर के लोकों की रक्षा करने के लिए दोनों लोकों के बीच में श्री वेंकटाद्रि पर निवास करते हैं। तैत्तिरीय यजुस्संहिता के चौथे कांड के छठे प्रपाठक में यह एक वाक्य है—"चक्षुर्देवानामुत मर्त्यानाम्"। इसका यह अर्थ है कि भगवान देव और मानवों के नेत्ररूपी है। यही अर्थ इस गाथा के पूर्वार्ध में उपवर्णित है। इसका यह तात्पर्य है कि अपने रक्षणादि कार्य करने में मानवों की भांति देव भी अशक्त होते हैं। सांसारिक समस्त संताप मिटाने से, तथा संतत बहनेवाले निर्झरों के कारण शीतल होने से श्रीवेंकटाद्रि को [सुशीतल वेंकटाद्रि] कहने में आया है॥ ... (३)

(गाथा-) वेप्पैं योत्तेडुत्तु * ओर्क मिनियै *
निर्कुं मम्मान् शीर् * कर्प्पन् वैहले ॥ ४ ॥

गोवर्धनाभिधानमेकमद्रिमुद्धृत्य श्रान्तिलेशमन्तरेण सप्ताहं स्थितवतो भगवतो महागुणं सततमुपभुञ्जीय ॥

गोवर्धनोद्धरणकथा सर्वविदिता सुप्रथिता। तत्र तावदार्जवमेव प्राधान्येन प्रकाशमानो महागुणः। दुर्जनेन एकस्य भागवतस्योत्पादितामपि व्यथां न सहते मनागपि भगवानिति स्थिते, बिडौजसा युगपदेव अपरिमितगोगणगोपालवृन्दभरितस्य व्रजस्य समुत्पादितां सुमहतीं व्यथां कथमिव विषेहे? महाद्रोहिणो वासवस्य शिरसश्छेदो हि सद्यः कर्तव्यः, कुतो न कृतस्स इति बहव आशङ्केरन्। कृष्णस्य तावदभिसन्धिरेवमिह; इन्द्रस्य भुक्तिमपहृतवता मया किं तत्प्राणापहारकेणापि भवितव्यमिति। एतदेवार्जवमिहानुभूयते। [श्रान्तिलेशमन्तरेण सप्ताहं स्थितवतः] इत्यत्र "क्षोणीध्रं पुनरविमश्च सप्तरात्रम्....अम्लाना वरद! तथाऽपि पाणयस्ते" इति श्रीकूरनाथगुरुवरसूक्तिरनुसन्धेया ॥ .... (४)

(हिंदी) गोवर्धन नामक एक पहाड उठाकर, छत्र के रूप में उसे धारण कर, आयास के बिना सात दिन रहनेवाले भगवान के महागुण का मैं नित्य संकीर्तन करूं ॥

गोवर्धन पर्वत का धारण करना श्रीकृष्णभगवान का एक प्रसिद्ध चेष्टित है, जिससे मुख्यतया उनके आर्जवगुण का ही प्रकाशन किया जाता है। तथाहि—भगवान का यह स्वभाव है कि वे अपने किसी एक भक्त के विषय में किये जानेवाले अपराध का भी सहन नहीं कर सकते। ऐसे उन्होंने व्रजनिवासी समस्त गोगोपसमूहके विषय में महेंद्र के किये हुए (घोरवर्षण रूप) महापराध का कैसे सहन किया? उसी क्षण में उन्हें भक्तजनद्रोही उस महापापी का सिर काट डालना था। परंतु उन्होंने उसे अत्यल्प भी शिक्षा नहीं दी। इस विलक्षण कृत्य का कारण क्या है? यही कि श्रीकृष्ण ने सोचा, "महेंद्र के भोजन का अपहरण करनेवाले मुझको क्या उसके प्राणों का भी अपहरण करना उचित होगा? नहीं नहीं। अतः उसकी उपेक्षा करना ही पर्याप्त दंड है।" इस महान आर्जवगुण का संकीर्तन यहां पर किया गया ॥ (४)

(गाथा.) वैहलुम् वेण्णेय् * कैकल न्दुण्डान् *
पोयू कलवादु * एन्मेय् कलन्दाने ॥ ५ ॥

सदा नवनीत भाण्डे बाहुम् आमूलं प्रसार्य नवनीतमास्वादितवान् सत्यमेव मम वपुषि समश्लिष्यत् ॥

यथाऽहं भगवन्तमुत्सृज्य भगवतो गुणाननुभवामि, तथा सोऽपि परमः पुमान् मां विहाय मम वपुरेवोपभुङ्क्ते इत्याह मुनिवरो गाथयाऽनया। यथाहि मम तस्य गुणस्सततं धारकः, तथा तस्य आश्रित-करस्पर्शपावनं गव्यमेव सततभोग्यं भवति। नवनीते संजातेन स्पृहातिशयेन स तावत् कृत्स्नमपि बाहुं पात्रे प्रवेश्य गृहीत्वा समास्वाद्य गव्यगन्धिना स्वविग्रहेण मम हेयमपि वपुस्समाश्लिक्षदहहेति विस्मयस्तिमितो भवति मुनिवरः ॥ .... (५)

(हिंदी) अपने पूरे बाहु को बरतन में घुसाकर मक्खन उठाकर खानेवाले भगवान सत्य ही मेरे शरीर से मिल गये ॥

इस गाथा में आळ्वार यों कहते हुए आश्चर्य पा रहे हैं कि, "जैसे मैं भगवान के शुभगुणों का अनुभव करता हूं, इसी प्रकार वे मुझे छोड, मेरे शरीर का ही अनुभव कर रहे हैं। जैसे मुझे उनके गुण ही धारक होते हैं, वैसे उन्हें अपने आश्रितों के हस्तस्पर्श से पवित्र बना हुआ मक्खन ही धारक होता है। अतः उसपर अत्यधिक आशा करते हुए वे नवनीतपात्र में अपना सारा बाहु घुसाकर मक्खन खाकर उस सुगंध से विभूषित अपने भुज से अतिहेय मेरे शरीर का भी आलिंगन कर रहे हैं॥ .... (५)

(गाथा.) कलन्दे नावि * नलङ्गोळ् नाथन् *
पुलन्कोळ् माणाय् * निलम् कोण्डाने ॥ ६ ॥

मया सह संश्लिष्य मदात्मभूषणभूतं शेषत्वमपहृतवान् स्वामी सर्वेन्द्रियापहारचतुरवामनवेष-धारी सन् भूमिं भिक्षित्वा स्वीकृतवान् ॥

अत्र उद्देश्यविधेययोर्नियमो न कोऽपि। यो महाबलिस्वमपहृतवान् स एव मम स्वमपहृतवान्, यो मम स्वमपहृतवान् स एव महाबलिस्वमपहृतवान् इत्युभयथाऽपि विवक्षण मक्षतम्। मुनिवरस्यास्य स्वम्—शेषत्वम्; तस्यापहरणं नाम शेषित्वे स्थापनम्। शेषभूतस्यापि चेतनस्य कदाचित् शेषत्वप्रतिभटं शेषित्वमास्थेयं भवति; कथमिति चेत्, शेषत्वादप्यभ्यर्हितस्य पारतन्त्र्यस्यापि परिपालनीयतया तादृशं पारतन्त्र्यं स्मारयन् भगवान् 'शठकोपमुनीन्द्र भो! भवान् सिंहासनमधितिष्ठतु; अहं भवतस्सेवां करवाणि' इति कथयेद्यदि, तर्हि पारतन्त्र्यपरतन्त्रेण मुनिवरेण तत्प्रतिषेधस्य कर्तुमशक्यत्वादयोग्यत्वाच्च ओमित्यभ्युपगम एव कर्तव्यो भवति। तथाऽभ्युपगमे शेषत्वं प्रनष्टमेव भवतीति सुगमम्। एतदेवोच्यते [मया सह संश्लिष्य मदात्मभूषणभूतं शेषत्वमपहृतवान्] इति। सैषा चर्या भगवतः कौटिल्यकल्पमिति मितधियो मन्येरन्। नैव तथा। गायति स्म भगवान् स्वयम्—* ज्ञानी त्वात्मैव मे मतम् * इति। ज्ञानी आत्मा भवति चेत् भगवान् शरीरं ननु भवति। नियन्तृत्व धारकत्व शेषित्वैर्निरूपणीय आत्मा। नियाम्यत्वधार्यत्वशेषत्वैर्निरूपणीयं शरीरम्। ज्ञानिनमात्मानं मन्यमानस्य कथयतश्च भगवतः शरीरत्वे अक्षतसिद्धिके सति मुनिवरस्य शेषत्वं प्रच्युतमेव खलु। नैतदन्याय्यं नाम। तथाचात्र भगवतः शेषित्वप्रहाणं मुनिवरस्य शेषत्वप्रच्यावनं च न कौटिल्यम्, अपि त्वार्जवमेवेति सिध्यति। अथ सर्वेन्द्रियापहारचतुरवामनवेषधारणेन भूमिस्वीकरणे द्यावापृथिव्योराक्रमणे च न कौटिल्यकथा, सर्वथा-ऽप्यार्जवमेव। भिक्षणकाल एव "मम पादतो मयैव विक्रमणार्हा भूमिः प्रदीयताम्" इति खल्वपेक्षितम्। ओमित्यभ्युपगम्यैव हि बलिना दानमकारि। तथा चार्जवमेवेत्यलम् ॥ .... (६)

(हिंदी) मेरे साथ मिलकर मेरी आत्मा के अलंकारभूत शेषत्व का अपहरण करनेवाले हमारे नाथ ने सर्वेंद्रियों का अपहरण करने में समर्थ वामनवेष का धारण कर भूमि माँग कर उसे अपनाया ॥

इस गाथा का तात्पर्य इन दोनों प्रकारो से हो सकता है कि, (१) महाबलि की संपत्ति का अपहरण करनेवाले भगवान ने मेरी संपत्ति भी लूट ली; अथवा, (२) मेरी संपत्ति के चोर भगवान ने महाबलि की संपत्ति भी चुरा दी। भगवान ने आळ्वार की कौन-सी वस्तु की चोरी की? शेषत्व की। शेषत्व की चोरी क्या चीज है? यही, कि आळ्वार को शेषी बना देना। कहने का यह भाव है—सर्वदा भगवान का शेष ही रहना चाहनेवाले इस चेतन को कभी ऐसा प्रसंग आता है जब कि यह अपना शेषत्व छोडकर स्वयं शेषी बनने को बाध्य हो जाता। यह अर्थ बताया गया है कि शेषत्व की भांति पारतंत्र्य भी इस चेतन का एक महान गुण है, जिसका भी पालन करना आवश्यक है। तथा च कभी कभी इस पारतंत्र्य की याद दिलाते हुए भगवान आळ्वार से कहते हैं कि, "हे शठकोप मुनिवर! आप कृपा करके इस दिव्य सिंहासन पर विराजिएगा; मैं आपकी सेवा करूंगा।" तब अपने पारतंत्र्य का स्मरण करनेवाले आळ्वार कैसे यह भगवदाज्ञा टाल सकते हैं? अतः उन्हें सिंहासन पर विराजना ही पडेगा। परंतु यों करने पर उनका शेषत्व नष्ट होगा। हाल में इस अर्थ का वर्णन किया जाता है इन शब्दों से—[मेरे साथ मिलकर मेरी आत्मा के अलंकार भूत शेषत्व का अपहरण करनेवाले]। कोई लोग यों मानते होंगे कि यह तो भगवान की कुटिलता हुई, न तु आर्जव। यह बात ठीक नहीं; चूंकि भगवान स्वयं गीताजी में गाते हैं कि "ज्ञानी तु आत्मैव मे मतम्" अर्थात् ज्ञानी मेरी आत्मा ही है। ज्ञानी आत्मा हुआ तो भगवान उसका शरीर बनते हैं। शरीर व आत्मा के ये लक्षण शास्त्रसिद्ध हैं, कि (१) नियंता, धारक व शेषी आत्मा है, और (२) नियाम्य, धार्य व शेष शरीर है। तथा च ज्ञानी को आत्मा कहनेवाले भगवान के अभिप्राय से जब वे स्वयं शरीर (अथवा शेष) ठहरे, तब ज्ञानी का शेषत्व नष्ट ही हुआ। ज्ञानि के प्रति भगवान के सीमातीत प्रेम के कारण बने हुए इस प्रसंग में कुटिलताका प्रश्न ही न उठ सकेगा; किंतु यह पूर्ण आर्जव का ही प्रताप सिद्ध होगा। एवं सकल इंद्रियों के भी चुराने में समर्थ वामन रूप का धारण कर महाबलि से भूमि माँगने के प्रसंग में भी कौटिल्य का अवकाश नहीं है; क्योंकि भगवान ने महाबलि से स्पष्टतया यही माँगा कि, "मुझे तीन पग भूमिका प्रदान करो, जिसे मै स्वयं अपने पाद से नाप लूं।" महाबलि ने भी यह अर्थ ठीक जान कर ही दान दिया था। अतः इसमें भी आर्जव ही प्रकट होता है॥ .... (६)

(गाथा.) कोण्डा नेळ्विडै * उण्डा नेळ्वैयम् *
तण्डामम् शेयदु * एम्नेणूता नानाने ॥ ७ ॥

नीलादेवीपरिणयार्थं वृषभसप्तकौद्धत्यमपाकृतवान्, सप्तलोकीं संवर्तसमये समुपभुक्तवांश्च भगवान् श्रीवैकुण्ठनिर्विशेषं मयि प्रेमबन्धमाबध्य मदीयमनोरथानशेषानपि स्वयमुवाह हन्त! [मदीयमनोरथप्रतिकोटिभूतान्मनोरथान् स्वयं वहतीति यावत् ॥]

मदीयमनोरथानशेषानपीत्यादिकं गाथाया अस्या जीवसर्वस्वम्। मुनिवरोऽसौ श्रीवैकुण्ठभुवन-[illegible], [illegible]नाय, * एतत्साम गायन्नास्ते * इत्याम्नातसामगानाय च मनोरथान् बिभर्ति। भगवांस्तु [illegible], [illegible] [illegible] च स्वकीयानां मनो-

रयानामतटान् प्रवाहानुपबृंहयन्नास्त इत्युक्तं भवति। एवंविधं स्वामिलषितं साधयितुं नायमशक्तः, अपि तु सुसमर्थ एवेति द्योतनाय सप्तर्षभौद्धत्यनिरसनापदानम सप्तलोकीनिगरणापदानं च पूर्वार्धेनानुसंहितम्॥ .... (७)

(हिंदी.) नीलादेवी से परिणय करने के लिए सात बैलों का दमन करनेवाले, और प्रलय काल में सातों लोक अपने पेट में रखनेवाले भगवान ने श्री वैकुंठ की भांति मुझसे प्रेम करते हुए मेरी समस्त इच्छाओं को स्वयं अपनाया॥ (अर्थात् मैंने जो जो इच्छा की, भगवान ने भी ऐसी ही इच्छा की है॥)

इस गाथा का सारभूत भाग [मेरी समस्त इच्छाओं के] इत्यादि अंतिम वाक्य है। आल्वार यों विचार करते रहे कि, मुझे श्री वैकुंठदिव्यलोक जाना चाहिए, विरजानदी में स्नान करना चाहिए और सामगान करना चाहिए, इत्यादि। यह जानकर भगवान ने अपने मन में यह आशा की कि, मुझे वैकुंठ से आल्वार तिरुनगरि जाना चाहिए, ताम्रपर्णी नदी में स्नान करना चाहिए, सहस्रगीति का गान करना चाहिए, इत्यादि। इस प्रकरण में सप्तवृषभमर्दन और सप्तलोकी-भक्षण के इतिहासों का वर्णन करने का यह भाव है कि भगवान अपनी पूर्वोक्त इच्छा पूर्ण करने के पर्याप्त शक्तिमान हैं॥ .... (७)

(गाथा.) आनां नानायन् * मीनो डेनप्पुम् *
तानाना नेनिल् * तानाय शङ्गे॥ ८॥

गोपालो भूत्वा गोरक्षणेऽधिकृतोऽभूत्। मत्स्यवराहरूपेणाप्यवातरत्। एवमेव मवताराः किमर्थं कृता इति चेत्, मयि स्वस्य संजातया प्रीत्या॥

तेषुतेषु कालविशेषेषु भगवता कृता अवतारा यद्यपि तत्तत्कालिक प्रयोजनविशेष प्रेप्सानिमित्तेनेति पौराणिककथाविशेषैः प्रतिपत्तव्यं भवति, तथाऽपि श्रीशठकोपमुनीन्द्रसधर्माणो ज्ञानिनामग्रेसरास्तु सर्वानपि तांस्तानवतारान् स्वार्थमेव कृताननुसंदधते। कथमुपपद्येत तदिद मनुसन्धानमिति शङ्का स्यादपि। * परित्राणाय साधूनामिति गीताश्लोकस्य भाष्यमनुगृह्णन् भगवान् भाष्यकार एवमाह—"साधवः—उक्तलक्षणधर्मशीला वैष्णवाग्रेसरा मत्समाश्रयणे प्रवृत्ता मन्नामकर्मस्वरूपाणां वाङ्मनसागोचरतया मद्दर्शनादृते स्वात्मधारणपोषणादिक-मलभमानाः क्षणमात्रं कल्पसहस्रं मन्वानाः प्रशिथिलसर्वगात्रा भवेयुरिति मत्स्वरूपचेष्टितावलोकन-आलापादि-दानेन तेषां परित्राणाय....संभवामि" इति। अत्र बहुभिर्विशेषणैर्विशेषितास्सन्तो वैष्णवाग्रेसरा इति निर्दिष्टा व्यक्तिविशेषाः पराङ्कुशपरकालादिदिव्यसूरिवरा एवेत्यत्र न संदेहगन्धोऽपि। अनुगृहीत मेकैकमपि विशेषणं वस्तुतस्तेष्वेव हि समन्वेति। तेषां परित्राणं कीदृग्विधमुद्दिष्टमिति निर्दिष्टमाष्य पङ्क्तितो विमर्शनीयम्। "मत्स्वरूपचेष्टितावलोकनदानेन तेषां परित्राणाये"ति सुस्पष्टं भाषितत्वात्, युगान्तरेषु कृतानामप्यवताराणां चेष्टितविशेषान् प्रदर्श्य तान् परिरक्षतीति सुष्ठु प्रतीयते। तथा च भगवदवताराणां तत्तत्कालिकप्रह्लादप्रभृति भक्त-रिरक्षिषामात्रं नोद्देश्यम्; अपितु गुणचेष्टितानुभवलोलुपानामेवंविधानामर्वाचीनानां भक्तानां रिरक्षिषाऽपि भगवद् विवक्षितेति भगवद्भाष्यकाराणामाशयोऽवसीयते। तथा चात्र गाथायां 'मत्स्यकूर्मगोपालाद्यवतारा भगवता मयि

स्वस्य संजातया प्रीत्या कृता' इति कीर्तितं सर्वथा स्थाने। अवतारसमकाले रक्षणप्रकारोऽन्यः, समनन्तरकाले रक्षणप्रकारस्ततोऽन्यः परमविलक्षणः। समकाले रक्षणं विरोधिविनाशनप्रधानं स्यात्। समनन्तरकाले एतन्-मुनीन्द्रसधर्मणां रक्षणं गुणानुभवप्रदानप्रधानं प्रतिपत्तव्यम्; अवतारेषु पूर्वमकृतेषु सत्सु पश्चाद्गुणानुभव प्रसक्तेरेवानुत्थितेः॥ .... (८)

(हिंदी.) भगवान स्वयं गाय चरानेवाला गोपाल बने; मत्स्यवराहादिरूपों से अवतीर्ण भी हुए। मुझसे प्रेम करते हुए ही उन्होंने ये सभी अवतार किये॥

पुराणकर्ता महर्षियों का कहना है कि भगवान के इस संसार में बारंबार अवतार करने का कारण, उस समय के दुष्टशिक्षण, शिष्टपरिपालनादि कतिपय कार्य संभालना ही है। परंतु आळ्वार जैसे भक्त जन उन अवतारों को अपने लिए ही अनुष्ठित मानते हैं। यह बात असंभावित-सी लगती होगी; परंतु है बिलकुल ठीक। तथाहि—भगवद्गीता में अवतार-प्रयोजन का वर्णन करनेवाला "परित्राणाय साधूनाम्" इत्यादि पद्य प्रसिद्ध हैं। इस पर श्री रामानुजस्वामीजी का यह भाष्य है—"साधु—पूर्वोक्तलक्षणवाले वैष्णवाग्रेसर, जो कि मेरा आश्रयण करने में प्रवृत्त होकर, मेरे नामकर्मस्वरूपों को अपने मन व वाणी के गोचर न होने के कारण मेरे दर्शन पाये. बिना अपनी आत्मा के धारण-पोषणादि प्राप्त न करते हुए (मेरे दर्शन के अलाभ में) एक पल भर के समय को भी हजारों कल्प मानते हुए शिथिलगात्र हो जायंगे; अतः उन्हें अपने विग्रह व चेष्टितों के दर्शन, वार्तालाप इत्यादि देकर उनका संरक्षण करने के लिए....मैं प्रकट होता हूं।" इस लंबे वाक्य में वैष्णवाग्रेसर शब्द से कीर्तित साधु जन श्रीपरांकुश परकालादि आळ्वार ही हैं; क्योंकि यहां प्रयुक्त सभी विशेषण उनको ही लगते हैं। भगवान के दर्शन करने की, तथा उनसे वार्तालाप करने की तीव्र इच्छा करना, उनके अलाभ से बहुत दुःखी होना, इस दुःख के फलतया पलभर को युगसहस्र मानना, शिथिलांग होना, ये सभी आळ्वारों के ही लक्षण होते हैं। उदाहृत भाष्य पंक्ति से हम यह भी जान सकते हैं कि इन साधुशब्दवाच्य आळ्वारों का परित्राण (माने रक्षण), भगवान के श्रीविग्रह चेष्टितादियों के दर्शन तथा वार्तालाप से होता है। अर्थात् भगवान आळ्वारों को अपने पुरातन अवतारों के चेष्टित दिखा कर उनकी रक्षा करते हैं। तथा च यह अर्थ सिद्ध हुआ किया कि अवतारों के प्रयोजन तत्तत्काल में स्थित प्रह्लाद विभीषणादि भक्तों का संरक्षण मात्र नहीं, वरन् बहुत समय के बाद जन्म लेनेवाले आळ्वारों का भी संरक्षण है। आळ्वारों की स्पष्ट श्रीसूक्तियों का आधार लेकर ही श्रीरामानुजस्वामीजी ने उक्त गीताश्लोक का यह सुंदर अर्थ लिखा। अतः हाल में आळ्वार जो कह रहे हैं कि, "मुझसे प्रेम करते ही भगवान ने अनेक अवतार किये," यह सर्वथा उचित है। अवतारों के समय दुष्टों का संहार करने से कतिपय भक्तों का रक्षणं हुआ होगा; परंतु यह बताना कठिन है कि उन समयों कौन-सा भक्त भगवान के दर्शन पाकर आळ्वारों की भांति विरह दुःख से पार हुआ होगा। वे लोग तो दुष्टविनाश से तृप्त हो गये। गुणानुभव से रक्षित होनेवाले आळ्वार ही हैं। यदि भगवान पूर्व में अवतार नहीं किये होते, तो फिर आळ्वार को उनके दर्शन अथवा गुणानुभव कैसे मिलता? अतः ठीक कहा गया कि आळ्वार के लिए ही भगवान ने मत्स्यवराहगोपालादि अवतार किये॥ ....; (८)

(गाथा.) शङ्गु शक्करम् * अङ्गैयिल् कोण्डान् *
एङ्गुम् तानाय * नङ्गळ् नाथने ॥ ९ ॥

अवतरणमुखेन सर्वगतो भगवान् अस्मन्नाथः शङ्खचक्रविभूषितपाणितलो विराजते ॥

कतिपयान् वशयितुं पर्यटन्तो जना यथाहि वशीकरणौषधसनाथा अटन्ति तथा भगवानपि भक्तजन-वशीकरणार्थं मवतरन् वशीकरणसाधनभूतदिव्यायुधपरिकर्मित एव सन्नवतरतीत्यनुसन्धीयत इह। अत्रेदं विमर्शपदम्। * जातोऽसि देवदेवेश ! शङ्खचक्रगदाधरेति पुराणरत्ने कथनात् कृष्णावतारे परं शङ्खचक्रादिसाहित्यं सुवचम्; रामाद्यवतारेषु च किमस्ति तत्साहित्यमिति। अत्रैवमनुगृह्णन्त्याचार्याः—'अस्त्येव तत्साहित्यं सर्वेष्वप्यवतारेषु। दिव्यायुधानि तानि समयविशेषेषु संनिधित्सया तिरोहितानि स्युः" इति। उपपद्यते सत्यमेतत्। श्रीरामायणे प्रथमतो दाशरथिं प्रेक्षमाणो हनुमान् पृच्छति—* आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः। सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः * इति। अत्र व्याख्याता गोविन्दराजार्य आह—"हनुमतो भक्तप्रवरत्वेन तस्य चतुर्भुजवेषेण दृश्योऽभवत्" इति। रावणवधानन्तरं मन्दोदर्या क्रियमाणे प्रलापे "व्यक्तमेष महायोगी.... शंखचक्रगदाधरः" इत्येतदप्येवं भवितु मर्हति। सुदर्शनशतके प्रोक्तम्—* वाणी पौराणिकी यं प्रथयति महितं प्रेक्षणं कैटभारेः शक्तिर्यस्येषुदंष्ट्रानखपरशुमुखव्यापिनी तद्विभूत्याम् * इति। श्रीरामाद्यवतारेषु तिरोहितानां स्थितानां दिव्यहेतीनां शक्तिविशेषो वस्तुविशेषेषु व्याप्य कार्यकारी बभूव; रामावतारे इषौ, वराहावतारे दंष्ट्रायाम्, नरसिंहावतारे नखेषु, जामदग्न्यावतारे परशौ, एवमवतारान्तरेषु यथायोगं व्याप्य स्वसत्त प्राचीकशन्नायुधानीति भावः॥ .... (९)

(हिंदी.) अवतारद्वारा से सर्वत्र व्याप्त होनेवाले हमारे नाथ भगवान अपने सुंदर हाथों में शंखचक्रों का धारण करते हैं ॥

इस गाथा में यों कहा जा रहा है कि जैसे दूसरों को अपने वश करना चाहनेवाले हाथ में वशीकरण का औषध लेकर उनके पास जाते हैं, इसी प्रकार भगवान भी भक्तों को अपने वश करने के लिए भूतल पर अवतार करते हुए, हाथ में शंखचक्रादि दिव्यायुधों का धारण करते हैं; क्योंकि ये दिव्यायुध ही उनके वशीकारसाधन होते हैं। यद्यपि "जातोऽसि देवदेवेश ! शंखचक्रगदाधर" (हे देवाधिदेव ! आप शंखचक्रगदाधारी हो कर ही अवतीर्ण हैं) इत्यादि श्री विष्णुपुराण के अनुसार एकमात्र श्रीकृष्णावतार में शंखचक्रों की सत्ता प्रतीत होती है; अन्य अवतारों में तो उनकी बात सुनी नहीं जाती। तथापि आचार्यों का अभिप्राय है कि सभी अवतारों में भगवान के साथ दिव्यायुध भी विराजते ही हैं; परंतु भगवान आवश्यक किसी किसी समय उनसे कार्य लेते हुए दूसरे समय उनको छिपा रहते हैं। यह बात बहुत ठीक है। श्रीरामावतार को ही लीजिए। साधारणतया हम कहते हैं कि श्रीरामचंद्र द्विभुज और अत एव शंखचक्रविरहित थे। परंतु पहले पहल उनके दर्शन करनेवाले हनुमान जी उनसे पूछते हैं कि "आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः। सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः॥ अर्थात् प्रभो ! विशाल, बेलन के समान, परिघसदृश, व समस्तविध आभूषण पहनने योग्य अपने बाहुओं को आपने क्योंकर नहीं

सजाया?" इसमें विचार यह है कि हनुमान जी ने क्योंकर, बाहवः करके बहुवचन का प्रयोग किया? संस्कृत भाषा में दो वस्तुओं की सूचना करने के लिए द्विवचन का ही प्रयोग करना चाहिए, न तु बहुवचन का। रामायण के व्याख्याता श्री गोविन्दराज यहां पर लिखते हैं कि भक्तप्रवर हनुमानजी को चतुर्भुज श्रीरामचंद्रजी के दर्शन हुए; अतः इस बहुवचन का प्रयोग किया गया। एवं रावणवध के बाद प्रलाप करनेवाली मंदोदरी कहती है—"व्यक्तमेष महायोगी....शंखचक्रगदाधरः। माने रावणवध करनेवाले ये श्रीरामचंद्र साधारण मानव नहीं; किंतु साक्षात् परमपदवासी चतुर्भुज श्रीमन्नारायण ही हैं।" इससे स्पष्ट होता है कि उसे भी चतुर्भुज रूप का ही साक्षात्कार हुआ। इससे यह अर्थ सिद्ध होता है कि श्रीरामचंद्रजी साधारणतया द्विभुज दीखते तो थे; परंतु परमभक्तों को उनके चतुर्भुज रूप के ही दर्शन मिलते थे। अथवा "शक्तिर्यस्येषुदंष्ट्रानखपरशुमुखव्यापिनी तद्विभूत्याम्" इत्यादि श्री सुदर्शनशतक-श्रीसूक्ति के अनुसार चक्रराज की शक्ति भगवान के तत्तदवतार के अनुगुणतया श्रीरामचंद्रजी के बाण में, वराह भगवान की दंष्ट्रा में, नरसिंह भगवान के नाखूनों में, परशुराम के परशु में एवं दूसरे अवतारों में दूसरी वस्तु में व्याप्त होती है; अर्थात् उक्त सभी वस्तु चक्रराज के अवतार मानी जा सकती हैं। अतः यह तत्व जाननेवाले भक्त जन भगवान के उक्त सभी आयुध आदियों को चक्रराज ही मानते हैं। अतः भगवान को सर्वदा चक्रधारी कहना उचित होता है। अथवा मूलगाथास्थ (शंखचक्र) शब्द न केवल शंखचक्रों का ही, किंतु सभी दिव्यायुधों का सूचक है। तथाच यह अर्थ हुआ कि भगवान एकैक अवतार में भी अपने साथ भक्तों के चित्त का वशीकार करने में समर्थ शंख चक्र बाण हल इत्यादि कतिपय दिव्यायुध भी लाते हैं॥

(गाथा.) नाथन् आलङ्गोळ् * पाद नेम्मान् *
ओदम्बोळ् किळर् * वेद नीरने ॥ १० ॥

सर्वनियन्ता, वसिष्ठचण्डालविभागविरहेण सर्वजनताशीर्षविनिहितचरणोऽस्मत्स्वामी भगवान् उत्तरङ्गजलधिवद्धुम्भमाणानां वैदिकगिरामेव हि गोचरमहिमा॥

भगवतो गुणगणान् कीर्तयितुं हन्त! के वयम्? * वेदैश्च सर्वैरहमेव वेद्यः * इति गीतोक्तरीत्या वेदैकसमधिगम्यमहिमा हि सः इति कथयति गाथैषा। * वेदैश्चेत्यादिगीताश्लोके एकत्रावतिष्ठमान एवकारो बहुत्रान्वेतुं प्रभवति। वेदैरेवाहं वेद्यः, नान्यैः प्रमाणाभासैः। वेदैरहमेव वेद्यः, नान्यान्यवरदैवतानि। वेदैस्सर्वैरहं वेद्य एव; न तु प्रमाणपथातिगोऽस्मि। सर्वैरेव वेदैरहं वेद्यः। [अधुना एवकारः अप्यर्थकः।] ब्रह्मकाण्डगतैरिव कर्मकाण्डगतैरपि वाक्यैरहं वेद्यः॥ एवं नाम भगवत्प्रतिपादने प्रवणैः प्रवीणैश्च वेदैरेव स्तुत्यमहिमा परमः पुमानिति कथितं भवति॥ .... (१०)

(हिंदि.) सबके नियन्ता और वसिष्ठचंडाल पक्षपात के बिना सबके सिर पर अपना श्रीपाद रखनेवाले हमारे स्वामी भगवान लहरों से समावृत सागर की भांति घोषण करनेवाले वेदों से जानने योग्य वैभववाले हैं॥

इस गाथा का यह तात्पर्य है कि "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादि प्रमाण के अनुसार वेदप्रतिपाद्य महावैभववाले भगवान के कल्याणगुणों का, अल्पल्पज्ञानशक्तिवाले हम कैसे वर्णन कर सकेंगे। उक्त वाक्य में 'एव' शब्द का अन्वय तत्रत्य दूसरे सभी पदों के साथ हो सकता है। तथाहि—(१) सर्वैः वैदेरेवाहं वेद्यः—माने समस्त वेदों से ही मैं समझा जा सकता हूं; न तु दूसरे किसी आभास प्रमाण से। (२) सर्वैः वेदै रह मेव वेद्यः—माने समस्त वेदों से प्रतिपाद्य मैं ही हूं; न तु दूसरा कोई क्षुद्र देवतांतर। (३) वेदैं स्सर्वैः अहं वेद्य एव—माने समस्त वेदों से मैं वेद्य ही हूं, न तु प्रमाण के अगोचर हूं। (४) सर्वै रेव वेदैः अहं वेद्यः—सभी वेदों से मैं वेद्य हूं; (अत्र एवकारका अर्थ 'भी' है।) अर्थात् कर्मकांड, ब्रह्मकांड नामक दोनों वेदमार्गों से मैं वेद्य हूं। इस प्रकार भगवान का प्रतिपादन करने के लिए ही प्रवृत्त, उस कार्य में समर्थ वेदों के सिवाय दूसरा कौन उनका वर्णन कर सकता है? .... (१०)

(गाथा.) नीर्पुरै वण्णन् * शीर् शठकोपन् *
नेर्द लायिरत्तु * ओर्द लिवैये ॥ ११ ॥

नीरसवर्णस्य सर्वेश्वरस्य (आर्जवाभिधानं) गुणविशेषमधिकृत्य शठरिपुमुनिना प्रोक्तमिदं दशकं सहस्रगाथामध्ये सम्यग्विमर्शसुशोभनम् ॥

आर्जवगुणप्रतिपादनमेव. दशकस्यास्य प्रमेयमिति मुनिवरो गाथयाऽनया स्वयमेव प्रतिपादितवान् भवति। "नीरसवर्णस्य भगवतो गुण" इत्यनेन आर्जवमेव विवक्षितं भवितुमर्हतीति विवृतमवतारिकाया-मिहानुसन्धेयम्। अन्येषु दशकेष्विवात्र फलकीर्तनं नास्ति। सुष्ठु विमृश्य व्याहृतस्यास्य दशकस्य विमर्श एव परमप्रयोजनं भक्तानामिति विवक्षितमिव ॥

गाथायामस्यां नीरसवर्ण इति निर्दिष्टो भगवान् भूयोभिः प्रकारैर्नीरसावर्ण्यं धत्ते। द्वात्रिंशत्या प्रकारैर्निरूपयाम इह तत् रसिकानां मनोविनोदाय। (१) नीरं निम्नस्थलेष्वेव स्वयं रागतः प्रसरति; उन्नतस्थलेषु तत्प्रसरं बहुलप्रयाससाध्यं हि पश्यामः। भगवान् जात्यादिभिस्स्वात्मानं जघन्यं मन्यमानं नीचं जनमुद्दिश्यैव स्वरसतः प्रसारयति कृपारसम्। उत्तुङ्गम्मन्येष्ववलिप्तेषु स्वकीयं कृपारसं प्रसारयितुं सङ्कुचति च। हस्तिनापुरराजवीथि-कायां राजाधिराजेषु बहुषु विराजमानेष्वपि * विदुरस्य ययौ वेश्म * इत्युक्तरीत्या सर्वथा स्वात्मानमतिजघन्यं मन्यमानस्य विदुरस्यैव हि सदनं प्रविवेश वासुदेवः। * भीष्मद्रोणावतिक्रम्य माञ्चैव मधुसूदन!। किमर्थं पुण्डरी-काक्ष! भुक्तं वृषलभोजनम् ॥ * इति प्रष्टव्यतां दधानो विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च॥ (२) जलं सर्वथाऽप्यनुपेक्षणीयं भवति। अन्नादीनि वस्तूनि यथा स्वप्रतिनिधिभूतगोधूमक्षीरपिष्टफलादिसहानि, न तथा जलं स्वप्रतिनिधिसहं दृश्यते। एवं भगवानपि न सहते स्वस्य प्रतिनिधिम्। फलविशेषानुरक्ता जनाः स्वस्वरुच्यनुगुणं कर्मज्ञानभक्त्यादिषु योगेषु अन्यतममवलम्बमाना अपि भगवन्तं विहातुं नैव शक्नुवन्ति। फलदशायामिव साधन-दशायामपि भगवानपरित्याज्य एव हि साधनान्तरनिष्ठानामपि। तदुक्तं श्रीवत्साङ्कमिश्रैः—* या कर्मणामधि-कृतिर्य इहोद्यमस्तेषु अप्येष्वनुष्ठितिरशेषमिदं हि पुंसाम्। त्वामन्तरेण न कथञ्चन शक्यमाप्तुम् एवं च तेषु मयि चास्ति न ते विशेषः॥ इति श्रीवैकुण्ठस्तवे। (३) आपः स्वतः शैत्यशालिन्यः, "शीतस्पर्शवत्य आपः"

इति हि लक्षणप्रपाम्। ऊष्मा तु तासामौपाधिकः। एवं भगवानपि स्वतः करुणाशिशिरहृदयः, * चन्द्रमा मनसो जातः * इति पुरुषसूक्ताम्नातरीत्या चन्द्रमसोऽपि जन्मस्थानत्वेन हि प्रसिद्धं तस्य मनः। एवंविधोऽपि भगवान् * यद् ब्रह्मकल्पनियुतानुभवेऽप्यनाश्यं तत्किल्बिषं सृजति जन्तुरिह क्षणार्धे * इत्युक्तरीत्या सन्ततसन्तन्यमानैरस्मादृशामपराधैरूष्मलहृदयो भवति तावत्। शिशिरतरे सागरेऽपि वडवानलो ज्वलति हि॥ (४) आगन्तुकोष्णभावा अप्यापः ऊष्मशमनाय अप एवापेक्षन्ते। एवम् अपराधैराविलचेतसोऽपि भगवतः तस्यैव प्रसादोपेक्षितः। * निरासकस्यापि न तावदुत्सहे महेश! हातुं तव पादपङ्कजम् * इत्यनुगृह्णन् यामुनार्यवर्य इममेवार्थं स्फोरयति। * समुद्रं राघवो राजा शरणं गन्तुमर्हति * इति विभीषणवचसि प्रत्ययेन भगवान् रामचन्द्रः प्रतिशयनभूमिकाभूषितपयोधिपुलिनस्समभूत्। 'निशास्तिस्रोऽतिचक्रमुः।' समुद्रराजो नाभूदभिमुखः। * चापमानय सौमित्रे! शरांश्चाशीविषोपमान्। सागरं शोषयिष्यामि पद्भ्यां यान्तु प्लवंगमाः॥ * इति कथयन् कोपमाहारयत्तीव्रम् अवनिजाजानिः। वाचामभूमिस्स कोपोऽथ स्वयमेव प्रशममुपययौ। (५) सलिलं तावदस्मदिच्छानुगुणम् क्वचिन्नियन्त्रणयोग्यम्, क्वचित्प्रसारणार्हं च भवति। उदपाने द्वारपिधानेन अवस्थाप्यते सलिलम्; तदेव द्वारोद्घाटनेन बहिः प्रसरयोग्यं च भवति खलु। एवं भगवानपि * स्वोच्छिष्टायां स्रजि निगलितन् या बलात्कृत्य भुङ्क्ते * इत्युक्तरीत्या गोदादेवीसधर्मणाम् निगलबन्धेनानुभाव्यो भवति। इतरेषाम् * दूत्यप्रसङ्गोत्सुकम् * इत्युक्तरीत्या बहिः प्रसारणार्हश्च भवति। (६) पानीयम् अन्नादीनां पाकाय साधनं भवति यथा, तथा स्वयं पेयं च भवति। अन्नादिपाकोपयोगकाले पयस उपायत्वाकारोऽनुभूयते। पानीयतादशायां तु उपेयत्वाकारोऽनुभूयते। एवं भगवानपि * उपायोपेयत्वे तदिह तव तत्त्वं न तु गुणौ * इति श्रीपराशरभट्टार्यदिव्यसूक्त्यनुरोधेन उपायत्वमुपेयत्वं च बिभर्ति। भगवन्तमुपायतया परिगृह्य प्रयोजनान्तराणि प्रेप्सन्ति केचित्। कर्मज्ञानभक्त्यादिकमुपायतया स्वीकृत्य भगवन्तमुपैतुमीहन्ते केचित्। उपायस्पर्शगन्धमप्यसहमानाः परमैकान्तिन उपायत्वमुपेयत्वं च तस्मिन्नेव सुप्रतिष्ठितमवधारयन्ति। (७) अन्नगोधूमादिकानि वस्तुजातानि स्वप्रतिनिधिसहानि प्रेक्ष्यन्ते। कन्दमूलफलादीनि च अन्नस्थाने निविशन्ते खलु। पानीयं तु न तथा प्रतिनिधिसहम्। पानीयस्थाने वस्त्वन्तरं न किमपि निवेशमर्हति। पानीयेन निर्वाह्यं कृत्यं पानीयेनैव हि निर्वाह्यं भवति। भगवानपि न प्रतिनिधिं सहते। भगवतो लिप्सा भगवतो लाभेनैव पूरणीया भवति। गुणानुभवतोऽपि कालक्षेपो न सुकरो भवति भगवद्दर्शनकामुकानाम्। (८) अन्नमश्यमानं सत् तोयमवश्यमपेक्षते। विना तोयमशितुं न प्रभूयते खलु। तोयं तु स्वोपभोगकाले नेतरदपेक्षते। पिपासितो हि पयसैव तृप्यति; बुभुक्षितो न भुक्त्यैव तृप्यति। भगवद्विषयोऽप्येतादृशः। उपायान्तरनिष्ठा भगवन्तमवश्यं कामयन्ते। भगवन्निष्ठास्तु (प्रपन्नाः) उपायान्तरेषु सर्वथा निरपेक्षाः। (९) जलाधारभूतेषु भाजनेषु तारतम्यसद्भावेऽपि जलं तावत् लघुनि वा बृहति वा पात्रे स्वयं परिपूर्णं भवति। एवम् भगवता प्रयोजनान्तराणि प्रेप्सन्तो जना लघवश्च गुरवश्च भवन्तु कामम्; सर्वत्र परिपूर्णफलप्रद एव भगवान्। अलम् अलम् इति यथा सर्वेऽपि कथयेयुस्तथा हि वितरति भगवान्। (१०) सलिलं पञ्चप्रकारकं प्रेक्षामहे। भूगतजलम्, आवरणसलिलम्, क्षीराब्धिपयः, प्रवाहतोयम्, वापीकूपादिगतमुदकमिति। भूमौ सर्वत्राप्यन्तरवतिष्ठते सलिलम्; अथापि पिपासितस्य सद्यः पिपासाप्रशमनार्हं तन्न भवति। एवमन्तर्यामी भगवान् सर्वत्र स्थितोऽपि सद्योदर्शनसमुत्कण्ठितानां परमभक्तानामुपयोगार्हो न भवति। अण्डाद्बहिः प्रवहदावरणजलम् श्रीवैकुण्ठमधिवसता [illegible] तुल्यम्। पिपासितानामावरण-

सलिलमिव सद्योदिदृक्षूणां मुमुक्षूणामनुपकारको हि भवति वैकुण्ठपतिः। क्षीराब्धिरण्डान्तर्गतोऽपि सन् यथा पिपासितानां नोपकारकः तथा व्यूहाधिपतिर्भगवानपि सद्यो दिदृक्षूणामस्मादृशामनुपकारकः। नेदिष्ठं सदपि प्रवाहसलिलम् तत्कालवर्तिव्यतिरिक्तानाम् जनानां यथा नोपकारकम् तथा रामकृष्णाद्यवतारमूर्तिविशेषोऽपि पाश्चात्यानामस्मादृशामनुपकारकः। अन्ततो वापीकूपतटाकादिसलिलमेव यथा इदानीन्तनानामपि सर्वेषां सद्यः पिपासाप्रशमनविचक्षणम्, तथा अर्चामूर्तिरेव भगवान् सद्यो दर्शनलालसानां मुमुक्षूणामशेषाणां सुष्ठु संदृश्यो भवति। (११) स्वतः पवित्रमपि पाथः आश्रयवशादेव त्याज्यतामुपादेयतां च विन्दति। अपरिशुद्धाधिकरणवर्ति तत् अनुपादेयम्, सुपरिशुद्धाधिकरणवर्ति तत् उपादेयं च भवतीति पश्यामः। एवं भगवानपि देवतान्तरेष्वन्तर्यामी सन् आश्रयवशादेव त्याज्यो भवति; रथाङ्गशङ्खासिगदाधनुर्वरादिदिव्यायुधैर्दिव्यभूषणविभूषितदिव्यमङ्गलविग्रहाश्रितो भगवानुपादेयो विराजते। (१२) आर्द्रासु सिकतासु पुनः पुनः खनने सति सलिलमाविर्भवत्यनारतम्। एवं भगवानपि आर्द्रहृदयैस्सुमनोभिरनारतमुपन्यस्यमानोऽपि तदातनत्ववन्नवीभवत्स्वरूपरूपगुणविभूतिचेष्टितस्सन् समुज्जृम्भते पुनः पुनः। (१३) अम्भः स्वार्थतागन्धरहितं पारार्थ्यैकवेषं वीक्ष्यते। एवं भगवानपि * न ते रूपं न चाकारो नायुधानि न चास्पदम्। तथाऽपि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥ * इति जितन्ताम्नातरीत्या, * परिजनपरिबर्हा भूषणान्यायुधानि प्रवरगुणगणाश्च ज्ञानशक्त्यादयस्ते। परमपदमथाण्डान्यात्मदेहस्तथाऽऽत्मा वरद! सकलमेतत् संश्रितार्थं चकर्थ ॥ * इति श्रीकूरेशमिश्रानुगृहीतरीत्या च आश्रितार्थात्मात्मीयश्चकास्ति। (१४) जलं स्वत एव प्रादुर्भवितुमर्हति, न तु कदापि परकीयनिर्बन्धतः। एवं भगवानपि * नासौ पुरुषकारेण न चाप्यन्येन हेतुना। केवलं स्वेच्छयैवाहं प्रेक्षे कञ्चित्कदाचन * इति स्वोक्तरीत्या स्वाधीनप्रादुर्भावः। * नायमात्माश्रुतिरप्यत्रानुसन्धातुं योग्या॥ (१५) नीरं सागरात् कालमेघद्वारा समागतं सदेव सर्वोपजीव्यं भवति। एवं भगवानपि आचान्तशास्त्रार्णवसदाचार्यसूक्तिद्वारैव सर्वोपजीव्यो भवति॥ (१६) क्षुद्रा महान्त इति विभागमन्तरेण सर्वैरपि जनैस्तटाकादिष्ववगाहनार्हं भवति पयः। एवं परमपुरुषोऽपि वसिष्ठचण्डालविभागमन्तरेण सर्वैर्निषेव्यो विभ्राजते। अत्र * निषादानां नेता कपिकुलपतिः काऽपि शबरी कुचेलः कुब्जा सा व्रजयुवतयो माल्यकृदिति। अमीषां निम्नत्वं वृषगिरिपतेरुन्नतिमपि प्रभूतैस्स्रोतोभिः प्रसभमनुकम्पे! समयसि॥ * इति दयाशतकश्लोकरत्नमेकांशतोऽनुसन्धानार्हम्। (१७) अम्बु अतिसूक्ष्मरन्ध्रवर्त्मनाऽपि स्वच्छन्दमन्तःप्रवेष्टुं प्रभवति। इत्थं परमकारुणिकः परमात्माऽपि संसारिष्वस्मादृशेषु यादृच्छिकप्रासङ्गिकआनुषङ्गिकाद्यज्ञातसुकृतलवलेशरूपरन्ध्रलाभेऽपि स्वकीयकृपारसमन्तः प्रवेशयति हन्त। श्रीवचनभूषणे * त्रिपाद्विभूतिचूर्णिकायामतिविशदमेतदिति नात्र विस्तरः॥ (१८) उदकं तीर्थविशेषेषु महीयते। गङ्गायमुनासरस्वतीकावेरीताम्रपर्ण्यादिनदीविशेषेषु खलु तीर्थप्रभावो विशिष्यते। एवं भगवानपि * श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रिसिंहाचलौ श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम् * इत्यादितोऽभिष्टुतेषु दिव्यदेशविशेषेष्वप्रतिमं महिमानमश्नुते॥ (१९) अतिशयिततापा जनाः सलिलमुखावनैः प्रकारैरुपभुञ्जते स्नानपानादिरूपैः। भगवानपि मानसिकैरनुसन्धानैः वाचिकैःस्तवैः कायिकैः प्रणामाद्यनुष्ठानैरुपभुज्यते भक्तैः स्वस्वरुच्यनुगुणम्॥ (२०) पिपासितेन जनेन 'अलं जलकणिकया, अलं पानीयबिन्दुना' इति कथनात् अल्पशः काङ्क्ष्यमाणत्वं पयसि दृश्यते। एवं भगवानपि * सकृत्त्वदाकारविलोकनाशया तृणीकृतानुत्तमभुक्तिमुक्तिभिः। महात्मभिः * इति भगवद्यामुनार्यदिव्यसूक्त्यनुसारेण सकृत्काङ्क्षणीयदर्शनो भवति॥ (२१) पाथसि लघुतरः अश्मखण्डोऽपि

निमज्जति; वृहत्तरमुडुपमपि प्लवते। अल्पवस्तुभिरवेक्षणीयान्तःप्रदेशत्वम्, महत्तरैरप्यनवेक्ष्यान्तःप्रदेशत्वं पाथसोऽस्तीत्युक्तं भवति। सैषा रीतिर्भगवति च समाना। स तावत् * समाहितैस्साधु सनन्दनादिभिस्सुदुर्लभम् भक्तमनैरदुर्लभम् * इत्युक्तरीत्या अल्पानामप्यवगाह्यः अनल्पानामपि दुरवगाहश्च भवति खलु॥ (२२) उदकं तावत् अन्नमुत्पादयति; उत्पन्नस्योपयोजने च हेतुर्भवति। एवं भगवानपि नानाभोगान् सृजति; सृष्टानां भोगानामनुभवे च स्वयमन्तर्भवति। विना भगवन्तमनुभूयमाना भोगा न हि खलु स्वदन्ते रसिकानां चेतसे॥ एवमन्येऽपि नीरसाधर्म्यप्रकारा उन्नेया उत्तुङ्गमनीषैर्भक्तप्रवरैः॥ .... (११)

—* एतद्दशक सारार्थसंग्राहकः द्रमिडोपनिषत्संगति श्लोकः *—

कौटिल्यवत्सु करणत्रितयेऽपि जन्तुष्वात्मीयमेव करणत्रितयैकरूप्यम्।
संदर्श्य तानपि हरिः स्ववशीकरोतीत्याचष्ट सान्द्रकरुणो मुनिरष्टमेन॥

(हिंदी.) नीरसमान भगवान के (आर्जवनामक) गुण को लक्ष्यकर श्रीशठकोप सूरी से अनुगृहीत यह दशक सहस्र गाथाओं के बीच में बहुत विमर्श करने योग्य है॥

इस गाथा में आळ्वार यह स्पष्ट बता रहे हैं कि इस दशक में भगवान के आर्जवगुण का ही वर्णन किया गया है। इस दशक की अवतारिका में बताया गया कि भगवान् को नीरसमान कहने का तात्पर्य यह कि वे आर्जवगुणसंपन्न हैं। दूसरे दशकों की भांति इस दशक में फलश्रुति नहीं है। इसका यह भाव होगा कि इस दशक के परमभोग्य अर्थों का विवेचन करना ही भक्तों के लिए महान लाभ है।

भगवान को नीरसमान कहने का यह तात्पर्य है कि उनमें पानी के अनेक धर्म रहते हैं। अब इसका, कुछ विवरण करेंगे—(१) जल स्वभावतः नीचे की ओर ही बहता है और बहुत प्रयत्न करने पर ही ऊपर चढता; भगवान भी जाति गुण वृत्त आदियों से अपने को नीच माननेवालों की ओर ही अपना कृपारस बढाते हैं; न तु अपने को उच्च माननेवालों की ओर। पांडवदूत बनकर हस्तिनापुर पधारनेवाले श्रीकृष्ण राजवीथी में बडे बडे राजाधिराजों को छोड, अपने को अतिनीच माननेवाले विदुरजी के घर पधारे, और "विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च" इत्युक्त प्रकार भक्ति से पवित्र बने हुए, सुमधुर अन्न का भोजन किया। यह देखकर दुर्योधन ने पूछा, "भीष्मद्रोणवतिक्रम्य मां चैव मधुसूदन। किमर्थं पुण्डरीकाक्ष! भुक्तं वृषलभोजनम्॥ अर्थात् हे कमलनयन, मधुसूदन! श्रेष्ठजन्मवाले द्रोण, ज्ञानाधिक भीष्म, और राजाधिराज मुझको लांघकर तुमने क्योंकर शूद्र का अन्न खाया?" (२) कोई भी जल की परवाह नहीं कर सकता। अर्थात्, जैसे हम चावल के बदले में गऊं, बाजरा, दूध, फल इत्यादि दूसरी वस्तुओं का उपयोग कर सकते हैं, वैसे पानी के बदले में दूसरी किसी वस्तु को काम में नहीं ले सकते। इसी प्रकार भगवान का भी कोई प्रतिनिधि नहीं होगा। अर्थात् भगवान का काम दूसरा कोई नहीं करेगा। यह भाव है—यह अर्थ नहीं जानते हुए कि भगवत्प्राप्ति का उत्तम साधन स्वयं भगवान ही हैं, कितने लोग कर्मयोग ज्ञानयोग भक्तियोग इत्यादि दूसरे उपायों का अनुष्ठान करने लगते हैं। परंतु उन्हें भी अपने उपाय की सिद्धि के लिए भगवान का आश्रय लेना ही पडता है। यह तत्व जाननेवाले प्रपन्न जन तो उन

उपायांतरों को छोड कर भगवान को ही पूर्णरूप से उपाय मानते हैं। यथा श्रीकूरेशस्वामीजी ने श्रीवैकुंठस्तव में अनुगृहीत किया कि, "या कर्मणामधिकृतिः य इहोद्यमस्तेषु अप्येष्वनुष्ठितिरशेषमिदं हि पुंसाम्। त्वामन्तरेण न कथंचन शक्यमाप्तुम् एवं च तेषु मयि चास्ति न ते विशेषः॥" इसका यह तात्पर्य है—हे भगवन्! कर्मादि दूसरे योग करने का अधिकार पाना, उनमें उतरना और विधिवत् उनका अनुष्ठान कर समाप्त करना, ये सभी आपकी कृपा के विना किसीको न मिलेंगे। मैं भी आपकी कृपा का ही प्रतीक्षी हूं। अतः उनमें और मुझमें कौन-सा अंतर रहता है? इस लिए आपको मुझ पर कृपा करना भी उचित है॥ (३) सुशीतल रहना जल का स्वभाव है, और तपाये जाने पर ही वह कदाचित् गरम होगा। भगवान का स्वभाव भी करुणाशीतल रहना ही है; चेतनों के सीमातीत अपराध देखने पर वे कदाचित् रुष्ट होते हैं। पुरुषसूक्त का यह एक वाक्य है कि "चंद्रमा मनसो जातः;" अर्थात् चंद्रमा भगवान के मनसे उत्पन्न हुआ। इसका कारण यह है कि भगवान का मन भी चंद्रमा की भांति—नहीं, उससे भी अधिक—शीतल होता है॥ (४) गरम पानी को ठंडा करने के लिए ठंडे पानी की ही आवश्यकता है, नतु दूसरी किसी वस्तु की। उक्त प्रकार चेतन के अपराध देख कर रुष्ट होनेवाले भगवान भी केवल अपनी कृपा से ही प्रसन्न होते हैं, न तु उपायांतर से। श्रीयामुनाचार्य स्वामीजी ने "निरासकस्यापि न तावदुत्सहे महेश! हातुं तव पादपङ्कजम्" (मेरे निरासक होने पर भी मैं आपके श्री पादकमल नहीं छोडूंगा) कहते हुए इसी अर्थ की सूचना की। अपनी शरणगति से अप्रसन्न समुद्रराज पर रुष्ट होकर उसे दंड देने को उद्यत श्रीरामचंद्रजी ने बाद में अपने आप ही उसपर प्रसन्न हुए। (समुद्रराजकी नम्रता तो व्याजमात्र था॥) (५) समर्थ लोग अपनी इच्छा के अनुसार पानी को बाँध से रोक सकते हैं और द्वार खोलकर बाहर बहा भी सकते हैं। "स्वोच्छिष्टायां स्रजि निगलितं या बलात्कृत्य भुङ्क्ते" (गोदादेवी अपने धारण की गयी पुष्पमाला से भगवान को बांध कर उनका अनुभव करती हैं) इत्यादि प्रशंसा के पात्र भक्त जन भगवान को बांध सकते हैं; और दूसरे भक्त उन्हें अपने दूत के रूप में बाहर भेज भी सकते हैं॥ (६) जल, दूसरी वस्तु पकाने का साधन होता है और स्वयं फलतया भी पिया जाता है। एवं भगवान उपाय व उपेय, दोनों बनते हैं। अर्थात् कोइ लोग भगवान को उपाय मान कर उनसे किसी दूसरी वस्तु (ऐश्वर्यादि) पाना चाहते हैं; दूसरे कोई जन कर्मज्ञानादि उपायांतर से भगवान को प्राप्त करना चाहते हैं; प्रपन्न लोग तो भगवान की ही कृपा से उन्हींको प्राप्त करना चाहते हैं॥ (७) भूखा मानव अन्न की भांति रोटी, फल इत्यादि खाने से भी तृप्त हो सकता है; प्यासा तो जल के सिवा दूसरी किसी वस्तु के उपयोग से तृप्त न हो सकता। एवं भगवत्प्राप्ति करने की इच्छा उनको प्राप्त करने पर ही शांत होगी, न कि दूसरी किसी वस्तु पाने पर। साक्षात् दर्शन करने के इच्छुक भक्त जन, न केवल दूसरे किसी पदार्थ के लाभ से तृप्त न होगा; किंतु खुद भगवान के गुणों का अनुभव करने पर भी तृप्त न होगा॥ (८) अन्न खाने के समय जल की अपेक्षा रहती है; परंतु जल पीने के समय दूसरे किसीकी आवश्यकता नहीं रहती। उपायांतरनिष्ठों को भगवत्कृपा भी पानेकी आवश्यकता रहती है; भगवन्निष्ठ (यानी प्रपन्न) को वस्त्वंतर की अपेक्षा नहीं होगी॥ (९) छोटे बडे पात्रों में सर्वत्र जल पूर्ण ही भरेगा; एवं भगवान से नाना प्रकार के फल पाना चहनेवाले जन छोटे बडे इत्यादि नाना प्रकार के यद्यपि होंगे; तथापि भगवान सब पर

परिपूर्ण अनुग्रह ही करेंगे। अर्थात् किसीको ऐसा न लगेगा कि मुझ पर भगवान की कृपा कम हुई। सभी पूर्ण तृप्त ही होंगे॥ (१०) जल के ये पांच प्रकार अनुभव व शास्त्रसिद्ध हैं—(अ) भूगत जल, जो साधारणतया नजर में नहीं आता, किंतु भूमि खोदने पर दीख पडता है; (आ) आवरणजल, जो शास्त्र के अनुसार इस ब्रह्मांड के बाहर बहता है; (इ) क्षीरसागर, जो ब्रह्मांड के अंदर है और ब्रह्मादि देवताओं को प्राप्य है; (ई) प्रवाह, जो चौमासे में बहता और उधर जानेवालों को मिलता है; और (उ) बावडी, तालाब इत्यादि, जो हमेशा जलपूर्ण और काममें आने योग्य रहता है। इनके सदृश भगवान के भी ये पांच प्रकार हैं—(अ) अन्तर्यामी, जो प्रत्येक मानव के हृदय में विराजते हुए केवल योगियों की नजर में आते हैं, न कि दूसरों की; (आ) परत्व, जो संसारमंडल के परे श्रीवैकुंठदिव्यधाम पर विराजमान हैं; (इ) व्यूह, जो क्षीरसमुद्रादि कतिपय जगह विराजते हैं; (ई) रामकृष्णादि विभवावतार, जो कि त्रेता द्वापरादि युगों में अयोध्या मथुरा इत्यादि स्थलों में प्रकट हुए थे; और (उ) अर्चावतार, जो श्रीरंगादि सभी क्षेत्रों में सर्वदा विराजमान हैं। अब इस अर्थ का वर्णन करने की आवश्यकता नहीं रहती कि, जैसे पिपासित व्यक्ति के काम में बावडी इत्यादियों के सिवा दूसरी जगह रहने वाला पानी सर्वदा नहीं आ सकेगा, इसी प्रकार सद्यः भगवान के दर्शन करने को उत्कंठित भक्त के काम में अर्चारूपी भगवान ही आ सकते हैं, न कि दूसरे रूपवाले॥ (११) स्वतः परिशुद्ध होने पर भी, शुद्धपात्रगत जल को ही हम पानादि काम में ले सकते हैं; न तु अशुद्धपात्रस्थ को। एवं भगवान की भी देवतांतर के अंतर्यामी होने पर हम प्रदक्षिण प्रणाम इत्यादि नहीं कर सकते; किंतु शंखचक्रादि दिव्यायुध धारी किरीट मकुट चूडावतंसेत्यादि दिव्यभूषणविभूषित तथा लक्ष्म्यादियुत दिव्यमंगलविग्रहधारी होने पर ही उनकी पूजा उपासना इत्यादि कर सकते हैं॥ (१२) गीली रेतीली भूमि में खोदने पर स्वच्छ नया जल मिलता है। आर्द्रचित्त (भगवद्गुणानुभव से गीले मनवाले) भक्तों से संकीर्त्यमान होने पर भगवान अपने स्वरूपरूपगुणविभूत्यादियों के साथ उज्वल दर्शन देते हैं॥ (१३) जल, रत्तीमात्र के भी स्वार्थ के बिना सर्वदा दूसरों के काम में ही आनेवाला पदार्थ है। भगवान भी सर्वथा स्वार्थ की चिंता न करते हुए अपने भक्तों के ही उपयोग में विनियुक्त होते हैं। "न ते रूपं न चाकारो नायुधानि न चास्पदम्। तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे॥" (अर्थात्, रूप, आकार, आयुध, निवासस्थान इत्यादि वस्तु भगवान के उपयोग के लिए नहीं, बल्कि उनके भक्तों के लिए ही अलग कर रखे गये हैं।) "परिजनपरिबर्हाभूषणान्यायुधानि प्रवरगुणगणाश्च ज्ञानशक्त्यादयस्ते। परमपदमथाण्डान्यात्मदेहस्तथात्मा वरद! सकलमेतत्संश्रितार्थं चकर्थ॥" (हे वरदराजभगवन्! आपने अपने सेवक, सेवा के उपकरण, दिव्यभूषण, दिव्यायुध, ज्ञान शक्त्यादि कल्याणगुण, श्रीवैकुंठधाम, अनेक ब्रह्मांड, अपने दिव्यमंगल विग्रह और दिव्यात्मस्वरूप, इन सबको भक्तों के लिए ही सुरक्षित रखा है। (१४) जल अपने आप ही प्रकट होता है, नतु किसीके निर्बंध से। इस प्रकार भगवान भी केवल अपनी इच्छा से किसी के सामने प्रकट होते हैं; न तु निर्बंध से। अर्थात् कोई भी मानव स्वप्रयत्न से भगवान के दर्शन इत्यादि पा नहीं सकता॥ (१५) सागर से उठा कर कालमेघ से बरसा जाने पर ही जल हमारे उपयोग करने योग्य होता है। भगवान भी शास्त्रसागर निमग्नमानस आचार्यों से उपदिष्ट होने पर ही हमारे उपयोग के योग्य होते हैं॥ (१६) तटाकादि में

रहनेवाला जल ऊंचे नीचे के विभाग के बिना समस्त जनों के काम में आता है। एवं भगवान श्रेष्ठनीच विभाग के बिना सभी जनों के सेव्य होते हैं। यथा श्रीरामावतार में भील गुहदेव, वानर सुग्रीव, राक्षस विभीषण, दंडकारण्यनिवासी ऋषिगण इत्यादियों ने उनकी सेवा की॥ (१७) अतिसूक्ष्म अवकाश (रंध्र या छेद) मिलने पर भी पानी अंदर घुस जाता है और धीरे धीरे अपना कार्यक्षेत्र बढा देता है। भगवान भी चेतन का उद्धार करने की ही राह देखते रहते हैं (और उसमें यादृच्छिक-प्रासङ्गिक-आनुषङ्गिक इत्यादि किसी प्रकार का अल्प सुकृत मिलने पर उसके द्वारा ही उस चेतन को अपने वश कर लेते हैं। श्रीवचन भूषण दिव्यशास्त्र के "त्रिपाद्विभूति" चूर्णिका में इस विषय का सुंदर वर्णन किया गया है॥ (१८) पुण्य तीर्थ के जलका विशेष वैभव पाया जाता है; एवम् "श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रिसिंहाचलौ श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम्" इत्याद्युक्त दिव्यदेशों में विराजमान भगवान का मान अधिक हैं॥ (१९) गरमी से अतिमात्र तप्त जन न्हाना पीना इत्यादि अनेक प्रकारों से जल का उपयोग करते हैं। भव संतप्त भक्त जन तो कायेन, वाचा और मनसा भगवान का अनुभव कर प्रसन्न होते हैं॥ (२०) अत्यंत प्यासे जन, "अब एक बिंदु पानी मिले तो भी हमारी प्यास बुझ जायगी" कहते हुए अत्यल्प पानी माँगते हैं। भगवदर्शन के अभाव से संतप्तान्तर भक्त भी, "सकृत्त्वदाकार विलोकनाशया" इत्याद्युक्त प्रकार अत्यल्पमात्रा में भगवद्दर्शन पाना चाहते हैं॥ (२१) जल में छोटा-सा भी पत्थर डूब जाता है और बडी नाव तरती है; अर्थात् अल्पवस्तु भी तलस्पर्शी होती है और कदाचित् बडा पदार्थ भी ऊपर ही रहता हुआ अंदर का वृत्तांत नहीं जान सकता। एवं भगवान भी "समाहितैस्साधु सनन्दनादिभिस्सुदुर्लभं भक्तजनैरदुर्लभम्" इत्याद्युक्त प्रकार भगवत्कृपा के पात्र भाग्यवान कतिपय व्यक्तियों को पूर्णतया ज्ञात होते हैं, और स्वप्रयत्न पर भरोसा करने वालों को अविदित ही रह जाते हैं॥ (२२) जल, अन्नादि पदार्थों का उत्पादक होता है और उत्पन्न अन्नादि के उपभोग में सहायक भी होता है। भगवान भी चेतनों के उपभोग के लिए नानाविध भोगों की सृष्टि करते हैं और उनका भोग करने में उनके सहायक भी होते हैं। अर्थात् भगवान की कृपा के बिना कोई भी मानव किसी प्रकार के भोग को न तो प्राप्त कर सकता, न वा भोग सकता॥ ऐसे दूसरे भी अनेक प्रकारों से भगवान में जल का सादृश्य समझा जा सकता है॥ .... (११)

सटीक सहस्रगीति के पहले शतक का आठवां दशक समाप्त हुआ॥
आळ्वार तिरुवडिगळे शरणम्॥

श्रीपराङ्कुशपरकालयतिवरवरमुनीन्द्रेभ्यो नमः॥

॥ सहस्रगीत्याम् प्रथमशतके - नवमं दशकम् - इवैयुमवैयुमुवैयुम् ॥

(सं.) अवतारिका—भगवति सात्म्यभोगप्रदत्वं नाम कश्चन महान् गुणविशेषोऽस्ति। स्वात्मनः स्वरूपरूप गुणविभूतिचेष्टितानामनुभवं युगपदेव कृत्स्नशः प्रदातुं प्रभवन्नपि स भगवान् 'क्षुद्रशक्तिकोऽयं जन एकपदे परिपूर्णभोगं कर्तुं नेष्टे; क्षणशः कणशश्चैव भुञ्जानोऽसौ अन्तत उपभुक्तपरिपूर्णभोगस्स्यात्' इति मन्यमानः अल्पाल्पश एव स्वभोगं वितरतीति यत्, एतदेव सात्म्यभोगप्रदत्वं नाम। शिशूनां प्रथमत एव जननी न हि

प्रयच्छत्यन्नरसशाकदध्यादिकम्। क्षीरम् यवागूः अन्नकणिका....इत्येवं क्रमेण प्राशनं हि प्रेक्षामहे। विद्यार्थिभ्योऽपि न हि बृहत्तरग्रन्थार्थोपदेशं दिशन्ति गुरवः प्रथमतः। वार्धके वर्तमानानां जनानां कुक्षौ तण्डुलसूपशाकदधिघृतादीनि वस्तूनि अपरिमितशकटमेयानि गतानि सन्तीति नैवात्र संदेहलेशोऽपि। किमेतावन्ति वस्तूनि युगपदेव प्रविष्टानि जठरे? सर्वथाऽप्यसंभावितं ह्येतत्। क्षणशः कणशश्चैव प्रविष्टानीति ननु सर्वे विदन्ति। एवमेव अपरिच्छिन्नविभूतिको भगवान् स्वविभूतीः कणश एवानुभावयन् क्रमेण अनुभावित कृत्स्नविभूतिको बोभवीति। एवमेवानुभावयति स भगवान् मुनिवरमेनम्।

तिरुविरुत्ताख्यप्राथमिकप्रबन्धतः प्रभृति सहस्रगीत्या अस्या अवसानावधि भगवान्मुनिवरमेनमेवमेवानुभावयतीति वस्तुतत्त्वे स्थिते, इदानीं विशिष्यैतत्प्रतिपादनं किमर्थमिति चेत्, अवधेयम्। भगवान् मुनिवरस्यास्योत्तमाङ्गमारुह्य तत्रावस्थाय मोदितुमैच्छत्; 'एकपदे उत्तमाङ्गाधिरोहणे कृते, महानिधिमुपलब्धवान् जन्मदरिद्र इव प्रशिथिलान्तःकरणो भवेदसौ; अतस्तदिदं साहसं नैव कर्तुमर्हम्; क्रमश एव शनैश्शनैरुत्तमाङ्गमधिरोढव्यम्' इति हृदि कलयन्, परिसरेऽवस्थितिः, अन्तिकेऽवस्थितिः, सहावस्थितिः, कटितटेऽवस्थितिः, हृदयदेशेऽवस्थितिः, भुजेऽवस्थितिः, रसनायामवस्थितिः, अक्ष्णोरवस्थितिः, ललाटेऽवस्थितिः—इत्येवं क्रमेण अन्ततो मूर्ध्नि निषण्णस्सन् कृतकृत्यो बभूव भगवान्। एवं नाम सात्म्यभोगप्रदानसामर्थ्यमस्य जेजेत्यप्रतिद्वन्द्वम्। तदिदमनुभूयते मुनिवरेण दशकेऽस्मिन्।

सत्यं भगवतः श्रुतीनां शिरस्यवस्थानापेक्षया शठरिपुमुनेरस्य शिरसि स्थितिः परमस्पृहणीया; अत एव श्रीवत्साङ्कमिश्रगुरुचरणा वरदराजस्तवे देवाधिराजं भगवन्तमनुयुञ्जते—* भक्तानां यद्वपुषि दहरं पण्डितं पुण्डरीकं यच्चाम्लानं वरद! सतताध्यासनादासनाब्जम्। आम्नायानां यदपि च शिरो यच्च मूर्धा शठारेः हस्तद्वेर्वा किमतिसुखदं तेषु पादाब्जयोस्ते? ॥ * इति। एतत्पुत्ररत्नभट्टपादा अपि श्रीरङ्गराजस्तवे * वटदल देवकीजठरवेदशिरः कमलास्तन शठकोपवाग्वपुषि रङ्गगृहे शयितम् * इत्यनुगृह्णन्ति ॥ .... *

(हिंदी) पहले शतक के नवें दशक की अवतारिका—प्रकृत दशक में भगवान के 'सात्म्य-भोगप्रदत्व' नामक विलक्षण गुण का अनुभव किया जा रहा है। भगवान अपने भक्तों को अपने स्वरूपरूप-गुणविभूतिचेष्टितों का अनुभव देने के समय एक ही साथ अपना परिपूर्ण अनुभव नहीं देते, परंतु धीरे धीरे देते हैं। क्योंकि वे ठीक जानते हैं कि अल्पशक्तिवाला यह मानव एक साथ परिपूर्ण अनुभव नहीं कर सकेगा। अतः धीरे धीरे थोडा थोडा अनुभव देते हुए क्रमशः परिपूर्ण अनुभव कराना भगवानका महान चातुर्य है, जिसका दूसरा नाम है सात्म्य-भोग-प्रदान। बच्चे को आहार देनेवाली माता, शुरू में ही अन्न, रोटी, शाक इत्यादि ठोस पदार्थ नहीं देती, किंतु प्रथमतः केवल दूध, थोडे दिनों के बाद माँड, फिर क्रमशः अन्न शाक इत्यादि देने लगती हैं; अर्थात् थोडा थोडा आहार देती हुई बच्चे की खाने तथा पचाने की शक्ति बढाती हुई धीरे धीरे आहार की मात्रा बढाती जाकर, अंततः पूर्ण आहार देती है। एवं शिष्यों को उपदेश देनेवाले आचार्य शुरू में ही नहीं, परंतु धीरे धीरे बडे बडे शास्त्रार्थों का उपदेश देते हैं। यदि कोई वृद्ध अपने मन में यह हिसाब लगावें कि अभी तक मैंने कितना आहार खाया हूं, तो उसे मालूम पडेगा कि सैकडों मन चावल, या गेहूं, दाल, शाक, घी इत्यादि उनसे खा गये। परंतु क्या ये

सभी वस्तु एक ही समय उसके पेट में चले गये? नहीं नहीं; सब धीरे धीरे गये। इसी प्रकार भगवान भी भक्तों को धीरे धीरे अनुभव देना शुरू कर क्रमशः अपना परिपूर्ण अनुभव देते हैं। प्रकृत दशक में उन्होंने आळ्वार को ऐसा ही एक विलक्षण अनुभव दिया।

यद्यपि आळ्वार के प्रथम प्रबंध तिरुविरुत्तम् से शुरूकर प्रकृत सहस्रगीति के अंततक भगवान उन्हें ऐसा क्रमिक अनुभव ही देते हैं; अतः यह शंका होगी कि "इस दशक की कौन-सी विशेषता है?" तथापि इसकी यही विशेषता है कि इस दशक में आळ्वार स्वयं अपनी वाणी से इस विलक्षण अनुभव का स्पष्ट व अत्यद्भुत वर्णन कर रहे हैं। तथाहि, इस दशक की यह कथावस्तु है—भगवान की इच्छा हुई कि मैं आळ्वार के सिर पर बैठकर आनंद पाऊं। परंतु उन्होंने सोचा कि "यदि मैं सहसा जाकर इनके सिरपर चढ जाऊं, तो अकस्मात् महानिधि पानेवाले गरीब की भांति, आळ्वार मुझको सह नहीं सकते; अतः यह काम धीरे धीरे करने का है।" तदनुसार वे आळ्वार के सामने प्रकट हो गये, समीप पधारे, पास बैठ गये, गोद पर चढ गये और ऊपर ऊपर चढते हुए क्रमशः वक्ष, भुज, जीभ, नेत्र व ललाट लांघकर अंततः सिर पर बैठ कर कृतार्थ हो गये। अब आळ्वार इस दशक में भगवान के इस सात्म्यभोगप्रदान नामक शुभगुण का अनुभव करते हैं।

इस दशक के अंत में यह अर्थ बताया जानेवाला है कि भगवान आळ्वार के सिरपर विराज कर कृतकृत्य हो गये। इससे स्पष्ट होता है कि उनको वह स्थान बहुत प्रिय लगा। यह बात सर्वथा सत्य और हमारे आचार्यों का परमादरणीय है। यथा श्री कूरेश स्वामीजी ने श्री वरदराज भगवान से प्रश्न किया, "भक्तानां यद्वपुषि दहरं.........यश्च मूर्धा शठारेः...." इत्यादि (श्री वरदराजस्तव ५९)। इसका यह तात्पर्य है—भक्तों का हृदयकमल, (अर्चावतार में) आसनरूपी कमल, वेदों का सिर (माने वेदांत) श्री शठकोपसूरी का सिर, और हस्तिगिरि का सिर, इतनी वस्तुओं में कौन-सी आपको सबसे अच्छी लग रही है? श्री पराशर भट्टार्य स्वामीजी भी श्रीरंगराजस्तव में "वटदल देवकीजठर........" (पू. ७८) इत्यादि पद्य में कहते हैं कि भगवान वटपत्र, देवकीगर्भ, वेदशिर (माने वेदांत), लक्ष्मीस्तन, श्री शठकोपसूरी की वाणी व शरीर और श्रीरंगदिव्यधाम में विराजमान हैं। इन दोनों पद्यों का यह भावार्थ है कि भगवान श्री शठकोप सूरी के दिव्य सिर पर इतने आराम व आनंद से विराजते हैं, जैसे उक्त दूसरे अनेक स्थानों पर आप विराजते हैं॥ .... *

(गाथा.) इवैयु मवैयु मुवैयुम् इवरु मवरु मुवरुम् *
एवैयुम् यवरुम् तन्नुळ्ळे आहियु माक्कियुम् काक्कुम् *
अवैयुळ् तनिमुद लेम्मान् कण्णपिरा नेन्नमुदम् *
शुवैयन् तिरुविन् मणाळन् एन्नुडै च्चूळलुळाने॥ १॥

(सं.) नेदीयांसोऽचेतनपदार्थाः, दवीयांसोऽचेतनपदार्थाः, मध्यस्था अचेतनपदार्थाः, नेदीयांसश्चेतनपदार्था• दवीयांसश्चेतनपदार्था मध्यस्थाश्चेतनपदार्थाः (किं बहुना) सर्वेऽपि चाचेतनपदार्थास्सर्वेऽपि च चेतनपदार्था स्संवर्तसमये यस्य कुक्षिकुहरं प्रविश्य स्थितिं विन्दन्ते, यस्य

कुक्षेरथ निस्सरन्ति, एवं नाम सकलजगदवननिपुणः सर्वेषु च तेष्वन्तर्यामी, तेषामद्वितीय-कारणभूतश्च सोऽस्मत्स्वामी कृष्णप्रभुः परमभोग्यः परमरसिको लक्ष्मीपतिर्मम परिसरमधि-तिष्ठति ॥

सकलचेतनाचेतनवर्ग सृष्टिस्थितिसंहारकौशलेन सकलचराचरान्तःप्रवेशचातुर्या च प्रदर्शितपरत्व-सीमा भगवान् तत्प्रत्यनीकं सौलभ्यमपि प्रदर्शयितुकामस्सन् मम सर्वाङ्गसंश्लेषरसं स्वयमनुबुभूषुः साल्यभोगप्रदान कुतूहलेन परिसरे संचरन्नवतिष्ठत इत्युक्तं भवति। स्वस्य परिसरे तिष्ठन् गोधूलिधूसरितकोमलकेशवेशः पिञ्छा-वतंसो मृदुललितवेणुनादमकरोदिव; अत एव कृष्णप्रभुरित्युक्तवान् सूरिवरः। अथ च स्वकीयसर्वाङ्गसौन्दर्य-लावण्यातिशयं च संदर्शितवानिव; अत एव परमभोग्य इत्युक्तम्। 'स्वामिन् शठकोपमुने! गोपीजनानामिव भवतोऽप्यङ्गसङ्गममिरोचये' इत्युक्तवानिव; अत एव परम रसिक इत्युक्तम्। 'एतावद्रासिक्यं भवता कुत्र शिक्षित' मिति मुनिवरेण पृष्टो लक्ष्मीसकाशेऽभ्यस्तमिति प्रत्युक्तवानिव; अत एव लक्ष्मीपति रित्युक्तम्॥ लक्ष्मीपतित्वादेव परमरसिकोऽभूत्; परमरसिकत्वादेव लक्ष्मीस्वयंवरपतिरभूदिति रसपरिपुष्टो भावविशेषोऽवधेयः॥

—❋ पहली गाथा—इवैयुमवैयुमुवैयुम् ❋—

(हिंदी.) समीप में रहनेवाले अचेतन पदार्थ, दूर रहनेवाले अचेतन पदार्थ, बीच में रहनेवाले अचेतन पदार्थ, एवं दूर रहनेवाले चेतन, बीच में रहनेवाले चेतन, मध्यस्थ चेतन, (तथाच) सभी अचेतन और सभी चेतन पदार्थ प्रलय के समय जिनके पेट में प्रवेश कर आराम से रहते हैं, एवं बादमें जिनके पेटमें से बाहर निकलते हैं, इस प्रकार समस्त जगत की रक्षा करने में निपुण, उन सबके अन्तर्यामी और उनके अद्वितीय कारण होनेवाले, वे हमारे स्वामी, श्री कृष्णचंद्र, जो परमभोग्य, परमरसिक तथा लक्ष्मीपति भी हैं, वे मेरे पास विराजमान हैं।

जो भगवान समस्त चेतनों व अचेतनों की सृष्टि, रक्षा व संहार करने, तथा उन सब के अंतर्यामी होने से अपने परत्व का परिचय देते हैं, वे ही उसके विपरीत अपने सौलभ्य का भी प्रदर्शन करना, एवं स्वयं मेरा सर्वांग आलिंगन करना तथा मुझे अपने साल्यभोग का प्रदान करना चाहते हुए, मेरे सामने पधार कर चारों ओर घूम रहे हैं—यह है इस गाथा का तात्पर्य। [श्री कृष्णचंद्र] कहने से यह अर्थ प्रतीत होता है कि उस समय भगवान गोधूली से अलंकृत केशवाले और वेणुगान करनेवाले श्रीकृष्ण के रूप में विराजमान थे। [परमभोग्य] कहने से यह माळूम पडता है कि उन्होंने आळ्वार को अपने दिव्यमंगलविग्रह का सारा सौंदर्य व लावण्य दिखाया। [परमरसिक] कहने का कारण यह होगा कि उन्होंने आळ्वार से कहा कि "हे शठकोपमुने! गोपियों की भांति मैं आपका भी आलिंगन करना चाहता हूं।" इसके बाद आळ्वार ने पूछा होगा कि तुमने किससे इतनी रसिकता सीखी? भगवान ने उत्तर दिया होगा कि, "लक्ष्मीजी से।" इस संवाद का सूचक है [लक्ष्मीपति] शब्द। लक्ष्मीपति होने से भगवान रसिक हुए, और रसिक होने से वे लक्ष्मीपति बने, इन दोनों प्रकारों से इस वाक्य का अर्थ समझा जा सकता है॥ .... (१)

(गाथा.) शूळल् पलपल वल्लान् तोळ्ळैय क्काल चुलहै *
केळ लोवाहि पिडन्द केशव नेन्नुडै यम्मान् *
वेळ मरुप्पै योशित्तान् विण्णव क्कॆण्ण लरियान् *
आल नेडुङ्कडल् शेन्दान् अवने नरुहलिलाने ॥ २ ॥

(सं.) नानाविधावतरणकरणनिपुणः, पुरा महावराहमूर्त्या विरचितवसुधोद्धरणः केशवः कुवलयापीडगजराजदन्तभञ्जनप्रवीणो दिविषदाम् इदमित्थंत्वेन चिन्तयितुमप्यशक्यः गंभीर-जलनिधिशयनश्च मम परिवृढो मत्समीपे वलते ॥

भगवतो मुनिवरपरिसरे वर्तनमधस्तनगाथायामनुभूतम् । अथात्र सन्निहितप्रदेशे वर्तनमनुभूयते । प्रथमत एव सन्निहितप्रदेशे कुतो नागत इत्यरसिकप्रश्नो माभूत् । सात्म्यभोगप्रदानमिह विवक्षितमित्येतत्सदा हृदि धार्यम् । सकाशे समुपस्थितो भगवान् पञ्चभिर्विशेषणैर्विशेष्यते । नानाविधावतरणकरणनिपुण इति प्रथमं विशेषणम् । मूलगाथायां तावदवतरणशब्दप्रयोगो नास्ति, अनेकसदुपायज्ञ इत्येव तु वर्तते । चेतनानां वशीकरणोपायः * अजायमानो बहुधा विजायते * इत्याम्नातमवतरणमेवेत्याचार्याणामुदारं हृदयम् । वस्तुनो भगवतोवतारविरहे सति चेतनानां भगवति व्युत्पत्तिरेव हि न स्यात्; शास्त्राणां च सर्वथा निर्विषयतैव स्यात् । अत एवानुगृहीतं श्रीवत्साङ्कमिश्रैर्वरदराजस्तवे * वरद ! यदि न भुव्यवतरिष्यः श्रुतिविहितास्त्वदुपासना ह्यनाथाः । करणपथविदूरगे सति त्वयि अविषयतानिकृताः किमाभविष्यन् ॥ * इति । 'नानाविधावतरणकर्तें'त्यनभिधाय ....करणनिपुण इति कथितम्; किं नामात्र नैपुण्यमिति पृच्छा जायेत; कर्मवश्यानामस्मादृशां धियोऽप्यगोचरान् खल्ववतारान् कृपावश्यस्सन् स करोति; तदिदमतिमात्रनैपुण्यनिबन्धनमिति मुनिवर आशेते । दण्डकारण्ये कुब्जाम्रतयाऽवततारेत्यैतिहासिकाः । * पिता पुत्रेण पितृमान् योनियोनौ * इति श्रावयन्ती श्रुतिः 'योनियोनौ' इत्यनेन यमर्थं विवक्षतिस्म, तमेवार्थं हृदि निधाय निपुण इत्याह मुनिवरः । तत्तद्योन्यनुरूपजन्मग्रहणं यत् तदेव नैपुण्यं नाम । तादृशेष्ववतारेष्वन्यतममनुभवति महावराहमूर्त्येत्यादिना । इतरसर्वावतारापेक्षया श्रीवराहावतारे भूरितमोऽभिनिवेशो मुनिवरस्यास्य; अत एव प्रथमप्रबन्धभूत तिरुविरुत्तावसाने चरमप्रबन्धभूतैतत्सहस्रगीत्यवसाने च सोऽयमेवावतारोऽनुसंहितोऽभूत् । ज्ञानप्रदानोपकारकः [ज्ञानप्पिरान्] इत्येव संज्ञा वराहभगवन् सूरिवर कृता । [केशवः] प्रशस्तकेश इत्यर्थः । वराहशुभविग्रहस्य वेदगन्धिकेशवृन्दानुभव इत्याचार्याः । कुवलयापीडदन्तिभञ्जनानुसन्धानम् मत्तगजरूप स्वकीयेन्द्रियावलेपलोपनस्मारकम् । दिविषदाम् इदमित्थंत्वेन चिन्तयितु मप्यशक्य इत्यनेन अस्मादृशां का कथेत्युक्तं भवति । दिविषदामनीत्यनुक्त्या अस्मादृशां परम भक्तानां सुसुखं चिन्तयितुं शक्य इत्यर्थोऽपि स्फोरितो भवति । आर्तनादश्रवणसौकर्याय पारावारविरचितशयनो भगवान् मदार्तिहरणाय मम सन्निहितोऽभूत् ॥ .... (२)

—* दूसरी गाथा—शूळल् पलपलवल्लान्*—

(हिंदी.) नाना अवतार करने में निपुण, पूर्वकाल में महावराह होकर भूमि का उद्धार करनेवाले, केशवविरुदधारी, कुवलयापीड नामक मत्तगज के दांत तोडने में समर्थ, 'इतने

हैं, ऐसे हैं' करके देवों को नापने में अशक्य और विशाल व गंभीर सागर पर शयन करने वाले मेरे स्वामी मेरे समीप ही विराज रहे हैं ॥

पूर्वगाथा में भगवान आळ्वार के सामने प्रकट होकर, दूर से उनकी परिक्रमा करते थे। अब आप उनके बिल्कुल समीप पधार गये। अर्थात् दूरसे दर्शन करनेवाले आळ्वार ने जब उस दर्शन का सहन किया, तब भगवान आगे बढकर उनके समीप ही आ गये। ऐसे भगवान के चार पांच विशेषण दिये जा रहे हैं। इनमें पहला विशेषण है—[नाना अवतार करने में निपुण]। यद्यपि मूलगाथा में साक्षात् अवतार शब्द प्रयुक्त नहीं; किंतु इतना ही कहा गया है कि [अनेक सदुपायज्ञ।] उदारचित्त आचार्यों का यह अभिप्राय है कि चेतनों को वश करने का उपाय अवतार ही है, जिसकी प्रशंसा, "अजायमानो बहुधा विजायते" इत्यादि वेदवाक्यों में भी की गयी है। यदि भगवान कभी अवतार ही नहीं कर देते, तो चेतनों को उनका ख्याल ही नहीं होता और सभी शास्त्र एकदम निर्विषय होते। अत एव श्रीकूरेश स्वामीजी ने श्रीवरदराजस्तव में अनुगृहीत किया, "वरद यदि न मुव्यवातरिष्यः" इत्यादि (६७)। इसका यह तात्पर्य है—हे वरदराज भगवन्! यदि आप इस धरातल पर अवतार नहीं कर देते, और अवाङ्मनसगोचर ही रह जाते, तो आपके उपासन अर्चन इत्यादि सभी वेदोक्त काम, विषय के अलाभ से अप्रामाणिक अथवा व्यर्थ हो जाते; अर्थात् वाणी व मन के भी परे रहनेवाले का अर्चन इत्यादि कैसे किये जा सकते? अतः ये सभी अर्थशून्य हो जाते। अवतारकर्ता कहने की जगह अवतार करने में निपुण कहनेवाले आळ्वार अवतार में भी भगवान का चातुर्य देख रहे हैं। वह इस प्रकार है कि कर्मवश्य हमारी बुद्धि के भी अगोचर कृपामूलक अवतार करना। इतिहास बताता है कि उन्होंने दंडकारण्य में कुब्जाम्र का अवतार लिया था। वेदपुरुष ने भी कहा, "पिता पुत्रेण पितृमान् योनियोनौ" (अर्थात् भगवान सबके पिता होते हुए ही अनेक योनियों में अवतार करते हुए अपने पुत्र किसी चेतन को अपना पिता बना देते हैं। ऐसे अवतारों में से एक अवतार का अनुभव किया जा रहा है [महावराह] इत्यादि से। मालूम पडता है कि दूसरे अवतारों की अपेक्षा यह श्री वराह अवतार ही श्री शठकोपस्वामीजी को अत्यंत प्रिय है। अत एव उन्होंने प्रथम प्रबंध तिरुविरुत्तम् के तथा अंतिमप्रबंध तिरुवाय्मोळि के अंत में इसकी स्तुति की; और इसे "ज्ञानप्पिरान्" (माने ज्ञान के उपदेशक) नाम भी रखा। [केशव] शब्द का अर्थ है श्रेष्ठ केश से विभूषित। आचार्यों का अभिप्राय है कि यह शब्द श्री वराह भगवान के दिव्यविग्रहस्थित वेदगंधि केशों का वर्णन करता है। कुवलयापीड वृत्तांत के कथन से आळ्वार मत्तगज की भांति प्रबल अपनी इंद्रियों का गर्व दूर करनेवाले भगवान के सामर्थ्य की सूचना करते हैं। [देवों को नापने में अशक्य] कहने का यह भाव है कि जब देव ही भगवान का वैभव नाप नहीं सकते, तो हमारे सरीक अज्ञों की बात ही क्या? अथवा भगवान बेशक देवों को नापने के अशक्य रहें; परंतु हमारे जैसे भक्तों के लिए सदा सुलभ ही होते हैं। देवों का आर्तनाद सुनने के लिए सागर में शयन करनेवाले भगवान् मेरा दुःख दूर करने के लिए अब मेरे समीप पधारे हैं ॥ .... (२)

(गथा.) अरुह् लिलाय पेरुञ्जीर् अमरर्ह ळादि मुदल्वन् *
करुहिय नीलनन्मेनि वण्णन् शेन्दामरै क्कण्णन् *
पोरुशिरै प्पुव्व्ळव न्देरुम् पूमहळार् तनिकेळ्वन् *
ओरुगतियिन् शुवै तन्दिट्टु ओळिविल नेन्नो ड्डने ॥ ३ ॥

(सं॰) कदाऽपि वैकल्यमनधिगच्छद्भिः कल्याणगुणैर्विभूषितः नित्यसूरीणां निर्वाहकः नीलमणिनिभविलक्षणविग्रहाभिरामः सरसिजोपमलोचनः पक्षिराजाधिरोहणेन प्रमोदमानो भूदेवीनाथो मया सहावतिष्ठमानो भगवान् कतिपयविधानुभवान् प्रदिश्य न तृप्यति, अपितु सकलविधानप्यनुभवाननुगृह्णाति ॥

समीपवर्तनं विहाय साहित्यमन्वविन्दतेत्युच्यतेऽत्र । अविकलशुभगुण इति प्रथमविशेषणम् । गुणानां वैकल्यं नाम तेषां केषुचित्प्रसरः केषुचिदप्रसरश्च; तद्राहित्यकथनेन नित्यसिद्धशुभगुणत्वमुक्तं भवति । ननु सर्वेष्वप्यधिकारिषु भगवद्गुणाः प्रसरन्तीति चेदङ्गीक्रियेत, तर्हि * तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ ....* कल्पकोटिशतेनापि न क्षमामि वसुन्धरे ! * इत्यादि निग्रहवचसां कथमुपस्थितिरिति शङ्क्येत । अपत्येषु सदा वत्सलः पिता हितपरतया कदाचिन्निगृह्णातीत्येतावता किं तस्य प्रेमभङ्गश्शङ्क्येतेति समाधेयम् । [नित्यसूरीणां निर्वाहकः] तत्तादृशोऽयमिदानीं हन्त ! मम निर्वाह्यो बुभूषतीति विस्मयोक्तिः । भूपतिस्तावत् न्यायाधिकरणे निर्वाहको भवन्नपि अवरोधे निर्वाह्यो भवतीति किमत्र चित्रम् । [नीलमणिनिभविलक्षणविग्रहाभिरामः] * पश्यत्यचक्षुस्स शृणोत्यकर्णः * अपाणिपादो जवनो ग्रहीता इत्यादिरौपनिषद वाक्यराशि रास्तां नाम दूरे; परमरसिकस्स भगवान् मामनुभोक्तुम् * इच्छागृहीताभिमतोरुदेहः * इति पुराणरत्नोक्तरीत्या दिव्यसुन्दरविग्रहं परिगृह्य खलु समायात इहेत्युच्यत इव । [सरसिजोपमलोचनः] * जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकस्स तु विज्ञेयस्स वै मोक्षार्थचिन्तकः * इत्युक्तरीत्या येन लोचनेन पुरा मयि सत्तामुदपादयत्तद्विलोचनमसकृत्प्रदर्शयतीत्युच्यत इव । [पक्षिराजाधिरोहणेनेत्यादि ।] * दासस्सखा वाहनमासनं ध्वजो यस्ते वितानं व्यजनं त्रयीमयः । उपस्थितं तेन पुरो गरुत्मता त्वदंघ्रिसम्मर्दकिणाङ्कशोभिना ॥ * इति यामुनार्यसूक्तिरीत्या गरुत्मन्तमिव मामपि विषयीकर्तुमुद्युक्त इति विवक्षितम् । [भूदेवीनाथः] रथाङ्गपाणिरिति क्वचित्, पाञ्चजन्यपाणिरिति क्वचिच्च कथनेऽपि यथा ह्युभयपरिकर्मितपाणित्वमुक्तप्रायम्, तथैव श्रीदेवीवल्लभ इति क्वचित्, भूदेवीवल्लभ इति क्वचिच्च कथनेऽपि उभयमहिषीवाल्लभ्यमुक्तप्रायं वेदितव्यम् । श्रीभूदेव्योरिव मय्यपि समुत्सुक इत्युक्तं भवति । एतादृशोऽयं भगवान् परिसरवर्तनं समीपवर्तनं च विसृज्याधुना श्रीभूम्यां सहेव मया सहाप्यवतिष्ठते; न केवलमेतावदेव; [कतिपयविधानुभवान् प्रदिश्य न तृप्यति, अपि तु सर्वविधानप्यनुभवाननुगृह्णाति] पुत्रे पितुः कार्यमन्यत्, मातुः कार्यमन्यत्; कलत्रे पत्युः कार्यमन्यत्, अपत्यानां कार्यमन्यत्, इत्येवंरीत्या व्यक्तिभेदेन कार्यभेदव्यवस्था हि लोके दृश्यते; नैवं काचिदस्ति व्यवस्था भगवतो मयि; सर्वविधानुभवजरसप्रवाहप्रदाता भवतीत्युक्तं भवति ॥ * यदा यदा हि कौसल्या दासीवच्च सखीव च । भार्यावद्भगिनीवच्च मातृवच्चोपतिष्ठति ॥ * इति श्रीरामायणश्लोकरत्नमिह भाव्यम् ॥ .... (३)

—* तीसरी गाथा—अरुरुलिलाय पेरुंचीर् *—

(हिंदी.) कभी कम न होनेवाले कल्याणगुणों से विभूषित, नित्यसूरियों के नाथ, नीलमणि के समान विलक्षण दिव्यमंगल विग्रह वाले, कमलनयन, पक्षिराज गरुडजी पर सवार होकर आनंदित होनेवाले, भूदेवी के नाथ, और मेरे साथ विराजमान भगवान हमें कतिपय प्रकार के भोगमात्र देकर तृप्त नहीं होंगे, किंतु सकलविध भोगों का भी परिपूर्ण प्रदान करेंगे ॥

इस गाथा में यों कहा जाता है कि भगवान आळ्वार के और समीप पधार कर उनके साथ एकासनासीन हो गये। उनका पहला विशेषण हैं [कम न होनेवाले कल्याणगुणों से विभूषित।] कहने का यह तात्पर्य हैं कि भगवद्गुणों में यह न्यूनता नहीं रहती, कि किसी के विषय में प्रकाशित होना और दूसरे किसी के विषय में प्रकाशित न होना; अर्थात् भगवान के कृपादि गुण विना संकोच सबके विषय में प्रकाशित होते हैं। इस पर यह शंका हो सकती है कि यदि भगवान सब से कृपा ही करनेवाले हो, तो आप दुष्टों को कैसे दंड देते हैं: यथा गीताजी में स्वयं उन्होंने ही आज्ञा की, "तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥" इत्यादि। जैसे अपराध करने वाले अपने पुत्र को कदाचित् दंड देने से पिता के प्रेम में कमी न मानी जायगी, ठीक इसी प्रकार पापी का पाप मिटाने के लिए और उसे सन्मार्ग में लाने के लिए उसे शिक्षा देनेवाले भगवान को भी उस अपराधी पर कृपालु ही समझना चाहिए। [नित्यसूरियों के नाथ] होते हुए भी भगवान अब अपने को मेरे संश्लेष से सनाथ मान रहे हैं; ओह! यह कैसा गुण है! अपने आस्थान-मंटप में सबका स्वामी होकर, अधिकार चलाता हुआ विराजनेवाला राजाधिराज भी अंतःपुर में अपनी प्रियमहिषी से वही व्यवहार नहीं करता, परंतु स्वयं उसका आज्ञाधारक बनता है। इसी न्यास से नित्यसूरिनाथ भगवान भी अब आळ्वार के पराधीन बन गये हैं। [नीलमणि के समान विलक्षण दिव्यमंगलविग्रहवाले] कितने ही लोग "पश्यत्यचक्षुः" (भगवान नेत्रहीन होते हुए ही सब को देखते हैं) इत्यादि उपनिषद्वाक्यों के अनुसार भगवान को इंद्रिय-शून्य, अवयवशून्य, निराकार इत्यादि मानते होंगे। परंतु श्रीपराशरमहर्षिने श्री विष्णुपुराण में कहा कि "भगवान अपनी इच्छा से अपने इष्ट दिव्यमंगलविग्रहों का धारण करते हैं (इच्छागृहीताभिमतोरुदेहः)।" एतदनुसार, परमरसिक वे अब अतिमनोहर दिव्यरूप लेकर मेरे पास पधार गये हैं। [कमलनयन] शब्द से आळ्वार भगवान के उन नेत्रों की प्रशंसा करते हैं जिन्होंने अपने पर पहले पहल कटाक्षपात किया था, और जो हाल में भी ऐसे कर रहे हैं। इनका वैभव शास्त्रों में यों उपवर्णित है—जायमानं हि पुरुषं यं पश्येन्मधुसूदनः। सात्विकस्स तु विज्ञेयस्स वै मोक्षार्थचिन्तकः॥ अर्थात् जन्म लेने के समय जिस मानव पर भगवान का कटाक्ष पडेगा, वही सात्विक और मोक्षमार्ग का चिंतक होगा। [गरुडजी पर सवार होकर] कहने का यह भाव है कि भगवान जैसे "दाससखा" इत्यादि स्तोत्ररत्नोक्त प्रकार गरुडजी से नानाविध सेवा सकारते हुए उनको अनुगृहीत करते हैं, ठीक इसी प्रकार अब आळ्वार को भी अनुगृहीत करना चाह रहे हैं। [भूदेवी के नाथ] कहने का तात्पर्य है—श्रीदेवी व भूदेवी के सहित विराजमान।

अर्थात् इन दो देवियों में से एकका नाम लेने पर भी दोनों को समझना चाहिए। जैसे उनको कदाचित् शंखधारी कहें, अथवा कदाचित् चक्रधारी कहें, तो भी दोनों समय हम भगवान को शंखचक्रधारी ही समझते हैं; इसी प्रकार यहां भी समझना चाहिए। तथाच आळ्वार यों कहना चाहते हैं कि भगवान श्रीदेवी व भूदेवी की भांति मेरे साथ भी एकासन पर विराजमान हैं। इतना ही नहीं, किंतु [कतिपय-प्रकार के भोगमात्र देकर तृप्त नहीं होंगे] इत्यादि। यह भाव है—पुत्र के प्रति माता का कार्य एक प्रकार का है; पिता का तो दूसरे प्रकारका होता है। एवं स्त्रीके विषय में पति के कार्य से पुत्रों का कार्य विलक्षण होता है। इस प्रकार लोकव्यवहार में एकैक व्यक्ति का भी काम अलग अलग होता है; एक ही व्यक्ति का दो प्रकार के काम करना असंभव है। परंतु भगवान के बारे में यह नियम लगता नहीं। "माता पिता भ्राता निवासश्शरणं सुहृत् गति र्नारायणः" इत्याद्युपनिषद के अनुसार सकलविधबांधव होनेवाले भगवान, अब आळ्वार को एक दो प्रकारों का अनुभवरस मात्र देने का विचार नहीं कर रहे हैं, वरन् समस्तविध अनुभव देकर परिपूर्ण आनंद का प्रदान करने तैयार विराज रहे हैं। जैसे कि दशरथ चक्रवर्ती कौसल्या देवी की प्रशंसा करते हैं—यदायदा हि कौसल्या दासीवच्च सखीव च। भार्यावद्भगिनीवच्च मातृ-वच्चोपतिष्ठति॥ यह भाव है—कौसल्यादेवी नौकरानी, सखी, पत्नी, बहन और माता की भांति दशरथ की सेवा करती थी; अर्थात् सभी प्रकारों की सेवा करती थी॥ .... (३)

(गाथा.) उडनमर् कादल् महळिर् तिरुमहळ् मण्महळ् आयर्
मडमहळ् * एन्ड्रिवर्. मूवर् आळु मुलहमुम् मून्ड्रे *
उडनवै योक्क विळुङ्गि आलिलै चेर्न्दवन् एम्मान् *
कडल्मलि माय प्पेरुमान् कण्णन् एन्नोक्कलैयाने ॥ ४ ॥

(सं.) श्रीदेवी भूदेवी नीलादेवी च नित्ययुक्ताः प्राणवल्लभास्तिस्रः। स्वकीयाधिराज्यगोचर-भूतं च त्रैलोक्यमेतदखिलम्। तथा चैवंविधप्रभावशाली, त्रिलोकीमपि युगपदास्वाद्य वटदल-मधिशयितोऽस्मत्स्वामी समुद्राभ्यधिकाद्भुतचेष्टितकारी च कृष्णो मम कटितटमध्यास्ते॥

भगवान् व्रजवासावसरे यशोदाया गोपीनां च कटितटमधिष्ठाय तासां यादृशानन्नुभवानदिशत् तादृशान्ममापि दित्सुर्मम कटितटीमध्यास्तेत्युच्यतेऽत्र। श्रीगुणरत्नकोशे श्रीपराशरभट्टार्याः प्राहुः—* देवि! त्वामनु नीलया सह मही, देव्यस्सहस्रं तथा यामित्त्वं स्तनबाहुदृष्टिभिरिव स्वामिः प्रियं श्लाघसे * इति। एतेन सहस्रसंख्यासु वल्लभासु मध्ये श्रीभूनीलानां प्राधान्यं प्रतिपद्येत। "श्रीभूनीलादेव्यो नित्ययुक्ताः प्राणवल्ल-भास्तिस्रः" इति कथनेन परस्सहस्रदेवीवैशिष्ट्यमुक्तप्रायम्। एतासां दिव्यमहिषीणा मुच्चावचकैङ्कर्येषुत्स्विन्वयः। भगवान् राघवो यदा समुद्रशरणागतिच्छलेन पयोधिपुलिनमधिशिश्ये, तदात्वे उपधानीकृतं तदीयबाहुमुपवर्णयन् वाल्मीकिर्मुनिवरः * भुजैः परमनारीणामभिमृष्टमनेकधा * इत्याचचक्षे। एकदारव्रतस्य राघवस्य बाहुः कथं परमनारीणां भुजैरनेकधाऽभिमृष्टो भवितुमर्हतीत्याशङ्कां व्याख्यातारः प्रशमयन्ति श्रीमति वैकुण्ठे तथात्वोपपादनेन। एवं च शठकोपमुनीन्द्रः स्वसन्निहितस्य भगवतो विभूतिविस्तारप्रतिपादनतत्परायामस्यां गाथायाम् देवीवर्ग-

वैशिष्ट्यात्मकं परत्वं प्रथमतः प्रतिपादयति। श्रीभूनीलासनाथ इति विशेषणतया निर्देशं विहाय '....प्राणवल्लभास्तिस्रः' इति, स्वकीयं राज्यं च त्रैलोक्यमेतदखिलम् इति च वाक्यमेदमाकलय्य यत्कथितमिह तदिद मनुभवरासिल्यव्यञ्जकम्। 'अस्य भूयस्यो देव्यस्सन्ति, परिपाल्यं वस्तु च त्रैलोक्यम्' इति कथनमनुभवप्रणाली खलु। एतादृशो हि भगवान् देवीरपि विसृज्य मामुपभोक्तुमुपाययौ; त्रैलोक्येऽपि मामेकमेव परिपाल्यमभिमन्यते हन्त! इति विस्मयस्तिमित इव भवति मुनिः। कृष्णावतारे 'नप्पिन्नैप्पिराट्टि' इति या खलु गोपी कृष्णस्य प्राणवल्लभाऽऽसीत्, या च दिव्यसूरिभिरसकृत् संकीर्त्यते सा नीलादेव्येवेति समुद्बोधयितुमत्र मूलगाथायाम् नीलेति नामविन्यासमकृत्वा 'गोपाङ्गना' [आयर्मडमहळ्] इत्यनेनैव नाम्ना सा निर्दिष्टा। एवमत्रैकत्र केवलं न; यत्र यत्र (दिव्यप्रबन्धेषु) तिस्रो देव्यो निर्देष्टव्या इष्यन्ते तत्र सर्वत्र श्रीभूशब्दाभ्यां सह नप्पिन्नैप्पिराट्टिबोधक-गोपाङ्गनाशब्द एव संयोज्यते। अत एवाचार्यैः * नीलातुङ्गस्तनगिरितटीसुप्तमित्यादिषु 'नप्पिन्न' विवक्षया नीलाशब्दः प्रायोजीति प्रतिपत्तव्यम्। एवमसंदिग्धेन विवरणेन "नप्पिन्नैप्पिराट्टीति द्राविडगिरा व्यपदिष्टां गोपीं केन प्रमाणेन गुरुचरणा नीलानाम्ना व्यपदिशन्ति" इति बहूनामाशङ्का परिहृता भवतीति बोध्यम्। दिव्यसूरि-सूक्तिरेवात्र प्रमाणमित्युक्तं भवति॥

[त्रिलोकीमपि युगपदास्वाद्य] इत्यादिकमपि भगवता स्वस्मिन् प्रदर्श्यमानस्य सौशील्यस्य प्रतिकोटिभूतगुणकथनमिति ध्येयम्। [समुद्राभ्यधिकाद्भुतचेष्टितकारी] मूलगाथासन्निवेशस्तावत् 'समुद्रशायी, अद्भुतचेष्टितकारी' इत्यप्यनुवादं सहते। आचार्यास्तूभयथाऽपि व्याचक्षते। आश्चर्यचेष्टितकारित्वं कृष्णे अवतारकालिकं नात्र विवक्षितम्; अपितु प्रकृते मुनिवरेण स्वेनानुभूयमानमेवोच्यत इत्यप्यनुगृह्णन्त्याचार्याः। श्रीशठकोप मुनीन्द्रसविधे भगवता कृष्णेन प्रदर्श्यमान माश्चर्यचेष्टितं किं नामेति पृष्टे कोन्वत्र प्रतिब्रूताम्? मुमुक्षुप्पडिरहस्ये मूलमन्त्रस्य नमःपदार्थ विवरणावसरे "भोगदशायां सर्वेश्वरे चेतनस्य स्वरूपं नाशयितुमुद्युक्ते सति सर्वात्मना तत्प्रतिषेध एव पारतन्त्र्यपरमकाष्ठे"ति यदन्वग्राहि लोकाचार्यैस्तदेवात्र स्मृतिपथं नेतव्यम्। ज्ञानिनामग्रेसरं चेतनं मुञ्जानः परमरसिकस्सर्वेश्वरः किंकिं कुर्वीतेति को नु वेद। मुनिवरस्य कटितटे निषण्णस्सन् स किंकि-मद्भुतमाततानेति स्वयं तावेव प्रष्टव्यौ॥ .... (४)

—* चौथी गाथा—उडनमर् कादल् महळिर् *—

(हिंदी.) श्रीदेवी भूदेवी और नीलादेवी, ये तीनों इनके साथ ही विराजमान प्रियपत्नियाँ हैं; इनके शासन के अधीन लोक भी तीन होते हैं; तथाच ऐसे वैभवोपेत, और तीनों लोकों को एक साथ निगलकर वटपत्र पर शयन करनेवाले हमारे नाथ, समुद्र से भी अधिक अद्भुत चेष्टित करनेवाले श्रीकृष्ण मेरे बगल पर विराजमान हैं॥

इस गाथा में आळ्वार यों कहते हैं कि श्रीकृष्ण मेरे बगल पर विराज कर मुझे ऐसा भोग देना चाह रहे हैं जैसा उन्होंने व्रज में यशोदाजी और गोपियों को उनके बगल पर बैठकर दिया था। श्रीगुणरत्न कोश में श्री पराशरभट्टार्य स्वामीजी कहते हैं "देवि त्वामनु नीलया सह मही देव्यस्सहस्रं तथा....।" (अर्थात् हे श्रीदेवि! भूदेवी नीला देवी इत्यादि हजारों पटरानियाँ श्री वैकुंठलोक में विराज रही हैं जो सभी आपके अंगोपांग के सदृश रहती हैं।) इससे विदित होता है कि इन असंख्य महिषियों में श्री-भू-नीला

देवियाँ प्रधान हैं। अतः हाल में इनके नाम लेना सभी देवियों की ओर संकेत करना है। भगवान की नानाविध सेवा करना इनका काम है। भगवान ने जब श्रीरामचंद्रजी के रूपमें अवतार कर लंका पहुंचने का मार्ग माँगते हुए समुद्र की शरणागति की, तब वे अपने भुज को ही तकिया बनाकर तटपर सो गये न? उस भुज का वर्णन करनेवाले वाल्मीकीजी कहते हैं "भुजैः परमनारीणाममिमृष्टमनेकधा" (अर्थात् परमनारियों के भुजों से बहुशः दबाया गया था श्रीरामचंद्रजी का वह भुज)। यहां पर यह शंका हुई कि एकदारव्रतत्वेन प्रसिद्ध श्री रामचंद्र भगवान के भुज ने जब एकमात्र सीतादेवी को छोडकर दूसरी किसी स्त्रीका हस्तस्पर्श नहीं पाया था, तब उसे कैसे परमनारियों के हाथों दबाया गया कहने में आया? अभिज्ञ-व्याख्याकार इसका यह समाधान देते हैं कि "यहां पर वाल्मीकीजी परमनारी शब्द से श्रीभूनीलादेवियों की ओर संकेत कर रहे हैं, जो श्रीरामावतार में नहीं, किंतु परमपद में हमेशा भगवान के हाथपग दबाती रहती हैं। तथाच यह विशेषण श्री रामचंद्रजी के नारायणत्व का सूचक है।" तथाच भगवान की विभूतियों का वर्णन करनेवाली इस गाथा में आळ्वार प्रथमतः दिव्यमहिषियों का कीर्तन करते हुए अर्थात् भगवान के परत्व की सूचना भी कर रहे हैं। इस पर यदि पूछा जाय, कि "यदि भगवान की विभूति का सविस्तर वर्णन करना ही आळ्वार का उद्देश हो, तो वे एक ही वाक्य में सब को मिलाकर क्यों नहीं कह देते कि भगवान तीन देवियों व तीन लोकों के नाथ हैं?" इसका प्रत्युत्तर यही है कि ऐसा कहना अरसिक-वचन होगा। देवियों का काम अलग है और लोकों का अलग। अतः "इनके अनंत देवियाँ हैं और परिपालनीय लोक भी तीन हैं" कहना ही उचिततर है। अत एव 'श्रीभूनीलानाथ' कहने के बदले में, "श्रीभूनीलादेवियाँ इनकी प्रियपत्नियाँ हैं" कहा गया। अब आळ्वार आश्चर्य के साथ यों कह रहे हैं कि हाल में भगवान इन प्रियमहिषियों की भी उपेक्षा करके मेरा अनुभव, और तीनों लोक भूलकर मुझ एकका परिपालन करना चाहते हैं। मूल गाथा मे 'नीला' नाम नहीं कहा गया, किंतु उसके स्थान (आयर्मकळ्) अथवा गोपांगना कहा गया है। गोपांगना तो श्रीकृष्णावतार में व्रज में भगवान की प्रियपत्नी "नप्पिन्नैप्पिराट्टी" नामवाली गोपी हैं, जिनका वर्णन दिव्यप्रबंधों में वारंवार किया जाता है। यह देवी नीलादेवी का अवतार मानी जाती हैं। यह अर्थ मन में रखकर सभी आळ्वार तीनों देवियों के नाम लेने के समय नीलादेवी को 'गोपांगना' ही कहते हैं। अत एव तिरुप्पावै के तनियन् पद्य में नप्पिन्नैदेवी का नाम 'नीला' बताया गया—"नीलातुङ्गस्तनगिरितटी" इत्यादि। इससे यह शंका भी निरस्त की जाती है कि "कौन-से प्रमाण के आधार पर उक्त पद्य में श्रीभट्टर स्वामीजी ने नप्पिन्नै प्पिराट्टी को 'नीला' कहा?" इसका यह समाधान कहा गया कि आळ्वारों के दिव्यप्रबंधों में नीलादेवी कहने की जगह गोपांगना करके नप्पिन्नै का ही नाम लिया गया है; अतः आळ्वारों के अभिप्राय से नप्पिन्नै और नीलादेवी, ये दोनों एक ही हैं।

[तीनों लोकों को एक साथ निगल कर] इत्यादि भी भगवान के परत्व का ही वर्णन है। तथाच इतने प्रकारों से भगवान के परत्व का वर्णन करनेवाले आळ्वार का यह भाव है कि भगवान अपना यह परत्व भूलकर अब मुझसे मिल रहे हैं। [समुद्र से भी अधिक अद्भुत चेष्टित करनेवाले।] मूल गाथा का यह भी अर्थ आचार्याभिमत है कि भगवान समुद्र पर शयन करते हैं और अद्भुत चेष्टाकारी होते हैं।

आचार्यों का यह भी अभिप्राय है कि यहां पर आळ्वार अद्भुतचेष्टा शब्द से भगवान के श्री कृष्णावतार समय की नहीं, बल्कि हाल में अपने को प्रदर्शित चेष्टाओं की ओर संकेत कर रहे हैं। यह मत पूछिए कि भगवान अब ऐसी कौन-सी चेष्टा दिखा रहे हैं। अपने अत्यर्थप्रिय ज्ञानी को प्राप्त कर, उनका अनुभव करनेवाले परमरसिक भगवान क्या करते हैं, और क्या नहीं करते, इस विषय पर हम क्या कह सकते हैं? यह तो उन दोनों को ही विदित होगा। मुमुक्षुप्पडिग्रंथ में, श्रीमंत्र के मध्यम पद 'नमः' का अर्थविवरण करते हुए श्रीलोकाचार्य स्वामीजी ने भी इतना ही कहा कि, "भोगदशा में (अर्थात् जब कि भगवान मुक्त पुरुष का अनुभव करते हैं), जब भगवान इस चेतन का स्वरूपनाश करने लगेंगे, तब किसी प्रकार से उसे नहीं रोकना, यही सर्वात्मना पारतंत्र्य का काम है॥" .... (४)

(गाथा.) ओक्कलै वैंचु मुलैप्पा लुण्णेन्नु तन्दिड वाङ्गि *
शेक्कम् शेहव ळावव्याल् उयिर् शेह वुण्ड पेरुमान् *
नक्क पिरानोडु अयनु मिन्दिरनुम् मुदलाह *
ओक्कवुम् तोत्तिय वीशन् माय नेञ्जे ञ्जि लुळाने॥ ५॥

(सं.) कटितटे निपात्य 'स्तन्यं पिब' त्युक्त्वा स्तन्यं पाययन्त्याः पूतनाया मनोरथं विपर्यस्तं विरचय्य स्तन्येन सह तस्याः प्राणानप्यास्वादितवान् प्रभुः, पशुपतिप्रजापतिशचीपतिप्रभृती-नखिलानपि प्रादुर्भावितवा नाश्चर्यगुणचेष्टितवानीशो मम हृदयप्रदेशमधितिष्ठति॥

कटितटादुरस्स्थलीमवजगाहे भगवानित्युच्यतेऽनया गाथया। यद्यपि मूले हृदयस्थ इति वर्तते, तथाऽपि शरीरावयवसंदोहव्यासङ्गकथनप्रकरणेऽस्मिन् वक्षस्स्थलाधिरोहणविवक्षणमेव युक्तं प्रतिपत्तुम्। हृदयस्थलमेव ह्युरस्स्थलम्। गाथाया अस्याः पूर्वार्धे पूतनावधवृत्तान्तोऽनुसन्धीयते। मथुरायां कंसप्रक्लृप्तकारागृहेऽवतीर्णो भगवान् वासुदेवस्तदानीमेव निशीथे वसुदेवेन व्रजं नीत इति ज्ञातवान् कंसः * मनीषितं कैतवमानुषस्य श्रुत्वा भयक्रोधपरिप्लुतात्मा। कंसश्चिरं प्राग्भवकालनेमिश्चिन्तार्णवे मग्न इवावतस्थे॥ * इत्युक्तरीत्या इतिकर्तव्यतामुग्धश्चिरं स्थित्वा, अथ * स दुर्दमानासुरसत्वभेदान नेता समाहूय नृशंसचेताः। प्रस्थापयामास परैरधृष्यं नन्दास्पदं नाथविहारगुप्तम्॥ * इत्युक्तरीत्या व्रजे वर्धमानस्य वासुदेवशिशोर्जिघांसया भूयस आसुरप्रकृतीन् प्राहिणोद्गोकुलं प्रति। तेष्वन्यतमो वनितावर्ष्म परिगृह्य * कदाचिदन्तर्हितपूतनात्मा कंसप्रयुक्ता किल काऽपि माया। निद्रापराधीनजने निशीथे व्रजं यशोदाकृतिराविवेश॥ * इत्युक्तरीत्या कृष्णशिशौ परमप्रेमशालिन्या जनन्या यशोदाया भावनया "अयि वत्सकिशोर! काले स्तन्यमपीत्वैव निद्रासि हन्त! उत्तिष्ठोत्तिष्ठ स्तन्यं पिबतात्" इति परमप्रीत्यभिनयेन प्रजल्पन्ती शिशुं डोलिकातस्समुत्थाप्य निजकटितटे निपात्य विषदिग्धं स्तनं तद्वदने निदधे स्वकीया जिघांसा सद्यः फलेग्रहिर्भवित्रीति प्रत्याशया। अथ किं वृत्तम्? * स्तन्येन कृष्णस्सह पूतनायाः प्राणान्पपौ लुप्तपुनर्भवायाः * इत्युक्तरीत्या स्तन्यं तत्प्राणांश्च पपौ कृष्णः। कृष्णसन्निधानबलात् तस्याः पुनर्भवश्च लुप्यते स्म। न केवलमेतावदेव; * यदद्भुतं भावयतां जनानां स्तनंधयत्वं न पुनर्बभूव * इत्युक्तरीत्या पूतना-स्तन्यपान वार्तामिमा मनुसंदधानानां जनानामपि * जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्वतः। त्यक्त्वा देहं

पुनर्जन्म नैति * इति गीतोक्तरीत्या पुनर्जन्म लुप्यते। कृष्ण इदानीं मुनिवरस्य कटितटे निषण्णस्सन् 'भो मुनिसार्वभौम! पुराऽहं व्रजे कस्याश्चिद्विप्रलम्भविदग्धायाः कटितटे निषद्य यदकार्षं तत्किमु जानाति भवान्?' इत्यनुयुज्य तदवबोधयामासेव; अत एव तदनुसन्धानं प्राप्तं मुनेरिह। अथ पशुपतिप्रजापतीत्यादिना सद्वारकाद्वारकसर्वस्रष्टृत्वरूपः प्रभावातिशयः प्रोच्यते॥ .... (५)

—* पांचवीं गाथा—ओक्कलै वैत्तु मुलैप्पालुण्णेन्नु *—

(हिंदी.) कमर पर अपने को बिठाकर, "यह स्तन्य पी लो" कहती हुई स्तन्य पिलानेवाली पूतना का मनोरथ व्यर्थ बनाते हुए, स्तन्य के साथ उसके प्राण भी पीनेवाले प्रभु, पशुपति प्रजापति शचीपति इत्यादि समस्त देवों की भी सृष्टि करनेवाले, और अत्याश्चर्य गुणचेष्टितवाले स्वामी मेरे हृदयप्रदेश पर विराजमान हैं॥

इस गाथा में यों कहा जा रहा है कि भगवान आळ्वार के कमर से ऊपर चढकर उनके वक्ष पर विराजमान हुए। यद्यपि मूलगाथा में भगवान को आळ्वार अपने 'हृदयस्थ' ही कहते हैं, जिसका साधारण अर्थ यही होगा कि भगवान उनके मन में विराज रहे हैं। परंतु यह प्रकरण के अनुगुण नहीं। इस दशक में आळ्वार भगवान को अपने श्री विग्रह के एकैक अवयव पर ही विराजमान बता रहे हैं। अतः एतदनुगुणतया, हाल में भी हृदय शब्द से हृदय का आश्रय वक्ष ही समझना उचित होगा। इस गाथा के प्रारंभ में पूतनावधवृत्तांत का वर्णन किया जाता है। मथुरापुरी में कंस के कारागृह में रातको अवतीर्ण श्री कृष्ण को उनकी आज्ञा के अनुसार वसुदेव जी ने तुरंत व्रज पहुंचा दिया। यह रहस्य जानकर कंस बहुत चिंताक्रांत हुआ। फिर बहुत सोच कर उसने श्री कृष्ण का संहार करने के लिए अनेक दुष्ट असुरों को व्रज भेजा। उनमें से एक, पूतना, यशोदाजी के वेष से रात को व्रज आयी और पालने में सोते हुए श्री कृष्ण शिशु को उठाकर, गोद में बिठा कर यों कहती हुई कि, "अरे लाल! दूध पिये बिना ही तू सो गया; अभी भूख लगती होगी; उठ, यह स्तन्य पीले" उसने उसके मुँह में विष लगाया हुआ अपना स्तन रखा। उसकी आशा थी कि यह स्तन्य पीकर श्री कृष्ण मर जायगा। परंतु श्रीकृष्णने स्तन्य के साथ उसके प्राण भी पी लिये। फलतः वह मर गई और श्री कृष्ण के सांनिध्य के बल से उत्तम लोक पहुंच गयी। इतना ही नहीं; इस वृत्तांत का अनुसंधान करनेवाले भक्तलोग भी पुनरावृत्तिशून्य उत्तमलोक पहुंचेंगे। "जन्म कर्म च मे दिव्यम्" इत्यादि गीता पद्य में भी यह अर्थ बताया गया। इस पद्य का यह अर्थ है कि भगवान के जन्म व चेष्टितों का अनुसंधान करनेवाले भक्त शरीर छोडने के बाद उन्हींको प्राप्त करते हैं; फिर इस संसार में जन्म नहीं लेते। मालूम होता है कि श्री कृष्ण, आळ्वार के कमरपर बैठ कर उनसे बोले कि, "हे मुनिवर! क्या आप जानते हैं कि पूर्वकाल में मैं व्रज में ठगनेवाली पूतना के कमर पर बैठ कर क्या किया?" अतः आळ्वार उस वृत्तांत का वर्णन कर रहे हैं। [पशुपति प्रजापति] इत्यादि से भगवान का अद्वारक व सद्वारक स्रष्टृत्वरूप वैभव बताया जाता है॥.... .... (५)

(गाथा.) माय नेञ्जेञ्जि लुव्ळान् मत्तुम् यवर्क्कुं म:दे *
कायमुम् जीवनुम् ताने कालु मेरियु मवने *
शेय नणियन् यवर्क्कुम् चिन्तैक्कुम् गोचर मल्लन् *
तूयन् तुयक्कन् मयक्कन् एन्नुडै चोळिणैयाने ॥ ६ ॥

(सं.) अद्भुतशीलस्स भगवान् मम हृदयमधितिष्ठति। किमेवमन्यस्य कस्यापि जनस्य करोत्यनुग्रहम्। शरीरे तिष्ठन् आत्मनि तिष्ठन् अनिलानलादिभूतात्मकश्च सन् केषाञ्चिद्दवीयान् केषाञ्चिन्नेदीयान् महाज्ञानिनामपि चिन्तापथवैदेशिकः परमपावनः केषांचित्संशयविपर्ययात्मकविषमज्ञानजनकश्च स एष मम दोर्द्वन्द्वमध्यास्ते।

सर्वान्तरात्मा भगवान् मम भुजद्वन्द्व मवलम्ब्यात्रतिष्ठत इत्युच्यतेऽत्र। भगवान् स्ववक्षस्स्थलमाशिश्रियदित्यधस्तादुक्तं पुनरनुभापमाणः 'मदितरजनदुर्लभं हि मम सुलभमासीत्' इति मध्ये महान्तं विस्मयमाविष्करोति मुनिवरः। [किमेवमन्यस्य कस्यापि जनस्य करोत्यनुग्रहम्] इत्येतन्मध्यमदीपन्यायेन पूर्वत्रोत्तरत्र चान्वेति। भगवान् स्ववक्षस्स्थलं समाश्रित इत्येतदपि मुनेः हर्षप्रकर्षाय भवति, स्वभुजद्वन्द्वमाश्रित इत्येतदपि तथा। वक्षो भुजश्चेत्यत्रयनद्वितयं दिव्यमहिष्याः खलु स्वम्। * लक्ष्मीचरणलाक्षाङ्कसाक्षि श्रीवत्सवक्षसे * स्वस्ति श्रीस्तनकस्तूरीमकरीमुद्रितोरसः * वेदान्तास्तत्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति * इत्यादिपरश्शतप्रमाणैः श्रियः श्रीचरणस्य चावसथभूतं तस्य वक्ष इति हि प्रख्यापितम्; तादृशप्रभावशालि स इदानीं मम वक्षस्स्थलमाश्रित्य लब्धसत्ताकमात्मानं मन्यत इति प्रथमो विस्मयः। अथच * आश्लेषे वरद! भुजास्तवेन्दिराया गोपीनामभिमतरासबन्धने वा। बन्धे वा मुदमधिकां यशोदयाऽऽहो संप्राप्तास्तव नवनीतमोषदोषात्? * इति श्रीवत्साङ्कमिश्रकृतप्रश्नरीत्या श्रीमहालक्ष्म्या आश्लेषेण, रासोत्सवकालिकगोपीजनाश्लेषेण, नवनीतस्तेयापराधनिमित्तं यशोदाकृतदामबन्धनेन च मोदितुमर्हावदसीयौ भुजौ मदीयभुजाश्लेषकांक्षिणावभूतामिति द्वितीयो विस्मयः। कालिदासो विक्रमोर्वशीये नाटके पुरूरवस उर्वश्याश्च रथयात्रां निबध्नन् रथसंक्षोभकाले ऊर्वश्या अंसः पुरूरवसोंसश्च मिथो न्यपीड्येतामिति कथयन् * यदयं रथसंक्षोभादंसेनांसो निपीडितः। एकः कृती मदङ्गेषु शेषमङ्गं भुवो भरः॥ * इति पुरूरवाः प्राहेति निबबन्ध। परमहेयः प्राकृतानन्द एतादृशश्चेदथ किमुच्यतां भगवद्दिव्यमङ्गलविग्रहैकान्तश्लेषसमुत्सुकस्य मुनिवरस्यानन्दमविकल्प। भरताक्रूरमारुतीनां परिष्वङ्गेणेव मत्परिष्वङ्गतोऽपि प्रमुमुदे भगवान् वतेति विस्मयते मुनिवरः। विस्मयनिदानभूतो हर्षप्रकर्ष एव "किमेवमन्यस्य कस्यापि जनस्य करोत्यनुग्रहम्" इति वाचं व्याहारयतिस्म। ननु एतादृशानुग्रहभागिनो भरताक्रूरमारुतिप्रभृतयस्सन्त्येव खलु; तर्हि कथमनन्यसुलभत्वोक्तिरिति नाशङ्कनीयम्। केनाप्येतादृशोऽनुभवो न प्राप्त इति सुदृढं ब्रूमः। [शरीरे तिष्ठन् आत्मनि तिष्ठन्] इत्यादिकं सुबालोपनिषत्प्रक्रियया प्रोक्तमिति ध्येयम्। [केषाञ्चिद्दवीयान् केषाञ्चिन्नेदीयान्] अभक्तानां भक्तानामिति शेषः; यदाहुः कूरेशमिश्राः * समाहितैस्साधु सनन्दनादिभिस्सुदुर्लभं, भक्तजनैरदुर्लभम् * इति। अथ पृच्छयेत सनन्दनादयः किमभक्ता इति। स्वोबमेन लिप्सन्ते स्म त इति हन्तोस्तथा नाम वक्तव्यमासीत्। महाज्ञानिनामपि चिन्तापथवैदेशिक इत्येतत् अप्रमेयविभूतिविस्तरशालित्व कथनपर्यायः। [केषाञ्चित्संशयविपर्ययात्मकविषमज्ञानप्रदः] इत्यत्र श्री पराशरभट्टार्यकालिकमपीतिहासविशेषमुदाहरन्ति टिप्पणीकाराः। स चैवम्।

श्रीमद्भट्टारक प्रवचनगोष्ठ्यां नित्यशः प्रवर्तमानायां सत्याम् शास्त्रज्ञ एकः पण्डितः, सामान्यज्ञानी परमैकान्ती एक इति द्वौ पुरुषौ वीथ्यामुञ्छवृत्तिपरौ नियतमागच्छन्तावास्तां कालभेदेन। उभावपि स्वागमन-सूचकस्तोत्रविशेषोच्चारणकर्तारौ चास्ताम्। भट्टार्यः पण्डितोत्तमस्य स्वभवनसविधोपस्थितिमवगत्य कमपि शिष्य-माज्ञापयेदस्मै तण्डुलभिक्षा प्रदीयतामिति। तथैव दीयमानां भिक्षां स्वीकृत्य स प्रयायात्। अन्यस्सामान्यज्ञानी यदा समायाति तदा स्वप्रवचनं विरमय्य स्वयमुत्थाय तमुपसृत्याभिवाद्य कुशलप्रश्नादिकं च कृत्वा सत्कृत्य प्रत्यावृत्याथ प्रवचनमुपक्रमेत भट्टार्यः। प्रत्यहमेवं प्रवर्तमानमवलोकमानाश्शिष्याः 'पण्डितोत्तमे अनादरणम्, अल्पज्ञे अत्यादरणं च किमेतन्नाम!' इति विह्वलचेतसो भूत्वा कदाचिद्भट्टार्यमेवात्र हेतुमपृच्छन्। आचार्यवर्यस्तु तदानीं किमप्यनुक्त्वा, परेद्यवि समागतमुञ्छवृत्तिपरं पण्डितप्रवरं स्वसविधमानाय्य योगक्षेमादिविचारं च विधाय बद्धाञ्जलि-पुटस्सन्ननुयुयुजे 'तत्त्वहितपुरुषार्थेषु तत्रभवतः प्रतिपत्तिः कीदृशी?' इति। सद्य एव स प्रत्युवाच, "भगवन्! शास्त्राणि तावन्नैकविधानि; क्वचित् * हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् * इति हिरण्यगर्भस्य प्रजापतेः परत्वं श्रूयते; अन्यत्र तु * न सन्न चासच्छिव एव केवलः * एक एव रुद्रो न द्वितीयाय तस्थे * इति रुद्रस्य परत्वं श्रूयते। अपरत्र तु * न किरिन्द्र! त्वदुत्तरः * इतीन्द्रस्य परत्वं श्रूयते। * एको ह वै नारायण आसीदित्येवंविधाऽपि श्रुतिरस्ति नाम। एवमेवमनिर्णयेन कथयन्तीं श्रुतिमवलम्ब्य किं वयं तत्त्वं निर्णेतुं प्रभवामः? हिते पुरुषार्थे चैवमेव हि" इति कथयन् स्वकीयामनिष्कृष्टज्ञानतां प्राचीकशत्। पुनः पप्रच्छ भट्टार्यः 'महाविद्वांसो भवन्तः किमहो स्वपाण्डित्यबलेन श्रुतीनां समन्वयं संपाद्य कमपि निर्णयं कर्तुं न प्रभवन्ति?' इति। अथ स प्रत्यब्रूत—'तेते विद्वांसः स्वस्वाभिनिवेशानुरूपं कमपि कमपि निर्णयं कुर्वन्त्येव किल; स पन्था मह्यं न रोचते' इति। अथ गम्यतामिति तं विससर्ज भट्टार्यः। प्रत्यहं लभ्यमानाऽपि भिक्षा तस्मिन्दिने तेन न लब्धा हन्त! अवनतमुख एव स उत्थाय प्रतिनिववृते। अथ कतिपयघटिकातः परं स आजगाम भिक्षार्थम् यः खल्वल्पज्ञः सत्कारानर्हश्चेति शिष्यैर्भाव्यमान आसीत्। यथायथं तमुपसृत्य भट्टार्यः अन्तरानाय्य सिंहासने निषाद्य "स्वामिन्! यद्यप्यत्राहं प्रवचनं कुर्वन्नस्मि, तथाऽपि तत्त्वहितपुरुषार्थेषु निष्कर्ष-विधुरा यद्वा तद्वा कथयन्तः कालं क्षिपाम; निष्कर्षो भवद्भिरनुग्राह्य इति प्रार्थये" इति सविनयं व्यजिज्ञपत्। एतच्छ्रवणमात्रेण स महान् बाष्पपर्याकुलमुखस्सन् 'अल्पीयानहम् इतरवीथीषु भैक्ष्यं विहाय अस्यामेकस्यामेव वीथ्यां भैक्ष्यपरो वर्ते; शास्त्रार्थेषु सर्वथा निष्कृष्टनिर्धारणशालिनो महान्तो भवादृशा अस्यामेव वीथ्यां विराजन्त इति प्रतिपत्त्या। हन्त! भवन्तोप्येवमनुगृह्णन्ति नाम; भवत्तातपादप्रवचनगोष्ठ्याम् भगवद्रामानुजगोष्ठ्यां च परस्सहस्रकृत्वो हि मया श्रुतम्—श्रीमन्नारायण एक एव परं तत्त्वम्; तच्चरणारविन्दशरणागतिरेकैव हितम्; तत्कैङ्कर्यमेव परमपुरुषार्थ इति। कोऽत्र विपर्यासः? कः पुनरत्र संदेहः? भवन्तोऽप्येवमनुयुञ्जते स्मेति हा बत! मम विस्मयो विषादश्च वोभवीति' इत्याम्रेडयन् नैव विरराम। तदात्वे भट्टपादाः परमप्रहर्षप्रफुल्लमनसः स्वदीय-श्रीपादतीर्थं निर्बध्य स्वीकृत्य पीताम्बरहिरण्यादिप्रदानेन च परितोष्य गम्यतामिति विसृज्य, अथ शिष्याणां सकाशेऽनुजगृहुः—कश्चिदवगतो युष्माभिरुभयोः प्रतिपत्तिविशेषः? बह्वधीतमित्येतावता को लाभः? न किमप्य-धीतमित्येतावता का हानिः? इत्यादि। सुतरामनुरूपोऽयमितिहासः प्रकृतस्थले॥ .... (६)

—॥ छठी गाथा—मायनेन्नेञ्जिनुळ्ळान् ॥—

(हिंदी.) अत्याश्चर्यचेष्टित भगवान मेरे वक्ष पर विराजमान हैं। क्या वे दूसरे किसी पर कभी ऐसा अनुग्रह करते हैं? समस्त शरीरों व चेतनों में रहनेवाले, तथा पवन अनल इत्यादि पंच भूतरूपी, किन्हींसे दूर और दूसरे किन्हींके समीप रहनेवाले, महान ज्ञानियों की चिंता के भी परे रहनेवाले, परमपावन, और किन्हींको संशय व विपर्यय रूप ज्ञान देनेवाले भगवान अब मेरे दोनों भुजों पर विराजमान हैं॥

इस गाथा में यों कहा जाता है कि सर्वान्तरात्मा भगवान आळ्वार के भुजों का अवलंबन कर विराज रहे हैं। अत्यंत आनंद व आश्चर्य के साथ पूर्वगाथोक्त अर्थ का (अर्थात् भगवान के आळ्वार के वक्षपर विराजने का) अनुवाद करते हुए आळ्वार पूछते हैं कि, "इस संसार मंडल में क्या भगवानने दूसरे किसी पर ऐसा अनुग्रह किया है?" आगे के वाक्य से भी इस वाक्य का संबंध हो सकता है। अर्थात् आळ्वार अपने वक्ष पर भगवान के विराजने के कारण जैसे आनंद पाते हैं, वैसे अपने भुजों पर उनके विराजने से भी आनंद पा रहे हैं। भगवान का वक्ष तथा भुजद्वंद्व दिव्यमहिषियों की मिल्कियत है। श्रीवक्ष पर लक्ष्मीजी नित्यनिवास करती हैं और उस पर उनका पादचिह्न भी विराजता है। अब आळ्वार को इस बातका आश्चर्य है कि ऐसे प्रभाववाले भगवान अब मेरे वक्ष पर विराज कर अपने को कृतकृत्य मान रहे हैं। एवं भगवान के भुजों का वैभव भी अपार है; यथा श्रीकूरेशस्वामीजी ने पूछा, "आश्लेषे वरद भुजास्तवेन्दिरायाः" (श्री वरदराजस्तव ४३) इत्यादि। यह भाव है—"हे भगवन्! आपके बाहुओं को कब अधिक आनंद मिला, क्या लक्ष्मीजी का आलिंगन करने से, अथवा गोपियों का इष्ट रासमंडल बांधने से, अथवा मक्खन चोरी के अपराध में यशोदाजी से बांधे जाने पर?" अब आळ्वार इस बात का भी आश्चर्य पा रहे हैं कि भगवान के ऐसे विलक्षण भुज अब अपने (आळ्वार के) भुजों का आलिंगन करके स्वयं कृतार्थ होना चाह रहे हैं। कालिदास-विरचित विक्रमोर्वशीय नाटक के एक दृश्य में राजा पुरूरव ऊर्वशी के साथ रथ पर बैठकर जब यात्रा कर रहे हैं तब पुरूरव का भुज ऊर्वशी के भुज से वारंवार रगडता था। तब इसे आनंदित होकर पुरूरव ने कहा कि "यदयं रथसंक्षोभादंसेनांसो निपीडितः। एकः कृती मदङ्गेषु शेषमङ्गं भुवो भरः॥ (अर्थात्, रथके हलने के कारण ऊर्वशी के भुजसे घिसाया जानेवाला यह मेरा भुज कृतार्थ हुआ; इस शरीर के दूसरे सभी अंग भूभारमात्र हैं, माने उनका जन्म व्यर्थ है।)" यदि अतिहेय व प्राकृत यह आनंद ही ऐसी प्रशंसा का पात्र हो, तो परमविलक्षण (भगवान के) दिव्यमंगलविग्रह का आलिंगन, उसमें विरात् आशा करनेवाले आळ्वार को कितना आनंद देता होगा? अब आळ्वार यह भी आश्चर्य पा रहे हैं कि ऐसे विलक्षण भुजवाले भगवान भरत-अक्रूर-मारुतियों की भांति मुझसे भी मिलकर सीमातीत आनंद पा रहे हैं। ऐसे विलक्षण आश्चर्य व आनंद के परवशचित्त होकर ही आप कह रहे हैं कि [क्या वे दूसरे किसी पर कभी ऐसा अनुग्रह करते हैं?] यह सुनकर कोई पूछेगा कि "उक्त भरत, अक्रूर व मारुति, इनको भी भगवान का आलिंगन मिला ही था; फिर आळ्वार की कौन-सी विशेषता है?" इसका प्रत्युत्तर यही है कि उनको आळ्वार का जैसा विलक्षण आलिंगन नहीं मिला था। यदि मिला होता,

तो वे भी आळ्वार की भांति परवशचित्त होकर उसकी खूब प्रशंसा करते। परंतु उनकी प्रशंसावाणी कहीं सुनी नहीं जाती। अत: यह स्पष्ट है कि उन्हें ऐसा आनंद नहीं मिला। [शरीरों व चेतनों में रहनेवाले] इत्यादि सुबालोपनिषद् के अनुसार कहा गया है। [किन्हींसे दूर और दूसरे किन्हींके समीप रहने वाले।] भगवान अभक्तों से दूर रहते हैं और भक्तों के समीप। यथा श्री कूरेशस्वामीजी ने कहा— "समाहितैस्साधु सनंदनादिभि स्सुदुर्लभं भक्तजनैरदुर्लभम्।" (वरदराजस्तव १०१) इसका यह भाव है— सनक सनंदनादि योगी भी भगवान को प्राप्त नहीं कर सकते, परंतु भक्तजन अनायास उनको प्राप्त करते हैं। यद्यपि सनकादि भी बडे भक्त हैं। तथापि वे भक्ति से नहीं, परंतु अपने तपोबल से भगवान को पाना चाहते हैं; अत: भगवान उन्हें नहीं मिलते और अभक्तों में उनकी गिनती होती है। [महान ज्ञानियों की चिंता के भी परे रहनेवाले] कहने का तात्पर्य यह है कि भगवान अप्रमेयविभूतियुत हैं। [किन्हींको संशय व विपर्ययरूप ज्ञान देनेवाले।] "मत्तः स्मृतिर्ज्ञान मपोहनं च" इत्यादि में भगवान स्पष्ट बताते हैं कि, "मैं ही सबको स्मरण, ज्ञान व अज्ञान देता हूं।" यहां पर भगवद्विषय के टीकाकार, श्री भट्टर स्वामीजी के समय के एक घटना का वर्णन करते हैं। वह इस प्रकार है—

श्री पराशर भट्टार्य स्वामीजी के यहां प्रतिदिन भगवद्विषयादि का प्रवचन चलता था। उस समय वीथी में भिक्षा माँगनेवाले दो महात्मा (एकके बाद दूसरा) आते थे। उनमें से एक था नानाशास्त्रों का प्रकांड विद्वान और दूसरा साधारण, परंतु परमैकान्ती। दोनों अपने आगमन की सूचना देने के लिए ऊंचे स्वर से कीसी स्तोत्र का पाठ करते आते थे। श्री पराशर भट्टार्य स्वामीजी, अपने मकान के पास विद्वान के आनेकी सूचना पाते ही किसी शिष्य से कह देते कि उसे मुष्टि भर चावल दे दो। पंडित भी वह भिक्षा लेकर चला जाता। फिर दूसरा महात्मा आता। उसके आते ही स्वामीजी अपना प्रवचन रोक कर स्वयं उठकर उससे मिलता और स्वागत, प्रणाम व कुशलप्रश्न पूर्वक उसे भिक्षा देकर, फिर स्वस्थान लौटकर प्रवचन चालू करते। यह काम रोज ऐसा ही चलता। यह देख कर शिष्यों ने विचार किया—"गुरुजी यह क्या कर रहे हैं, विद्वान का तिरस्कार और मूर्ख का सत्कार!" एक दिन किसीने उनसे इसका कारण पूछा भी किया। गुरूजी तब चुप रह गये। दूसरे दिन सवेरे जब वह पंडित भिक्षा माँगने आया, तब उन्होंने उसे अंदर बुलाया ओर स्वागत सत्कार पूर्वक हाथ जोडकर सविनय पूछा कि, "मान्य विद्वद्वर! कृपया बता दीजिए कि तत्वहितपुरुषार्थों के बारे में आपका क्या मत है।" विद्वान ने उत्तर दिया, "भगवन्! मैं क्या कहूं। शास्त्र तो एक प्रकार के नहीं। एकैक शास्त्र एकैक अर्थ बता रहा है। एक वेदवाक्य कहता है कि "हिरण्यगर्भस्समवर्तताग्रे" (अर्थात् प्रलयकाल में हिरण्यगर्भ ही रहा); जिससे चतुर्मुखब्रह्मा परतत्व बताया जाता है। दूसरा वाक्य शिवको परतत्व बताता है—"न सन्न चासच्छिव एव केवल:" (केवल शिव के सिवा दूसरा कोई चेतन या अचेतन नहीं रहा), "एक एव रुद्रो न द्वितीयाय तस्थे" (रुद्र एक ही था, दूसरा कोई नहीं) इत्यादि। तीसरा वाक्य तो इंद्रको ही परतत्व घोषित करता है—"न किरिन्द्र त्वदुत्तर:" (हे इंद्र! तुमसे श्रेष्ठ दूसरा कोई नहीं)। "एको ह वै नारायण आसीत्" इत्यादि, नारायण को परतत्व बतानेवाले वाक्य भी बीच में हैं ही। इस प्रकार, स्पष्टता के बिना जब जो

मन में आया, सो कहनेवाली श्रुति का अध्ययन कर हम कैसे कोई निश्चय पा सकेंगे? हित व पुरुषार्थ के बारे में भी इसी प्रकार, परस्पर विरुद्ध ही वेदवचन मिलते हैं। अतः मैं निश्चित रूप से क्या कहूं? किसी प्रकार का निश्चय हो सकता नहीं।" भट्टर स्वामीजी ने फिर पूछा, कि "यह बात तो ठीक है। परंतु आप विद्वान हैं और अपनी विद्वत्ता से इन श्रुतियों को समरस बनाकर एक निश्चित अर्थ निकाल सकते हैं। अतः हमें यही बतला दीजिए कि आपके अपना अभिप्राय क्या है।" विद्वान बोल डाला कि "हां; वेवे विद्वान अपने अपने अभिनिवेश के अनुगुणतया कोई कोई निश्चय कर डालते हैं; फलतः इतने मतभेद हो गये हैं। परंतु यह मार्ग मुझे पसंद नहीं।" यह सुनकर स्वामीजी ने उन्हें विदा कर दिया। उस दिन उसे रोजकी भिक्षा भी न मिली। खिन्न होकर वह निकल गया। थोडी देर में वह दूसरा महात्मा आया जिसे लोग अल्पज्ञ मानते थे। स्वामीजी ने उसका स्वागत किया, अंदर बुलाकर दिव्य आसन पर बिठाया और सविनय पूछा कि, "स्वामिन्! यद्यपि यहां पर रोज प्रवचन के नाम से कुछ चलता है। परंतु तत्वहितपुरुषार्थों के विषय में हमने कुछ निश्चय नहीं पाया। अतः आप हमें इस विषय का निर्णय सुनाने की कृपा करें।" यह सुनकर उस महात्माने अश्रुपूर्णाक्ष होकर गद्गद कंठ से प्रत्युत्तर दिया कि, "सर्वथा अज्ञ मैं दूसरी वीथियाँ छोडकर इस एक वीथी में भिक्षा ले रहा हूं; क्योंकि यहीं निष्कृष्ट शास्त्रार्थ ज्ञानवाले आप जैसे महान पुरुष विराजमान हैं। परंतु अब आप ऐसा विलक्षण प्रश्न पूछ रहे हैं। मैं क्या कहूं! आपके पिताजी की, तथा श्री रामानुजस्वामीजी की प्रवचनगोष्ठी में मैं ने खूब सुना हूं कि, भगवान श्रीमन्नारायण ही परतत्व हैं, उनके पादारविंद में की जानेवाली शरणागति ही हित है और उनकी सेवा ही परमपुरुषार्थ है। इस विषय में शंका कौन-सी है? परंतु मुझे इसी बात का आश्चर्य व खेद हो रहा है कि आप मुझसे यह पूछ रहे हैं।" और उसने बारंबार इस अंतिम वाक्य का ही रटन किया। यह सुनकर भट्टर स्वामीजी आनंदसागरनिमग्न हुए, और सनिर्बंध उसका श्रीपादतीर्थ लेकर, पीतांबर दक्षिणा आदि से खूब सत्कार कर, विदा देकर तृप्त हो गये। बाद में उन्होंने अपने शिष्यों को देखकर कहा, "तुमने स्पष्ट देख लिया न, कि इन दोनों का निश्चय कैसा है? अनेक शास्त्रों का अध्ययन करने मात्र से क्या लाभ है? और, कुछ भी नहीं पढने से कौन-सी आपत्ति आवेगी? शास्त्र पढना और तत्वनिश्चय पाना ये दोनों अलग अलग चीज हैं" इत्यादि। यह ऐतिह्य प्रकृत स्थल का अत्यंत अनुरूप है॥ .... (६)

(गाथा.) तोळिणै मेलुम् नन्मार्विन् मेलुम् शुडर्मुडि मेलुम् *
ताळिणै.मेलुम् पुनैन्द तण्णन्तुळा युडैयम्मान् *
केळिणै योन्रु मिलादान् किळरुम् शुडरोळि मूर्ति *
नाळणै न्दोन्रु महलान् एन्नुडै नावि नुळाने॥ ७॥

(सं.) भुजयुगले विलक्षणे वक्षसि प्रदीप्ते मकुटे चरणद्वन्द्वे च शिशिररुचिरतुलसीस्रगलङ्करणशाली अनुरूपोपमानरहितः तेजसामूर्जितो राशिरिवावभासमानो वियोगगंधरहितनित्यसंश्लेषशीलश्च भगवान् मम रसनामवजगाहे॥

लोके कामिनीसकाशमागच्छन् कान्तो यथा स्वात्मानं दिव्यालङ्कारालंकृतमाकलय्य पुंसां दृष्टिचित्तापहारी समागच्छति, तथैव मां रञ्जयितुं सर्वाङ्गीणालङ्कारसंभृतस्समागत्य रसनामध्यतिष्ठदित्याह मुनिवरोऽत्र। प्रथमप्रबन्धे तिरुविरुत्ते मुनिवरोऽसौ भूयसीषु गाथासु तुलसी तुलसीत्येव प्रलपति स्मेति स्मरन् भगवान् अस्य परिपूर्णतृप्तये दिव्यतुलसीमालिकाभिरेव स्वकीयमखिलमङ्गमलंकृत्य रसनामाविवेश 'स्वामिन् शठारिमुने! अविरलतुलसीदामसंजातभूमानं मां यावद्रसनाबलं संकीर्तयतु भवान्' इति कथयन्निव। जिह्वाप्रसिंहासनमभ्युपेयुषि भगवति संकीर्तनसारस्यं किमु वक्तव्यम्! तुलसीस्त्रगलङ्क्रियामविकल्प्य एतादृशी गाथा न कुत्रापि द्रष्टुं शक्येति नातिशयोक्तिः। सत्यमेतादृशाद्वितीयगाथावतारणार्थमेव भगवानधुना शब्दसंदर्भाविर्भावभूमिं रसनामध्यास्त। तुलसीमालां प्रथमतो भुजयुगले बिभर्तिस्म—* सुगाढं परिषस्वजे * इत्याद्युक्तरीत्या गाढपरिष्वङ्गोपकरणभूतकरणालञ्चिकीर्षया। अथ तामुरसि बिभर्ति स्म स्वपुरुषकारकृत्यमद्वितीयनप्रमेयं च फलतिस्मेति प्रमोदमाना पद्मा विशेषतः शोभतामिति। अथ तां मौलौ बभार मुनिवरस्यास्य वाग्विशेषैरेव खलु शिखरवानहमजनिषि, ततस्तदलङ्करणमावश्यकमिति। अन्ततश्चरणारविन्दमलञ्चकार—शठकोपमुनिवरस्यास्य नाम्नैव हि मम चरणयोः प्रथा भविन्नी, तदलङ्करणमत्यावश्यकमिति। अथवा, अदसीयोपदेशमहिम्नैव खलु प्रायस्सर्वे जना इमं चरणमाश्रयिष्यन्तीति विश्वासदृढिम्ना तत्रालङ्करणसंविधानम्। रसिकाग्रगण्यानां श्रीपराशरभट्टपादानां निर्वाहस्तु—जगति महावीराः प्रथमतः स्वविजयोपकरणदिव्यहेत्यलङ्करणे समुत्सुका भवन्ति; तथाऽसौ महावीरो निजदिव्यहेतिस्थानभूतं भुजं पुरस्तादलञ्चकार। अथ रासिक्यभूम्ना महिष्यै प्रयच्छन्त्यलङ्करणम्। दशकेऽस्मिन् प्रथमगाथाचरमचरणोक्तरीत्या रसिको रमापतिश्चासौ निजदिव्यमहिषीस्थानमलञ्चकार पश्चात्। महिष्यै दत्वाऽथ स्वयमुपभुङ्क्ते हि; एवं स्वशिखां विभूषयन् स्वयमुपबुभुजे। अन्ततोऽवशिष्टं दासेभ्यः खलु ददति; दासभूतानां निपतनस्थानभूते चरणे विन्यास्थत्—इति।

[अनुरूपोपमानरहितः] "उपमानोपमेयत्वं यदेकस्यैव वस्तुनः। इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः॥" इत्युक्तरीत्या स्वस्य स्वयमेवोपमानभूमिरिति यावत्। सर्वाङ्गीणदिव्यतुलसीस्त्रगलङ्करणजनितशोभाविशेषस्य सर्वथाऽपि सदृशदरिद्रता किमु वक्तव्या। आगन्तुकालङ्करणविरहेऽपि नैसर्गिकी सुषमैव हि पर्याप्तेति द्योतयन्नाह [तेजसामूर्जितो राशिरिवावभासमानः] इति। * महात्मभिर्नामवलोक्यतां नय क्षणेऽपि ते यद्विरहोऽतिदुस्सहः * इति स्तोत्ररत्नानुगृहीतरीत्या महात्मनां क्षणमात्रविश्लेषमपि सोढुमशक्नुवन् नित्यसंश्लेषसमुत्सुको भवतीत्यभिप्रायकं चरमविशेषणमतिचारु॥ .... (७)

—* सातवीं गाथा—तोळिणैमेलुम् नन्मार्पिन्मेलुम् *—

(हिंदी.) अपने दोनों भुजों, श्रेष्ठ वक्ष, उज्वल मुकुट व उभय पादों पर सुंदर व सुशीतल तुलसी का धारण करनेवाले, अपने योग्य उपमान से विरहित, जाज्वल्यमान तेजोराशि के सदृश और वियोग के विना नित्यसंश्लेप करने के स्वभाववाले भगवान मेरी जीभ में विराजमान हैं॥

प्रकृत गाथा का यह तात्पर्य है कि जैसे कामिनी से मिलना चाहनेवाला नायक अपने को दिव्यालंकारों से सजाकर, पुरुषों के भी मनोनेत्रों का अपहरण करने में समर्थ वेष से जाता है, इसी प्रकार भगवान भी आळ्वार को प्रसन्न कराने के लिए अपना सारा विग्रह सजाकर, उनकी जिह्वापर विराजमान हो

गये। आळ्वार ने अपने पहले प्रबंध तिरुविरुत्तम् में बारंबार तुलसी का नाम लेते ही प्रलाप किया था; इसका स्मरण कर अब भगवान इनकी परिपूर्ण तृप्ति के लिए, अपने सभी अंगों को तुलसी से सजा कर मानों यों कहते हुए कि, "हे मुनिवर! अब आप अपनी जिह्वा की शक्ति के अनुसार दिव्यतुलसी से अलंकृत मेरी स्तुति कर लीजिए," उनकी जीभ पर विराजमान हो गये। जिस जिह्वातल पर साक्षात् भगवान ही विराजमान हों, उससे निकलनेवाली श्रीसूक्तियों के माधुर्य के बारे में कहना क्या? तुलसी का ऐसा मनोहर वर्णन करनेवाला वचन, सत्य ही, और कहीं नहीं मिलेगा। यह तो सर्वथा सत्य है कि ऐसी मधुर श्रीसूक्ति निकालने के लिए ही भगवान अब आळ्वार की वागिंद्रिय, जिह्वापर विराजमान हुए। अस्तु। अब भगवान के चार अवयवों पर तुलसी का अलंकार उपवर्णित किया गया है। इसका एक कारण रहता है। पहले, भुजों पर धारण करने का यह तात्पर्य है कि भक्तों का आलिंगन करने के अंग भुजों को पहला सन्मान देना आवश्यक है। बाद में श्रीवक्ष में विराजमान श्रीलक्ष्मीजी जो अपने पुरुषकार को सफल होते देखकर प्रसन्न होती हैं, उनको सजाने के लिए श्रीवक्ष पर तुलसी माला का धारण होता है। फिर आळ्वार की स्तुति पाने से सार्थक बने हुए मुकुट का अलंकार करने के लिए सिरपर तुलसी का धारण होता है। अंत में चरणारविंद सजाने का भाव साक्षात् आळ्वार को ही सजाना है; क्योंकि भगवान के श्रीपादों का नाम ही श्रीशठकोप होता है। अथवा आळ्वार के उपदेश सुननेवाले जन सुधरकर भगवान के श्रीचरणों का आश्रय लेते हैं; अतः सर्वजनशरण्य उनका अलंकार करना आवश्यक है।

रसिकचक्रवर्ती श्रीपराशरभट्टार्य स्वामीजी दूसरे प्रकार इसका तात्पर्य बताते थे। तथाहि—लोक में हम देखते हैं कि विजय पानेवाले वीर जन पहले अपनी विजय के हेतु आयुधों का अलंकार करते हैं; इसी प्रकार भगवान ने भी पहले अपने बाहुओं का अलंकार करने बहाने बाहु पर विराजमान शंखचक्रों का ही अलंकार किया। फिर रसिकता से अपनी प्रेयसी को अलंकार देना आवश्यक होता है। इस दशक की पहिली गाथा के अंत में बताया गया कि भगवान बडे रसिक हैं। अतः उन्होंने आयुधों के बाद श्रीलक्ष्मीजी को सजाया (माने श्रीवक्षपर तुलसी पहना)। महिषी को देने के बाद स्वयं उपयोग करना रसिकों का संप्रदाय है; इस न्याय से भगवान ने तुलसी को श्रीवक्ष के बाद अपने सिरपर रखा। अंतमें प्रसाद तो दासों को दिया जाता है; इस प्रकार तुलसी भी इतने उपयोग होने के बाद भक्तों के स्थान (अर्थात् जहां भक्त प्रणाम करते हैं, ऐसे) चरणकमलों पर रखी गयी।

[अपने योग्य उपमान से विरहित] "एकमेवाद्वितीयम्" पुकारे जानेवाले भगवान का भी उपमान दूसरा कौन हो सकता है? तदुपरांत आपादचूड तुलसीमाला से अलंकृत हो जाने के बाद, कहने की बात ही नहीं। वस्तुतस्तु भगवान को अपनी शोभा बढाने के लिए कोई आभूषण पहनने की आवश्यकता ही कौन-सी है, जब वे स्वयं अभूषणों के भी आभूषण हैं! (अर्थात् आभूषण के बिना भी शोभायमान हैं!) यह अर्थ कहा जाता है [जाज्वल्यमान तेजोराशि के सदृश] कहने से। अंतिम विशेषण का यह तात्पर्य है कि भगवान इतने सुकुमार हैं कि वे अपने भक्तों के एक क्षण मात्र के विरह को भी सहन नहीं कर सकते; और अत एव उनसे नित्यसंश्लिष्ट ही रहना चाहते हैं। यथा स्तोत्ररत्न में गाया गया—महात्मभिर्मामवलोक्यतां नय क्षणेऽपि ते यद्विरहोऽतिदुस्सहः॥ .... (७)

(गाथा.) नाविनुळ् निन्नु मलरुम् ज्ञान कलैहळु केल्लाम् *
आवियु माकैयुम् ताने अळिप्पो डळिप्पवन् ताने *
पूवियल् नाल्तड न्तोळन् पोरुपडै याळि शङ्गेन्दुम् *
काविनन्मेनि कमल कण्णन् एन्कण्णि नुळाने ॥ ८ ॥

(सं.) (गाथाया अस्या भगवद्रामानुज दिव्याज्ञावतीर्ण षट्सहस्रिकाव्याख्यानं परमभोग्य संस्कृतवाक्यजटिलमिति प्रायस्तद्वाग्भिरेव पूर्यते प्रतिपदार्थटीका ।) साङ्गसकलवेदप्रतिपाद्यः तत्स्वरूपस्थितिप्रवृत्तिहेतुभूतः निखिलजगदुदयविभवलयलीलः पुष्पहाससुकुमारश्चतुर्भुजः शङ्ख-चक्रगदाधर इन्दीवरदलश्यामः कमलपत्राक्षो भगवान् मम चक्षुषि प्रविष्टः ॥

गाथायामस्यां भगवतस्स्वचक्षुर्निष्ठत्वकथनेन अत्र प्रयुज्यमानैस्सर्वैरपि विशेषणैः प्रतिपन्ना अर्था मुनिवरस्यास्य स्वचक्षुर्विषयभूतास्सन्तो वाचो निस्सरन्तीति प्रतिपत्तव्यम् । जिह्वाग्रतस्समुज्जृम्भमाणानां ज्ञानसाधन-भूतानां सर्वासामपि कलानां अर्थस्य शब्दस्य च निर्वाहको भगवानिति स्थितं मूलगाथायाम्; एतत्सारसंक्षेपः साङ्गसकलवेद प्रतिपाद्य इति । अयमर्थः कथमिव चक्षुषा वीक्षितुमर्हो भवति मुनिवरस्येति चेत् उच्यते । * प्रत्यक्षमेकं चार्वाक इत्युक्तरीत्या प्रत्यक्षमात्रप्रामाण्यस्वीकर्तृचार्वाकमतेऽपि वेदप्रामाण्यमनपायमिति सुनिपुणमुप-पादयद्भिः श्रीपराशरभट्टार्यैः श्रीरङ्गराजस्तवोत्तरशतके—* प्रत्यक्षा श्रुतिरर्थधीश्च, न तथा दोषः, तदर्थः पुनर्धर्मा-धर्मपरावरेश्वरसुखः प्रत्यक्षबाध्यो नच । तच्चार्वाकमतेऽपि रङ्गरमण ! प्रत्यक्षवत्सा प्रमा * इति पादत्रितयेन वेदवेदार्थयोः कयाचन विधया प्रत्यक्षतामुपपाद्य, अथ चतुर्थचरणेन * योगोन्मीलितधीस्तदर्थमथवा प्रत्यक्षमीक्षेत सः * इत्यनेन योगिनामव्यवधानेन वेदार्थसाक्षात्कर्तृत्वमभ्यधायि । मुनिवरश्चासौ योगिनामग्रेसरः । अत एव त एव भट्टपादाः * ऋषिं जुषामहे कृष्णतृष्णातत्त्वमिवोदितम् । सहस्रशाखां योऽद्राक्षीद् द्राविडीं ब्रह्मसंहिताम् ॥ * इत्यमितुष्टुवुर्मुनिवरमेनम् । अत्र ऋषित्वेन व्यपदेशः अद्राक्षीदिति क्रिया चावधीयेताम् । अतश्च सर्वमयं न केवलं मनसा, अपितु चक्षुषा च साक्षात्कृत्यैव व्याहरति मुनिवरोऽसावित्यववारणमनर्गलम् ॥ सर्वप्रमाणगतानां शब्दानामर्थानां च भगवानेव निर्वाहक इत्युक्त्या फलितमिदमेव यदुत वैदिकेषु शब्देष्वर्थेषु च स एव निविष्ट इति । * वचसां वाच्यमुत्तममित्येतत् पुनरपि स्मार्यते । यद्वा, 'अस्मात्पदादयमर्थो बोद्धव्य' इतीश्वरसंकेतः खलु शक्तिः । तस्याश्शक्तेर्यदस्ति तादधीन्यं तदिहोच्यत इत्यप्याहुराचार्याः ।

[तत्स्वरूपस्थितिप्रवृत्तिहेतुभूतः] तच्छब्दः पूर्वोक्तज्ञानसाधनीभूत सकलकलापरः । जगतां स्वरूपस्थितिप्रवृत्तीरिव शब्दराशीनां स्वरूपान्यपि स एव निर्वहतीत्यर्थः । "मन्दमतीनां चेतनानां प्रतिपत्तिदो-षैर्लेखकदोषैः पाठभेदादिभिश्च विकारेषु संभवत्सु तदुपसंहारकर्ता, अपेक्षावसरेषु पुनस्तदाविष्कर्ता" इति व्याचक्षते गुरुचरणाः ॥ अथ पुष्पहाससुकुमारतरत्वं चतुर्भुजत्वं शङ्खचक्रगदाधरत्वं इन्दीवरदलश्यामत्वं कमलपत्राक्षत्वं च स्वचक्षुषा साक्षात्कृत्यैव कथयति मुनिवरोऽसाविति तदेतद्विवरणनिरपेक्षम् । * यमेवैष वृणुते तेन लभ्यः * इत्युक्त्यनन्तरम् * तस्यैष आत्मा विवृणुते तनूं स्वाम् * इत्यपि खल्वाह नायमात्माश्रुतिः । 'स्वां तनूं तस्य विवृणुते'—स्वदिव्यावयवविशेषान् सर्वानपि स्वयमेव सुविशदं साक्षात्कारयति परमात्मा इति किल तदर्थः ॥

—* आठवीं गाथा—नाविनुळ्निन्‌रु मलरुम् *—

(हिंदी.) जीभसे निकलनेवाले, ज्ञानसाधनभूत सांगवेदादि समस्त शास्त्र व तदर्थरूपी, उनके स्वरूपस्थितिप्रवृत्तिहेतु, समस्तजगत के सृष्टिस्थितिसंहारों के कर्ता, पुष्पहास सुकुमार चार भुजवाले, शंखचक्रगदाधर, नीलोत्पलश्याम विग्रहवाले और कमलनयन भगवान मेरे नेत्र में विराज रहे हैं ॥

इस गाथा में आळ्वार भगवान को अपने नेत्र में प्रविष्ट बता रहे हैं; इससे यह सूचित किया जाता है कि इस गाथा में प्रयुक्त सभी विशेषणों के अर्थ आळ्वार के अपने नेत्रों से साक्षात्कृत हैं; अर्थात् आळ्वार अपनी आँखों से भगवान की कतिपय विशेषताओं को साक्षात्कार कर, अब उन्हींका वर्णन कर रहे हैं। भगवान को [वेदादि समस्तशास्त्र व तदर्थरूपी] कहने का यह भाव है कि भगवान उन सबके प्रवर्तक और उनके वेद्य हैं। यहांपर यह शंका हो सकती है कि आळ्वारने इस अर्थका कैसे साक्षात्कार पाया; क्योंकि यह तो आँखों से नहीं देखा जा सकता। इसका यह समाधान है कि योगिश्रेष्ठ महात्मा अतींद्रिय अर्थों का भी साक्षात्कार पा सकते हैं; अत एव कितने ही महर्षि मंत्र द्रष्टा, मंत्रार्थद्रष्टा इत्यादि पुकारे जाते हैं। श्रीशठकोप सूरी भी भगवत्कृपा से सिद्ध ऋषि हैं ही; सहस्रगीति भी उनसे 'दृष्ट' द्राविडी ब्रह्मसंहिता (अर्थात् द्राविडवेद) है। यथा श्री पराशर भट्टार्य स्वामीजी ने कहा—"ऋषिं जुषामहे कृष्णतृष्णातत्वमिवोदितम्। सहस्रशाखां योऽद्राक्षीत् द्राविडीं ब्रह्मसंहिताम् ॥ (अर्थात् हम श्रीशठकोप ऋषि का सेवन करेंगे जो साक्षात् श्रीकृष्णप्रेम का अपरावताररूप, और सहस्रगीतिनामक द्राविड उपनिषद् के द्रष्टा हैं।" तथाच यह अर्थ निश्चित हुआ कि आळ्वार समस्त अर्थों को, अपने मनसे नहीं, किंतु नेत्रों से देखकर ही दिव्यप्रबंध गा रहे हैं। अब भगवान स्वयं वेदादि समस्त शास्त्ररूपी, उनके नियामक, उनके प्रतिपाद्य, शब्द व अर्थों के संबंध के नियामक इत्यादि प्रतिपादित किये जा रहे हैं। अर्थात् "अमुक शब्द का अमुक अर्थ है" करके लोक में (तथा वेद में) शब्दार्थों का जो नियत संबंध है वह भगवदधीन बताया गया। [उनके स्वरूपस्थिति प्रवृत्ति हेतु] कहने का यह तात्पर्य है कि भगवान ही समय पर समस्त शास्त्रों को प्रकाशित करते हैं, उनका पालन करते हैं और अंततः एक समय उनका उपसंहार भी कर देते हैं। यहां पर पूर्वाचार्यों का यह व्याख्यान है—"मंदमतियों के बुद्धिदोषों लेखकदोषों तथा पाठ भेदादियों से जब शास्त्र बहुत विकार पाते हैं, तब भगवान उनका उपसंहार, और बादमें योग्य अवसर पाकर पुनः आविष्कार करते हैं।" यह कहने की आवश्यकता नहीं रहती कि आळ्वार भगवान के दिव्य-मंगलविग्रह के साक्षात् दर्शन पाकर ही उन्हें पुष्पहास सुकुमार, चार भुजवाले, शंखचक्रगदाधर, नीलोत्पल-श्याम और कमलनयन कह रहे हैं। प्रसिद्ध "नायमात्मा" श्रुति कहती है कि, "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्।" अर्थात् भगवान जिसपर कृपा करते हैं, उसे अपने सारे दिव्य-मंगल विग्रह के सुविशद दर्शन देते हैं, जिसे वह समस्त अंगोपांग, अस्त्रभूषण आदियों का पूर्ण अनुभव कर सकें ॥ .... (८)

(गाथा.) कमल कण्ण नेन्कण्णि नुळ्ळान् काण्ब नवन्कण्गळाले *
अमलङ्गळाह विळिक्कुम् ऐम्पुलनु मवन्मूर्ति *
कमल चयनम्बि तन्नै कण्णुदला नोडुम् तोचि *
अमल चेय्दवनो डुलह माक्कि एन्नेचि युळाने ॥ ९ ॥

(सं.) पुण्डरीकाक्षो मम चक्षुर्विषय आसीत्; सम्यगवलोकयामि तमहम्; सोऽपि सर्वथा मामनवद्यमाकलयन्नवेक्षते । मदीयपञ्चेन्द्रियवृत्तिरपि तत्परैव । स क इति चेत्, सरसिजासन ललाटनेत्रादिदेववर्गसनाथं सकलमेत ज्जगतीतलमुत्पादितवान् । स इदानीं मम ललाटस्थानमधितिष्ठति ॥

चक्षुःप्रदेशान्निटिलप्रदेशमधितस्थौ भगवान्, तदिहोच्यते । ब्रह्मादिस्थावरान्तसकलजगत्स्रष्टा कमलनयनो भगवान् यदा मम चक्षुःप्रदेशमवजगाहे तदा तमहं सम्यगेव साक्षात्कृतवानस्मि । सोऽपि स्वकीयशिशिरकटाक्षवीक्षाप्रसारणेन मम सकलानि दुरितानि दूरीकुर्वन् सन् मामेवावलोकते—इति कथनेन मुनिवरोऽयं विशिष्टाधिकारीत्यवधार्यते । कथमिति चेत्; * न चक्षुषा गृह्यते * न संदृशे तिष्ठति रूपमस्य * न मांसचक्षुरभिवीक्षते तम् * इत्यादि श्रुतिप्रतिपादिता प्रक्रिया सामान्यप्राकृतजनताविषयैव केवलम् न तु श्रीशठकोपसूरिप्रभृति विलक्षणाधिकारि विषयेति प्रतिपत्तिं द्रढयति गाथेयम् । अथ च, मम दुरितानि दूरीकुर्वन् स भगवान् मा मवलोकत इत्यत्र श्रमणीविदुरादयः स्मृतिपथं नेतव्याः । * श्रमणीं धर्मनिपुणामभिगच्छेति कबन्धवाचा * सोऽभ्यगच्छन्महातेजाः शबरीम् * इत्युक्तरीत्या भगवता दाशरथिना स्वयमेव समुपेत्य विषयीकृता सदाचार्यसेवानिरता श्रमणी * चक्षुषा तव सौम्येन पूताऽस्मि रघुनन्दन ! * इति—भगवन् ! तव दिव्यकटाक्षपातेन स्वप्राप्तिप्रतिबन्धकसंकलदुरितविमुक्ताऽहमभूवमिति कथितवती । अभिजनाद्यहङ्कार योग्यतागन्धेनापि विधुरं विदुरं महात्मानं भगवान् वासुदेवः स्वकटाक्षवीक्षाप्रसारणेन पुनीतेस्मेत्ययं विषयो महाभारते अत्यन्तविलक्षणप्रक्रियया समसूचि; * निवासाय ययौ वेश्म विदुरस्य महात्मनः * इत्युक्तरीत्या स्वयमेव तस्य भवनमुपसृत्य * विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च * इत्युक्तरीत्या तदुपहृतमन्नमाश्नात् । भगवतः कृष्णस्य कटाक्षवीक्षणेनायं परिपूतोऽभूदिति व्यासो महर्षिश्च नाकथयत्; शबरीवद्विदुरोऽपि स्ववाचा नाचचक्षे । परंतु विदुरवेश्मनि भुक्त्वा समागतोऽयमिति ज्ञात्वा तमिनमधिक्षिपन् दुर्योधनः * भीष्मद्रोणावतिक्रम्य मां चैव मधुसूदन ! । किमर्थं पुण्डरीकाक्ष ! भुक्तं वृषलभोजनम् ॥ * इत्यनुयुञ्जानः पुण्डरीकाक्षेति संबोधयामासेत्यवलोक्यते । गर्हणकाले हे जाल्म ! हे मूर्खेति वक्तव्ये पुण्डरीकाक्षेति पूजोक्तिकथन मवशाद्धि समजनि; भवदीय पुण्डरीकदलामलायतेक्षणवीक्षणेन विदुरस्स पवित्रितोऽभूदिति स्वयमेव समुद्घाटयदिव । एवमेवं भगवतः कटाक्षवीक्षाप्रसरः पापनिर्बर्हणनिपुण इतीतिहाससिद्धम् । अनयैव प्रक्रियया मुनिवरोऽत्र स्वस्यापि तत्कटाक्षपातपरिपूततां स्वयं प्राहेति ध्येयम् ।

[मदीयपञ्चेन्द्रियवृत्तिरपि तत्परैव ।] चक्षुर्व्यतिरिक्तेन्द्रियाणामन्यपरत्वे सति चक्षुषः केवलं भगवत्प्रवणता न कस्मा अपि फलाय कल्पेत । न तादृशमववमित्यभिधीयत इव । इदानीमनुभूयमानसौलभ्यप्रतिकोटिभूतः परत्वगुणोऽनुभूयते सरसिजासनेत्यादिना ॥ .... (९)

—# नवमी गाथा—कमलक्कण्णनेन्कण्णिनुळ्ळान् #—

(हिंदी.) कमलनयन भगवान मेरी आँखों के विषय हुए; अतः मैं ठीक उनके दर्शन कर रहा हूं। वे भी मुझको सर्वथा दोषदूर बनाते हुए देख रहे हैं। मेरी पांचों इंद्रियों के भी वे विषय हैं। वे ये हैं कि जिन्होंने कमलासन (ब्रह्मा); ललाटलोचन (शिव) इत्यादि देववर्ग के साथ सकल जगत की सृष्टि की। ऐसे भगवान अब मेरे ललाट पर विराजमान हैं॥

इस गाथा में आळ्वार कह रहे हैं कि भगवान मेरे नेत्र से ऊपर चढकर ललाट पर विराजमान हुए; और जब ब्रह्मादि स्थावरांत जगत की सृष्टि करनेवाले कमलनयन वे मेरे नेत्र में विराजमान थे, तब मैंने उनके परिपूर्ण दर्शन किये; और उन्होंने भी मुझ पर अपना सुशीतल कटाक्ष डाल कर मेरे समस्त पापों को दूर कर दिया। इससे आळ्वार की एक असाधारण विशेषता बतायी जाती है। तथाहि—वेदादिशास्त्र बारंबार घोषणा करते हैं कि भगवान मांसचक्षु के गोचर नहीं होते; अर्थात् कोई भी मानव अपनी पांचभौतिक आँखों से उनके दर्शन नहीं कर सकता। अब तो आळ्वार कह रहे हैं कि मैंने अपनी आँखों से उनके खूब दर्शन किये। इससे यह अर्थ सूचित किया जाता है कि पूर्वोक्त शास्त्र साधारण मानवों की ही बात कर रहे हैं और आळ्वार उसका अपवाद है; अर्थात् आप ऐसी एक विशिष्ट व्यक्ति हैं जो भगवान की विशेष कृपा का पात्र होकर उनके साक्षाद् दर्शन ही कर सकते हैं। [**वे भी मुझको सर्वथा दोषदूर बनाते हुए देख रहे हैं।**] यह वाक्य शबरी विदुर आदियों का स्मारक है। इनके चरित्र से यह अर्थ स्पष्ट विदित होता है कि भगवान का कटाक्षपात मानव के समस्त पापों को भी दूर करनेवाला होता है। तथाहि—श्रीरामचंद्र भगवान कबंध के उपदेश से शबरी को ढूंढते हुए उसके यहां पधार कर, जब उससे मिले, तब सदाचार्यसेवानिरत वह भक्ता बोल उठी कि "चक्षुषा तव सौम्येन पूतास्मि रघुनंदन," (अर्थात् हे रामचंद्र! मैं आपके सौम्य कटाक्षपात से परिशुद्ध बन गयी, माने सद्गति प्राप्त करने में विघ्न डालनेवाले समस्त पापों से मुक्त हो गयी)। एवं कुलमद धनमद इत्यादि दोषों से दूर विदुरजी पर श्रीकृष्ण भगवान ने केवल अपनी विशेष कृपा से विलक्षण अनुग्रह किया; अर्थात् संधि कराने के उद्देश्य से हस्तिनापुर पधारने के समय, अपनी प्रतीक्षा करते बैठे हुए भीष्मद्रोण दुर्योधन आदियों की उपेक्षा कर, वे अचानक विदुरजी के घर पधारे। विदुरजी को सपने में भी यह कल्पना नहीं थी कि भगवान मेरे घर पधारेंगे। वे थे सर्वथा गरीब। तथापि उन्होंने कल्पनातीत प्रेम के साथ भगवान की सेवा की; अन्न का अर्पण किया। भगवान ने भी "विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च" (माने विदुरजी से समर्पित पवित्र व रसपूर्ण अन्न खाया)। यहां पर प्रश्न यह है कि इस वाक्य में विदुरान्न को कैसे शुचि कहने में आया, जब विदुर नीच जाति के थे। आचार्य इसका यह समाधान देते हैं कि भगवान के कटाक्ष का लक्ष्य होकर विदुरजी का अन्न पवित्र हुआ। यह अर्थ ऐसे स्पष्ट शब्दों से महाभारत में उपवर्णित नहीं; परंतु एक विलक्षण ढंग से सूचित किया गया है। दुर्योधन भगवान की खुशामद करने के लिये धूमधाम से उनका स्वागत करना चाहता था। भगवान को उसकी यह चालबाजी पसंद न हुई; अतः वे उसे धोखा देकर विदुरजी के यहां चले गये। इससे रुष्ट दुर्योधन ने उनसे पूछा कि, "भीष्मद्रोणावतिक्रम्य मां चैव मधुसूदन। किमर्थं पुण्डरीकाक्ष! भुक्तं वृषलभोजनम्॥"

(अर्थात् भीष्म द्रोण और मुझको छोडकर, हे मधुसूदन! कमलनयन! तुमने क्योंकर शूद्र का अन्न खाया? इसमें यह विचारार्ह है कि भगवान की निंदा करनेवाला दुर्योधन, क्योंकर उन्हें 'कमलनयन' संबोधित कर रहा है। इसका यह तत्व है कि यह वचन दुर्योधन की स्वबुद्धि से प्रयुक्त नहीं; परंतु अंतर्यामी की प्रेरणा से उसके मुख से निकला हुआ शब्द है। कहने का यह तात्पर्य है कि जब दुर्योधन को भगवान का तिरस्कार करने का विचार हुआ, तब उसी समय भगवान ने उसके मन में यह समाधान बताया कि मैंने अपने कमल-सदृश नेत्र के कटाक्षों से विदुर को परिशुद्ध बना कर बाद में उसका अन्न खाया। अतः दुर्योधन के मुँह से अचानक यह वाणी निकली, 'पुंडरीकाक्ष'। तथाच इन दोनों इतिहासों से यह अर्थ सिद्ध किया जाता है कि भगवान का कटाक्ष पापविनाशक होता है। अतः हालमें आळ्वार कहते हैं कि ऐसे भगवान के कटाक्ष से मेरे पाप भी नष्ट हुए। [मेरी पांचों इंद्रियों के भी वे विषय हैं] कहने का यह भाव है कि यदि दूसरी इंद्रिय दूसरी वस्तु के अनुभव करें और केवल नेत्र भगवान के दर्शन करें, तो उसमें कोई रस नहीं मिलेगा; अतः आळ्वार कह रहे हैं, कि मुझे ऐसा दोष नहीं हुआ, मेरी सभी इंद्रिय एक मात्र भगवान पर लग्न हैं और मैं उनका परिपूर्ण अनुभव कर रहा हूं। [कमलासन] इत्यादि गाथा के अवशिष्ट भाग से भगवान के प्रसक्त सौलभ्य के प्रतिद्वंद्वि परत्व का वर्णन किया गया है ॥....(९)

(गाथा.) नेच्चियुळ् निंनै याळुम् निरैमलर् प्पादङ्गळ् शूडि *
कच्चैचुळाय् मुडिकोलक् (मु) कण्ण पिरानै चोळुवार् *
ओच्चैप्पिरै यणिन्दानुम् नान्मुहनु मिन्दिरनुम् *
मच्चै यमररु मेल्लाम् वन्दु एनदुच्चि युळाने ॥ १० ॥

(सं.) मदीयललाटस्थले निविश्य मच्छेषभावं सुप्रतिष्ठितमादधानं चरणारविन्दद्वन्द्व मवतंसपदे निधाय दिव्यतुलसीस्रगलंकृतमूर्धानं परमपुरुषं प्रणमन्तो महानुभावाः चन्द्रशेखर श्चतुर्मुखश्शचीपतिरन्ये च सर्वेऽमराः; एतादृशप्रभावशाली स एव भगवान् मम मूर्धानमधिरूरोह ॥

ब्रह्मादयो महाभागा यमुपसृत्य सत्तां लब्धुमवसरप्रतीक्षास्सन्ति, तत्तादृशवैभवशेवधिर्महापुरुषो मम मूर्धानमधिरोढुमुत्कण्ठितो भूत्वा साम्यभोगप्रदित्सया क्रमेण मम मूर्धानमधिरुरोहेत्यमन्दानन्दसंदोहघनमुच्यते गाथयाऽनया। चन्द्रशेखर चतुर्मुख शचीपतिप्रभृतयो देवा भगवत्पादारविन्दद्वन्द्वमवतंसयन्तीति भगवत्प्रभावप्रख्यापनार्थमेतावदिह विवक्षितत्। तस्य चरणारविन्दद्वन्द्वस्य यद्विशेषणं दत्तमुपक्रमे तदत्यन्तमवधेयम्। "मदीयललाटस्थले निविश्य मच्छेषभावं सुप्रतिष्ठितमादधानम्" इति यदस्ति भगवच्चरणद्वन्द्वविशेषणम् तत् मुनिवरस्यास्य परमवैष्णवतां प्रकाशयति। हरिपादद्वन्द्वाकारमूर्ध्वपुण्ड्रं धारयित्वा स्वयं स्वशेषत्वप्रतिष्ठां प्रतिपेद इति स्पष्टं हि प्रकाशितं भवति। स्वललाटे भगवदवस्थान मधस्तन गाथाया मभिहितम्। अत्र तु तच्चरणारविन्दद्वन्द्वावस्थानमभिधीयते। एतच्चावस्थानमूर्ध्वपुण्ड्राकारत्वेनेति ध्येयम्।

विशेषतोऽवधेयम् । गाथायामस्यां वाक्यभेदो वर्तते । चन्द्रशेखराद्यमरप्रणतपादारविन्दद्वन्द्व इति वाक्य सन्निवेशमनाकल्य्य "परमपुरुषं प्रणमन्तो महानुभावाश्चन्द्रशेखरादयोऽमराः" इति पृथग्वाक्यविन्यसनं हि वर्ततेऽत्र । एवंविधवाक्यसन्निवेशेन कमपि रस्यतममर्थविशेषमभ्यूहन्त्याचार्यचरणाः—महाप्रभुषु अवरोधे एकस्मादङ्गणादङ्गणान्तरं प्रविशत्सु यथा ह्यन्तरङ्गभूतास्तत्रोपसृत्य स्वाभिलषितफलविशेषं लब्ध्वा कृतकृत्या भवन्ति, तथा सर्वेश्वरे मुनिवरस्य ललाटतलान्मूर्धानमवगाहमाने ब्रह्मादयो मध्ये मुखं प्रदर्श्य स्वकार्यसाधनप्रवणा भवन्तीति । वाक्यभेदमन्तरा विशेषणतया प्रयोगे कृते सोऽयमर्थविशेष उपन्यसितुमशक्यो भवेदिति सारस्वतसारज्ञा विजानीयुः ॥ .... (१०)

—* दसवीं गाथा—नेत्तियुळ् निन्रेन्नैयाळुम् *—

(हिंदी.) मेरे ललाटपर विराजकर मेरे शेषत्व को सुदृढ बनानेवाले भगवानके उभय पादारविंदों को चंद्रशेखर, चतुर्मुख, शचीपति इत्यादि देवगण, अपने सिर पर धारण कर दिव्यतुलसीमाला से अलंकृत मकुटवाले उनका प्रणाम कर रहे हैं। ऐसे प्रभाववाले भगवान अब मेरे सिरपर विराजमान हो गये ॥

इस गाथा में आळ्वार सानंद यह उद्गार कर रहे हैं कि ब्रह्मादि बडे बडे देवता जिनकी सेवा कर धन्य बनने के योग्य अवसर की प्रतीक्षा कर रहे हैं, ऐसे महामहिम भगवान मेरे सिर पर चढने को उत्कंठित होकर, तथापि मुझे सात्म्यभोग का प्रदान करने की इच्छा से धीरे धीरे ऊपर चढते हुए अंततः अब सिर पहुंच कर वहां पर सुदृढ प्रतिष्ठित हो गये। भगवान का वैभव बताने के लिए चंद्रशेखर आदियों की बात की गयी है। भगवान के चरणारविंदों का जो विशेषण दिया गया है कि, [**मेरे ललाट पर विराजकर मेरे शेषत्व को सुदृढ बनानेवाले**] यह आळ्वार की परमवैष्णवता का प्रतिपादक है। इसका यह अर्थ है कि आळ्वार ने भगवच्चरणारविंदों के सदृश ऊर्ध्वपुंड्र को धारण कर सुदृढ भगवच्छेषत्व पाया। पिछली गाथा में आळ्वार ने खुद भगवान को ही अपने ललाट पर विराजमान बताया; अत्र तो उनके चरणारविंदों को ऐसे बता रहे हैं। इसका यही अर्थ समझना चाहिए कि भगवान के उभयपादारविंद आळ्वार के भाल पर, अपने समान आकारवाले ऊर्ध्वपुंड्र तिलक के रूप में विराजमान हैं।

इस गाथा में और एक वाक्य ध्यान देने योग्य है। प्रकृत गाथार्थ को, "चंद्रशेखरादि देवों से संसेवित, और मेरे भाल पर विराजमान उभय पादारविंदवाले...." इत्यादि एक वाक्य में कहना सरल था। परंतु यहां दो वाक्य बनाये गये हैं। इनमें से एक वाक्य यह है कि, "चंद्रशेखरादि देवता भगवत्सेवा करने के लिए योग्य अवसर की प्रतीक्षा कर रहे हैं।" इस वाक्यसंनिवेश से हमारे पूर्व आचार्य एक अद्भुत अर्थ निकालते हैं—जैसे कोई एक महाप्रभु विशाल व सुमनोहर अपने प्रासाद में एक कमरे से दूसरे कमरे जाता है, और वह अवसर पाकर अंतरंग भक्त जन उससे मिलकर, योग्य सेवा कर उससे अपने इष्ट पुरुषार्थ पाते हैं; अर्थात् कमरे के अंदर रहने पर प्रभु से मिलना कठिन होगा, और प्रभुके अंतःपुर छोड कर बाहर आस्थान मंटप आने में बहुत देर लगेगी जब तक ये लोग उनकी राह देखते नहीं

बैठ रह सकते; अतः दूसरे कमरे में जाने के लिए उसके बाहर आते ही ये लोग उससे मिलने को उत्कंठित होते हैं; इसी प्रकार जब भगवान आळ्वार के एक अवयव का अनुभव करने के बाद, दूसरे अवयव पर चढने का प्रयत्न करते हैं, ठीक यह अवसर पाकर चंद्रशेखरादि देवता भगवान की सेवा कर उनसे अपने अपेक्षित पुरुषार्थ माँग लेते हैं ॥ .... (१०)

(गाथा.) उच्चियुळ्ळे निर्कुम् देवदेवर्क्कु कण्ण पिरार्क्कु *
इच्चैयुळ् शेल्ल वुणर्त्ति वण्कुरुहूर् शठकोपन् *
इच्चोन्न वायिरत्तुळ् इवैयुमोर् पत्तेम्बिरार्क्कु *
निच्चलुम् विण्णप्पम् शेय्य नीळ्कळल् शेन्नि पोरुमे ॥ ११ ॥

(सं.) मूर्धन्येवावतिष्ठमानस्य देवाधिदेवस्य श्रीकृष्णपरमात्मनः स्वस्मिन् संजातमभिनिवेशं सम्यगवबोध्य श्रीकुरुकापुराधिनाथ श्रीशठकोपमुनीन्द्रेण कीर्तिते सहस्रे अद्वितीयमेतद्दशकं भगवदग्रे विज्ञापयतां वैष्णवानां भगवत्पादारविन्दमवतंसपदं स्यादिति फलकीर्तनेन समापित-मिदं दशकम् ॥

मुनिवरोऽयं क्रमशो यदलभत फलमुत्तुङ्गं तत् एतद्दिव्यसूक्तिविज्ञापनप्रवणानां सतामनायासलभ्यं स्यादिति कथ्यते। एकैकमवयवविशेषं विहाय क्रमश उपर्युपर्यवयवान्तरेषु स्पृहातिशयेन संगतस्य भगवत इतः परं गन्तव्यस्य स्पृहणीयस्य वा स्थलान्तरस्याभावेन मूर्धन्येवावस्थिति रुच्यते। * श्रुतिशिरसि विदीते ब्रह्मणीत्युक्त-रीत्या श्रुतिशिरसि विभ्राजमानस्य भगवतः परमश्रुतिमूलभूतस्य मुनिवरस्य शिरसि संप्रति विभ्राजमानता भगवतो धिया भाग्यानामुपरि परिगणनीया सत्यम्। [परमश्रुतिः—सहस्रगीत्यात्मिका द्रमिडश्रुतिः; तन्मूलभूतः स एष शठकोपमुनिरिति ध्येयम् ॥] मूर्धन्येवावतिष्ठमानस्य देवाधिदेवस्येति सममिव्याहारबलात् मुनिवरमूर्धन्यव-स्थानत एव स्वयं देवाधिदेवत्व मन्वविन्ददिति कथितं भवतीति रसिकमणीनामाचार्याणां व्याख्या। स्वतो देवाधिदेवो भगवान् हन्त! मन्मूर्धन्यवस्थानादात्मानं कृतकृत्यं मन्यत इति विस्मयते मुनिवर इत्यपि सुवचम्। मुनिसार्वभौमेऽस्मिन्नेतादृशमभिनिवेशं प्रदर्शयितु मुत्सुकः परमपुरुषो गोपीजनवल्लभ एव भवितुमर्हतीति द्योतयन्नाह श्रीकृष्ण परमात्मन इति। दशकेऽस्मिन् स्वावयवेषु भगवान् व्यासक्तोऽभूदिति कथनं स्वप्रशंसार्थं न, अपितु भक्तजनेषु भगवतोऽभिनिवेश एवंविध इति प्रख्यापनेन तस्यान्तःकरणमाह्लादयितुमिति द्योत्यते अभिनिवेशं सम्यगवबोध्येत्यनेन ॥ .... (११)

—* द्रमिडोपनिषत्संगतिः* —

आत्मीर्जवानुभवकौतुकिनोऽस्य शौरि रात्मोपभोगरुचिमभ्यधिकां ददानः।
देव्यादिवद्रसयिता क्रमतोऽखिलाङ्गान्याशिश्रियत्तदवदन्नवमे शठारिः ॥

—※ ग्यारहवीं गाथा—उच्चियुळ्ळे निक्कुम् देवदेवक्कुं ※—

(हिंदी.)-अपने सिर पर ही विराजनेवाले देवाधिदेव श्रीकृष्ण भगवान के अपने प्रति समुत्पन्न उत्कट अभिनिवेश' को ठीक समझाते हुए, श्रीकुरुकापुरी में अवतीर्ण श्री शठकोपसूरी से अनुगृहीत इस सहस्रगीति के अंतर्गत इस दशक की भगवत्संनिधि में विनती करनेवाले भक्तों के सिर पर भगवान के पादारविंद नित्य ही विराजेंगे। [इस फलश्रुति के साथ यह दशक समाप्त किया गया ॥]

इस गाथा में यह फलश्रुति गायी गयी है कि आळ्वार ने धीरे धीरे जो फल पाया, वह महान फल भगवत्संनिधि में इस दशक की विनती करनेवाले भक्तों को अनायास, और नित्य ही मिल जायगा। आळ्वार के एकैक अवयव का अनुभव करने के बाद दूसरे अवयव में आशा करनेवाले भगवान जब उनके सिर पहुंच गये, तब उसे भी छोडकर आगे बढने की उनकी इच्छा न हुई और जगह न मिली; अतः वे उधर ही स्थिरप्रतिष्ठित हो गये। महापुरुषों के "श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे" इत्यादि कथन के अनुसार जो भगवान श्रुतियों के सिरपर विराजते हैं; उन्हें परमश्रेष्ठ श्रुतिमूल श्रीशठकोपसूरी के सिर पर विराजना भी अत्यंत उचित है, और उनके अभिप्राय से यह उनके अहोभाग्य की बात है। [परमश्रेष्ठ श्रुति—सहस्रगीति नामक द्राविडवेद; उसका मूल—गायक श्री शठकोपसूरी हैं।) [सिरपर ही विराजनेवाले देवाधिदेव] कहने से यह अर्थ सूचित किया जाता है कि भगवान आळ्वार के सिरपर विराजने से देवाधिदेव बने। अथवा-आळ्वार इस बात का आश्चर्य पा रहे हैं कि स्वयं देवाधिदेव भगवान मेरे सिर पर विराज कर ही अपने को कृतार्थ मान रहे हैं। [श्रीकृष्ण भगवान] का नाम लेनेवाले आळ्वार का यह भाव है कि ऐसी विलक्षण रसिकता का प्रकाशन करने में समर्थ देव, गोपीजनवल्लभ नंदनंदन श्रीकृष्णचंद्र ही हो सकते हैं। इस दशक में आळ्वार ने अपने एकैक अवयव में भी भगवान से प्रदर्शित अभिनिवेश का जो वर्णन किया, यह आत्मश्लाघा करने नहीं, वरन् भगवान के आश्रितजनव्यामोह का वर्णन कर, उससे उनको प्रहृष्ट करने के लिए है; अर्थात् भगवान सीमातीत वात्सल्य के मारे भक्तों के एकैक अवयव पर भी व्यामुग्ध बनते हैं; उनके इस अभिनिवेश को ठीक समझकर इसका वर्णन करने पर वे बहुत प्रसन्न होते हैं; इस लिए आळ्वारने प्रकृत दशक में इस अर्थ का विस्तृत वर्णन किया। इस भावना के सूचक शब्द हैं—[भगवान के समुत्पन्न उत्कट अभिनिवेश को ठीक समझाते हुए ॥] .... (११)

सटीक-सहस्रगीति के पहले शतक का नवां दशक समाप्त हुआ ॥
आळ्वार तिरुवडिगळे शरणम् ॥

श्रीपराङ्कुशपरकालयतिवरवरवरमुनीन्द्रेभ्यो नमः ॥

॥ प्रथम शतके दशमं दशकम्-पोरुमानीळ्पडै ॥

(सं.) अवतारिका—अनन्तरदशके मुनिसार्वभौमस्य यस्तावदनुभवस्समजनि स एष सत्यमसमाभ्यधिकः। ततोऽधिकमनुभवं प्रदातुं सर्वशक्तेनापि सर्वेश्वरेण नैव पार्यत इति वस्तुस्थितिः। तादृशोऽनुभवस्सत्यं

नैवास्ति खलु यो ह्यनुभवमिममतिशयीत। अस्यैवानुभवस्याविच्छेदेनानुवर्तनं तु कर्तव्यं स्यात्। तदत्रगत्रदिच्छाधीन मिति तदास्तां नाम। अतीतानुभवजनितो हर्षप्रकर्ष इदानीमस्मिन्दशके स्वानुभवमुखेन प्रकाश्यत इति पूर्वाचार्या निर्वहन्ति स्म। गवां रोमन्थ इह स्मर्तव्यः। गावो हि तृणपर्णादिकमाहारं चरन्तस्तदानीमेव नास्वादयन्ति; स्वीकृतमाहारं तालुमूले कपोलमूले वाऽवस्थाप्य परस्तादनोकहच्छायायां निषद्य शनैश्शनैरन्तः प्रवेशयन्ति। एतदेव रोमन्थपदाभिलप्यं प्रथते। एवमेव मुनिवरः पूर्वदशके स्वस्य संघटितमनुभवमेव केवलमुदघाटयत्। तदुपजनित आनन्दस्तु तदात्वे न सम्यग्विवृतः; तद्विवृतिस्तु दशकेऽस्मिन् संपन्नत इति प्राचामाचार्याणां निर्वाहपद्धतिः। श्रीपराशर भट्टार्यास्तु एतेनार्थेन सह विशेषतोऽन्यमपि कश्चिदर्थमायोजयन्ति स्म। स एवम्; अधस्तनदशकानुभवं मुनिवरः पुनः पुनरात्मनो हृदयेऽनुसंदधानः 'आः! कीदृशोऽयमनुभवः! अपारकृपाकूपारस्य भगवतः कृपाप्रवाहः कीदृशो नाम! इतोऽभ्यधिकः कृपाप्रवाहो भगवताऽपि कर्तुं न शक्यते, नास्माभिरपि धारयितुं शक्येत। ईदृशी कृपा कथं नु तस्य संजाता! कच्चिदस्ति तस्याः किमपि मूलम्?' इति सुबहु विमृशन् (मुनिवरः) सर्वथा निर्हेतुकप्रसरा सेयं कृपेत्येव निर्धारणीयं भवतीति निश्चित्य तमेव निर्हेतुककृपाभूमान मनुसंधत्ते दशकेऽस्मिन्—इति। स एष निर्वाहः श्रीकुरुकेशार्यानुगृहीतषट्सहस्रिकायां नास्ति। पेरियवाचान्पिळ्ळै समाख्य-श्रीमत्कृष्णगुरूत्तमानुगृहीत चतुर्विंशतिसहस्रिकायां प्रप्रथममारूढः। व्याख्यायामस्यामवतारिकावसाने अनर्घा श्रीसूक्तिरेका विराजते—"निर्हेतुककृपाविषये श्रीपराशर भट्टार्याणा मनुपमत्राग्विलसितप्रकाशकं खलु दशकमिदम्" इति। वेदान्तदेशिककाले षट्सहस्रिकाव्याख्यायाः प्रचारप्राचुर्ये सत्यपि अतिसंक्षिप्ता व्याख्या सेति हेतुना चतुर्विंशतिसहस्रिकाव्याख्याया एव प्रवचनप्राचुर्यमुदभूत्। वेदान्तदेशिकोऽपि इमामेव व्याख्यामधीत्य एतदनुसारेणैव स्वकीयां द्रमिडोपनिषत्तात्पर्यरत्नावली मधातीतरदिति भूयोभिः पद्यैरवसीयते। तदिदमस्मदीये ग्रन्थान्तरे सुविशदमुपपादितम्। तदास्ताम्। प्रकृतदशकसारार्थसंग्राहकनया तत्प्रणीते तात्पर्यरत्नावलीश्लोके "स्ववितरणमहौदार्यतुष्टोऽभ्यचष्ट" इति, अथ दशकानां प्रमेयसंग्राहकत्वेन प्रणीते पद्ये "अव्याजोदारभावात्" इति च निवेशितमिहानुसन्धेयम्।

भगवत्कृपाया निर्हेतुकतामिहानुसंदधानो मुनिवरो यद्यपि स्वविषये प्रसृतां तत्कृपामधिकृत्यैव प्राह, तथाऽपि भगवत्कृपायाः स्वरूपमेतादृशमिति प्रतिपादयतीत्येव प्रतिपत्तव्यम्। सत्संप्रदायाध्वनि स एष विषयः प्रधानतमस्तस्मिन्च इति हेतुना, श्रीवचनभूषणे आचार्यहृदये च स्थितानि विपुलतमानि निरूपणान्यनुसृत्य सारमिह प्रपञ्चयामः। चेतनानामस्मादृशां सद्गुणान् सच्चरित विशेषान् वा निमित्तीकृत्य भगवान् दयते—इत्यभ्युपगमे सति कृपायास्सहेतुत्वं सिध्यति; स्वयमेव प्रसर्पति भगवत्कृपेत्यङ्गीकारे तस्या निर्हेतुकत्वं निष्पद्यते। ननु हेतुमन्तरेण स्वयमेव समुन्मिषति भगवतः कृपेति कथमिदं संघटेत? तथा सति सर्वदा सर्वेऽपि जना भगवत्कृपालक्ष्यभूता एव हि भवेयुः। नैवमुपलभ्यते जगति। कालविशेषेषु अधिकारिविशेषेष्वेव भगवत्कृपायाः प्रसरं पश्यामः। हेतुविशेषपुरस्कारेणैव एवं भवतीत्यवधार्यते। तथा च तत्कृपायास्सहेतुकत्वाभ्युपगम एव साधीयान्; निर्हेतुकतावादो निरालम्बनः—इति तावत्परेषां प्रत्यवस्थानम्।

अत्रोच्यते। भगवत्कृपा नाम गरिष्ठं वस्तु; असमाभ्यधिकं वस्तु। तत्प्रसरं प्रति अपराधैकनिरूपणीयेष्वस्मादृशेषु हेतुत्वेन व्यपदेशार्हं यत्किमपि लघिष्ठं कर्म लघीयान् गुणो वा स्यान्नाम। तथा नाम अस्मासु..

संभवितुमर्हान् कतिपयान् कृत्यविशेषान् प्रदर्शयाम इह। क्रमशः अष्टौ विषयाः प्रदर्श्यन्ते; (१) परहिंसैकपराणामस्माकम् वक्ष्यमाणव्यक्तिमध्ये कदाचित् भगवद्भागवतविरोधिजना अपि अन्तर्भूता भवेयुः; सामान्यतः प्राणिवधस्य दुष्कृतत्वेऽपि भगवद्भागवतविरोधिजनहिंसनम् सुकृतमेव। परंतु इदं सुकृतमिति विदित्वा वा तच्चिकीर्षया वा न वयमाचरामः; प्राणिहिंसनात्मकदुश्चरितैकनिष्ठया तत्कुर्वतामस्माकं कर्मणि यदृच्छया भगवद्भागवतविरोधिजनहिंसनं संघटितं भवति। (२) अन्यदपि पश्यत। विषयप्रावण्यभूम्ना गणिकासु चपला भवामः; ताश्च कैङ्कर्यार्थं भगवदालयं गता इति विदित्वा तद्दिदृक्षया केवलं वयं भगवदालयं प्रविशामः। एवमसकृत्तत्र गतागतं भवति नः। भगवन्मन्दिरसेवनं सुकृतमेव यद्यपि, तथाऽपि तदार्जनकुतूहलेन न वयं तत्कुर्मः; वेश्यालोलुपतया बहुत्र पर्यटतामस्माकम् यदृच्छया भगवन्मन्दिरपर्यटनमपि संघटितम्। (३) अपरं च पश्यत; अस्मदीयकेदारे काचन धेनुः प्रविश्य सस्यजग्धिमकरोत्; तां प्रहर्तुं वयमाग्रहेण धावामः; कान्दिशीकी सा अर्थात् कमपि देवालयं प्रविश्य प्रादक्षिण्येन प्रधावति; तत्प्रजिघृक्षासंभ्रमेण तामनुधावतामस्माकम् यदृच्छया भगवत्प्रदक्षिणीकरणं संघटितम्। (४) संसारिणो वयम् पुत्रान् पुत्रीश्च प्रसूय नानादेशेषु सम्बन्धं कुर्मः; सम्बन्धिनां वासस्थानेषु अर्थात् श्रीरङ्गम् वेङ्कटाद्रिः काञ्ची यादवाद्रिरित्यादयो दिव्यदेशा अप्यन्तर्भवन्ति। सांसारिककार्यनिर्वहणार्थेव केवलं तत्रतत्र जिगमिषवो, गत्वा प्रतिनिवृत्ताश्च वयम् 'श्रीरङ्गं गमिष्यामः....वेङ्कटाद्रेः प्रतिनिवृत्ताःस्मः....काञ्च्यां मम दुहिता सुखिनी वर्तते....मम पुत्रो यादवाद्रिमधिवसतीदानीम्' इत्येवमेवं व्यवहरामः। दिव्यदेशानां नामोच्चारणं सुकृतमिति धिया नैवं व्यवहृतमस्माभिः। (५) गृहकार्यनिर्वर्तनाय कांश्चन किङ्करान् वेतनविश्राणनेन वयमाद्रियामहे; तेषु नारायणनामा कश्चित्; केशवनामा अपरः; गोविन्दसंज्ञश्चान्यः। स्वकार्यार्थं तेषामाह्वाने प्रसक्ते हे नारायण! रे केशव! अये गोविन्द! इत्याकारयामः। भगवन्नामोच्चारणं सुकृतमिति धिया तु न। (६) केचन भागवताः दिव्यदेशसेवाहेवाकेन निर्जने वने व्रजन्ति; तेषां सर्वस्वापहाराय केचन तस्करा अनुधावन्ति; तदात्वे कोऽपि राजभटो यदृच्छया नलिकास्त्रपाणिस्तत्र संगतोऽभूत् ग्रामान्तरजिगमिषया। चोरास्तु तमवेक्ष्य 'एतेषां रक्षणार्थमागच्छत्यसौ' इति मन्यमानास्सद्यः कान्दिशीका भवन्ति। दिव्यदेशसेवार्थं व्रजन्तो भागवतास्ते सुरक्षिताः प्रयान्ति। वस्तुनो राजभटस्स भागवतरक्षार्थं नोपस्थितः। रक्षा तु यादृच्छिकी समघटत। (७) कश्चन कृषिजीवी कचन केदारे पलाण्डुगृञ्जनाद्यभिवर्धने निरतः; तत्र तावदुदकसौलभ्यं नाघटत; ततो दविष्ठे क्वचन देशे महान्तं कूपं निर्माप्य पलाण्डुक्षेत्रं प्रति महतीं जलधारां प्रवाहयति; सा तु महानदीनिर्विशेषं प्रसर्पति पथि। केचन भागवता मरुकान्तारसधर्मणो देशादागच्छन्तः कुत्रापि जलकणिकामप्यलभमानास्ताम्यन्तोऽत्र संगता धारासलिलमवेक्ष्य भृशं प्रसन्नाः पिपासाप्रशमनादिकमकुर्वत; गृञ्जनकृषिकर्तुस्तस्य भागवतोपचरणमभिष्टमपि यदृच्छया समघटत तत्। (८) कश्चन धनिकः द्यूतक्रीडार्थं वायुसेवार्थं च स्वकीयभवनबाह्याङ्गणे महतीं वेदिकां प्रच्छायां निरमापयत्; स हि सन्ततं न तत्र वसति। अर्थात् बहवो भागवता अपि तत्र विश्राम्यन्ति। भागवतविश्रान्तिसौकर्यसम्पादनं महत्तरं सुकृतमिति धीस्तु नासीदेवास्य। यदृच्छया तु तत् संघटते क्रियासमभिहारेण।

एवमेवमुदाहर्तुमर्हाणि सन्ति नाम भूयांसि। एवंविधेषु स्थलेषु कर्तुरिच्छया सुकृतगन्धोऽपि नास्तीति सुगमम्। सहजकरुणया चेतनानङ्गीकर्तुमवकाशविशेषमवेक्षमाणो भगवान् अस्मदीयेषु दुष्कृतेष्वपि सुकृतनामधेयमारोपयितुं जातुचिदवकाशमुपलभमानः कृपां प्रसर्पयति। भूयसीषु जन्मपरम्परासु यादृच्छिकम् प्रासङ्गिकम्

आनुषङ्गिकम् इति व्यपदेशयोग्यान् सुकृतविशेषान् स्वयमेवास्मासु कल्पयित्वा दयते—इति वस्तुस्थितिः। एतावता तस्याः कृपायास्सहेतुकत्वाभिधानं नैव सांप्रतम्। प्रबलदण्डनार्हपातकविशेषान् खलु वयमनारतं सृजामः। यदाहुः श्रीवत्साङ्कमिश्राः—* यद् ब्रह्मकल्पनियतानुभवेऽप्यनाश्यं तत्किल्बिषं सृजति जन्तुरिह क्षणार्धे * इति। * न निन्दितं कर्म तदस्ति लोके सहस्रशो यन्न मया व्यधायि * अमर्यादः क्षुद्रश्चलमतिरसूयाप्रसवभूः कृतघ्नो दुर्मानी स्मरपरवशो वंचनपरः। नृशंसः पापिष्ठः * इत्येवमनेवमनुसन्धातुमुत्कटामार्हन्तीमपि विवशतामस्माकं क्वचित् धीपूर्वकोऽपि सुकृतलवलेशः कश्चिदस्तीति स्याम्नाम। अनर्घां भगवत्कृपां प्रति क्षोदिष्ठस्यास्य कर्मणः फल्गुनो हेतुत्वेनानुसंधानं न विवेकिकृत्यम्॥ अत्र प्रतिपक्षिण एवं प्रत्यवतिष्ठन्ते;—अत्युत्तमाया भगवत्कृपाया अस्मासु सदृशहेतुर्नास्तीति कथ्यतां कामम्; तावता तस्या अहेतुकत्वकथनं कथमिव युज्यताम्? इति। हन्त! लघीयानेष वादः। याचकः पण्डितो राज्ञे लिकुचफलमर्पयन् महत्तरं राज्यं प्रतिलेभे यदि, राज्यदानं तत् सहेतुकमिति को वा मतिमान् मन्येत? वयं मन्यामह एवेति चेत्, कामं मन्यध्वम्। कः प्रतिरोद्धा।

(हिंदी.) पहले शतक के दसवे दशक की अवतारिका—पिछले दशक में आळ्वार को जो भगवदनुभव मिला, वह सत्य ही बेजोड था। सर्वशक्त भगवान भी उससे अधिक अनुभव देने में अशक्त हैं। दूसरा कोई भी अनुभव इसके सदृश अथवा इससे अधिक नहीं हो सकता, जिसे यह चेतन कभी माँग सकेगा। अतः इतना ही माँगा जा सकता है कि यही अनुभव, विच्छेद के विना, नित्य बना रहें। परंतु यह भगवान की मर्जी की बात है। अस्तु। पूर्वाचार्यों का अभिप्राय था कि प्रकृत दसवें दशक में आळ्वार, पिछले दशक में अपने अनुभूत सीमातीत आनंद को ही स्वानुभवद्वारा प्रकाशित कर रहे हैं। गाय की जुगाली इस विषय का सुंदर दृष्टांत होता है। तथाहि—गाय का यह स्वभाव है कि वह घास पत्ता इत्यादि आहार को मानव की भांति एकदम नहीं निगल देती; परंतु चरने के समय शीघ्रता के लिए, उस आहार को बरावर चबाए विना ही तालु अथवा पेट के ऊपर के आमाशय में रख लेती है ओर बाद में किसी पेड की छाया में लेट कर, उस आहार को फिर अपने मुँह मे लाकर, उसे धीरे धीरे, बड़े आराम के साथ चबाती है। यह क्रिया रोमंथ (अथवा जुगाली) कहलाती है। इसी प्रकार, आळ्वार ने पिछले दशक में भगवान का सुंदर अनुभव किया तो सही; परंतु उस समय अवकाशाभाव के हेतु वे परिपूर्ण आनंद का आस्वादन नहीं कर सके। वह काम प्रकृत दशक में किया जा रहा है; अर्थात् आप पूर्वानुभव की याद करते हुए अब पूर्ण आनंद पा रहे हैं। यह हुआ पूर्वाचार्यों का निर्वाह (माने अर्थवर्णन करने का प्रकार)। श्रीपराशरभट्टार्य स्वामीजी ने इसके साथ और एक सुंदर अर्थ मिला दिया। तथाहि—आळ्वार ने पिछले दशक के अनुभव की बार बार याद करते हुए अपने मनमें विचार किया कि, "ओह! मुझे यह कैसा अनुभव मिला! अपारकरुणासागर भगवान की कृपा का यह कितना विलक्षण प्रवाह है! क्या स्वयं भगवान ही कभी इससे अधिक कृपा कर सकेंगे? अथवा हम उसका सहन कर सकेंगे? न, न। अस्तु। अब मुझे आपकी यह कृपा सहसा कैसे मिली? इसका क्या कारण है?" परंतु बहुत सोचने पर भी इसका कोई कारण दीख नहीं पडा; अतः आळ्वार ने यह निश्चय कर लिया कि यह तो भगवान की निर्हेतुक कृपा का ही काम है। अतः आप इस दशक में (अपने आनंद के साथ) उसी निर्हेतुक कृपा का वर्णन करने लगते

हैं। यह निर्वाह श्रीकुरुकेशस्वामीजी की षट्सहस्री टीका में उपवर्णित नहीं है, किंतु पहले पहल पेरियवाच्चान्पिळ्ळै की चौबीसहजार टीका में, और बाद में छत्तीस हजार टीका में पाया जाता है। उक्त चौबीस हजार टीका में यह एक वाक्य विराजमान है कि, "प्रकृत दशक, निर्हेतुक भगवत्कृपा के विषय में श्रीपराशर भट्टर स्वामीजी के अन्यादृश वाग्विलास का प्रकाशक है"। (अर्थात् भट्टर स्वामीजी इस दशक का प्रवचन करने के समय भगवान की निर्हेतुक कृपा का बडा मनोहर विवरण करते थे)। श्रीवेदांतदेशिक स्वामीजी के जमाने मे सहस्रगीति की तीन टीकाएं—षट्सहस्री नवसहस्री तथा चौबीसहजार—प्रचलित थीं। इनमें से अति संक्षिप्त होने के कारण षट् सहस्री व नवसहस्री बांचने से रसिकों को पूर्ण तृप्ति नहीं होती। अतः चौबीस हजार टीका का ही उस समय विशेष आदर व प्रचार था। वेदांतदेशिक स्वामीजी ने भी इसी ग्रंथ का स्वागत व ठीक अध्ययन किया, इसमें उपदिष्ट रसमय अर्थों का ही अपने ग्रंथों में तत्र तत्र उल्लेख किया; और इसीके अनुसार द्रमिडोपनिषत्तात्पर्यरत्नावलि ग्रंथ रचा। इसका सूक्ष्मविवेचन करनेवाले सरलतया यह अर्थ समझ सकते हैं। यह अर्थ अन्यत्र (श्री कांची प्र. अ. स्वामीजी के दूसरे ग्रंथों में) विशद रूप से बताया गया है। अस्तु। उक्त तात्पर्यरत्नावलि में प्रकृतदशक का सारार्थ बतानेवाले पद्य में आप लिखते हैं कि "स्ववितरणमहौदार्यतुष्टोऽभ्यधत्त" (आळ्वार ने भगवत्कृत स्वात्मदान के हेतु उनके महौदार्य से संतुष्ट होकर कहा); और आगे के पद्य में, जिस में सारे पहले शतक का ही सारार्थ बताया गया है, आप प्रकृत दशक का अर्थ लिखते हैं कि, "अव्याजोदारभावात्" (भगवान के विना कारण उदार होने से)।

यद्यपि इस दशक में आळ्वार अपने प्रति भगवान की प्रदर्शित निर्हेतुक कृपा का ही वर्णन कर रहे हैं। (अर्थात् आप इतना ही कह रहे हैं कि भगवान ने मुझपर निर्हेतुक कृपा की); दूसरों की बात नहीं की गयी। तथापि समझना चाहिए कि सामान्यतः भगवत्कृपा का ही यह स्वभाव बताया गया है। चूंकि यह निर्हेतुक भगवत्कृपा का प्रभाव सत्संप्रदायनिष्ठों का समादृत एक महान व मुख्य अर्थ है, अतः श्रीवचनभूषण और आचार्यहृदय में प्रतिपादित रीति से यहां पर इसका संक्षिप्त विवेचन करेंगे। यह विचारणीय अंश है—भगवान जो हमारे जैसे चेतनों पर कृपा करते हैं, वह क्या हमारे सद्गुण, व सच्चरित्र देख कर करते हैं, (जब कि कृपा सहेतुक सिद्ध होगी) अथवा क्या हमारे गुणदोषों की परवाह नहीं करते, स्वतः एव करते हैं; (जब कि वह निर्हेतुक होगी)? दूसरों का कहना है कि, "यदि भगवान निर्हेतुक (माने विना कारण ही) किसी व्यक्ति पर कृपा करेंगे, तो उन्हें सब पर यह करनी पडती है; अर्थात् संसार में रहनेवाले सभी मानवों को उनके कृपामात्र होने चाहिए। परं तु हम प्रत्यक्षतः देख रहे हैं कि इस विशाल प्रपंच में कभी किसी एक व्यक्ति पर आपकी कृपा बहती है; दूसरे सभी कृपा के अविषय ही रह जाते हैं। अतः कहना पडता है कि चेतन की किसी प्रकार की विशेषता देख कर ही भगवान उस पर कृपा करते हैं। अत एव शास्त्रों में भगवत्कृपा प्राप्त करने के अनेक उपाय बताये गये हैं। यदि वह कृपा विना कारण ही मिले, तो उसे प्राप्त करने के लिए हमें प्रयत्न करने की आवश्यकता कौन-सी है? अतः उसे सहेतुक कहना ही शास्त्र व युक्ति के अनुगुण है।

अब इसका सारभूत समाधान बतावेंगे। भगवान की कृपा एक अमूल्य वस्तु है। हमारा स्वभाव तो अपराध ही करते रहना है। ऐसे हमारे पास वह श्रेष्ठ वस्तु पाने के योग्य कौन-सा गुण रह सकता है? अथवा कदाचित् ऐसी कोई वस्तु होगी जिसे किसी तरह गुण कहना शक्य हो। शायद, ऐसे भी आठ एक गुण बताते हैं। उनका अब विवरण करेंगे। (१) सर्वदा प्राणिहिंसा करने में ही निरत हमने कदाचित् दूसरे अनेक प्राणियों के साथ अचानक किसी भगवद्भागवतविरोधी का भी वध किया होगा। यह तो स्पष्ट है कि प्राणिहिंसा करना बडा पाप है; किंतु भगवद्भागवत शत्रु का वध करना पुण्य है। परंतु हमने इसे सुकृत मान कर, अथवा सुकृत का अनुष्ठान करने के संकल्प से यह काम नहीं किया। प्राणिहिंसा करने के लिए ही शस्त्र का प्रयोग करनेवाले हमने अकस्मात् दुष्ट का भी संहार कर दिया। (२) हम किसी वेश्या में अनुरक्त रहते होंगे; वह तो सदा भगवान के मंदिर में गान, नर्तन इत्यादि सेवा करती है; अतः उसे देखने के लिए हमें भी बारंबार मंदिर जाना पडता है; भगवान के दर्शन भी करने पडते हैं। यह तो बात ठीक है कि मंदिर जाना और भगवान के दर्शन करना सत्कर्म है; परंतु हमने मंदिर जाना अथवा भगवान के दर्शन करने नहीं चाहे; वेश्यालोलुप होकर इधर उधर भटकनेवाले हमें अकस्मात् मंदिर जाने का भी अवसर प्राप्त हुआ। (३) हमारे खेत में कोई गाय सस्य चरती होगी, जिसे मारने के लिए हम हाथ में डंडा लेकर दौडते हैं। वह गाय भी हमें देखकर डरती हुई भागती है और पासमें विराजमान किसी भगवन्मंदिर की परिक्रमा करती है। गाय के पीछे पीछे दौडनेवाले हम भी वह परिक्रमा कर लेते हैं। हमने इसका ख्याल तक नहीं किया कि हम मंदिर की परिक्रमा कर रहे हैं; परंतु गाय खेदनेवाले हमें वह सुकृत मिल गया। (४) संसारी हम अपने पुत्रों व पुत्रियों को नाना देशों में परिणय करते हैं, जिनमें श्रीरंग, श्रीवेंकटाद्रि, श्री कांची, श्रीयादवाद्रि इत्यादि दिव्यदेश भी अंतर्गत होते हैं। पीछे हम कभी कभी अपनी संतान से अथवा संबन्धियों से मिलने के लिए उधर जाते हैं और ऐसी बातें करते हैं कि, "हम कल श्रीरंग जायंगे; हम श्रीवेंकटाद्रि जाकर आये; हमारी पुत्री श्रीकांची में रहती है; हमारा पुत्र श्रीयादवाद्रि में निवास करता है" इत्यादि। हमें दिव्यदेशों का नामोच्चारण अथवा उनकी यात्रा करने का बिलकुल विचार नहीं रहता; तथापि लौकिक वार्तालाप अथवा कामकाजों के बीच में यह भी सुकृत करना पडता है। (५) अथवा पैसावान होने के कारण हम अपनी सेवा करने के लिए अनेक नौकर चाकर रखते हैं। उनमें किसीका नाम नारायण, दूसरेका गोविंद, और तीसरे का केशव होगा। उनको बुलाने की भावना से हम बारं बार पुकारते हैं कि, 'हे केशव!' 'हे नारायण!' 'हे गोविंद!' इत्यादि। भगवन्नामोच्चरण करने की हमारी चिंता तक नहीं रही। (६) अथवा कितने ही भगवद्भक्त जन दिव्यदेशों की यात्रा करते हुए किसी निर्जन वन से निकल रहे हैं। उधर दो चार चोर मिल कर उन भक्तों को लूटने की राह देख रहे हैं। उतने में शस्त्रधारी एक राजकर्मचारी उसी रास्ते से निकलता है जिसे देख कर चोर समझते हैं कि यह तो इन यात्रियों की सुरक्षा करने के लिए आया है; और वहां से भाग जाते हैं; अर्थात् उसके निमित्त भक्तों की रक्षा हुई। उन भक्तों तथा कर्मचारी को इस रहस्य का पता भी न लगा। वे अपने अपने रास्ते चले गये। (७) कोई किसान अपने खेत में प्याज, लहसुन इत्यादि उपजाना चाहता हुआ, उधर पानी का अभाव होने से, दूरस्थित कुँए से निकलवा कर नहरों द्वारा प्रकृत

खेत तक पानी बहाता है। दिव्यदेशयात्रा करते दूर से चलकर आनेवाले थके हुए व प्यासे कतिपय भक्त जन, इधर उधर पानी ढूंढते हुए यह नहर देखकर, उसमें अपने हाथ पग मुँह धो कर, पानी पीकर प्रसन्न होते हैं। प्याज रोपनेवाले किसान को इस बात का पता भी न लगा कि ये भक्तजन मेरे पानी का उपयोग कर रहे हैं। यदि उसे इसका पता लगता, तो शायद वह उन्हें अपना पानी छूने तक नहीं देता। तथापि अकस्मात् उससे भक्तों की यह सेवा बन गयी। (८) कोई धनिक जुआ खेलना, हवा खाना इत्यादि काम के लिए अपने घर के बाहर विशाल व सुंदर ओरी बनवाकर, दिन भर और आधी रात तक अपने मित्रों के साथ उधर ही रहता है; और बाद में घर के अंदर जाकर आराम करता है। उसके बाद कितने ही भक्त जन इधर उधर दिव्यदेशों की यात्रा करते हुए वह गाँव पहुंच कर उस ओरी में विश्राम कर लेते हैं। गृहस्वामी ने इनके लिए वह ओरी नहीं बनवायी; उसे इस बात का पता भी नहीं चला कि मेरी ओरी में यात्री लोग आराम करते हैं। परंतु अचानक ही उन्हें बारंबार उक्त प्रकार उनकी सुविधा करने का अवकाश मिला। ऐसे और भी अनेक दृष्टांत दिये जा सकते हैं, जहां कर्ता की इच्छा अथवा ज्ञान के भी विना उससे सत्कर्म अनुष्ठित किये जाते हैं। परंतु स्वभावतः दयामय, और अत एव पापी चेतनों का अंगीकार करने की राह देखते रहनेवाले भगवान, उनके उक्त कार्यों को ही, (जिनमें कितने ही स्पष्टरूप से पाप हैं;) पुण्य करके नाम देकर, उन पर यों कहते हुए कृपा करते हैं कि "तुमने मेरे क्षेत्रों के अथवा मेरे नामों का संकीर्तन किया, मेरे भक्तों की सेवा अथवा रक्षा की" इत्यादि। इस प्रकार हमारे एक जन्म में नहीं, किंतु अनेक जन्मपरंपराओं में यादृच्छिक (अकस्मात् होनेवाले), प्रासंगिक (दूसरे काम करने के प्रसंग में होनेवाले), आनुषंगिक (दूसरे काम के साथ किये जानेवाले) इत्यादि पुण्यों को हमारे सिर पर लाद कर, उनके निमित्त भगवान हमारा उद्धार कर देते हैं। इतने मात्र से उनकी कृपा को सहेतुक बतलाना कैसे उचित होगा?

इस पर लोग फिर पूछ उठेंगे कि, "यह तो पापियों की बात हुई; परंतु लोक में ऐसे पुण्यवान भी बहुत होते हैं जो भगवान की कृपा पाने के लिए नानाविध सत्कर्म करते हैं। उनके बारे में कृपा सहेतुक ही ठहरेगी।" यह भी बात ठीक नहीं है। यद्यपि हम इस बातका इनकार नहीं करेंगे कि हमारे जैसा पापी भी कदाचित् कोई सत्कर्म करता होगा; और विशेष पुण्यवान जन भी इस संसार में कोई कोई रहता हैं। तथापि हमारे अनंत पापों के सामने यह पुण्य कौनसी गिनती में आवेगा? श्री यामुनाचार्यस्वामीजी स्तोत्ररत्न में कहते हैं कि, "न निन्दितं कर्म तदस्ति लोके सहस्रशो यन्न मया व्यधायि" (अर्थात् इस संसार में (अथवा धर्मशास्त्रग्रंथों में) ऐसा कोई भी पाप बाकी नहीं रह गया जिसे मैंने हजार बार नहीं किया हो।) श्री कूरेश स्वामीजी कहते हैं कि, "यद्ब्रह्मकल्पनियुतानुभवेऽप्यनाश्यं तत् किल्बिषं सृजति जन्तुरिह क्षणार्धे।" (अर्थात् पलभर में मानव इतना पाप करता है, जिसका फल अनेक कल्पोंतक अनुभव करने पर भी समाप्त नहीं होगा।) जब ज्ञानियों के अग्रेसर इन आचार्यों का यह उद्गार ठहरा, तब हमारे जैसे अज्ञों के बारे में कहना ही क्या? सारभूत वार्ता यह है कि भगवान की कृपा ऐसी एक अनमोल वस्तु है जिसके सदृश कोई भी पुण्य हमसे नहीं किया जा सकता। अथवा मान भी लीजिए कि ऐसा कोई भक्त है जिसने अपने जन्मभर एक भी पाप नहीं किया, किंतु निरंतर भगवद्भजन ही

किया। तथापि उसके पिछले असंख्य जन्मों में किये हुए पापों के सामने इस एक जन्मका पुण्य गिनती में नहीं आ सकेगा। भगवान की कृपा तो सबसे बडी वस्तु है। ऐसी अमूल्य वस्तु को अपने अत्यल्प पुण्य के साथ तोलकर, उसका फल बताना, उस कृपा की अवहेलना है। अतः उसे निर्हेतुक बताना ही युक्तियुक्त है।

इस पर भी लोग यह प्रश्न करेंगे कि, "यह तो स्वीकार्य हैं कि हमारे पास भगवत्कृपा के सदृश कोई पुण्य नहीं है। इतने मात्र से उसे एकदम निर्हेतुक कह डालना कैसे उचित होगा?" यह आक्षेप बिलकुल निस्सार है। उपाय उसे कहते हैं जो फल के सदृश होगा। जो फल के अनुरूप न हो उसे उपाय कहना लोक व शास्त्र-व्यवहार के विरुद्ध है। कोई गरीब ब्राह्मण किसी राजा के पास जाकर, एक निंबू की भेंट कर, स्तुति कर, यदि उसे विशाल जागीर पा लें, तब कौन-सा विवेकी कह डालेगा कि पंडित जी ने निंबू देकर उसके बदले में जागीर पायी? प्रशंसा तो राजा के औदार्य की होगी, न कि निंबू की। यदि कोई ऐसा आग्रह कर बैठें, कि हम निंबूको जागीर का उपाय ही मानेंगे, तो बेशक मान लीजिए; आपको कौन रोकेगा? कोई नहीं—इत्यलम्॥ .... *

(गाथा.) पोरुमा नीळ्पडै आळि शङ्गचोडु * तिरुमा नीळ् कळल् एळुलहुम् तोळ *
ओरुमाणि क्कुरळाहि निमिर्न्द * अकरु माणिकम् एन्कण्णुळ दाहुमे॥ १॥

(सं.) स्पर्धोन्मुखदिव्यायुधवरेण्य सुदर्शन पाञ्चजन्यधारी सन् सकललोकाभिवन्दित चरणारविन्दश्च सन् वामनब्रह्मचारिवर्ष्मणा विक्रान्तलोको नीलमणिनिभो भगवान्, स्वदिव्यवपुस्सुपमां मम चक्षुर्गोचरतामनैषीत्॥

दशकस्यास्य यत्प्रमेयमवधारितमवतारिकायाम् तदस्यां गाथायां सारसंक्षेपरूपतः प्रतिपाद्यते। यायजूको महाबलिस्तावत् लक्ष्मीपतिर्भगवान् स्वकीयदिव्य सौन्दर्यलावण्यप्रकाशकस्सन् स्वस्य पुरतस्समायास्यतीति स्वप्नेऽपि न मेने। * कौपीनं कटिसूत्रसीम्नि घटयन् मौञ्जीमभिव्यञ्जयन् कृत्तिं कृष्णमृगस्य वक्षसि वहन्नाषाढमंसेऽर्पयन्। स्वाध्यायस्वरसम्पदा परिषदां प्रीतिं समुत्पादयन् याञ्चायै बलियज्ञवाटनिकटं प्राप्तो वटुः पातु वः॥ * इत्युपश्लोकितरीत्या परमविलक्षणदिव्यमूर्तिधारी यथा ह्यचिन्तितमेव तस्याग्रतो विरेजे एवमेव न केवलमहेतुककृपया ममापि पुरतस्तिष्ठति परमशोभनदिव्यमूर्तिप्रदर्शको भवन्—इत्युक्तं भवति।

[स्पर्धोन्मुखदिव्यायुधधारी सन्] महाबलियज्ञवाटोपसर्पणसमये यद्यपि सुदर्शनपाञ्चजन्यधारणं नासीद्भगवतः, तथाऽपि जगद्विक्रान्तिसमये तद्धारणमासीदिति तत्रतत्रानुसंदधते दिव्यसूरयः। दिव्यायुधयोस्तयोः स्पर्धोन्मुखत्वविशेषणं द्वेधा व्याचक्षत आचार्यवर्याः—जगद्विक्रमणकाले प्रतिरोधप्रवृत्तानां नमुचिप्रमृतीनां विषये स्पर्धा-इति सर्वसुगमोऽयमर्थः। अथ द्वितीयोऽर्थस्तु-दिव्यायुधयोरनयोर्मिथो बद्धस्पर्धत्वं मङ्गलाशासनपरताप्रयुक्तम्। शृङ्गिबेरपुरसन्निकर्षे रामसीतामिथुने शयाने सति महता प्रेम्णा अङ्गरक्षके सौमित्रावप्यतिशङ्का गुहस्य, तस्मिन्नप्यतिशङ्का तत्परिकरस्य इत्ययमर्थः श्रीरामायणारूढः। पश्चादागतभरतसकाशे तदिदं गुहो वक्ति स्वयमेव; * नियम्य पृष्ठे तु तलाङ्गुलित्रवान् शरैस्सुपूर्णाविषुधिं परंतपः। महद्धनुस्सज्यमपोह्य लक्ष्मणो निशामतिष्ठत्परितोऽस्य केवलम्॥

ततस्त्वहं चोत्तमचापबाणभृत् स्थितोऽभवं तत्र स यत्र लक्ष्मणः ॥ अतन्द्रिभिर्ज्ञातिभिरात्तकार्मुकै र्महेन्द्रकल्पं परिपालयंस्तदा ॥ * इति । श्लोकयोरनयोरर्थम् अस्मत्पूर्वाचार्यव्यतिरिक्ता नैव जानते, न चापि ज्ञातुं प्रभवन्ति । मङ्गलाशासनप्रावण्यमूलभूताया अतिशङ्कायाः खलु कार्यमेतत् । एवम् सुदर्शने पाञ्चजन्यस्यातिशङ्का, पाञ्चजन्ये सुदर्शनस्यातिशङ्का । तथा चोक्तं श्रीगुणरत्नकोशे भट्टपादैः * स्नेहादस्थानरक्षाव्यसनिभिरभयं शार्ङ्गचक्रासिमुख्यैः * इत्यादि । सर्वथाऽप्यपायशङ्कागन्धावकाशानास्पदे परमपदे वार्ता यदीदृशी, आसुरप्रकृतिमेदुरे तामसमण्डलेऽस्मिन् किमु वक्तव्यम्? अत एव स्पर्धोन्मुखेति विशेषणस्य द्वितीयोऽप्यर्थस्सुघटितः । पूर्वाचार्यास्त्वाविममर्थ मनुगृह्य, अस्मिन्नर्थे रसज्ञा विरला इति धिया प्राथमिकार्थे सांगत्यातिशयमाहुः ॥ .... (१)

—* पहली गाथा—पोरुमानीळ्पडै आळिशङ्गत्तोडु *—

(हिंदी.) स्पर्धा करनेवाले दिव्यायुध शंखचक्रों को धारण कर, समस्तलोकाभिवंदित श्रेष्ठ चरणारविंदवाले विलक्षण वामन ब्रह्मचारी बनकर, बाद में बढकर लोकों को नापनेवाले नीलमणिसदृश भगवान ने अपने दिव्यमंगल विग्रह की शोभा को मेरे नेत्रों का गोचर बना दिया ॥

अवतारिका में इस दशक का जो प्रमेय (माने प्रतिपाद्य वस्तु) बतलाया गया, वह इस पद्य में संक्षेपतः उपवर्णित है। यज्ञ करते हुए महाबलि की सपने में भी कल्पना न रही कि भगवान् अपने दिव्यमंगलविग्रह की शोभा दिखाते हुए मेरे यहां पधारनेवाले हैं। तथापि भगवान कौपीन, कटिसूत्र, मौञ्जी, पलाशदंड, मृगचर्म आदियों से सजाये हुए, वेदपाठ करते हुए, सदस्यों के मनों का अपहरण करने में समर्थ दिव्यवामन रूप को धारण कर अचानक ही उसके सामने प्रकट हो गये न? अब आळ्वार कह रहे हैं कि ठीक इसी प्रकार वे अपनी निर्हेतुक कृपा से मुझे अपने परमशोभन दिव्यविग्रह के दर्शन देते हुए मेरे सामने विराजमान हैं।

[स्पर्धा करनेवाले दिव्यायुधों को धारण कर]। यद्यपि वामनवेषधारी भगवान ने शंख चक्रों का धारण नहीं किया। तथापि दिव्यसूरियों का अनुसंधान है कि आगे के त्रिविक्रम रूप में उनका धारण किया गया था। उसीका वर्णन यहाँपर भी किया गया। शंखचक्रों को स्पर्धा करने वाले कहने का तात्पर्य आचार्यों से दो प्रकार उपवर्णित हैं। सर्वसुगम सरल प्रकार यह है कि भगवान के लोक नापने के समय उनको रोकने की चेष्टा करनेवाले नमुचि इत्यादि दुष्टदानवों के साथ भगवान के दिव्यायुध स्पर्धा करने लगे। दूसरा प्रकार तो यह है कि ये दिव्यायुध भगवान के मंगलाशासन करने में निरत होने के कारण, आपस में ही स्पर्धा करते हैं। अत्यंत प्रेमपरवश भक्तों का यह स्वभाव है कि वे कभी कभी आपस में ही अविश्वास करते हैं। इस विषय का एक बडा सुंदर दृष्टांत श्रीरामायण में मिलता है। तथाहि—वनवास के लिए अयोध्या से प्रस्थित श्रीरामलक्ष्मणजानकी जब शृंगिबेर पुर पहुंचे, तब रात का समय था। गुहदेव ने उनका स्वागत व सत्कार किया। वह पाकर श्रीरामचंद्रजी, सीतादेवी के साथ लक्ष्मण-विरचित पर्णशय्या पर सो गये। लक्ष्मण जी स्वयं शयन किये विना, अत्यंत प्रेम से दिव्यदंपतियों की सुरक्षा करने के लिए हाथ में धनुर्बाण उठाकर चौकीदार की भांति चारों ओर घूमने लगे। यह देख कर गुहदेव ने सोचा कि,

"शायद यह लक्ष्मण श्रीरामचंद्रजी को दुःख पहुंचाने की राह देख रहा है;" और इस कल्पित आपत्ति से प्रभुको बचाने की इच्छा से वह स्वयं हाथ में आयुध लेकर लक्ष्मणजी के पीछे पड गया। गुहदेव के नौकरों ने शस्त्रधारी इन दोनों को देखा और सोचा कि, "ये दोनों मिलकर कुछ अनुचित काम करने का विचार कर रहे हैं। इनसे प्रभु को बचाना हमारा कर्तव्य है।" अतः वे भी हाथ में धनुर्बाण उठाकर रात भर जागृत व सावधान रहे। भरतजी के साथ वार्तालाप करते हुए स्वयं गुहदेव ने कहा—"नियम्य पृष्ठे तु तलाङ्गुलित्रवान् शरैस्सुपूर्णामिषुधिं परंतपः। महद्धनुस्सज्यमपोह्य लक्ष्मणो निशामतिष्ठत्परितोऽस्य केवलम्॥ ततस्त्वहं चोत्तमचापबाणधृत् स्थितोऽभवं तत्र स यत्र लक्ष्मणः। अतन्द्रिभि र्ज्ञातिभिरात्तकार्मुकैः महेन्द्रकल्पं परिपालयंस्तदा॥" इन पद्यों का यह अर्थ है—" लक्ष्मण जी हाथ पर हस्तत्राण धरकर, पीठपर बाणपूर्ण तूणीर लगाकर हाथमें बडे धनुष को तैयार उठाकर रातभर श्रीरामचंद्र जी के पास ही खडे थे। मैं भी श्रेष्ठ धनुष व बाण धरकर लक्ष्मण के रहने के उसी स्थान पर खडा था। मेरे बंधु लोग भी धनुष उठाकर महेंद्र के सदृश प्रभु का परिपालन करते हुए सचेत ही साथ में रह गये।" दूसरे साधारण विद्वान इन पद्यों में गुहदेव की अथवा उनके परिजनों की अतिशंका की गंध तक नहीं सूंघ सकते हैं। परंतु मर्मज्ञ हमारे पूर्वाचार्य, वाल्मीकि-प्रयुक्त शब्दों का विलक्षण मिलाप, प्रेमियों का स्वभाव इत्यादियों का ठीक विवेचन कर यह निश्चय कर देते हैं कि इन पद्यों में गुह और उनके परिजनों के विलक्षण प्रेमान्ध्य का ही वर्णन किया गया है। यह तो स्पष्ट है कि गुहदेव ने भरतजी पर शंका की। अतः लक्ष्मण जी के पर भी शंका करना उसके लिए कोई बडी बात नहीं। तथाच हाल में ठीक कहा गया कि अत्यंत प्रेम-परवश होने के कारण भगवान के शंखचक्र एक दूसरे से अविश्वास करते हैं। अत एव श्री पराशर भट्टार्य स्वामीजी ने परमपद-निवासी नित्यसूरियों का वर्णन करते हुए, श्रीगुणरत्नकोश में कहा कि, "स्नेहादस्थानरक्षाव्यसनिभिरभयं शार्ङ्गचक्रासिमुख्यैः" (परमपद इस लिए निर्भय है कि वहां पर शंख चक्र खड्ग धनुष इत्यादि दिव्यायुध विराजमान हैं, जो अस्थाने (माने जहां जब डरने का कारण नहीं है, वहां भी तब) डरते हुए सदा भगवान का रक्षण करने को तैयार रहते हैं।) जब नीडर परमपद की यह बात हुई, फिर समस्तदोषाकर इस भूमंडल के बारे में हम क्या कह सकते हैं! अतः शंखचक्रों को कदाचित् आपस में स्पर्धा करना शक्य ही है। हमारे आचार्यों ने इस अर्थ का वर्णन करने के बाद, यों सोच कर कि, "इस अर्थ का रस समझनेवाले मिलना कठिन है," उक्त पहले अर्थ को ही उचिततर बता दिया॥ .... (१)

(गाथा.) कण्णुळ्ळे निर्कुम् कादन्मैयाल तोळिळ् * एण्णिलुम् वरुम् एन्निनि वेण्डुवम् *
मण्णुम् नीरुम् एरियु नल्वायुवुम् * विण्णुमाय् विरियुंम् एम्बिरानैये॥ २॥

(सं.) पृथिवीसलिलतेजोमरुद्वियदादिसकलजगदात्मना विस्तृतो भगवान् परमभक्तियुक्ततया नमस्यतां सदैव चक्षुषोः पुरतोऽवतिष्ठेत। चिन्तनमात्रेऽपि समुपस्थितस्स्यात्। किमपेक्षित-मितोऽधिकम्॥

परिगणनायाः परमभक्त्याश्च अविशेषेण संनिदधीत भगवानिति कथ्यतेऽत्र। मूले 'चिन्तनमात्रेऽपि' इति यदस्ति तत् द्राविडवाङ्मर्यादया बहुधाऽर्थानभिधातुमलम्। चिन्तामात्रे, व्यवहरणमात्रे, परिगणनामात्रे

समुपस्थितो भवति भगवानिति। * परमापदमापन्नो मनसाऽचिन्तयद्धरिम् * इत्युक्तरीत्या ग्राहग्रस्तो गजेन्द्रो यदा मनसा केवलमचिन्तयत्तदा * करिप्रवरबृंहिते भगवतस्त्वरायै नमः * इति वक्तुं योग्यतया सरभसमुपाययौ हि सरसस्तीरम्; तथा नाम समुपेयात्। व्यवहारमात्रे—मातृघातुकोऽपि पुमान् मातुस्ताडनेन हस्तव्यथायां जातायाम् अम्ब! इति वदति खल्ववशः; एवमीश्वरसद्भाव मनङ्गीकुर्वन्नपि जनो घटपटकुड्यकुसूलादिपदानां मध्ये ईश्वरपदमपि कदाचिद्व्यवहरति ननु; तदात्वे सोऽयं मत्सद्भावमूरीकृतवानहो! इति प्रहृष्यन् समुपस्थितो भवति। परिगणनामात्रे—एकं द्वे त्रीणि चत्वारीति संख्यातुमुपक्रम्य चतुर्विंशतिः, पञ्चविंशतिः षड्विंशतिः....इति संख्याने क्रियमाणे 'अचित्तत्वानि चतुर्विंशतिः, चेतनः पञ्चविंशः, परमचेतनोऽहमेव ननु षड्विंशः' इति वदन्नुपस्थितो भवति। भगवत उपस्थितिर्नाम केषुचित्साक्षादेव; कतिपयेषु रक्ष्यत्वेनाभिमतिरूपा। परमभक्तिरूप समुत्तुङ्गफलस्य अङ्कुरावस्थायां गणनीयमद्वेषमाभिमुख्यं च वहतो जनानिव एवंविधानपि स्वकीयाभिमुख्यपात्रतां नयतीति प्रतिपत्तव्यम्। [किमपेक्षितमितोऽधिकम्?] अल्पीयसोऽवकाशस्य लाभेऽपि प्रहृष्यति भगवानिति ज्ञातवतामस्माकं नैर्भर्ये का नाम चिन्तेत्युक्तं भवति। पृथिवीसलिलेत्यादिना भगवतस्सर्वशरीरित्वकथनेन 'शरीरी स्वशरीराणां विषये एवमभिमुखो भवतीति किमत्र चित्रम्!' इत्युक्तं भवति॥ .... *

—* दूसरी गाथा—कण्णुळ्ळे निर्कुम् कादन्मैयाल् *—

(हिंदी) पृथिवी जल अग्नि वायु और आकाशरूप समस्त जगत के रूप में विस्तृत होनेवाले भगवान् परमभक्ति के साथ नमस्कार करनेवाले भक्तों के नेत्रों के सामने सदा प्रकट होते हैं। चिंता करने पर भी आप उपस्थित होनेवाले हैं। इससे भी बढकर हम और क्या चाह सकते हैं?

इस गाथा में आळ्वार कहते हैं कि परमभक्ति की भांति गिनती करने पर भी भगवान प्रकट होते हैं। मूलगाथास्थ [एण्णिलुम् वरुम्] शब्द के अनेक अर्थ होते हैं—केवल चिंता करने पर, केवल व्यवहार करने पर अथवा केवल गिनती करनेपर भगवान प्रकट होते हैं। गजेंद्रमोक्षप्रकरण में बताया गया कि "परमापदमापन्नो मनसाऽचिन्तयद्धरिम्" (अत्यंत दुःखी गजराज ने अपने मन में भगवान का चिंतन किया)"; और उसी समय गरुडारूढ भगवान अतिशीघ्र उसके सामने प्रकट हुए। इसी प्रकार चिंता करने वाले दूसरों के सामने भी आप प्रकट होंगे। केवल व्यवहार करने पर कहने का यह अर्थ है कि भगवान का नाममात्र लेने पर भी आप प्रकट होते हैं। कोई अपनी माता पर रुष्ट होकर उसे हाथसे मारना लगता है; इससे जब उसका हाथ दुःखेगा, तब उसके मुँह से यह उद्गार निकलेगा कि, 'हा! माँ!' इसी प्रकार, ईश्वर का इनकार ही करनेवाला भी मानव कभी, 'हा राम!' इत्यादि भगवान का नाम लेता है। यह सुनकर भगवान, यों सोचकर कि 'यह मानव मुझको मानता है' उसके सामने प्रकट होते हैं। गिनती करने पर कहने का यह तात्पर्य है— कोई मानव किन्हीं वस्तुओं को गिनते हुए, 'एक, दो, तीन,........चौबीस, पचीस, छब्बीस........' इत्यादि कहता है। तब भगवान सोचते हैं कि, "यह मानव तत्वों की गिनती कर रहा है। चौबीस अचित्तत्व हुए; पचीसवां तो चेतन हुआ, और छबीसवा

तत्व मैं हूं; इस प्रकार यह मेरा अनुसंधान कर रहा है" और उसके सामने प्रकट होते हैं। इस प्रकरण में प्रकट होने का अर्थ, उस व्यक्ति को प्रत्यक्ष दर्शन देना होगा; अथवा उसकी रक्षा करने का संकल्प करना होगा। तथा च इस प्रकरण का यह तात्पर्य समझ लेना चाहिए कि भगवान परमभक्तिरूप महाफल की अंकुरदशा कहलानेवाली अद्वेष, आभिमुख्य इत्यादि दशाओं में रहनेवालों की भांति ऐसे (माने पूर्वोक्त चिंतन इत्यादि करनेवाले) लोगों के विषय में भी अभिमुख होते हैं। [इससे भी बढकर] इत्यादि। जब भगवान का यह स्वभाव अवगत हुआ कि आप अत्यल्प अवकाश पाने पर भी हृष्ट होते हैं, फिर हमें अपनी श्रेयःप्राप्ति के बारे में शंका करने की आवश्यकता कौन-सी है? [पृथिवी, जल] इत्यादि से भगवान को सर्वशरीरी कहने का यह तात्पर्य है कि, 'शरीरी भगवान के अपने शरीरभूत जीवों के विषय में इस प्रकार अभिमुख होने में कोई आश्चर्य नहीं है'॥ .... (२)

(गाथा.) एम्बिरानै एन्दै तन्दै तन्दैक्कुम् तम्बिरानै * तण्डामरै कण्णनै *
कोम्बराबु नुण्णेरिडै मार्वनै * एम्बिरानै तोळाय् मडनेञ्जमे ॥ ३ ॥

(सं.) अयि मम विधेय हृदय! मन्नाथम् पारम्पर्येण मत्कुलनाथम् शिशिरकमलसदृशनयनम् वल्लीजैत्रवलग्नशालिलक्ष्मीसमाश्लिष्टवक्षसं मत्प्रभुं प्रणम तावत्॥

भगवतो विलक्षणस्वभावानुसन्धानं हि कृतमभस्तात्ताथाद्वितये; तेन च हृदयमतितरामार्द्रमासीन्मुनिवरस्य। अथ तूष्णीमवस्थातुं कथं नु शक्येत? स्वरूपानुरूपवृत्तिर्दुर्वर्जनीया भवति; अत एव स्वहृदयं प्रेरयति महोपकारकमिमं भगवन्तं प्रणमताविति। [मन्नाथम् पारम्पर्येण मत्कुलनाथमित्याम्रेडनम् हृदयगताया आर्द्रतायाः कार्यम्। इमां सूक्तिमनुसृत्यैव भगवान् भाष्यकारः श्री वैकुण्ठगद्ये "भगवन्तं नारायणं मम कुलनाथम् मम कुलदैवतम् मम कुलधनम्" इत्यनुसंदधे। मन्नाथमित्यादि स्तुतिवचनवैलक्षण्यमवहितवता भगवता 'एवं नाम स्तुवन् विलक्षणः पुमान् को नाम संसारमण्डलेऽस्मिन्!' इति विस्फारितेक्षणेन वीक्षितो मुनिवरः तादृशकटाक्षवीक्षण सौवादव मनुभवन्नाह शिशिरकमलसदृशनयनमिति। * तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥ * इति निग्रहशीलो भगवान् हन्त! साम्प्रतं कृपमिवैवं मृदुमधुरकटाक्ष वीक्षाविषयं मां तनोतीति विचिन्त्य वीक्षमाणो मुनिवरो नित्यमज्ञातनिग्रहाया इन्दिराया स्सन्निधानबलादेवैतदिति प्रतिपद्यमानः प्राह वल्लीजैत्रेत्यादि। स्वकीयदिव्यावयवसुषमया सेयं स्वतन्त्रमपि भगवन्तं स्वकिङ्कर मारचयितुं कुशलेति सूचयन्निव सौन्दर्यवर्णनपुरस्सरं तां निर्दिशति॥ .... (३)

—* तीसरी गाथा—एम्पिरानै एन्दैतन्दैक्कुम् तम्पिरानै *—

(हिंदी.) हे मेरे वश्य मन! मेरे नाथ, परंपरा से मेरे कुलनाथ, सुशीतल कमल-सदृश नेत्रवाले और अपने वक्ष से लता सदृश मध्यवाली लक्ष्मीजी का धारण करने वाले मेरे प्रभु का नमस्कार करो॥

पिछली दो गाथाओं में भगवान के विलक्षण स्वभाव का अनुसंधान करने से आळ्वार का हृदय बहुत नरम हो गया। अतः आप चुप रहने में अशक्त होकर, अपने मन को ऐसे महोपकारक भगवान की

स्वरूपानुरूप सेवा करने की आज्ञा दे रहे हैं, प्रकृत गाथा में। [मेरे नाथ, मेरे कुलनाथ] इत्यादि बार-बार रटना आऴ्वार के हृदय की तात्कालिक नरम अवस्था का द्योतक है। इस वाक्य के आधार से ही भगवान श्री भाष्यकार स्वामीजी ने श्रीवैकुंठ गद्य में लिखा, "भगवन्तं नारायणं मम कुलनाथम् मम कुलदैवतम् मम कुलधनम्" इत्यादि। आऴ्वार का यह स्तुतिवचन सुन कर, भगवान ने आँख खोल कर देखा कि "इस संसार मंडल में रहता हुआ ऐसी विलक्षण स्तुति करनेवाला कौन है?" अतः आऴ्वार उस सुशीतल कटाक्ष के माधुर्य का आस्वादन करते हुए उन विशालनेत्रों की स्तुति करते हैं—[सुशीतल-कमल-सदृश-नेत्रवाले।] "तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपामि" इत्याद्युक्त प्रकार, अभी तक निग्रह करते रहे हुए भगवान् अब कैसे अकस्मात् मुझ पर ऐसी कृपादृष्टि डाल रहे हैं?" यों सोचते हुए आऴ्वार ने यह निश्चय किया कि "यह तो अवश्य ही नित्यमज्ञातनिग्रहा (माने कभी दंड देना नहीं जाननेवाली) महालक्ष्मी का प्रभाव है"; अतः उनका वर्णन करते हैं—[लतासदृश मध्यवाली] इत्यादि से। लक्ष्मीजी के सौंदर्य का वर्णन करने का यह भाव है कि लक्ष्मीजी इस सौंदर्य से भगवान को अपने वश करके, चेतन के अपराध से रुष्ट होकर उसे दंड देने के उद्यत उनको शांत करके, और उनका स्वातंत्र्य भी दबा कर उन्हें अनुग्रह करने के उद्यत करती हैं॥ .... (३)

(गाथा.) नेञ्जमे नल्लै नल्लै उन्नैप्पेत्ता लेन्शेय्योम् * इनियेन्न कुरैविनम् *
मैन्दनै मलराळ् मणवाळनै * तुञ्जुम्पोदुम् विडादु तोडर् कण्डाय्॥ ४॥

(सं.) अयि हृदय! तव साद्गुण्यं किमिति वर्णयेयमहम्? त्वदानुकूल्ये लब्धे सति किं नामास्ति मम दुस्साधम्? [अवाप्तसमस्तकाम एव खल्वहम्।] नित्ययुवानं निरतिशय-भोग्यताशालिलक्ष्मीवल्लभम् अनारत मनुवर्तेथाः॥

कृतज्ञता हि जनिधर्मणां प्रधानतमो गुणः। 'अयि हृदय! तं प्रणम तावत्' इत्युक्तिसमसमय एव सम्मुखीनतां यतः प्राचीकशन्मानसं निजम्, ततोऽत्यन्तं प्रहृष्यन्मुनिवरः कृतज्ञतामाविष्कुर्वन् विशेषतोऽभिनन्दति तत्। बालकमुद्दिश्य 'पठ तावत्, पाठशालां प्रयाहि तावत्' इत्युक्तिमात्रे यदि तस्मिन्नाभिमुख्यं पश्यतः पितरौ, अथ किं कुरुतः? भृशमभिनन्दतः, तथा ह्येतत्। * मन एव मनुष्याणां कारणं बन्धमोक्षयोः * इति सर्वानुभवसाक्षिक वचनानुसारेण कथ्यते त्वदानुकूल्ये लब्धे सतीत्यादि। उभौ सखायौ गृहात्प्रस्थितौ भगवन्मन्दिरनिषेवणकुतूहलेन। अन्यतरो मध्येमार्गं नाटकशालामवेक्ष्य तत्र प्रविष्टः, अपरस्तु यथोद्देशं मालय-मुपेत्य विलक्षणानन्दमन्वभूत्; किंमत्र कारणं वक्तुं शक्यम्? मनसो वृत्तिस्तादृशीत्येव हि सुवचम्। आनुकूल्यावमर्शसमयेषु मनसस्संभावन मार्याणामनर्घचर्या। दिव्यप्रबन्धेषु मनसोऽभिनन्दनं क्रियासमभिहारेण वीक्षितुं योग्यम्। स्वात्मीयहर्षप्रकर्षप्रकाशनपर्याय एतदिति प्रतिपत्तव्यम्।

अथ नित्ययुवानमित्यारभ्य अनारतमनुवर्तेथा इति हृदयं प्रत्युपदेशः (अधस्तात्पञ्चमे दशके यथा, तथा) नैच्यानुसन्धानेन परावर्तितुं माभूत्प्रयत्नस्तवेत्यभिसन्धिना क्रियते मुनिवरेण। स व्यापिविशेषस्सन्निहितो भवितेति प्रतिभानादेवमभिचीयत इति मर्मज्ञा आचार्या अनुगृह्णन्ति। भविष्यति च तथैवोपरिष्टात्॥

—* चौथी गाथा—नेञ्जमे नल्लै नल्लै उन्नैप्पेत्ताल् *—

(हिंदी.) हे मन! वाह! वाह! तुम्हारे अच्छेपन की मैं कैसे प्रशंसा करूं? तुम्हारे अनुकूल होने पर मैं क्या नहीं कर सकूंगा? [मेरी सभी इच्छाएं पूर्ण होंगी ही।] नित्ययुवा और असीम भोग्यतावाली लक्ष्मीजी के वल्लभ भगवान की निरंतर सेवा करो॥

कृतज्ञता मानवों का मुख्य गुण माना जाता है। पिछली गाथा में आळ्वार ने अपने मनको कहा कि 'भगवान को नमो।' यह सुनते ही मन प्रणाम करने को तैयार हो उठा। अत: इस गाथा में आळ्वार अपनी कृतज्ञता प्रकाशित करते हुए उसकी (मनकी) प्रशंसा करते हैं। जैसे कि मावापों की यह बात सुनते ही, कि, "बेटा! पाठशाला जा और विद्या सीख" यदि बालक पाठशाला जानेकी तैयारी करें, तो मावाप उसकी प्रशंसा करते हैं; इसी प्रकार आळ्वार भी अपने मनकी प्रशंसा कर रहे हैं। शास्त्र का यह प्रसिद्ध वचन है कि "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" (अर्थात् मन ही मानव के संसार अथवा मोक्ष पाने का कारण है)। एतदनुसार कहा जा रहा है [तुम्हारे अनुकूल होने पर] इत्यादि। दो मित्र मंदिर जाने की इच्छा से घर से निकले। मार्ग में एक चित्रगृह दीख पडा। एक जन मंदिर जाने की बात छोड कर चित्र देखने गया; दूसरा तो अपने पहले संकल्प के अनुसार मंदिर ही गया और भगवान के दर्शन कर घर लौटा। इन दोनों की चर्या में इस अंतर का कारण यदि पूछा जाय, तो हम इतना ही कह सकते हैं कि उनके मन वैसे थे। महात्माओं का यह स्वभाव है कि जब वे अपने मन को अपना अनुकूल देखते, तब उसकी प्रशंसा करते हैं। दिव्यप्रबंधों में तो वारंवार मन की प्रशंसा दीख पडती है। समझना चाहिए कि इसका तात्पर्य, आळ्वार के अपने अत्यधिक हर्ष का प्रकाशन करना है।

[नित्ययुवा] इत्यादि हृदय को उपदेश है। नित्यसेवा करने का आदेश इसलिए दिया जा रहा है, कि आळ्वार को यह भय है कि अपना मन (पांचवें दशक की भांति) नैच्यानुसंधान करता हुआ कदाचित् भगवान से दूर हट जानेका विचार कर डालेगा। मर्मज्ञ आचार्यों का यह कहना है कि हाल में ही आळ्वार को ऐसा लग रहा है कि वह रोग (नैच्यानुसंधान पूर्वक हट जाना) अपने को शीघ्र आनेवाला है। आळ्वार का यह भय सत्य होनेवाला है॥ .... (४)

(गाथा.) कण्डाये नेञ्जे करुमङ्गळ् वायुकिन्नु * ओर् एण्णदानु मिन्निये वन्दियलुमारु *
उण्डानै उलहेळु मोर् मूवडि कोण्डानै * कण्डुकोण्डनै नीयुमे ॥ ५ ॥

(सं.) भो हृदय! कार्यसंसिद्धौ संमुखीनायां सत्याम् चिन्तालेशमन्तराऽपि सा फलेप्रहिर्भवतीत्यमुमंशम् अनुभवसाक्षिक मद्राक्षीः खलु त्वम्। सप्तलोकीनिगरणसमर्थम् लोकविक्रान्तिदक्षं च भगवन्तं हे हे! त्वमपि खल्वनायास मलमथाः॥

दशकमिदं निर्हेतुककृपाप्रतिपादनपरमिति निर्वहनामाचार्याणामियं गाथा अत्यन्त मवधानपथे विन्यस्तेति वेदितव्यम्। अधस्तात् द्वितीयगाथायाम् * एण्णिलुम् वरुम् * [चिन्तामात्रेऽप्युपस्थितो भवति] इति अनु-

गृहीतम्। चिन्तारूपव्याजमात्रमप्यनपेक्षितम् इति प्रत्याययितुम् अस्यां गाथायाम् * ओर् एण् तानुमिन्त्रिये * [चिन्तालेशमन्तराऽपि] इत्यनुगृह्यते। अत्रेदमववेयम्; "अहेतुत्वे सति अतिप्रसङ्गवारकत्वं व्याजत्वम्" इति तावद्व्याजलक्षणमाचक्षते शास्त्रज्ञाः। अत्र अतिप्रसङ्गवारकत्वदलनिवेशनेन हेतुत्वशङ्काकलङ्ककणिकाप्रसङ्गस्संभवितुमर्हति; तस्याप्यवकाशं वारयन्मुनिवर इमां गाथां विशिष्टोक्तिसनाथामनुगृह्णातीति। सत्यमेतन्निध्यानेनैव वेदान्ताचार्याः * अव्याजोदारभावात् * इति (द्र. ता.) समगिरन्त। समासशरीरे 'व्याजमप्यन्तरा' इति अपिशब्दयोगस्तावदवर्जनीयः। 'निर्हेतूदारभावात्' इति कथने तत्र समासशरीरे अपिशब्दयोगो नान्वियात्; अव्याजेत्यत्र तु तद्योगविरहो नान्वियादिति प्रेक्षन्तां प्रेक्षावन्तः।

चिन्तामात्रमप्यन्तरेण स कार्यकर्तेत्यमुमंशं द्रढयितुमितिहाससिद्धितयं प्रदर्श्यते सप्तलोकीनिगरणं लोकविक्रान्तिश्चेति। प्रलयापद स्संनिधाने एवंविधा रक्षा भवत्विति वा भवित्रीति वा नहि खलु कोऽपि दध्यौ। लोकविक्रान्तिसमयेऽपि 'अस्मच्छिरसि भगवत्पादारविन्दघटना भवित्री' इति च न कोऽप्यमंस्त। तथाच भगवतः प्रकृतिरियमित्युपपादितं भवति॥

—* पांचवी गाथा—कण्डाये नेञ्जे करुमङ्गळ् वायुविकन्नु *—

(हिंदी.) हे मन! तुमने देखा न, कि यदि कार्यसिद्धि होनेवाली हो, तो वह हमारी चिंता के भी विना हो जायगी? वाह! वाह! सातों लोकों को निगलनेवाले और तीन पगों से नापनेवाले भगवान को तुमने भी प्रयास के विना पाया॥

समझना चाहिए कि इस गाथा का गाढ विवेचन करने के फलतया ही हमारे पूर्वाचार्यों ने यह सिद्धांत किया कि प्रकृत दशक में भगवान की निर्हेतुक कृपा का वर्णन किया जा रहा है। पिछली दूसरी गाथा में बताया गया कि "एण्णिलुम् वरुम्" (माने हमारे चिंता करने पर भगवान प्रकट होंगे)। प्रकृत गाथा में कहा जा रहा है कि चिन्तालेश के विना भी कार्यसिद्धि होगी। इसका यह भाव है—शास्त्रकार 'व्याज' (माने बहाना) नामक एक पदार्थ का वर्णन करते हैं। उसका लक्षण है, "अहेतुत्वे सति अतिप्रसङ्गवारकत्वम्"; माने व्याज वह है जो (उद्दिष्ट किसी काम का) वास्तव में कारण न होता हुआ भी इस लिए कारण बताया जाता है, कि अन्यथा किसी नियम का भङ्ग हो जायगा। अर्थात् व्याज,—दूसरों को बताने के लिए एक कारणाभासमात्र है। तथाच इसमें असल कारण होने की शंका कदाचित् की जा सकती है। अब आळ्वार कह रहे हैं कि ऐसे किसी व्याज के अभाव में भी भगवान की कृपा बहेगी। इस गाथा का ठीक विवेचन करके ही श्रीवेदांतदेशिक स्वामीजी ने इस दशक का सारांश "अव्याजोदारभावात्" बताया। अव्याजशब्द का अर्थ होता है—'व्याज के भी विना।' निष्कारण, निर्हेतु इत्यादिशब्दों का यह अर्थ नहीं होगा। अतः निर्हेतुक इत्यादि शब्दों के बदले में अव्याजशब्द का प्रयोग करनेवाले आचार्य का यही अभिप्राय है कि भगवान की कृपा किसी प्रकार की व्याज की भी अपेक्षा नहीं करती।

अब इस अर्थ के, कि हमारी चिंता के भी विना भगवान हमपर कृपा करेंगे, दो सुंदर दृष्टांत दिये जाते हैं [सातों लोकों को निगलनेवाले] इत्यादि से। जब प्रलयापद आयी, तब किसी को उसका

ख्याल तक न रहा, कि अब प्रलय आनेवाला है; फिर भगवान से माँगे कौन कि, "मुझे इसमे बचाइएगा"? एवं किसी की आशा भी न रही कि भगवान हमारी रक्षा करेंगे। इतना होने पर भी भगवान ने केवल अपनी कृपा से समस्त लोकों को निगलकर, अर्थात् अपने पटे में रख कर सबको बचाया। अतः निर्हेतुक कृपा का यह सुंदर दृष्टांत हुआ। एवं भूमि का नापना भी कृपा का ही काम है। तथाहि—आळ्वार का अभिप्राय है कि उस समय भूमि नापने के बहाने भगवानने सब के सिरपर अपना श्री पाद धरा। किसीने यह महाभाग्य माँगा नहीं, इसका ख्याल तक किया नहीं। तथा च ये दोनों उक्त अर्थ के बडे सुंदर दृष्टांत सिद्ध हुए॥ .... (५)

(गाथा.) नीयुम् नानुम् इनेर् निर्किल् * मेल् मचोर् नोयुम् शार्कोडान् नेञ्जमे शोन्नेन् *
तायुम् तन्दैयुमाय् इव्वुलहिनिल् * वायु मीशन् मणिवण्ण नेन्दैये॥ ६॥

(सं.) हे हृदय! तव च मम चैतादृश आभिमुख्ये सुस्थिरे सति, मातृवत्प्रियपरः पितृवद्धितपरश्च सन् लोकेऽस्मिन्नवतीर्य संनिद्धानस्सर्वेश्वरो मणिसवर्णः स्वामी यावज्जीव मस्माकं न किमप्यवद्यमुपनमयेत्; तदिदमहं ते सुदृढमवोचम्॥

"सम्पदामग्रे विपदः, विपदामग्रे सम्पदः" "दुःखस्योपरि सुखम्, सुखस्योपरि दुःखम्" "संयोगा विप्रयोगान्ताः" इति लोकानुभवसाक्षिकानां न्यायानामनुसंधानेन मुनिवरस्य चेतसि काचिदाशङ्का समजनि—उन्मस्तकमिदानीमुज्जृम्भमाणस्यास्य ब्रह्मानन्दस्य काचित्प्रच्युतिस्स्यात्किमु! इति। अनया शङ्कया व्यामुग्धं हृदयं संबोध्य तदुपच्छन्दनरूपमिदमभिधीयते। मातापितृसहस्रेभ्योऽपि वत्सलतमो भगवान् स्वयं न कमपि क्लेशमुपनमयेदस्माकम्। परंतु "आत्मैव रिपुरात्मनः" इत्युक्तरीत्या अस्मदीये क्लेशे हेतुभावस्सत्यमस्माकमेव स्यात्। हे हृदय! तव च मम च यदिदानीमस्त्याभिमुख्यम् तदेतद्यदि न व्यपैति, यदि वा सुस्थिरमवतिष्ठेत, तर्हि स भगवान् न कमपि क्लेशमुपधास्यतीति विश्वसिहि इत्याश्वासन मातनोति मुनिवरः। अत्र मूले "न कमपि व्याधिमुपजनयेद्भगवान्" इति व्याधिशब्दोल्लेखो वर्तते। अयोग्यतानुसन्धानेन [नैच्यानुसन्धानेन] भगवद्विसर्जनकामनैव व्याधिशब्दविवक्षितेत्याचार्याः। भगवतोऽत्र मातृसाम्यं केवलमनुक्त्वा पितृसाम्यमपि कथितमित्येतदवधेयम्। हितपरो हि पिता नाम। तदात्वे अप्रियं सत् कालान्तरे यद्भवति प्रियम् तदेव हि हितं नाम। तादृशहितधिया यदि कदाचिद्भगवानपि स्वविश्लेषं जनयित्वा क्लेशयेत्तदपि कृपाकार्यमेव मन्तव्यमिति सूचितं भवति।

[यावज्जीवमस्माकं न किमप्यवद्य मुपनमयेत्] निषिद्धानुष्ठानेषु प्रवृत्तिमुत्पाद्य वा, प्रयोजनान्तरेषु साधनान्तरेषु च रुचिमुत्पाद्य वा, चिरन्तनसञ्चितकर्मफलानुभवभैयभीमुत्पाद्य वा, नैच्यानुसन्धानेनापसर्पणेच्छामुत्पाद्य वा न कमपि क्लेशमावहेद्भगवानिति भावः॥ [तदिदमहं ते सुदृढमवोचम्] गीतायाम् * भूय एव महाबाहो! श्रृणु मे परमं वचः * इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे * इति प्ररोचनपूर्वकं येये परमार्थाः प्रोक्ताः परमात्मना, तेभ्योऽप्ययमभ्यर्हितमिदं मुनिवरस्य वचनमिति शब्दसंदर्भतः प्रतिपत्तव्यं भवति॥

—* छठी गाथा—नीयुम् नानुम् इन्नेर् निर्क्किल् *—

(हिंदी.) हे मन! यदि तुम और मैं इसी आभिमुख्य में स्थिर रहेंगे, तो माता के सदृश प्रियपर और पिता के सदृश हितपर होकर इस लोक में अवतार लेकर हमारे पास आनेवाले, मणि के सदृश, हमारे स्वामी हमारे जीवन काल में हमें किसी प्रकार का दुःख नहीं देंगे; मैं सुदृढ कहूंगा कि यह बात सत्य है॥

यह तो लोकानुभव की बात है कि संपत्ति के बाद विपत्ति आती, और सुख के बाद दुःख मिलता है। इसका ख्याल करनेवाले आळ्वार के मन में यह चिंता उत्पन्न हुई कि, "अभी सीमातीत ब्रह्मानंद का जो अनुभव चल रहा है, यह क्या कायम रहेगा, अथवा टूट जायगा?" इस शंका से व्याकुल अपने मन को आळ्वार आश्वासन करते हुए यह गाथा गाते हैं। भगवान हजारों माबापों से भी अधिक वत्सल हैं; अतः वे कभी हमें क्लेश नहीं देंगे। परंतु "आत्मैव रिपुरात्मनः" इत्याद्युक्त प्रकार हम ही अपने क्लेश का हेतु होते हैं। अतः हे मेरे हृदय! तुम सुदृढ निश्चय कर लो कि यदि हम दोनों अभी की भांति सर्वदा भगवान के अभिमुख ही रहेंगे, और इस निष्ठा से न चूकेंगे, तो भगवान हमें कोई दुःख नहीं देंगे। मूलगाथा में "(भगवान हमें) और किसी रोग को आने नहीं देंगे" करके रोग शब्द का प्रयोग किया गया है। आचार्यों का अभिप्राय है कि अपने को अयोग्य मानकर भगवान से दूर हट जाने की इच्छा ही रोग कहला रहा है। भगवान को माता और पिता के सदृश कहने का यह भाव है—अपनी संतान के बारे में माता का काम अलग और पिता का अलग होता है। माता प्रियपर होती है और पिता हितंपर। तत्काल सुख देनेवाला प्रिय है और तत्काल दुःख देने पर भी बाद में सुख देनेवाला हित है। अतः, पिता कहने का यह भाव हुआ कि बाद में कल्याण करने के लिए यदि भगवान हाल में कभी अल्प विश्लेषदुःख भी दें, तो भी उसे कृपाकार्य ही समझना चाहिए।

[किसी प्रकार का दुःख नहीं देंगे] पापाचरण में प्रवृत्ति, फलांतरों अथवा उपायांतरों में आशा, प्राचीन कर्मफलानुभव करने में व्यग्रता, नैच्यानुसंधान करने के कारण भगवान से दूर हट जाने की इच्छा इत्यादि दुःख के हेतु हैं। इनमें से कोई भी हमें उत्पन्न नहीं होगा। **[मैं सुदृढ कहूंगा]** इत्यादि। बात करते करते, बीच में, "मैं कहता हूं, सुनो" इत्यादि कहना उस बात की मुख्यता का सूचक है; जैसे गीताजी में बीच बीच में भगवान कहते हैं—"भूय एव महाबाहो! श्रृणु मे परमं वचः," (हे महाबाहु! फिर मेरी यह श्रेष्ठ वार्ता सुनो), "इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे" (असूयारहित तुमसे मैं दूसरी एक रहस्य वार्ता कहूंगा) इत्यादि। इस अवतारिका के बाद भगवान ने (गीता में) जो कहा, वे सभी श्रेष्ठ शास्त्रार्थ ठहरे। समझना चाहिए कि हालमें आळ्वार अपने मन से जो बात कर रहे हैं, यह उक्त गीतावचनों से भी बढकर श्रेष्ठ उपदेश है॥ .... (६)

(गाया.) एन्दैये येन्नुम् एम्बेरुमा नेन्नुम् * शिन्दैयुळ् वैप्पन् शोल्लुवन् पावियेन् *
एन्दै येम्बेरुमा नेन्नु वानवर् शिन्दैयुळ् वैत्तु * शोल्लुम् शेल्वनैये॥ ७॥

(सं.) 'अस्मत्सत्ताहेतुभूत! अस्मत्स्वामिन्!' इति श्रीवैकुण्ठनिकेतनैर्नित्यसूरिभि रतुसंधातुमभिधातुं च योग्यं परात्परं भगवन्तं हे हन्त! पापी सोऽहं स्तौमि 'मम तात! मम शेषिन्!' इति ॥

अव्यवस्तनगाथायां नैच्यानुसन्धानेनापसर्पणेच्छामपि भगवान् नोत्पादयेदिति मुनिवरेण मनसा यद्विचिन्तितम्, हा बत! सैव मुखं प्रदर्शयितुमुपचक्रमे। "अस्मदीय गृहस्य सम्यग्द्वारे कृते सति सर्पभयं न स्यात्" इति कथयन्कश्चित् सद्य एव क्वापि कोणे मुखं प्रदर्शयन्तं सर्पमपश्यदिव। हेयस्य वस्तुनः प्रसङ्गमात्रमपि तदुपस्थापकं भवतीव। सङ्कल्पसूर्योदये श्रीमान्वेङ्कटनाथार्यः प्राह * दोषानुचिन्तनार्था स्मृतिरपि दूरीकरोति वैराग्यम् * इति। विरक्तिवृद्धिकामः कोऽपि महान् तदर्थं विषयाणां दोषाननुचिन्तयितुमारेभे; दोषाश्रयतया विषयस्मरणमवर्जनीयं हि जातम्; तावन्मात्रेऽपि विरक्ति विगलनाभिमुखी बभूवेति तात्पर्यम्। एवं नाम प्रसङ्गमात्रेणापि बाधकेषु वस्तुष्वन्यतमं हि नैच्यानुसन्धानतोऽपसर्पणकाङ्क्षणम्; चिन्तितमात्रेण तदुपनतमिव हन्त। तत्स्फोरिका सेयं गाथा। निश्चानुभवमार्गमागिभि रसर्वोत्तुङ्गैर्नित्यसूरिभिर्यानि वचांसि वक्तुमर्हाणि तानि सर्वथाऽप्यनधिकारी सोऽहमवोचमिति कथनमिह भगवतस्सकाशादपसर्पणप्रागभावपेशुनमिति मन्तव्यम् ॥

[पापी सोऽहम्] सात्त्विकोऽपि सन् कोऽपि पुमान् रजस्तमोभिर्मन्नेन हेतुना समन्यग्नि प्रक्षिप्य पश्चात्सत्त्वोद्रेकेणानुशिश्य इति श्रुतम्। एवमेषोऽपि मुनिवरोऽनुशेत इत्याचार्याः। ननु भगवन्नामचिन्तनसंकीर्तने किमहो! अग्निप्रक्षेपतुल्यपापम्? इति पृच्छा प्रादुर्भवेत्; तदिदं मुनिवरस्यास्य धियेति नमादनते च। देवभोग्यं पुरोडाशं स्पृशन्तं शुनकमिव ह्यात्मानं मन्यतेऽधुना मुनिवरः ॥ .... *

—* सातवीं गाथा—एन्दैयेयेन्नुम् एम्पेरुमानेन्नुम् *—

(हिंदी.) "हे हमारे सत्ताधारक! हे हमारे स्वामिन्!" इत्यादि प्रकार नित्यसूरियों की चिंता व प्रशंसा पाने योग्य परात्पर भगवान को, हाय! पापी मैं, "हे मेरे बाप! हे मेरे नाथ!" इत्यादि कहता हुआ चिंतन व स्तवन कर रहा हूं ॥

—— पिछली गाथा में आळ्वार ने अपने मन में निश्चय किया कि अब मुझे नैच्यानुसंधान करता हुआ भगवान से छूटनेकी आपत्ति नहीं आवेगी; परंतु हाय! इस गाथा में वही रोग अपना सिर दिखा रहा है। कोई अपने गृहांगण में बैठ कर कहता था कि, "हमारे इस गृह की ठीक मरम्मत करने पर यहां सांप का भय न रहेगा।" उतने में किसी कोने में ऐक सांपने अपना सिर दिखाया। हेय वस्तु का प्रसंग करना भी उसका आह्वान बनेगा। यथा संकल्पसूर्योदय नाटक में श्रीवेदांतदेशिक स्वामीजी ने कहा, "दोषानुचिन्तनार्था स्मृतिरपि दूरीकरोति वैराग्यम्।" कोई महात्मा अपना वैराग्य दृढ करने के लिए विषय दोषों का चिंतन करने लगा। इस प्रसंग से उसे विषयों का भी चिंतन करना पडा। इतने मात्र से उसका वैराग्य घटनें लगा। इस प्रकार अपने प्रसंगमात्र में भी अनिष्ट उत्पन्न करनेवाली वस्तुओं में एक ठहरा यह नैच्यानुसंधान और तत्प्रयुक्त दूर हटने की इच्छा। अर्थात् आळ्वार के उसका नाम लेनें मात्र से

वह उनके सामने आकर खडा हो गया। प्रकृत गाथा इस अर्थ का सूचक है। अर्थात्, "विषयलोलुपता से सर्वथा दूर रहकर भगवान का नित्यानुभव करनेवाले नित्यसूरियों के वचनों का अनुकरण, सर्वथा उसका अनधिकारी मैं कर रहा हूं" कहनेवाले आळ्वार को अब भगवान से छूट जाने की बुद्धि ही उत्पन्न होने वाली है।

[पापी मैं] आचार्य कहते हैं कि सात्विक ही रहनेवाला एक पुरुष कदाचित् रजस्तमोगुणों के वश होकर दूसरों का घर जलाकर, बाद में अपना स्वाभाविक सत्वगुण पाकर जैसे अपने काम के लिए पछतायगा, इसी प्रकार आळ्वार अपने कृत भगवदनुभव के लिए अब पछताते हैं। यह सुनकर कोई पूछेगा कि क्या भगवान का अनुभव, चिंतन, संकीर्तन इत्यादि करना, अग्निप्रक्षेप के सदृश पाप है। इसका प्रत्युत्तर यही है कि हाल में आळ्वार ऐसे ही मान रहे हैं; क्योंकि वे अब अपने को देवयोग्य पुरोडाश छूनेवाले कुत्ते के सदृश अघकारी मान बैठे हैं॥ .... (७)

(गाथा.) शेल्व नारण नेन्न शोल् केट्कलुम् * मल्हुम् कण्पनि नाडुवन् मायमे *
अल्लु नन्पहलुम् इडैवीडिन्नि * नल्हि येन्नै विडान् नम्बि नम्बिये॥८॥

(सं.) श्रीमन्नारायणेति (केनचित्पथिकेनोच्चारितं) दिव्यनाम यदृच्छया श्रुत्वा तावन्मात्र एव बाष्पपर्याकुलनयनो भवामि हन्त; भगवन्तं तमन्विष्यामि च। अत्याश्चर्यं ह्येतत्। शुभगुणपुष्कलस्स च भगवान् दिवा निशि च निरन्तरं मामपरित्यजन् मय्येव व्यामुग्धो विराजते॥

भगवतश्चिन्तनं कीर्तनं च महत्तरं पातकमिति धृतवान् मुनिवरो भगवद्गुणप्रचारविरहितं जीर्णकुड्य-कुहरं किमप्यन्विष्य तत्र प्रयात इव। यथाकथञ्चिदपि तमेनमात्मसात्कर्तुकामो निसर्गसुहृत्परमपुरुषः कमप्युपाय-मकुरुत; यस्मिन् रहस्स्थले मुनिवरोऽयं निषसाद, तत्रोपान्ते काचन वेदिका; भारवाहिनः पान्थाः स्वं स्वं भारं तत्र मुहूर्तं विन्यस्य विश्रम्य प्रयान्ति; तदात्वे कश्चन भारवाही पथिको भारवहनक्लेशमूला तस्यां वेदिकायां भारावरोपणोद्युक्तः श्रीमन्नारायणेति उच्चैः कीर्तयन् भारमवारोपयत्। मुनिवरस्य वैमुख्यं व्युदस्य आभिमुख्यं सम्पिपादयिषुणा परेण पुंसा हि कारितोऽयमभ्युपायः। श्रीमन्नारायणेति तदुक्तिश्रवणमात्रेण मुनिवरो 'हा हा! किमेतत्! कोऽयं मयि भगवतः पक्षपातोऽतिविलक्षणः। उदासीनमपि मां सूत्रानुबद्धशकुनिक्रमेण हि भगवानाकर्षति; अहो! कीदृगस्य करुणाविभवः!' इति विस्मितो बाष्पपर्याकुलमुखो भूत्वा विसृष्टचरं भगवन्त मन्वेष्टुमुपचक्रमे। तदिदमभिवीयते गाथायामस्याम्। पथिकेन नारायणेति केवलं कथिते इयान् व्यामोहो न स्यादिव मुनिवरस्य। "दिव्यसूरीणां परिसरे ब्रह्मचारिनारायणनामवक्ता नैकोऽपि" इति प्रथा च वर्तते। प्रोक्ते नामनि अर्थानुसन्धानमप्यनपेक्षितम्; विषहरणमन्त्रा यथा शब्दशक्त्यैव केवलं कुर्वन्ति कार्यं तथा भगवन्नामापि इति वेदितव्यम्॥ .... (८)

—* आठवीं गाथा—शेल्वमारणनेंश शोल् केट्टलुम् *—

(हिंदी.) (किसी पांथ से उच्चरित) श्रीमन्नारायण दिव्य नाम के आकस्मिक श्रवणमात्र से मेरी आँखें आँसू से भर जाती हैं; और मैं उन्हें ढूंढने लगता, हूं। ओह! यह कैसे आश्चर्य की बात है! शुभगुणपरिपूर्ण वे भगवान भी रातदिन विच्छेद के विना मुझ पर कृपा व प्रेम करते हुए, मुझसे मिलकर ही रहते हैं॥

भगवान के चिंतनकीर्तनों को बड़ा पाप मानने वाले आळ्वार ने भगवद्गुणप्रचार से सर्वथा विरहित किसी जीर्ण-कुड्य की गुफा में जाकर बैठ गये। उनकी आशा थी कि ऐसे करने से भगवान भुले जायंगे। परंतु भगवान ने आळ्वार को भूलना नहीं चाहा। अतः उन्होंने आळ्वार को अपने वश करने के लिए एक उपाय रचा। जिस दीवार के पास आळ्वार बैठे थे, उसकी दूसरी ओर एक चबूतरा रहा, बोझा ढोते उस रास्ते से निकलनेवाले जिस पर अपना बोझा रखकर थोडा आराम लेते थे। हाल में एक मारवाहक उधर आया और जोर से 'श्रीमन्नारायण' कहते हुए उसने उस चबूतरे पर अपना बोझा उतार दिया। यह शब्द सुनते ही आळ्वार का नैच्यानुसंधान शांत हुआ और उन्होंने विचार किया कि, "ओह! यह क्या है मुझ पर भगवान का विलक्षण पक्षपात! मैंने आपसे दूर भागना चाहा; परंतु आप मुझे अपनी ओर खींच रहे हैं। ओह! कैसी है इनकी कृपा!" यों सोचकर आळ्वार आश्चर्यमग्न व अश्रुपूर्णनयन होकर अपने से परित्यक्त भगवान को ढूंढने लगे। यह अर्थ इस गाथा में बताया जा रहा है। यदि पथिक ने "श्रीमन्नारायण" कहने के बदले में केवल 'नारायण' कहा होता, तो शायद आळ्वार को इतना व्यामोह उत्पन्न नहीं होता। आळ्वारों की गोष्ठी में कोई ब्रह्मचारीनारायण का नाम नहीं लेगा; उस नामकी कोई कीमत भी न रहेगी। उक्त नाम का अर्थानुसन्धान करने की भी आवश्यकता नहीं रहती; विषहरमंत्र की भांति केवल शब्दशक्ति से ही भगवान के दिव्यनाम अपने काम कर सकते हैं॥ (८)

(गाथा.) नम्बियै तेन्कुरुङ्गुडि निन्ऱ * अच्चेम्बोने तिहलुम् तिरुमूर्तियै *°

उम्बर् वानवर् आदिय ञ्जोदियै * एम्बिरानै एन्शोल्लि मरप्पनो॥ ९॥

—(सं.) वैष्णववामनक्षेत्रे [तिरुकुरुङ्गुडिदिव्यदेशे] विराजमानं हिरण्मयदिव्यमूर्तिशालिनम् ब्रह्मेशानादिभ्योऽप्यत्यन्तविलक्षणानां नित्यसूरीणां जीवातुभूतं तेजसां राशिमूर्जितमस्मत्प्रभुं हन्त! केन हेतुना विस्मर्तुं प्रभवामि॥

भगवद्विषयावगाहने यद्यपि सुखातिशयो वर्तते, तथाऽपि मुहुर्वियोगादिक्लेशानामपि संभवेन भगवतस्सर्वात्मना विस्मरणं शाश्वतिकसुखनिदानमिति केचिदवोचन्निव; अथवा मुनिवरः स्वयमेव मेने; अहह! भगवतो विस्मरणं कथमिव सुशकमिति सहेतुकं कथयति गाथयाऽनया। शठकोपमुनिवरस्यास्य दिव्यचरितप्रबन्धेषु तिरुकुरुङ्गुडिनामकदिव्यदेशाधीशस्य भगवतो वरप्रसादेनावतीर्णोऽयमिति प्रथा निबद्धाऽस्ति। स एवार्चामूर्तिर्भगवानधुनोपशमाय मुनिवरेऽस्मिन् वैमुख्यविध्वंसिनीं परमकृपां प्राचीकशदिव। अत एव गाथायामिह

तदुत्कीर्तनमुपनिबद्धम् । तस्य भगवतः पूर्ण इत्येव नाम प्रथते । शुभगुणपूर्णः, सौन्दर्यलावण्यपूर्णः, परमकृपापूर्ण इत्यादयोऽर्थास्सुसंगताः । तं कथमहं विस्मरेयम्? * य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते * इत्याम्नातदिव्यमूर्तिं कथमहं विस्मरेयम् । नित्यसूर्यनुभाव्यं दिव्यमङ्गलविग्रहं मामपि क्षुद्रमनुभावयन्तं परमकारुणिकं कथमिव विस्मरेयम्? विस्मरणार्हहेतुलेशविरहेण न कथञ्चिदपि विस्मर्तुं प्रभवामीति कथयति ॥ .... (९)

—* नवमी गाथा—नम्बियैत्तेन् कुरुङ्गुडि निन्न *—

(हिंदी) तिरुक्कुरुङ्गुडिनामक वैष्णववामनक्षेत्र में विराजमान, कल्याणगुण परिपूर्ण, हिरण्मय दिव्यमंगलविग्रहवाले, ब्रह्मरुद्रादियों से भी अतिविलक्षण नित्यसूरियों के जीवातुभूत, और तेजोराशि मेरे नाथ को मैं कौन-से कारण भूल सकूंगा?

किसीने आळ्वार से कहा कि, "यद्यपि भगवान पर चित्त लगानेवाले को विलक्षण आनंद मिलता है; तथापि उसे बीच बीच में विरहदुःख भी सहना पडता है, जो बहुत ही कठिन है। अतः सर्वथा भगवान को भूल जाने से ही मानव अटूट सुख भोग सकता है।" अथवा स्वयं आळ्वार को ही ऐसे लगा होगा। अतः इसके प्रत्युत्तर में आप प्रकृत गाथा में कारणपूर्वक कह रहे हैं कि, "तुम्हारी बात सत्य होगी; परंतु मैं कैसे भगवान को भूल सकूंगा? यह तो अशक्य है।" आळ्वार की जीवनी में बताया गया है कि तिरुक्कुरुङ्गुडि क्षेत्राधीश भगवान के अनुग्रह से ही इनका अवतार हुआ। मालूम पडता है कि हालमें भी अर्चारूपी उन्हीं भगवान ने आळ्वार के सामने प्रकट होकर इन पर ऐसी विलक्षण कृपा की, जिससे इनका मैच्यानुसंधान सुतरां मिट गया। अतः प्रकृत गाथा में उन भगवान का उल्लेख किया जा रहा है। उनका शुभनाम 'नम्बि,' माने 'पूर्ण' है। इसका अर्थ है, शुभगुणपूर्ण, सौंदर्यलावण्यादिपूर्ण, परमकृपापूर्ण इत्यादि। अतः आळ्वार कहते हैं कि ऐसे भगवान को मैं कैसे भूल सकूंगा? "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" (सूर्यमंडल के मध्य में सोने के सदृश रूपवाले जो महापुरुष दीखते हैं) इत्याद्युपनिषत्प्रतिपाद्य दिव्यमंगलविग्रह को मैं कैसे भूलूंगा? नित्यसूरियों के अनुभव करने योग्य अपने दिव्यमंगल विग्रह को मेरा भी अनुभाव्य बनानेवाले परमकृपालु को मैं कैसे भूल सकूंगा? भुलानेवाले किसी हेतु के अभाव में मैं भगवान को कैसे भूलूं? ....(१०)

(गाथा.) मरप्पुम् आनमुम् नानोन्नुणर्न्दिलन् * मरक्कु मेन्नु शेन्दामरै क्कण्णोडु *
मरप्पर वेन्नुळ्ळे मन्निनान् तन्नै * मरप्पनो विनि यानेन् मणियैये ॥ १० ॥

(सं.) विस्मरणं वा स्मरणं वा न तावन्मदधीनम् । कदाचिदहं विस्मरेयमिति मन्यमानस्स भगवान् स्वकीयसरसिजसदृशविलोचनविकासप्रपञ्चनपूर्वकं ममैव हृदि नित्यप्रतिष्ठितो विराजते । तादृशं मणिसवर्ण मच्युतमहं न कदाचिदपि विस्मर्तुं प्रभवामि ॥

जगति कर्तुमशक्यानामपि कृत्यानां कथञ्चिन्महता प्रयासेन करणं संदृश्यते ननु; तथा मुनिवर! तत्रभवनाऽपि परमसुखोदर्कं तद्विस्मरणं कथञ्चिदपि वा कर्तव्यमेवेति कथयतः प्रति कथ्यते

गाथैषा ॥ सर्वथाऽप्यसंभवि तद्विस्मरणमिति निगद्यते। * मत्तस्स्मृतिर्ज्ञानमपोहनं चेति स्वयं गायति भगवान्। यदि स्मरणं चेतनाधीनं स्यात्तर्हि विस्मरणमपि तदधीनं भविष्णु। सर्वथाऽप्यचेतनकल्पोऽहं स्मरणस्येव विस्मरणस्यापि नाधिकारीति प्रामाणिकं प्रतिपाद्यतेऽत्र। स परमकृपालुः स्वयमेव स्वस्मरणयोग्यतां मय्यनुगृहीतवान्; विस्मरणस्य जनिधर्मधर्मत्वात् कदाचित्तदुद्भवेदपीति स्वयमाशङ्क्य कृषीवलो यथा स्वकृतकृषिशैथिल्यानुदयाय सततं कृषिभूमौ जागर्ति, तथा भगवानपि सन्ततं स्वकीयनयनकमलसुषमासंदर्शनेन स्वस्य स्मरणमेव पुष्णाति मम हृदि। तत्कटाक्षवीक्षापात्रभावात्पूर्वं तं विस्मृतवानप्यहमितः परं नैव मनागपि विस्मर्तुं शक्नोमि भोः॥ (१०)

—* दसवीं गाथा—मरप्पुम् ज्ञानमुम् नानोन्रुणर्न्दिलन् *—

(हिंदी.) भूलना अथवा याद रखना, यह कोई मेरे हाथ में नहीं। यों मानते हुए कि "कदाचित् यह मुझको भूलेगा भी," वे भगवान अपने कमल सदृश नयन का सौंदर्य दिखाते हुए मेरे हृदय में सुदृढ प्रतिष्ठित हो गये। ऐसे मणिसदृश उनको मैं अब कैसे भूल सकूंगा!

किसीने आळ्वार से कहा कि, "अशक्य कार्य को भी, आवश्यक होने पर, प्रयत्न पूर्वक करना ही पडता है। इस न्याय से, हे मुनिवर! अपको भी प्रयत्न करके किसी तरह भगवान को भूलना ही चाहिए;" प्रकृत गाथा में इसका यह प्रामाणिक प्रत्युत्तर दिया जाता है कि भगवान को भूलना मेरे लिए सर्वथा अशक्य है। स्वयं गीताचार्यने गाया कि "मत्तः स्मृतिर्ज्ञानमपोहनं च" (अर्थात् स्मरण, ज्ञान और विस्मरण मेरे अधीन हैं)। यदि याद करना मेरा अधीन होता, तो भूलना भी मेरा अधीन होता। परंतु सर्वथा अचेतन-सा रहनेवाला मैं स्मरण करने का भी अधिकारी नहीं, भूलने का भी अधिकारी नहीं। परम कृपावान भगवान ने ही मुझे अपना स्मरण करने की योग्यता दी; और यों सोच कर कि "भूल जाना मानव का स्वभाव है, अतः आळ्वार भी कदाचित् मुझको भूल जाते होंगे," जैसे किसान अपने क्षेत्रस्थ सस्य की रक्षा करने के लिए उसके पास ही निवास करता, इसी प्रकार वे मेरे हृदय में ही विराजकर मुझे अपने कमलसदृशनेत्रों की शोभा दिखाते हुए सदा अपनी याद ही दिला रहे हैं। उनके कृपाकटाक्ष का पात्र होने के पहले, (अर्थात् अबतक के अनादि काल में) मैं उनको जैसे भूल गया था, वैसे अबसे नहीं कर सकूंगा; अर्थात् पूर्वकाल में उनका स्मरण करना अशक्य था; अब तो भूलना अशक्य बना है॥(१०)

(गाथा.) मणियै वानवर् कण्णनै तन्नदोरणियै * तेन्कुरुगूर् शठकोपन् * शोल्
पणिशै यायिरत्तुळ् इवै पत्तुडन् * तणिविलर् कर्प्परेल् कल्वि वायुमे॥ ११॥

(सं.) नित्योज्ज्वलमणिनिभम् नित्यसूरिनिर्वाहकम् अलङ्करणैरनपेक्ष्येण स्वयमलङ्काररूपं भगवन्तमुद्दिश्य श्रीकुरुकापुरीनाथेन श्रीशठकोपमुनिवरेण वाचिककैङ्कर्यरूपतया विज्ञापिते सहस्रे दशकमिदम् अपर्याप्त्या सह ये कीर्तयन्ति ते ज्ञानफलभाजो भवितार इति फलकीर्तनेन समापितमिदं दशकम्॥

भगवान् कृष्णो नीलमणिनाम्नैव पप्रथे। अधुनाऽपि मथुरावृन्दावनप्रान्ते भक्तजनसन्ततौ नीलमणि-नामव्यपदेशश्चिरन्तनोऽनुवर्तते। दक्षिणजनपदेषु मणिनामधारिण स्सुब्रह्मण्यशर्माणमात्मानं कथयन्ति। सत्यमुत्तर भारत एव मणिर्नीलमणिरिति च श्रीकृष्णनामधारणेन बहवो ऽन्यजन्मानो भवन्ति। श्रीकृष्णस्य मणिसाम्यं न केवलं वर्णमात्रतः, स्वभावतश्चेति मनागिह विवृणुमः। मणिः रत्नं चेति पर्यायः। ततश्च रत्नसाम्यं भगवति चतुर्दशभिः प्रकारैर्निरूप्यते।

(१) लोके रत्नं तावत् स्वात्मानं लब्धुकामं लब्धवन्तं च जनं नक्तंदिवं निद्रादरिद्रमाकलयति। रत्नं हि नाम अत्युत्तममनर्घं हि वस्तु। तस्य आर्जनकाले तदेकवैयग्र्येण निर्निद्रता भवति जनानाम्। आर्जनानन्तरमपि आपायातिशङ्कया संरक्षणवैयग्र्येण निर्निद्रता भवति। एवमेव भगवदार्जनपरा मुमुक्षवः संसिद्धभगवदार्जना मुक्ता नित्याश्च सततं वीतनिद्रा एव भवन्ति। मुमुक्षवो हि न क्षणमात्रमपि निद्रावशा भवेयुः। * या निशा सर्वभूतानां तस्यां जागर्ति संयमी * इति खलु गीताचार्योऽपि गायतिस्म। मुक्तानां नित्यानां च निद्राविरहं प्रति किमु वक्तव्यम्? * सदा पश्यन्ति सूरयः * * तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते * इत्येवं जाग्रति चोपनिषदः। (२) रत्नं हि अनर्घं सदपि चेलाञ्चले संग्रथ्य अनायासमेव धारयितुं शक्यं विराजते। भगवानपि स्वयमप्रमेयपरत्वशाली सन्नपि * समाहितैस्साधु सनन्दनादिभिस्सुदुर्लभं भक्तजनैरदुर्लभम् * इत्युक्तरीत्या भक्तानामत्यन्तसुलभस्सर्वात्मना विधेयश्च विराजते। परात्परो भगवान् यशोदास्तनन्धयो भूत्वा अक्षतपरत्वोऽपि सन् * दाम्ना चैवोदरे बध्वा प्रत्यबध्नादुलूखले। यदि शक्नोषि गच्छ त्वमतिचञ्चलचेष्टित। इत्युक्त्वाऽथ निजं कर्म सा चकार कुटुम्बिनी * इत्युक्तरीत्या प्रापितोलूखलबन्धोऽपि हि बभौ। तथा च परत्वमिव सौलभ्यमप्यस्तीति रत्नसावर्ण्यं भगवति बोध्यम्। (३) रत्नं हि सागरपर्वतादिषु विराजते। सागरो हि रत्ना-करव्यपदेशभागिति प्रसिद्धम्। तथा पर्वतेऽपि रत्नसद्भावः कविवरप्रबन्धप्रसिद्धः। दिव्यसूरयोऽपि श्रीवेङ्कटाद्रि-वर्णनप्रकरणे तत्र रत्नसत्तां प्रदर्शयन्ति। एवं भगवानपि क्षीरसागरे वेङ्कटाचलवनाचलसिंहाचलादिपर्वतेषु च विराजते। तथा च सागरमहीधरनिलयत्वेन सावर्ण्यं वेदितव्यम्। (४) रत्नं तावत् स्वस्वामिनं जनं भृशमवलिप्तं तनोति। रत्नवन्तो हि महाधनिकाः; धनिकानामवलेपस्य सहजत्वं लोकदृष्टम्। एवम्, भगवन्तं ये स्वहस्त-स्थितं सर्वथा स्ववशंवदमाकलयन्ति ते धनाढ्येभ्यो जनेभ्योऽप्यतिशयितमवलेपमात्मनि दधते। नैषोऽवलेपो हेयः; भगवद्वशीकरणवैचक्षण्यप्रयुक्तोऽयमहङ्कारः सात्विकाहङ्कारव्यपदेशमाप्नुरः। भगवान् शठकोपमुनीन्द्रस्सहस्रगीत्यां षष्ठशतकीय चतुर्थदशके एकैकस्यामपि गाथायाम् अप्रमेयावलेपभरितत्वं स्वस्य प्रकाशयतीति द्रष्टव्यम्। * पन्नगाशनमाकाशे पतन्तं पक्षिसेवितम्। वैनतेयमहं शक्तः परिगन्तुं सहस्रशः॥ * इति समयविशेषे मारुते-रवलेपोक्तिरिव तदेतदपि नैव दुष्यति। तथाच अवलेपहेतुत्वे साधर्म्यं निर्व्यूढं भवति। (५) रत्नं तावत् स्वरक्षकं जनं सर्वैरपि जनैरनुवर्तनीयं करोति। महाधनिकान् बहवोऽनुवर्तन्त इति हि पश्यामः। एवं भगवानपि स्वरक्षकान् महामतीन् प्राज्ञैरशेषैरनुवर्तनीयान् करोति। * तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ * इति गीताचार्यवचनतोऽपि सिद्धमिदम्। * पराशरं मुनिवरं कृतपौर्वाह्णिक-क्रियम्। मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च॥ * इत्यादिप्रमाणानुगृहीतेनानुष्ठानेनापि संसिद्धम्। (६) रत्नं हि क्रयविक्रयावसरे मध्ये कस्यचन पुरुषस्य द्वारीकरणमपेक्षते। रत्नविक्रेतृपुरुषसकाशात् साक्षादेव रत्नक्रेतारो

जना विरलाः । सद्वारकक्रयणमेव भूयिष्ठम् । एवं भगवानपि घटकद्वारैव प्रपित्सूनां प्राप्यो भवति । श्रीरामचन्द्र-प्रपित्सया लङ्कानगराद्दुत्पतितो विभीषणः साक्षादेव स्वयं रामचन्द्रं प्रपत्तुं प्रभवन्नपि सन् तां पद्धतिमपहाय * निवेदयत मां क्षिप्रं विभीषणमुपस्थितम् । सर्वलोकशरण्याय राघवाय महात्मने ॥ * इति सुग्रीवादिवानरवीर-पुरस्कारपूर्वकं हि प्रपेदे । तथाच घटकसापेक्षत्वे साम्यं वेदितव्यम् । (७) रत्नं तावदाश्रयातिशयाधीन-स्वातिशयं भवति । स्वस्य आश्रयभूतं वस्तु क्षुद्रं चेत् तदा स्वस्य माननीयता क्षीयते । स्वाश्रयवस्तु गरिष्ठं चेत्तदा स्वस्य माननीयता विजृम्भत इति पश्यामो जगति । [अत्र आश्रयशब्देन रत्नधारकव्यक्तिविशेषो ग्रहीतव्यः ; पुरुषयोषिदादिरूपव्यक्तयो वा भवन्तु, ताम्रपित्तलरजतसुवर्णादि वा भवतु ।] एवं भगवानपि आश्रय-गौरवेण स्वात्मनो गौरवमतिशयितं बिभर्ति । श्रीपराङ्कुशपरकालादिदिव्यसूरिसमुद्गीतदिव्यदेशरूपेषु आश्रयविशे-षेषु हि भगवतो गौरवातिशयमनुभवामः । (८) रत्नं सर्वदा प्रभाविशिष्टमेव स्यात् ; प्रभया विहीनत्वं तु तस्य न कदाऽपि भवति । पङ्कमृत्तिकादिमग्नत्वावसरेष्वपि प्रभाया उद्भूतत्वाभाव एव केवलम् ; न तु प्रच्युतिः । एवम् * अनन्या राघवेणाहं भास्करेण प्रभा यथा * * अनन्या हि मया सीता भास्करेण प्रभा यथा * इत्यादिप्रमाणप्रतिपन्नप्रभात्ववत्या देव्या सततसंश्लिष्ट एव भगवान् । रामस्य सीताविश्लेषस्समजनीति चरित्रसद्भावेपि, नारायणतत्वं हि नित्यं श्रीसंश्लिष्टमेव । वामनावतारे ब्रह्मचर्याश्रममुररीकुर्वन्नपि भगवान् श्रीविशिष्ट एवासीदिति पुराणेषु पठामः । * कृष्णाजिनेन संवृण्वन् वामनो वक्षसि श्रियम् * इति ह्याहुर्महर्षयः । वेदान्ताचार्या अपि देहलीशस्तुतौ * भिक्षोचितं प्रकटयन् प्रथमाश्रमत्वं कृष्णाजिनं यदनिकां कृतवान् प्रियायाः । व्यक्ताकृतेस्तव समीक्ष्य भुजान्तरे तां त्वामेव गोपनगरीश । जना विदुस्त्वाम् । * इत्यनेन श्लोकरत्नेनामुमर्थं व्यवृण्वन् । तथा च अनारतप्रभाविशिष्टत्वेन रत्नसाधर्म्यं निर्व्यूढम् । (९) रत्नं तावत् प्रभयैव गौरवमश्नुते ; अतिशयितप्रभाशालिनो रत्नस्यैव हि अतिशयितप्रभावशालिता प्रथते । एवं भगवानपि प्रभारूपया श्रीमहालक्ष्म्यैव प्रभावातिशयशाली भवति । * श्रद्धयाऽदेवो देवत्वमश्नुत । * इति वेदपुरुष आम्नासीत् । * अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा * इति भगवान् वाल्मीकिर्महर्षिर्मारीचमुखतः प्राचिख्यपत् । श्रीपराशरभट्टार्याश्च श्रीगुणरत्नकोशे * वेदान्तास्तत्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्तीति, * अपाङ्गा भूयांसो यदुपरि परं ब्रह्म तदभूदिति चानुजगृहुः । ननु यदि भगवतः प्रभावो लक्ष्मीयोगाधीनः तर्हि तस्य स्वाभाविकत्वं भूरितरप्रमाणप्रति-पन्नं भज्येतेति चेन्न ; * स्वया दीप्त्या रत्नं भवदपि महार्घं न वियुतं न कुण्ठस्वातन्त्र्यं भवति च न चान्या-हितगुणम् * इत्यनया भट्टपाददिव्यसूक्त्या वस्तुस्थितेः प्रकाशितत्वात् । (१०) रत्नं हि विधिवशात् स्वात्मनः प्रच्युतिं प्राप्तवन्तं जनं दुस्सहदुःखभूम्ना आक्रन्दनपरं करोति । प्रच्युतरत्नः पुमान् आक्रन्दनात् आक्रोशनात् विलपनाच्च विना किमन्यत्कर्तुं प्रभवति । एवं भगवतः प्रच्युतोऽपि जनः आक्रन्दन्नेव कालं क्षिपति । प्रच्युत-रामरत्नो भरतः * विललाप सभामध्ये जगर्हे च पुरोहितम् * इत्युक्तरीत्या हि विललाप । दशरथादयोऽपि हि तथा । * एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते । दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं नृणाम् ॥ * इति हि महर्षयोऽप्याहुः । (११) रत्नं तावन्न सामान्यपुरुषसुलभं भवति ; अपि तु भाग्याधिकैकभोग्यं भविष्णु । एवं भगवानपि * मानं प्रदीपमिव कारुणिको ददाति । तेनावलोक्य कृतिनः परिभुञ्जते तम् * इति भट्टपादोक्त-रीत्या विलक्षणभाग्यभाजामेव भोग्यो भवति । (१२) रत्नं तावत् रत्नाकरे सागरे कदाचित् धीवरेणापि लभ्यते ; स तु तन्महिमानमजानन् अल्पमूल्यतो विक्रीणाति ; तदेव रत्नं वणिजो हस्तगतं सत् यथावस्थित-

मूल्यतो विक्रीयते; तदेव महाराजहस्तगतं सत् अल्पानल्पमूल्यतो विक्रयणकथामन्तरेण स्वयमुपभोगाय निधीयते तेन। एवं भगवानपि अल्पजनैः क्षुद्रफलप्रेप्सया प्रार्थ्यते; उत्तमैर्महात्मभिः मोक्षाख्यसमुत्तुङ्गवस्तुप्रेप्सया प्रार्थ्यते। उत्तमोत्तमैस्तु उपायत्वानुसन्धानगन्धमन्तरेण स्वयंपुरुषार्थतया परमभोग्यतयाऽनुभूयते। (१३) रत्नं पङ्किलप्रदेशेषु पतितं सत् अर्वाग्दर्शिभिः पामरैर्निहीनवस्तुतया गण्यते; तदेव रत्नतत्त्वविद्भिर्महद्भिर्यथायथमभिमन्यते। एवं भगवानपि पङ्किलप्रदेशसधर्मिणि प्राकृतमण्डले रामकृष्णादिरूपेणावतरन् * अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् * न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः। माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः॥ * इति स्वेनैव सनिर्वेदमुक्तरीत्या प्राकृतैर्मूढैरवज्ञायते; तत्त्वदर्शिभिर्महाज्ञानिभिस्तु * इङ्गितं निमिषितं च तावकं रम्यमद्भुतमतिप्रियङ्करम् * इत्युक्तरीत्या विद्वद्भिर्भूयते। (१४) कृत्रिमोऽश्माऽपि रत्ननामधारी सन्नपि तत्त्वानभिज्ञानामेव भ्रान्त्यास्पदं भवति; तत्त्वविद्भिस्तु तिरस्क्रियत एव [क्षिप्यते सुदूरतः]; एवं देवतान्तराण्यपि भगवच्छब्दारोपसहानि सन्त्यपि रजस्तमोगुणप्रचुराणां पामराणामेव भ्रमास्पदानि भवन्ति; शुद्धसात्त्विका विलक्षणशेमुषीका महान्तस्तु तत्र विमुखा एव भवन्ति। तथाच अकृत्रिमत्वाकारेण महाजनोपभोग्यत्वे रत्नसाधर्म्यं निर्व्यूढं भवति। एवमेवं रत्नसादृश्यनिर्वाहप्रकारा अन्येऽपि बहव उन्नेयाः॥ .... *

[अलङ्करणनैरपेक्ष्येण स्वयमलङ्काररूपम्.] श्रीमद्वनाद्रिनिलयं सुन्दरबाहुं भगवन्तं स्तुवन् श्रीकूरनाथगुरुवर आह * किं नु स्वयं स्वात्मविभूषणं भवन्नसावलङ्कार इतीरितो जनैः * इति। श्री भट्टनाथसूक्ते सुन्दरभुजस्य भगवतः अलङ्कार इत्येव (४-३-५) शुभनाम निर्दिष्टन्; * आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः * इत्यादिदिशा स्वस्य स्वयमेवालङ्कार इति हेतुना तदिति उपात्तकूरनाथगुरुवरसूक्तिहृदयम्। अर्चामूर्तिषु नानाविधैराभरणैरलङ्कारविधानं तु आभरणानामाभरणत्वसम्पादनार्थमेव; नतु भगवतोऽपूर्वशोभाप्रजननायेति तत्त्वम्।

दशकमिदमधीयाना ज्ञानफलभाजो भवेयुरिति फलकीर्तनम्; * संज्ञायते येन तदस्तदोषं तत् ज्ञानम् अज्ञानमतोऽन्यदुक्तम् * सा विद्या या विमुक्तये, विद्याऽन्या शिल्पनैपुणम् * इत्याद्युक्तरीत्या भगवदवगाहि ज्ञानमेव ज्ञानशब्दाभिलप्यम्; तस्य च प्रधानं फलं तत्कैङ्कर्यमेव; तथाच 'फलेऽभिज्ञाना भवितार' इत्युक्तिः भगवत्कैङ्कर्यपरता भवितार इत्युक्तिपर्याय इत्याचार्याः॥ .... (११)

—* द्रमिडोपनिषत्संगतिः *—

इत्थं श्रियःपतिकृतस्वसमस्तदेहसंश्लेषलक्षणफलस्य सुदुर्लभस्य।
भक्त्यादिवत् स्वगणनेऽपि च तत्प्रसादान्निर्हेतुकत्वमवददृशमे शठारिः॥

॥ सहस्रगीति - प्रथम शतकस्य - सारार्थसंग्रहसूची ॥

दशभिर्दशकैर्भरितं हि शतकम्। तत्र (१) प्रथमदशके श्रुतिसिद्धं भगवत्पारम्य मनुभूतम्। (२) द्वितीयदशके-स्वानुभवसहयोगिसज्जनसंपिपादयिषया परोपदेशे प्रवृत्तेन मुनिवरेण संसारिभ्यस्त्याज्योपादेय-

विवेचनपूर्वकं भक्त्युपदेशः कृतः। (३) तृतीयदशके-भगवान् मुख्यवतीर्य सुलभो भवति, मुक्तिप्रदश्च भवतीत्यभ्यधायि। (४) चतुर्थदशके दूतसंदेशप्रापणव्यवसायापदेशेन भगवतोऽपराधसहत्वामिधः क्षमागुणोऽन्वभावि। (५) पञ्चमदशके स्वनैच्यानुसन्धानेन भगवतस्सकाशात् स्वस्य दूरतोऽपसर्पणम्, अथ भगवता सदुपायेन स्ववशीकरणं च निबध्य 'महतो मन्दैस्सह नीरन्ध्रेण संश्लेषः' इति लक्षितं सौशील्यमन्वभूयत। (६) षष्ठदशके—देवतान्तरवद्भगवान् दुराराधो न, अपितु पत्रपुष्पफलतोयार्पणेन स्वाराध इत्युपावर्ण्यत। (७) सप्तमदशके भगवत्समाश्रयणं परममोग्यमिति तन्माधुर्यमतिमात्रमनुभूयतेस्म। (८) अष्टमदशके-भगवान् कुटिलवृत्तिषु संसारिष्वपि स्वयमकुटिल एव संश्लिष्यतीति करणत्रयसारूप्यात्मकमार्जवं तस्यानुबभूवे। (९) नवमदशके स भगवान् परमोत्तुङ्गानपि स्वभोगान् क्रमशः प्रदिशतीति तदीयं सात्म्यभोगप्रदत्वमनुभूतम्। (१०) चरमदशके भगवन्निर्हेतुककृपाप्रभावः प्रत्यपादि इति सर्वं समञ्जसम्॥ .... *

इति श्रीकाञ्चीप्रतिवादिभयङ्कराण्णङ्गराचार्यकृतिषु सहस्रगीतिव्याख्यायाम्
प्रथमशतकं परिसमाप्तम्॥

—* ग्यारहवीं गाथा—मणियै वानवर् कण्णनै *—

(हिंदी) नित्योज्वल मणिसदृश, नित्यसूरियों के नेता और दूसरे आभूषण की अपेक्षा किये विना-स्वयं आभरणरूपी भगवान को लक्ष्य कर श्री कुरुकापुरी के नाथ श्रीशठकोप सूरी से विज्ञापित, वाचिक कैंकर्यरूप इस सहस्र के अंतर्गत इस दशक का, पर्याप्ति पाये विना, जो पाठ करेंगे वे ज्ञानका फल पायेंगे। (इस फलश्रुति के साथ यह दशक समाप्त किया गया)॥

भगवान श्रीकृष्ण नीलमणि नाम से ही प्रसिद्ध थे। प्राचीन काल से ही मथुरा प्रांत में भक्तलोगों में नीलमणि नाम रखने की प्रथा चलकर आयी है, जो अभी चालू है। दक्षिणदेश की प्रथा इस विषय में अलग है। यहां के मणि पुकारे जानेवाले लोग अपना नाम 'सुब्रह्मण्य' बताते हैं। (सुब्रमणि का ठुंका रूप मणि है।) सत्य, उत्तर भारत में ही कितने लोग श्रीकृष्ण के नामतया मणि, नीलमणि इत्यादि नाम धरते हुए धन्य होते हैं। अस्तु। श्रीकृष्ण को मणि-सदृश कहने का कारण केवल उनका रंग नहीं, किंतु उनका स्वभाव भी है। अब इस अर्थ का थोडा विवरण करेंगे। मणि व रत्न पर्याय हैं। (१) रत्न कमाना चाहनेवाला और पानेवाला जन निद्रा नहीं कर सकता; क्योंकि रत्न तो बहुत कीमतवाली वस्तु है, जिसे कमाने के लिए हमें उसी पर ध्यान रखकर आहार व निद्रा भी छोडकर प्रयत्न करना पडता है; रत्न कमाने पर तो उसकी रक्षा करने के चिंतन व प्रयत्न में मग्न होते हुए नींद नहीं ले सकता। एवं भगवान को प्राप्त करना चाहनेवाला मुमुक्षु एवं उन्हें प्राप्त किया हुआ मुक्त पुरुष, दोनों निद्राविरहित होते हैं। सदा भगवान की चिंता में और उनके अलाभप्रयुक्त विरह दुःख में मग्न मुमुक्षु कैसे निद्रा कर सकता है? स्वयं भगवान ने गाया "या निशा सर्वभूतानां तस्यां जागर्ति संयमी।" मुक्त व नित्यों के निद्राविरह के प्रति तो

कुछ कहने की आवश्यकता नहीं रहती; क्योंकि ज्ञानसंकोच के अभाव से, निद्रा की प्रसक्ति से भी विरहित परमपद में वे नित्य भगवदनुभव करते रहते हैं। उपनिषद्ने भी कहा—"सदा पश्यन्ति" (नित्य व मुक्त भगवान के सदादर्शन करते हैं), "तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते" (श्रेष्ठ ज्ञानवाले परमपदनिवासी जन सदा जागृत रहकर भगवान की स्तुति करते विराजते हैं)। (२) बहुमूल्यवान होता हुआ भी रत्न इतना सुलभ भी रहता है कि हम उसे अपने वस्त्र के पल्ले में बांध कर रख लेते हैं। परात्पर होते हुवे ही भगवान भी भक्तों को अत्यंत सुलभ होते हैं। यशोदाजी ने श्रीकृष्ण भगवान को ओखली में बांध लिया न? अतः समझना चाहिए कि परत्व व सौलभ्य नामक परस्पर विरुद्ध गुणों का आश्रय होना रत्न व भगवान का स्वभाव है। (३) रत्न, सागर व पर्वतों में मिलता है। सागर का नाम ही रत्नाकर है। कवियों का कहना है कि पर्वतों में भी वह मिलेगा। दिव्यप्रबंधों में श्रीवेंकटाद्रि में रत्नों की सत्ता बतायी गयी है। यह भी अर्थ प्रसिद्ध है कि भगवान क्षीरसागर तथा श्रीवेंकटाचल, वनगिरि, सिंहाचल, यादवाचल आदि पर्वतों में पाये जाते हैं। (४) रत्न का मालिक धनिक होने से गर्वी बनता है। एवं भगवान जिनके हस्तस्थित सर्वथा विधेय बन जायंगे, ऐसे परमभक्त भी गर्वी होते हैं। दोनों में इतना अंतर है कि धनिकों का गर्व, दूसरों का तिरस्कार करने का कारण होने से बडा दोष माना जाता है; भक्तों का गर्व तो भगवान की भक्तपराधीनता का सूचक होकर सात्त्विकाहंकारशब्दवाच्य गुण होता है। श्रीशठकोपसूरी भी इसी सहस्रगीति के छठे शतक के चौथे दशक की एकैक गाथा में भी अपने सीमातीत गर्व का वर्णन करनेवाले हैं। समुद्र लांघने की तैयारी करते हुए हनुमानजी ने भी (सुंदरकांड में) अपने दुःखी मित्रों को धीरज देते हुए कहा कि, "मैं आकाशमें उडनेवाले गरुडजी के साथ साथ भी जा सकता हूं," इत्यादि। उस समय ऐसे गर्व की बहुत आवश्यकता थी। एवं भक्तों का गर्व भी उपयुक्त व आवश्यक होता है। (५) जिसके पास रत्न हो, उसकी बहुत-से लोग सेवा करना चाहते हैं। एवं जिनके पास भगवान हो, ऐसे ज्ञानियों से उपदेश पाने के लिए, बहुत जन उनकी सेवा करना चाहते हैं। यथा गीताचार्य ने गाया "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया" (ज्ञानियों का प्रणिपात, परिप्रश्न व सेवन कर वह ज्ञान सीखो।) "पराशरं मुनिवरम्.........मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च॥" (पराशर मुनि को साष्टांग प्रणाम कर मैत्रेयं ने उनसे पूछा) इत्यादि भी इस बातके प्रमाण हैं। (५) दलाल के द्वारा ही लोग रत्न बेचते अथवा खरीदते हैं; साक्षात् सेठके पास से ही रत्न लेनेवाले बहुत कम हैं। एवं भक्तजन, आचार्य इत्यादि पुरुषकार के द्वारा ही भगवान को प्राप्त करते हैं; साक्षात उनके पास जाने पर वे कदाचित् मिलें या न भी मिलें। श्रीरामचंद्रजी से मिलने के लिए लंका छोडकर अति शीघ्र आये हुए विभीषणजी साक्षात् उनकी शरण में नहीं गये; किंतु "निवेदयत माम्.........सर्वलोकशरण्याय राघवाय महात्मने॥" (सर्वलोकशरण्य महात्मा श्रीरामचंद्रजी से विनती करिए कि विभीषण आया है।) कहते हुए उन्होंने सुग्रीवादि वानरवीरों को पुरुषकार बनाना चाहा। (७) रत्न का बडप्पन उसके आश्रय का अधीन होता है; अर्थात् श्रेष्ठ व्यक्ति से धारण किये जाने पर, एवं श्रेष्ठ धातु पर जडाये जाने पर रत्न की विशेष शोभा होती है; अन्यथा नहीं। एवं आश्रयगौरव से भगवान को भी गौरव मिलता है। यथा श्रीपरांकुश परकालादि दिव्यसूरियों की प्रशंसा के पात्र दिव्यदेशों में विराजने पर भगवान बहुत गौरव पाते हैं। (८) रत्न,

सदा प्रभायुत ही होगा, न तु कभी प्रभाविरहित रहेगा। कीचड़ में मग्न होनेपर भी उसका प्रकाश नष्ट नहीं होता, परंतु गुप्त रह जाता है। एवं भगवान भी सर्वदा प्रभारूपिणी लक्ष्मीजी से युक्त ही रहते हैं, नतु कभी उनसे वियुक्त। इस विषय में दिव्यदंपतियों के श्रीमुख की वाणी ही मुख्य प्रमाण है। "अनन्या राघवेणाहं भास्करेण प्रभा यथा" (यथा सूर्य की प्रभा उससे अलग न रहेगी, इसी प्रकार, मैं भी श्रीराघव से अलग नहीं रह सकूँगी।) यह सीताजी का वचन है। श्रीरामचंद्रजी का यह वचन है—"अनन्या हि मया सीता भास्करेण प्रभा यथा।" अतः समझ लेना चाहिए कि सीतावियोग-प्रकरण में भी भगवत्तत्व लक्ष्मीसनाथ ही था। अत एव आचार्य कहते हैं कि वामनब्रह्मचारी के अवतार में भगवान के श्रीवक्षपर लक्ष्मीजी विराजमान थीं, जिन्हें उन्होंने कृष्णाजिन से ढांक लिया। इस विषय का यह आर्षवचन प्रमाण है—"कृष्णाजिनेन संवृण्वन् वामनो वक्षसि श्रियम्" (श्री वामन भगवान वक्षस्थ्ल गत लक्ष्मीजी को कृष्णाजिन से ढांक कर पधारे)।

(९) रत्न का वैभव उसकी प्रभा का अधीन है; अर्थात् रत्न की कीमत उतनी बढेगी जितनी उसकी प्रभा उज्ज्वल हो। एवं भगवान का गौरव भी 'प्रभा' कहलानेवाली लक्ष्मीजी का अधीन है; अर्थात् लक्ष्मीजी से ही भगवान वैभव पाते हैं। वेदपुरुष ने कहा "श्रद्धयाऽदेवो देवत्वमश्नुते।" (अदेव रहे हुए भगवान लक्ष्मीजी से देवत्व प्राप्त करते हैं; श्रद्धा - लक्ष्मीजी का वैदिकनाम है।) वाल्मीकि ने भी मारीच के मुख से घोषित करवाया कि, "अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा।" (सीतापति नाप करने अशक्य महान तेज हैं।) श्रीपराशरभट्टरस्वामीजी ने कहा—"वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति"; (उपनिषद भी भगवान के श्रीवक्षपर जिन लक्ष्मीजी का पादचिह्न देखकर तत्त्वचिंता का पार करते हैं; अर्थात् यह निर्णय कर लेते हैं कि लक्ष्मीपादचिह्न का धारण करनेवाले नारायण ही परदेवता हैं; और "अपाङ्गा भूयांसो यदुपरि परं ब्रह्म तदभूत्।" (जिन पर लक्ष्मीजी का परिपूर्ण कटाक्ष पडा, वे परब्रह्म हुए।) इस पर किसी की शंका होगी कि यदि भगवान का वैभव लक्ष्मीजी का अधीन हो, तो वह पराधीन बन जायगा; फिर उसे अनन्याधीन बतानेवाले शास्त्र कैसे संगत होंगे। इसका प्रत्युत्तर भट्टर् स्वामीजी से ही दिया गया कि, "स्वया दीप्त्या रत्नं भवदपि महार्घं न विगुणं न कुण्ठस्वातन्त्र्यं भवति च नचान्याहितगुणम्।" यह भाव है—जैसे अपनी ही प्रभा से गौरव पानेवाला रत्न अन्याधीनमहिमवाला अथवा अस्वतंत्र नहीं कहलावेगा, (क्योंकि प्रभा तो उस रत्न का ही एक अंश है) इसी प्रकार अपने ही अंश लक्ष्मीजी से वैभव पानेवाले भगवान को भी कोई न्यूनता नहीं होगी। (१०) दैवयोग से कदाचित् रत्न खोने वाला मानव दुस्सह दुःख पाता हुआ चिल्लाता है; बेचारा वह और क्या कर सकेगा? एवं भगवान से विरहित होने पर भक्तजन भी रो रोते हैं। श्रीरामायण में दशरथ, सीता आदियों का प्रलाप प्रसिद्ध है। भरतजी ने भी "विललाप सभामध्ये जगर्हे च पुरोहितम्" (सभामध्य में प्रलाप किया और अपने पुरोहित वसिष्ठ जी की निंदा की)। ऋषियों का भी वचन है—"एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते। दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं नृणाम्॥" (यदि भगवद्भजन के विना, एक ही मुहूर्त क्यों न हो, व्यतीत हो, तो मानव को ऐसे प्रलाप करना पडता है जैसे चोरों से लूटे जानेवाला करेगा। (११) रत्न सबको नहीं, किंतु किसी भाग्यवान को ही मिलेगा; एवं

भगवान को पाना भी बड़े भाग्य की बात है। श्री पराशरभट्टर स्वामीजी ने कहा कि, "तेनावलोक्य कृतिनः परिभुञ्जते तम्।" (अर्थात् भाग्यवान जन ही शास्त्रों का अभ्यास कर उनसे ठीक भगवान का ज्ञान व अनुभव प्राप्त कर सकते हैं।) (१२) सागर में कभी मछुए को रत्न मिलता है। उसके यथार्थ मौल्य से अपरिचित होने के कारण वह उसे अल्पमूल्य पर बेच डालता है; वह रत्न जौहरी को मिले तो, वह उसे ठीक दाम पर बेचता है, और राजा महाराजा इत्यादि तो रत्न बेचने का विचार नहीं करते, किंतु उसे आभूषण बनाकर स्वयं भरते हैं। इसी प्रकार भगवान के भी तीन प्रकार के उपयोग होते हैं। अत्यल्प जन उनके प्रत्यक्षदर्शन पाकर भी उनसे पुत्र पशवन्नादि अल्प फल पाकर निकल जाते हैं; विशेषज्ञ उनसे अतिश्रेष्ठफल मोक्ष माँगते हैं; और उत्तमोत्तम परमभक्त तो उनसे कुछ पाने की इच्छा न करते हुए स्वयं पुरुषार्थ होने की भावना से सदा उन्हींका अनुभव करते हैं। (१३) कीचड़ में पड़े हुवे रत्न को मूढ़ जन कूड़ाकरकट ही मान लेते हैं; अभिज्ञ जन ही उसे पहचान सकते हैं। एवं कीचड़ के सदृश इस संसारमंडल में अवतीर्ण भगवान को मूर्ख लोग, अपने सदृश प्राकृत मानव ही मानकर उनका तिरस्कार करते हैं। अत एव स्वयं उन्होंने ही सनिर्वेद कहा कि, "अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्," (मूढ़लोग मनुष्यरूप में अवतीर्ण मेरा तिरस्कार करते हैं।) "न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः। माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः॥" (ये चार प्रकार के पापी—मूढ़, नराधम, मायापरवश और आसुरी प्रकृतिवाले मेरा आश्रयण नहीं करते।) परंतु तत्वदर्शी, महाज्ञानी, भक्तश्रेष्ठ तो उन अवतारों के सभी चेष्टितों को, (दूसरों के अभिप्राय से वे चाहे जितने अल्प क्यों न हो!) परमभोग्य मानकर उनका अनुभव करते हैं। (१४) कभी कभी अत्यल्प पत्थर (नकली रत्न) भी रत्न का नाम अपना कर मूढ़ जनता को भ्रम में डाल देता है; अर्थात् मूर्ख जन असली रत्न पहिचान नहीं सकते और नकली रत्न को ही असली मान लेते हैं; प्रंतु अभिज्ञ जन उसका आदर नहीं करते। एवं दूसरे कितने ही देव भगवान ईश्वर इत्यादि नाम धरकर, स्वयं परतत्व होने की दावा करते हुवे मूर्ख जनता को भ्रम में डालते हैं। शुद्ध सात्विक विलक्षण ज्ञानेवाले महात्मा तो ऐसे भ्रम से दूर रह जाते हैं। ऐसे अनेक प्रकारों से भगवान का रत्न से साम्य समझा जा सकता है॥

[आभूषण की अपेक्षा किये विना स्वयं आभरणरूपी] इत्यादि। श्री वनाद्रिक्षेत्र में विराजमान सुंदरबाहु भगवान का दूसरा नाम 'अलंकार' (अळगर्) है। श्री भट्टनाथ सूरी ने अपने दिव्यप्रबंध में (श्री भट्टनाथ सूक्त में—४-३-५) इस नाम का उल्लेख किया। श्री कूरेशस्वामीजी ने सुंदरबाहुस्तव में कहा कि "किंतु स्वयं स्वात्मविभूषणं भवन्नसावलंकार इतीरितो जनैः।" (स्वयं अपने आभूषण होने से लोगों से ये अलंकार कहलाते होंगे।) यद्यपि अर्चामूर्तियाँ नानाविध आभूषणों से सजायी जाती हैं। तथापि अभिज्ञों का सिद्धांत है कि इससे आभूषणों की ही शोभा होती है, न तु भगवान की।

इस दशक का फल बताया जाता है—[वे ज्ञानका फल पायेंगे।] "संज्ञायते येन तदस्तदोषं तत् ज्ञानम्" (वही ज्ञान कहलाता है जिससे दोषदूर भगवान समझे जा सकते हैं), "सा विद्या या विमुक्तये" (वही विद्या, माने ज्ञान है, जो मोक्ष का साधन हो) इत्यादि प्रमाणों के अनुसार भगवान को लक्ष्य करनेवाला ज्ञान ही ज्ञान कहलाने योग्य है और उस ज्ञान का मुख्य फल भी भगवान का कैंकर्य

करना ही है। अतः ज्ञानफल पाने का अर्थ यह हुआ कि भगवत्कैंकर्य करने में निरत होना; अर्थात् पूर्ण प्रेम से इस दशक का अध्ययन करनेवाले निरंतर भगवत्कैंकर्य करने में निरत होते हैं—यही आचार्यों का निर्वाह हैं ॥ .... (११)

सहस्रगीति में पहले शतक के सारार्थों की सूची।

एक शतक के दस दशक होते हैं। अब एकैक दशक का भी सारार्थ बतावेंगे।

(१) पहले दशक में भगवान के वेदांतसिद्ध परत्व का अनुभव किया गया।

(२) दूसरे दशक में अपने भगवदनुभव में सहयोग देनेवालों को तैयार करने के उद्देश्य से आळ्वार ने परोपदेश करते हुए, संसारियों को त्याज्योपादेयविवेचन-पूर्वक भक्ति का उपदेश किया।

(३) तीसरे दशक में भगवान अवतार लेने से सुलभ और मोक्षप्रद बताये गये।

(४) चौथे दशक में भगवान को दूत भेजने के बहाने उनके अपराधसहत्वगुण का अनुभव किया गया।

(५) पाँच वें दशक में आळ्वार ने अपनी नीचता का अनुसंधान करते भगवान से दूर हट जाने और फिर भगवत्कृत सदुपायद्वारा अपने वशीकरण का वर्णन कर, भगवान के सौशील्यगुण (महान होते हुए नीचों से मिलने के स्वभाव) का अनुभव किया।

(६) छठे दशक में भगवान स्वाराध बताये गये; अर्थात् यह कहा गया कि दूसरे देवों की भांति भगवान की सेवा करने में कोई विशेष क्लेश उठाने की आवश्यकता नहीं रहती; किंतु पत्र पुष्पादि सुलभ वस्तुओं से वह की जा सकती है।

(७) सातवें दशक में भगवदाश्रयण को अति भोग्य बता कर, उनके अतिमात्र माधुर्य का अनुभव किया गया।

(८) आठवें दशक में भगवान के आर्जवगुण (माने सीधापन, यानी कुटिलबुद्धिवाले संसारियों से भी स्वयं अकुटिल (माने सीधे) होकर मिलने के स्वभाव) का अनुभव किया गया।

(९) नौवें दशक में उनके सात्म्यभोगप्रदत्व (माने श्रेष्ठ भोगों का भी धीरे धीरे प्रदान करने के चातुर्य) का अनुभव किया गया।

(१०) दसवें दशक में निर्हेतुक कृपा का प्रभाव बताया गया ॥

श्रीमद्यादवाद्रि—अकारकनि-सम्पत्कुमाराचार्यविलिखित हिन्दी अनुवाद व टीका समेत

सहस्रगीति में पहला शतक समाप्त हुआ।

॥ आळ्वार तिरुवडिगळे शरणम् ॥

एम्बेरुमानार् तिरुवडिगळे शरणम्—जीयर् तिरुवडिगळे शरणम् ॥

सहस्रगीति (हिंदी) टीका में पहले शतक के अंतर्गत विशेष अर्थों की सूची

(संस्कृत टीका में भी इन्हीं प्रकारणों ये अर्थ वर्णित हैं। यहां पर हिंदी टीका के अनुसार पृष्ठसंख्या दी गयीं हैं)

1. तनियन् नामक मुक्तपद्यों की टीका।
4. श्रीशठकोपसूरी की जीवनी।
6. भूमिका।
9. अवतारिका।
15. भगवान भक्तदुःख की भांति स्वकीयदुःख के भी निवर्तक होते हैं।
19. भगवान वैधर्म्य-दृष्टांत से विरहित हैं।
23. देवतांतर कैसे फल देते हैं?
26. श्रीभाष्यकार और सहस्रगीति।
29. ब्रह्मरुद्रों के काम भगवदधीन हैं।
30. सर्वशून्यवाद व निरीश्वरवाद का खंडन।
33. भगवान सर्वत्र पूर्ण हैं।
35. फलश्रुति व कविनामांकन का फल।
36. आळ्वार के परोपदेश के हेतु।
41. सदसच्छब्दों का अर्थनिर्णय करना।
42. कैवल्य हेय है।
43. भगवान संगस्वभाववाले हैं; मालाकार का वृत्तांत।
44. संबंधज्ञान का फल।
46. कृतकृत्य मृत्युकी प्रतीक्षा करेगा।
47. नारायणशब्दार्थ का विवरण; श्रीकूरेशस्वामीजी का एक ऐतिह्य।
49. भगवान भक्तसुलभ हैं; "विधेयात्मा" का अर्थ।
50-54. सौलभ्यगुण का अनुभव। गोविंदस्वामीजी का ऐतिह्य।
51. भगवान अभक्तों को दुर्लभ हैं; और लक्ष्मीपति हैं।
53. दामोदरबंधनवृत्तांत।
55. अवतार रहस्य; * 'स उ श्रेयान् भवति' इत्यादि श्रुति का अर्थ।
56. मोक्षप्रदान ही भगवान का मुख्य काम है।
57. कोई अवताररहस्य जानता नहीं। भगवान के नामरूपादि को भक्तजन ही जान सकते हैं; नतु अभक्त।
60. त्रिमूर्तिसाम्यविचार।
62. अद्वितीयशब्दार्थ।
63. भगवत्पादवंदन करने से पाप नष्ट होते हैं।
64. लक्ष्मीपुरुषकार की आवश्यकता।
65. ब्रह्मा व रुद्र भगवान के श्रीविग्रह में आश्रित हैं।
66. त्रिपुरदहन का रहस्य।
67. पारिजातापहरण; गरुडगर्वभंग।
68. समुद्रमथनवृत्तांत।
71. आळ्वार की स्त्रीभावना का रहस्य।
73. दूतप्रेषण का भाव; दूत कौन हैं?
77. बकपक्षी से आचार्य का सादृश्य।
81. कोकिल से आचार्य का सादृश्य।
86. चिंतयंती का इतिहास।
87. गृहस्थ-आश्रम की प्रशंसा।
88. हंस व आचार्य; मतिशब्द का अर्थविवरण।
92. क्रौंच का गूढ अर्थ।

98. श्री भट्टर स्वामीजी का प्रवचन; नायक स्वयं अपनी नायिका की विरहावस्था देख सकता है; भक्तों को भगवद्विषयक वैराग्य टिकेगा नहीं।

99. भ्रमर से आचार्य का सादृश्य।

100. गरुडवाहन की विशेषता।

105. शुक से आचार्य का सादृश्य।

106. "शोकविनाशनम्" का अर्थविवरण; भगवान के अपराधसहत्व नामक गुण का वर्णन।

108. प्रदक्षिण-प्रणाम आदि को अपराध बताना।

111. "भरत का व्याधि चातुर्थिक नहीं होगा।"

112. श्रीशैलपूर्णस्वामीजी का ऐतिह्य।

114. सभी प्राकृत पदार्थ भक्त को दुःख भी देते हैं।

115. वायु को दूत बनाने का औचित्य।

117. मन को दूत बनाने का भाव।

122. बृहत्सूक्त से सहस्रगीति की एक विशेषता का वर्णन; शीलगुण का लक्षण व स्वरूप।

123. नैच्यानुसंधान का तात्पर्य।

127. सप्तवृषभमर्दन की कथा।

132. जगत्कारणत्व की श्रेष्ठता।

133. त्रिविक्रमावतार चरित्र का तात्पर्य।

134. भगवान जगत् का त्रिविध कारण हैं।

138. मथुरा व अयोध्या की कुब्जा का वृत्तांत।

139. एक साधु की कथा।

142. "केशव" नाम का निर्वचन; भगवान भक्तों के मन में अपने विषयक प्रेम उत्पन्न करते हैं।

145. भगवद्दास्य ही आत्मा का असाधारण धर्म है; कैवल्य की प्रशंसा।

147. मक्खन चोरी का कारण बताना।

152. ब्रह्मशब्दार्थ-विवरण।

153. भगवान भक्ति से आराध्य हैं।

157. भगवान पक्षपातरहित हैं।

161. रावण का चित्रवध करने का कारण।

162. क्षुद्रविषयसंग छोडकर ही भगवान का आश्रय करना।

163. लक्ष्मीपुरुषकार का वैभव।

167. भगवान स्वयं अपने को भी भोग्य लगते हैं।

170. केवलों की निंदा।

172. भगवान निधि एवं औषधरूपी हैं।

174. भगवान के परमभोग्य व मायाचेष्टितों का वर्णन।

176.180. भगवत्कृत उपकारों का वर्णन।

178. भगवान को भूल जाना अशक्य है।

183. भगवान के साथ संश्लेष व विश्लेष का अर्थ।

186. आर्जवगुण के स्वरूप का वर्णन।

188. परमपद में आर्जव का प्रकाशन।

189. केशिवध।

190. श्रीकृष्ण ने महेंद्र को क्यों दंड नहीं दिया?

192. भगवान भक्त के शेषत्व का अपहरण करते हैं।

194. अवतार-प्रयोजन-निरूपण।

195. भगवान सर्वदा शंखचक्रधारी हैं।

197. "वेदैश्च सर्वैरहमेव वेद्यः" का अर्थविवरण।

200. भगवान जल के सदृश हैं।

203. साम्यभोगप्रदान का विवरण।


208. भगवदवतार का एक विशेष प्रयोजन बताना।

210. भगवद्गुणों का कभी संकोच होता नहीं; पापी को दंड देना भी कृपा का ही काम है।

211. भगवान भक्तों को समस्तविध भोग देते हैं।

213. नीलादेवी और नप्पिन्नैप्पिराट्टी; "भुजैः परम-नारीणाम" का अर्थ-विवरण ।
215. पूतना का उद्धार ।
219. भट्टर स्वामीजी का एक विलक्षण ऐतिह्य ।
221. श्रीतुलसीमाला का अत्यद्भुतवर्णन ।
224. श्रीशठकोपसूरी अतींद्रिय अर्थों के द्रष्टा, ऋषि हैं ।
226. भगवान का कटाक्ष पावन है ।
228. आळ्वार भगवत्पादाकृति का तिलक धरते हैं ।
234. निर्हेतुक भगवत्कृपा का वर्णन ।
238. अस्थाने रक्षा करना ।
240. "एण्णिलुम् वरुम्" (गिनती करने पर भगवान पधारेंगे ।)
244. अव्याजोदारभाव का वर्णन ।
246. आळ्वार का दुःख क्या है?
249. भगवान को भूलना अशक्य है ।
251. स्मरण, विस्मरण इत्यादि भगवदधीन हैं ।
255. भगवान रत्न के सदृश हैं ।
259. प्रथमशतकार्यों का संक्षिप्त वर्णन ।

विशेषार्थसूची समाप्त ॥



1—33 'लिबर्टी' मुद्रणालये मुद्रितः, चेन्नपुरी—१.